न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।



माणिकचन्द-दिगम्बर-जैन-

ग्रन्थमाला ।

१९

मूलाचारः सटीकः ।

(प्रथमो भागः)

माणिकचंद्र-दिगम्बरजैनग्रंथमालाया अष्टादशो ग्रंथः ।

श्रीमद्वट्टेरकाचार्यविरचितो

मूलाचारः ।

(प्रथमभागः)

श्रीवसुनंदिश्रमणविरचितया टीकया संकलितः ।

सोनी-पंडितपन्नालालैस्तथा न्याय-काव्यतीर्थ-

पंडितगजाधरलाल—श्रीलालाभ्यां

सम्पादितः संशोधितश्च ।

प्रकाशिका—

माणिकचंद्र- दिगम्बरजैनग्रंथमालासमिति ।

माघवदि ५ मी श्रीवीरनि० सं० २४४७ ।

प्रथमावृत्तिः] वि० सं० १९७७ [५००

प्रकाशक—
नाथूराम प्रेमी मंत्री,
माणिकचंद्र–दि० जैनग्रंथमालासमिति,
हीराबाग, गिरगांव बम्बई।



मुद्रक—
श्रीलाल जैन काव्यतीर्थ,
जैनसिद्धांतप्रकाशक (पवित्र) प्रेस
नं० ८ महेंद्रबोस लेन,
श्यामबाजार कलकत्ता।

सूचना।

ग्रंथका परिमाण अधिक होनेके कारण इसके दो खंड किये गये हैं। यह प्रथम खंड है इसमें सात अध्याय तक निरूपण है पांच अध्यायोंका दूसरा खंड भी शीघ्र ही प्रकाशित होगा इसके संशोधनादि कार्योंमें यथाशक्ति सावधानी रक्खी गई है परंतु दृष्टिदोष अल्पज्ञता आदि कारणोंसे अशुद्धि रह जानी संभव है। विज्ञजन सुधार कर पढने पढानेकी कृपा करें।

—मंत्री

अधिकारसूची।

	पृष्ठसंख्या
१ मूलगुणाधिकारः	१
२ बृहत्प्रत्याख्यानसंस्तरस्तवाधिकारः	४९
३ संक्षेपप्रत्याख्यानाधिकारः	१००
४ समाचाराधिकारः	१०९
५ पंच चाराधिकारः	१७०
६ पिंडशुद्धि-अधिकारः	२२९
७ षडावश्यकाधिकारः	२९२



नमो वीतरागाय ।

श्रीवट्टकेराचार्यविरचितो

मूलाचारः ।

(श्रीवसुनंदिसिद्धांतचक्रवर्तिविरचितया आचारवृत्त्या सहितः)

मूलगुणाधिकारः ॥ १ ॥

श्रीमच्छुद्धेद्धबोधं सकलगुणनिधिं निष्ठिताशेषकार्यं
वक्तारं सत्प्रवृत्तेर्निहतमतिमलं शक्रसंवंदिताङ्घ्रिम् ।
भर्तारं मुक्तिवध्वा विमलसुखगतेः कारिकायाः समन्ता-
दाचारस्यात्तनीतेः परमजिनकृतेर्नौम्यहं वृत्तिहेतोः ॥ १ ॥

श्रुतस्कन्धाधारभूतपष्ठाद्शपदसहस्रपरिमाणं, मूलगुणप्रत्याख्यान- संस्तर- स्तवाराधना- समयाचार–पंचाचार–पिंडशुद्धिषडावश्यक–द्वादशानुप्रेक्षानागारभावना-समयसार–शीलगुणप्रस्तार–पर्याप्त्याद्यधिकारनिबद्धमहार्थगभीरं लक्षणसिद्धपदवाक्यवर्णोपचितं, घातिकर्मक्षयोत्पन्नकेवलज्ञानप्रबुद्धाशेष-

गुणपर्यायखचितषड्द्रव्यनवपदार्थजिनवरोपदिष्टं, द्वादशविधतपोनुष्ठानोत्पन्नानेकप्रकारर्द्धिसमन्वितगणधरदेवरचितं, मूलगुणोत्तरगुणस्वरूपविकल्पोपायसाधनसहायफलनिरूपणप्रवणमाचाराङ्गमाचार्यपारम्पर्यप्रवर्तमानमल्पबलमेधायुःशिष्यनिमित्तं द्वादशाधिकारैरुपसंहर्तुकामः स्वस्य श्रोतॄणां च प्रारब्धकार्यप्रत्यूहनिराकारणक्षमं शुभपरिणामं विदधच्छ्रीवट्टकेराचार्यः प्रथमतरं तावन्मूलगुणाधिकारप्रतिपादनार्थं मंगलपूर्विकां प्रतिज्ञां विधत्ते मूलगुणेत्यादि।

मूलगुणेसु विसुद्धे वंदित्ता सव्वसंजदे सिरसा।
इहपरलोगहिदत्थं मूलगुणे कित्तइस्सामि ॥१॥

मूलगुणेषु विशुद्धान् वंदित्वा सर्वसंयतान् शिरसा।
इहपरलोकहितार्थान् मूलगुणान् कीर्तयिष्यामि ॥१॥

मंगलनिमित्तहेतुपरिमाणनामकर्तॄन् धात्वादिभिः प्रयोजनाभिधेयसम्बन्धांश्च व्याख्याय पश्चादर्थः कथ्यते। मूलगुणेसु मूलानि च तानि गुणाश्च ते मूलगुणाः। मूलशब्दोऽनेकार्थे यद्यपि वर्तते तथापि प्रधानार्थे वर्तमानः परिगृह्यते। तथा गुणशब्देऽप्यनेकार्थे यद्यपि वर्तते तथाप्याचरणविशेषे वर्तमानः, परिगृह्यते। मूलगुणाः प्रधानानुष्ठानानि उत्तरगुणाधारभूतानि तेषु मूलगुणेषु विषयभूतेषु कारणभूतेषु वा सत्सु ये। विसुद्धे-विशुद्धाः निर्मलाः संजातास्तान् मूलगुणेषु विशुद्धान्। वंदित्ता-वन्दित्वा मनोवाक्कायक्रियाभिः प्रणम्य, सव्वसंजदे-अयं

सर्वशब्दो निरवशेषार्थवाचकः परिगृहीतो बहुनुग्रहकारित्वात्तेन प्रमत्तसंयताद्ययोगिपर्यन्ता भूतपूर्वगत्या सिद्धाश्च परिगृह्यन्ते, सम्यक् यताः पापक्रियाभ्यो निवृत्ताः सर्वे च ते संयताश्च सर्वसंयतास्तान् सर्वसंयतान् प्रमत्ताप्रमत्तापूर्वकरणानिवृत्तिकरणसूक्ष्मसांपरायोपशान्तकषायक्षीणकषायसयोगकेवल्ययोगकेवलिसंयतान् सप्ताद्यष्टपर्यन्तषण्णवमध्यसंख्यया समेतान् सिद्धांश्चानन्तान्। सिरसा—शिरसा मस्तकेन मूर्ध्ना। इहपरलोकहिदत्थे—इहशब्दः प्रत्यक्षवचनः, परशब्द उपरतेन्द्रियजन्मवचनः, लोकशब्दः सुरेश्वरादिवचनः । इह च परश्चेहपरौ तौ च तौ लोकौ च इहपरलोकौ ताभ्यां तयोर्वा हितं सुखैश्वर्यपूजासत्कारचित्तनिवृत्तिफलादिकं तदेवार्थः प्रयोजनं फलं येषां ते इहपरलोकहितार्थास्तान् इहलोकपरलोकसुखैश्वर्यादिनिमित्तान्। इहलोके पूजां सर्वजनमान्यतां गुरुतां सर्वजनमैत्रीभावादिकं च लभते मूलगुणानाचरन्, परलोके च सुरैश्वर्यं तीर्थकरत्वं चक्रवर्तिबलदेवादिकत्वं सर्वजनकान्ततादिकं च मूलगुणानाचरन् लभत इति। मूलगुणे—मूलगुणान् सर्वोत्तरगुणाधारतां गतानाचरणविशेषान। कित्तइस्सामि—कीर्तयिष्यामि व्याख्यास्यामि । अत्र संयतशब्दस्य चत्वारोऽर्था नाम स्थापना द्रव्यं भाव इति । तत्र जातिद्रव्यगुणक्रियानिरपेक्षं संज्ञाकर्म नामसंयतः। संयतस्य गुणान् बुद्ध्याध्यारोप्याकृतिवति अनाकृतिवति च वस्तुनि स एवायमिति स्थापिता मूर्तिः स्थापनासंयतः। संयतस्वरूपप्रकाशनप-

रिज्ञानपरिणतिसामर्थ्याध्यासितोऽनुपयुक्त आत्मा आगमद्रव्यसंयतः। नोआगमद्रव्यं ज्ञायकशरीरं संयतप्राभृतज्ञस्य शरीरं भूतं भवत् भावि वा। भविष्यत्संयतत्वपर्यायो जीवो भाविसंयतः। तद्व्यतिरिक्तमसम्भवि कर्म नोकर्म, तयोः संयतत्वस्य कारणत्वाभावात्। संयतगुणव्यावर्णनपरप्राभृतज्ञ उपयुक्तः सम्यगाचरणसमन्वित आगमभावसंयतस्तेनेह प्रयोजनं, कुतः मूलगुणेषु विशुद्धानिति विशेषणादिति। मूलगुणादिस्वरूपावगमनं प्रयोजनम्। ननु पुरुषार्थो हि प्रयोजनं न च मूलगुणादिस्वरूपावगमनं, पुरुषार्थस्य धर्मार्थकाममोक्षरूपत्वात्, यद्येवं सुष्ठु मूलगुणस्वरूपावगमनं प्रयोजनं यतस्तेनैव ते धर्मादयो लभ्यन्ते इति। मूलगुणैः शुद्धस्वरूपं साध्यं. साधनमिदं मूलगुणशास्त्रं, साध्यसाधनरूपसम्बन्धोऽपि शास्त्रप्रयोजनयोरतएव वाक्यालभ्यते, अभिधेयभूता मूलगुणाः तस्माद् ग्राह्यमिदं शास्त्रं प्रयोजनादित्रयसमन्वितत्वादिति। सर्वसंयतान् शिरसाभिवन्द्य मूलगुणान् इहपरलोकहितार्थान् कीर्तयिष्यामीति पदघटना। अथवा मूलगुणसंयातानामयं नमस्कारो मुलगुणान सुविशुद्धान संयतांश्च वन्दित्वा मूलगुणान् कीर्तयिष्यामि, चशब्दोऽनुक्तोऽपि द्रष्टव्यः। यथा पृथिव्यप्तेजोवायुराकाशमित्यत्र।

मूलगुणकथनप्रतिज्ञां निर्वहन्नाचार्यः संग्रहसूत्रगाथाद्वयमाह—

पंचय महव्वयाइं समिदीओ पंच जिणवरुद्दिट्ठा।

पंचेविंदियरोहा छप्पि य आवासया लोचो ॥२॥
अचेलकमण्हाणं खिदिसयणमदंतधंसणं चेव ।
ठिदिभोयणेयभत्तं मूलगुणा अट्ठवीसा दु ॥३॥

पंच महाव्रतानि समितयः पंच जिनवरोपदिष्टाः ।
पंचैवेंद्रियनिरोधाःषडपि च आवश्यकानि लोचः २
आचेलक्यं अस्नानं क्षितिशयनं अंदतघर्षणं चैव ।
स्थितिभोजनमेकभक्तं मूलगुणा अष्टाविंशतिस्तु ॥३॥

पंच य-पंचसंख्यावचनमेतत् । चशब्द एवकारार्थः पचैव न षट् । महव्वयाइं--महान्ति च तानि व्रतानि चै महाव्रतानि महान् शब्दो महत्त्वे प्राधान्ये वर्तते, व्रतशब्दोऽपि सावद्यनिवृत्तौ मोक्षावाप्तिनिमित्ताचरणे वर्तते, महद्भिरनुष्ठितत्वात् । स्वत एव वा मोक्षप्रापकत्वेन महान्ति व्रतानि महाव्रतानि प्राणासंयमनिवृत्तिकारणानि । समिदीओ-समितयः सम्यगयनानि समितयः सम्यक्श्रुतनिरूपितक्रमेण गमनादिषु प्रवृत्तयः समितयः व्रतवृत्तय इत्यर्थः । जिणवरुद्दिट्ठा—कर्मारातीन् जयन्तीति जिनास्तेषां वराः श्रेष्ठास्तैरुपदिष्टास्तेन स्वमनीषिकाचर्चिता इमाः सर्वेमूलगुणाभिधा न भवन्ति । आप्तवचनानुसारितया प्रामाण्यमासां व्याख्यातं भवति । कियन्त्यस्ताः पंचैव नाधिकाः । पंचेविंदियरोहा—इन्द्र आत्मा तस्य लिङ्गमिन्द्रियं, अथवा इन्द्रो नामकर्म तेन सृष्टमिन्द्रियं, तद् द्विविधं

द्रव्येन्द्रियं भावेन्द्रियं च, चक्षुरिन्द्रियाद्यावरणक्षयोपशमजनितशक्तिर्भावेन्द्रियं तदुपकरणं द्रव्येंद्रियं यतो 'लब्ध्युपयोगौ भावेन्द्रियं, निर्वृत्त्युपकरणे द्रव्येंद्रियं' चेति रोधा अप्रवृत्तयः इन्द्रियाणां श्रोत्रादीनां रोधा इंद्रियरोधाः सम्यक्ध्यानप्रवेशप्रवृत्तयः कियन्तस्ते पंचैव । छप्पि य—षडपि च षडेव न सप्त नापि पंच । आवासया—अवश्यकर्तव्यानि आवश्यकानि निश्चयक्रियाः सर्वकर्मनिर्मूलनसमर्थनियमाः । लोचो—लोचः हस्ताभ्यां मस्तककूर्चगतबालोत्पाटः । आचेलक्कं—चेलं वस्त्रं, उपलक्षणमात्रमेतत्, तेन सर्वपरिग्रहः श्रामण्यायोग्यः चेलशब्देनोच्यते, न विद्यते चेलं यस्यासावचेलकः अचेलकस्य भावोऽचेलकत्वं वस्त्राभरणादिपरित्यागः । अण्हाणं—अस्नानं जलसेकोद्वर्तनाभ्यंगादिवर्जनम् । खिदिसयणं—क्षितौ पृथिव्यां तृणफलकपाषाणादौ शयनं स्वपनं क्षितिशयनं स्थंडिलशायित्वम् । अदंतघंसणं चेव—दन्तानां घर्षणं मलापनयनं दन्तघर्षणं न दन्तघर्षणं अदन्तघर्षणं ताम्बूलदन्तकाष्ठादिवर्जनम् । चशब्दः समुच्चयार्थः । एवकारोऽवधारणार्थः । अदन्तघर्षणमेव च । ठिदिभोयणं—स्थितस्योर्ध्वतनोः चतुरंगुलपादान्तरस्य भोजनम् । एयभत्तं—एकं च तद्भक्तं चैकभक्तं, एकवेलाहारग्रहणम् । मूलगुणा—मूलगुणा उत्तरगुणाधारभूताः । अट्ठवीसा दु—अष्टाविंशतिः तु शब्दोऽवधारणार्थः, अष्टभिरधिका विंशतिरष्टाविंशतिरष्टाविंशतिरेव मूलगुणा नोनाः, नाप्यधिका इति ।

---

१ अस्य स्थाने जानोरिति पाठः ।

द्रव्यार्थिकशिष्यानुग्रहाय संग्रहेण संख्यापूर्वकान् मूलगुणान् प्रतिपाद्य पर्यायार्थिकशिष्यावबोधनार्थं विभागेन वार्तिकद्वारेण तानेव प्रतिपादयन्नाह—

हिंसाविरदी सच्चं अदत्तपरिवज्जणं च बंभं च।
संगविमुत्ती य तहा महव्वया पंच पण्णत्ता ॥४॥

हिंसाविरतिः सत्यं अदत्तपरिवर्जनं च ब्रह्म च।
संगविमुक्तिश्च तथा महाव्रतानि पंच प्रज्ञप्तानि ॥४॥

त्रिविधा चास्य शास्त्रस्याचाराख्यस्य प्रवृत्तिः, उद्देशो, लक्षणं, परीक्षा इति। तत्र नामधेयेन मूलगुणाभिधानमुद्देशः। उद्दिष्टानां तत्त्वव्यवस्थापको धर्मो लक्षणम्। लक्षितानां यथालक्षणमुपपद्यते, नेति प्रमाणैरर्थावधारणं परीक्षा। तत्रोद्देशार्थमिदं सूत्रम्। उत्तरं पुनर्लक्षणम्, परीक्षा पुनरुत्तरत्र, एवं त्रिविधा व्याख्या। अथवा संग्रहविभागविस्तरस्वरूपेण त्रिविधा व्याख्या। अथवा सूत्रवृत्तिवार्तिकस्वरूपेण त्रिविधा। अथवा सूत्र-प्रतिसूत्र-विभाषासूत्रस्वरूपेण त्रिविधेति। एवं सर्वत्राभिसम्बन्धः कर्तव्य इति। हिंसा—प्रमत्तयोगात्प्राणव्यपरोपणं, प्रमादः सकषायत्वं, तद्वानात्मपरिणामः प्रमत्तः प्रमत्तस्य योगः प्रमत्तयोगस्तस्मात्प्रमत्तयोगादशप्राणानां वियोगकरणं हिंसेति, तस्या विरतिः परिहारः हिंसाविरतिः सर्वजीवविषया दया। सच्चं-सत्यं असदभिधानत्यागः"असदभिधानमनृतं"सच्छब्दः प्रशंसावाची न सदसत् अप्रशस्तमिति यावत् असतोऽर्थस्याभि-

धानमसदभिधानं, अनृतं-ऋतं सत्यं न ऋतं अनृतं किंपुनस्तदप्रशस्तं प्राणिपीडाकरं यद्वचनं तदप्रशस्तं विद्यमानार्थविषयमविद्यमानार्थविषयं वा तस्यासदभिधानस्य त्यागः सत्यं। अदत्तपरिवज्जणं—अदत्तपरिवर्जनं अदत्तस्य परिवर्जनं अदत्तपरिवर्जनं, "अदत्तादानं स्तेयं" आदानं ग्रहणं अदत्तस्य पतितविस्मृत-स्थापिताननुज्ञातादिकस्य ग्रहणं अदत्तादानं तस्य परित्यागोऽदत्तपरिवर्जनम्। चशब्दः समुच्चयार्थः। बंभं च—ब्रम्हचर्यं च, ब्रम्हेत्युच्यते जीवस्तस्यात्मवतः परांगसम्भोगनिवृत्तवृत्तेश्चर्या ब्रम्हचर्यमित्युच्यते मैथुनपरित्यागः। स्त्रीपुंसोश्चारित्रमोहोदये सति रागपरिणामाविष्टयोः परस्परस्पर्शनं प्रतीच्छा मिथुनः, मिथुनस्य कर्म मैथुनं तस्य परित्यागो ब्रह्मचर्यमिति। संगविमुत्तीय—संगस्य परिग्रहस्य बाह्याभ्यन्तरलक्षणस्य विमुक्तिः परित्यागः संगविमुक्तिः श्रामण्यायोग्यसर्ववस्तुपरित्यागः परिग्रहासक्त्यभावः। तहा—तथा तेनैवागमोक्तेन प्रकारेण। महव्वयाइं-महाव्रतानि सर्वसावद्यपरिहारकारणानि पंच न षट्। पण्णत्ता—प्रज्ञप्तानि प्रतिपादितानि कैर्जिनेन्द्रैरिति शेषः। महद्भिरनुष्ठितत्वात् स्वत एव वा महान्ति व्रतानि महाव्रतानि पंचैवेति ॥

जीवस्थानस्वरूपं बन्धस्थानपरित्यागं च प्रतिपादयन हिंसाविरतेर्लक्षणं प्रपंचयन्नाह—

कायेंदियगुणमग्गणकुलाउजोणीसु सव्वजीवाणं
णाऊण य ठाणादिसु हिंसादिविवज्जणमहिंसा ॥

कायेंद्रियगुणमार्गणाकुलायुर्योनिषु सर्वजीवानाम् ।
ज्ञात्वा च स्थानादिषु हिंसादिविवर्जनमहिंसा ॥५॥

काय-कायाः पृथिव्यप्तेजोवायुवनस्पतित्रसाः तात्स्थ्यात् साहचर्याद्वा पृथिवीकायिकादयः काया इत्युच्यन्ते, आधारनिर्देशो वा, एवमन्यत्रापि योज्यम् । इंदिय —इन्द्रियाणि पंच स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि । एकं स्पर्शनमिन्द्रियं येषां ते एकेन्द्रियाः । द्वे स्पर्शनरसने इन्द्रिये येषां ते द्वीन्द्रियाः । त्रीणि स्पर्शनरसनघ्राणानीन्द्रियाणि येषां ते त्रीन्द्रियाः । चत्वारि स्पर्शनरसनघ्राणचक्षूषीन्द्रियाणि येषां ते चतुरिन्द्रियाः । पंच स्पर्शनरसनघ्राणचक्षुःश्रोत्राणीन्द्रियाणि येषां ते पंचेन्द्रियाः । गुण—गुणस्थानानि मिथ्यादृष्टिः, सासादनसम्यग्दृष्टिः, सम्यग्मिथ्यादृष्टिः, असंयतसम्यग्दृष्टिः, संयतासंयतः, प्रमत्तसंयतः, अप्रमत्तसंयतः, अपूर्वकरणः उपशमकः क्षपकः, अनिवृत्तिकरणः उपशमकः क्षपकः, सूक्ष्मसाम्परायः उपशमकः क्षपकः, उपशान्तकषायः, क्षीणकषायः, सयोगकेवली, अयोगकेवली चेति चतुर्दशगुणस्थानानि । एतेषां स्वरूपं पर्याप्त्यधिकारे व्याख्यास्यामः, इति नेह प्रपंचः कृतः । मग्गण—मार्गणा यासु यकाभिर्वा जीवा मृग्यन्ते ताश्चतुर्दश मार्गणाः, गतीन्द्रियकाययोगवेदकषायज्ञानसंयमदर्शनलेश्याभव्यसम्यक्त्वसंज्ञ्याहाराः । एतासामपि स्वरूपं तत्रैव व्याख्यास्यामः । जीवस्थानानि चैकेन्द्रियवादरसूक्ष्मपर्याप्तापर्याप्त-द्वीन्द्रियपर्याप्तापर्याप्त-त्रीन्द्रिय-

पर्याप्तापर्याप्त--चतुरिन्द्रियपर्याप्तापर्याप्त-पंचेन्द्रियसंज्ञ्यसंज्ञि-पर्याप्तापर्याप्ताः । कुल—कुलानि जातिभेदाः, वटपलाश-शंखशुक्तिमत्कुणपिपीलिकाभ्रमरपतङ्गमत्स्यमनुष्यादयः, सीमन्तकादिनारकभेदाः, भवनादिदेवविशेषाश्च । आऊ—आयुः देहधारणं, नरकतिर्यग्मनुष्यदेवगतिस्थितिकारणानि । जोणि—योनयः जीवोत्पत्तिस्थानानि, सचित्ताचित्तमिश्र-शीतोष्णमिश्रसंवृतविवृतमिश्राणि । एतेषां संख्याविशेषमुत्तरत्र व्याख्यास्यामः । कायाश्चेन्द्रियाणि च गुणस्थानानि च मार्गणाश्च कुलानि चायुश्च योनयश्च कायेन्द्रियगुणमार्गणाकुलायुर्योनयस्तासु तान् वा । सव्वजीवाणं—सर्वे च ते जीवाश्च सर्वजीवाः । सर्वशब्दः कात्स्न्र्यवचनः, जीवाः द्रव्यप्राण-भावप्राणधारणसमर्थाः, तेषां सर्वजीवानाम् । णाऊण—ज्ञात्वा स्वरूपमवबुध्य । ठाणादिसु—स्थानं कायोत्सर्गः स आदि-र्येषां ते स्थानादयस्तेषु स्थानादिषु, स्थानासनशयनगमन-भोजनोद्वर्तनाकुंचनप्रसारणादिक्रियाविशेषेषु । हिंसा—प्राण-व्यपरोपणं आदिर्येषां ते हिंसादयस्तेषां विवर्जनं हिंसादिवि-वर्जनं बधपरितापमर्दनादिपरिहरणमहिंसा । एतदहिंसाव्रतं कायेन्द्रियगुणमार्गणाकुलायुर्योनिविषयेषु स्थितानां जीवानां कायोत्सर्गादिषु प्रदेशेषु प्रयत्नवतो हिंसादिवर्जनं यत्तदहिंसाव्रतं स्यात् । अथवा कायेन्द्रियादीन् ज्ञात्वा स्थानादिषु क्रियासु जीवानां हिंसादिविवर्जनमहिंसा । कायादिस्वरूपेण स्थितानां जीवानां हिंसादिपरिहरणमहिंसेति भावः ॥

द्वितीयस्य व्रतस्य स्वरूपमाह—

रागादीहिं असच्चं चत्ता परतावसच्चवयणुत्तिं ।
सुत्तत्थाणविकहणे अयधावयणुज्झणं सच्चं ॥६॥

रागादिभिः असत्यं त्यक्त्वा परतापसत्यवचनोक्तिं ।
सूत्रार्थविकथने अयथावचनोज्झनं सत्यम् ॥ ६ ॥

रागादीहिं—रागः स्नेहः स आदिर्येषां ते रागादयस्तै रागादिभी रागद्वेषमोहादिभिः पैशून्येर्ष्यादिभिश्च । असच्चं-असत्यं मृषाभिधानम् । चत्ता-त्यक्त्वा परिहृत्य । परतावस-च्चवयणुत्ति—परतापसत्यवचनोक्तिं परतापसत्यवचनमिति वा । परान् प्राणिनः तपति पीडयति परतापं परतापं च तत्सत्यव-चनं च परतापसत्यवचनम् । येन सत्येनापि वचनेन परेषां प-रितापादयो भवन्ति तत्सत्यमपि त्यक्त्वा । अयधावयणुज्झणं-न यथा अयथा तच्च तद्वचनं चायथावचनं अपरमार्थवचनं । द्रव्यक्षेत्रकालभावाद्यनपेक्षं सर्वथास्त्येवेत्येवमादिकं तस्य सर्वस्य उज्झनं परिहरणमयथावचनोज्झनं सदाचाराचार्यान्यथार्थकथने दोषाभावो वा सत्यमिति सम्बन्धः । सुत्तत्थाणविकहणे—सूत्रं द्वादशांगचतुर्दशपूर्वाणि, अर्थो जीवादयः पदार्थास्तयोर्विक-थनं प्रतिपादनं तस्मिन् सूत्रार्थविकथने, सूत्रस्य अर्थस्य च विकथनेऽयथावचनस्योत्सर्गोऽन्यथा न प्रतिपादनम् । सदा-चारस्याचार्यस्य स्खलने दोषाभावो वा । सच्चं—सत्यमिति । रागादिभिरसत्यमभिधानमभिप्रायं च त्यक्त्वा, परितापकरं

सत्यमपि त्यक्त्वा सूत्रार्थान्यथाकथनं च त्यक्त्वा आचार्यादीनां वचनस्खलने दोषं वा त्यक्त्वा यद्वचनं तत्सत्यव्रतमिति ।

तृतीयव्रतस्वरूपनिरूपणायाह—

गामादिसु पडिदाइं अप्पप्पहुदिं परेण संगहिदं
णादाणं परदव्वं अदत्तपरिवज्जणं तं तु ॥ ७ ॥

ग्रामादिषु पतितादि अल्पप्रभृति परेण संगृहीतं ।
न आदानं परद्रव्यं अदत्तपरिवर्जनं तत् तु ॥ ७ ॥

गामादिसु-ग्रामो वृत्तिपरिक्षिप्तजननिवासः स आदिर्येषां ते ग्रामादयस्तेषु ग्रामादिषु ग्रामखेटकर्वटमटंबनगरोद्यानपथिशैलाटव्यादिषु । पडिदाइं--पतितमादिर्येषां तानि पतितादीनि पतितनष्टविस्मृतस्थापितादीनि । अप्पप्पहुदिं--अल्पं स्तोकं प्रभृतिरादिर्येषां तान्यल्पप्रभृतीनि स्तोकबहुसूक्ष्मस्थूलादीनि । परेण-अन्येन । संगहिदाइं-संगृहीतानि चात्मवशकृतानि च क्षेत्रवास्तुधनधान्यपुस्तकोपकरणच्छात्रादीनि तेषां सर्वेषां । णादाणं-नादानं न ग्रहणं आत्मीयकरणविवर्जनम् । परदव्वं–परद्रव्याणां । अदत्तपरिवज्जणं–अदत्तस्यापरित्यक्तस्यानभ्युपगतस्य च परिवर्जनं परिहरणं अदत्तपरिवर्जनं, अदत्तग्रहणेऽभिलाषाभावः । तंतु–तदेतत् । परद्रव्याणां ग्रामादिषु पतितादीनामल्पबह्वादीनां परेण संगृहीतानां च यदेतन्नादानमग्रहणं तददत्तपरिवर्जनं व्रतमिति । अथवा परद्रव्यं परेण संगृहीतं च ग्रामादिषु पतितादिकं चाल्पादिकं च नादानं ना-

देयं आत्मीयं न कर्तव्यमिति योऽयमभिप्रायस्तददत्तपरिवर्जनं नामेति ॥

चतुर्थव्रतस्वरूपनिरूपणायाह—

मादुसुदाभगिणीवय दट्ठूणित्थित्तियं च पडिरूवं
इत्थिकहादिणियत्ती तिलोयपुज्जं हवे बंभं ॥ ८ ॥

मातृसुताभगिनीरिव दृष्ट्वा स्त्रीत्रिकं च प्रतिरूपम् ।
स्त्रीकथादिनिवृत्तिः त्रिलोकपूज्यं भवेत् ब्रह्म ॥ ८ ॥

मादु–माता जननी । सुदा–सुता दुहिता । भगिणीवय-भगिनी स्वसा । इवौपम्ये द्रष्टव्य इवशब्द उपमार्थः । च-शब्दः समुच्चयार्थः । दट्ठूण-दृष्ट्वा सम्यक् ज्ञात्वा । इत्थित्तियं स्त्रीणां त्रिकं वृद्धबालयौवनभेदात् । पडिरूवं च—प्रतिरूपं च चित्रलेपभेदादिषु स्थितं प्रतिबिंबं देवमनुष्यतिरश्चां च रूपं । इत्थिकहादिणियत्ति—स्त्रीकथा आदिर्येषां ते स्त्री-कथादयस्तेभ्यो निवृत्तिः परिहारः स्त्रीकथादिनिवृत्तिः, वनिताकोमलालाप-मृदुस्पर्श–रूपालोकन–नृत्यगीतहासकटा-क्षनिरीक्षणाद्यनुरागत्यागः । अथवा स्त्रीभक्तराजचौरकथानां परित्यागः रागादिभावेन तत्र प्रबन्धाभावः । तिलोयपुज्जं—त्रिभिर्लोकैः पूज्यं त्रिलोकपूज्यं देवभावनमनुष्यैरर्चनीयम् । हवे-भवेत् । बंभं-ब्रह्मचर्यम् । देवमनुष्यतिरश्चां वृद्धबालयौ-वनस्वरूपं स्त्रीत्रिकं दृष्ट्वा यथासंख्येन माता सुता भगिनीव चिन्तनीयम् । तेषां प्रतिरूपाणि च तथैव चिन्तनीयानि । स्त्री-

कथादिकं च वर्जनीयम् । अनेन प्रकारेण सर्वपूज्यं ब्रह्मचर्यं नवप्रकारमेकाशीतिभेदं द्वाषष्ट्यधिकं शतं चेति ॥

पंचमव्रतस्वरूपपरीक्षार्थमुत्तरसूत्रमाह—

जीवणिबद्धा बद्धा परिग्गहा जीवसंभवा चेव ।
तेसिं सक्कचागो इयरम्हि य णिम्ममोऽसंगो ॥९॥

जीवनिबद्धा बद्धाः परिग्रहा जीवसंभवाश्चैव ।
तेषां शक्त्या त्यागः इतरस्मिन् च निर्ममोऽसंगः॥ ९ ॥

जीवणिबद्धा-जीवेषु प्राणिषु निबद्धाः प्रतिबद्धा जीवनिबद्धाः प्राण्याश्रिता देह-मिथ्यात्व—वेद—राग—हास्य-रत्यरति—शोक-भय-जुगुप्सा-क्रोध-मान-माया-लोभादयः दासिदास-गोऽश्वादयो वा । अबद्धा—अप्रतिबद्धा अनाश्रिता जीवपृथग्भूताः क्षेत्रवास्तुधनधान्यादयः । परिग्गहा—परिग्रहाः समन्तत आदानरूपा मूर्च्छा । जीवसम्भवा—जीवेभ्यः सम्भवो येषां ते जीवसम्भवा जीवोद्भवा मुक्ताफलशङ्खशुक्तिचर्मदन्तकम्बलादयः क्रोधादयो वा श्रामण्ययोग्याः । चेव-चैव । तेसिं-तेषां सर्वेषां पूर्वोक्तानां । सक्कचागो-शक्त्या त्यागः सर्वात्मस्वरूपेणानभिलाषः सर्वथापरिहारः । अथवा तेषां संगानां परिग्रहाणां त्यागः पाठान्तरम् । इयरम्हि य—इतरेषु च संयमज्ञानशौचोपकरणेषु । णिम्ममो-निर्मम ममत्वरहितत्वं निःसंगत्वम् । असंगो असंगव्रततत्त्वम् । किमुक्तं भवति--जीवाश्रिता ये परिग्रहा ये चानाश्रिताः क्षेत्रादयः जीवसम्भवाश्च ये तेषां सर्वेषां म-

नोवाक्कायैः सर्वथा त्यागः । इतरेषु च संयमाद्युपकरणेषु च असङ्गमतिमूर्च्छारहितत्वमित्येतदसङ्गव्रतमिति ॥

पंचमहाव्रतानां स्वरूपं भेदं च निरूप्य पंचसमितीनां भेदं स्वरूपं च निरूपयन्नाह—

इरिया भासा एसण णिक्खेवादाणमेव समिदीओ पदिठावणिया य तहा उच्चारादीण पंचविहा १०

ईर्या भाषा एषणा निक्षेपादानमेव समितयः ।

प्रतिष्ठापनिका च तथा उच्चारादीनां पंचविधाः ॥१०॥

इरिया—ईर्या गमनागमनादिकं भासा—भाषा वचनं सत्यमृषा-सत्यमृषाऽसत्यमृषाप्रवृत्तिकारणम् । एसणा-एषणा चतुर्विधाहारग्रहणवृत्तिः । णिक्खेवादाणं—निक्षेपो गृहीतस्य संस्थापनं आदानं स्थितस्य ग्रहणं निक्षेपादाने एवकारोऽवधारणार्थः । समिदीओ—समितयः सम्यक्प्रवृत्तयः । समितिशब्दः प्रत्येकमभिसम्बध्यते, ईर्यायाः समितिः ईर्यासमितिः सम्यगवलोकनं समाहितचित्तस्य प्रयत्नेन गमनागमनादिकम् । भाषायाः समितिः भाषासमितिः श्रुतधर्मविरोधेन पूर्वापरविवेकसहितमनिष्ठुरादिवचनम् । एषणायाः समितिरेषणासमितिः लोकजुगुप्सादिपरिहीनविशुद्धपिण्डग्रहणम् । निक्षेपादानयोः समितिर्निक्षेपादानसमितिश्चक्षुःपिच्छकप्रतिलेखनपूर्वकसयत्नग्रहणनिक्षेपादिः । पइठावणिगा य—प्रतिष्ठापनिका च, अत्रापि समितिशब्दः सम्बन्धनीयः, प्रतिष्ठापनासमितिर्जन्तुविव-

र्जितप्रदेशे सम्यगवलोक्य मलाद्युत्सर्गः। तहा–तथैव । उच्चारादीणं-उच्चारादीनां मूत्रपुरीषादीनां प्रतिष्ठापना सम्यक्परित्यागो यः सा प्रतिष्ठापनासमितिः। एवं पंचविहा–पंचप्रकारा एव समितयो भवन्तीत्यर्थः ।

सामान्येन पंचसमितीनां स्वरूपं निरूप्य विशेषार्थमुत्तरमाह–

फासुयमग्गेण दिवा जुगंतरप्पेहिणा सकज्जेण ।
जंतूण परिहरंतेणिरियासमिदी हवे गमणं॥११॥

प्रासुकमार्गेण दिवा युगांतरप्रेक्षिणा सकार्येण ।
जंतून् परिहरता ईर्यासमितिः भवेत् गमनम्॥ ११ ॥

फासुगमग्गेण–प्रगता असवो जीवा यस्मिन्नसौ प्रासुकःप्रासुकश्चासौ मार्गश्च प्रासुकमार्गो निरवद्यः पंथास्तेन प्रासुकमार्गेण गजखरोष्ट्रगोपहिषीजनसमुदायोपमर्दितेन वर्त्मना । दिवा-दिवसे सूरोद्गमे प्रवृत्तचक्षुःप्रचारे युगंतरप्पेहिणा–युगान्तरं चतुर्हस्तप्रमाणं प्रेक्षते पश्यतीति युगान्तरप्रेक्षी तेन युगान्तरप्रेक्षिणा सम्यगवहितचित्तेन पदनिक्षेपप्रदेशमवलोकमानेन । सकज्जेण-कार्यं प्रयोजनं शास्त्रश्रवणतीर्थयात्रागुरुप्रेक्षणादिकं सह कार्येण वर्तते इति सकार्यस्तेन सकार्येण सप्रयोजनेन धर्मकार्यमन्तरेण न गन्तव्यमित्यर्थः । जंतूणि–जन्तून् जीवान् एकेन्द्रियप्रभृतीन् । परिहरन्तेण–परिहरता अविराधयता । इरियासमिदी–ईर्यासमितिः । हवे–भवेत् । गमणं–गमनम् । सकार्येण युगान्तरप्रेक्षिणा संयतेन दिवसे प्रासुकमार्गेण यद्गमनं क्रियते

सेर्यासमितिर्भवतीत्यर्थः । अथवा संयतस्य जन्तून् परिहरतो यद्गमनं सेर्यासमितिः ॥

भाषासमितेः स्वरूपनिरूपणायोत्तरसूत्रमाह—

पेसुण्णहासकक्कसपरणिंदाप्पप्पसंसविकहादी ।
वज्जित्ता सपरहियं भासासमिदी हवे कहणं॥१२॥

पैशून्यहास्यकर्कशापरनिंदात्मप्रशंसाविकथादीन् ।
वर्जयित्वा स्वपरहितं भाषासमितिः भवेत् कथनम् ॥

पेसुण्ण–पिशुनस्य भावः पैशून्यं निर्दोषस्य दोषोद्भावनम्। हास-हसनं हासः हास्यकर्मोदयवशादधर्मार्थहर्षः । कक्कस-कर्कशः श्रवणनिष्ठुरं कामयुद्धार्थप्रवर्तकं वचनम्।परणिंदा-परेषां निंदा जुगुप्सा परनिंदा परेषां तथ्यानामतथ्यानां वा दोषाणामुद्भावनं प्रति समीहा अन्यगुणासहनम्। अप्पप्पसंसा-आत्मनः प्रशंसा स्तवः आत्मप्रशंसा स्वगुणाविष्करणाभिप्रायः । विकहादी–विकथा आदिर्येषां ते विकथादयः स्त्रीकथा, भक्तकथा, चौरकथा, राजकथादयः । एतेषां पैशून्यादीनां द्वंद्वसमासः । वज्जित्ता–वर्जयित्वा परिहृत्य । सपरहियं–स्वश्च परश्च स्वपरौ ताभ्यां हितं स्वपरहितं, आत्मनोऽन्यस्य च सुखकरं कर्मबंधकारणविमुक्तम् । भासासमिदी–भाषासमितिः । हवे भवेत् । कहणं–कथनम् । पैशून्यहासकर्कशपरनिन्दात्मप्रशंसाविकथादीन् वर्जयित्वा स्वपरहितं यदेतत् कथनं भाषासमितिर्भवतीत्यर्थः ॥

एषणासमितिस्वरूपं प्रतिपादयन्नाह—

छादालदोससुद्धं कारणजुत्तं विसुद्धणवकोडी ।
सीदादीसमभुत्ती परिसुद्धा एसणासमिदी ॥१३॥

षट्चत्वारिंशद्दोषशुद्धं कारणयुक्तं विशुद्धनवकोटि ।
शीतादिसमभुक्तिः परिशुद्धा एषणा समितिः ॥ १३ ॥

छादालदोससुद्धं–षड्भिरधिका चत्वारिंशत् षट्चत्वारिंशत् षट्चत्वारिंशतश्च ते दोषाश्च षट्चत्वारिंशद्दोषाः तैः शुद्धं निर्मलं षट्चत्वारिंशद्दोषशुद्धं उद्गमोत्पादनैषणादिकलंकरहितम् । कारणजुत्तं–कारणैर्निमित्तैर्युक्तं सहितं कारणयुक्तं असातोदयजातबुभुक्षाप्रतीकारार्थं वैयावृत्त्यादिनिमित्तं च । विसुद्धणवकोडी–नव च ताः कोटयश्च विकल्पाश्च नवकोटयः विशुद्धा निर्गता नवकोटयो यस्माद्विशुद्धनवकोटि मनोवचनकायकृतकारितानुमतिरहितम् । सीदादि–शीतमादिर्यस्य तच्छीतादि शीतोष्णलवणसरसविरसरूक्षादिकम् । समभुत्ती–समा सदृशी भुक्तिर्भोजनं समभुक्तिः । शीतादौ समभुक्तिः शीतादिसमभुक्तिः शीतोष्णादिषु भक्ष्येषु रागद्वेषरहितत्वम् । परिसुद्धा–समन्ततो निर्मला । एसणासमिदी–एषणासमितिः । षट्चत्वारिंशद्दोषरहितं यदेतत् पिंडग्रहणं सकारणं मनोवचनकायकृतकारितानुमतिरहितं च शीतादौ समभुक्तिश्च, अनेन न्यायेनाचरता निर्मलैषणासमितिर्भवतीत्यर्थः ॥

आदाननिक्षेपणसमितिस्वरूपं निरूपयन्नाह—

णाणुवहिं संजमुवहिं सउचुवहिं अण्णमप्पमुवहिं वा
पयदं गहणिक्खेवो समिदी आदाणणिक्खेवा १४

ज्ञानोपधिं संयमोपधिं शौचोपधिं अन्यमप्युपधिं वा।
प्रयतं ग्रहनिक्षेपौ समितिः आदाननिक्षेपा ॥ १४ ॥

णाणुवहि—ज्ञानस्य श्रुतज्ञानस्योपधिरुपकरणं ज्ञानोपधिर्ज्ञाननिमित्तं पुस्तकादि। संजमुवहिं—संयमस्य पापक्रियानिवृत्तिलक्षणस्योपधिरुपकरणं संयमोपधिः प्राणिदयानिमित्तं पिच्छिकादिः। सउचुवहिं—शौचस्य पुरीषादिमलापहरणस्योपधिरुपकरणं शौचोपधिर्मूत्रपुरीषादिप्रक्षालननिमित्तं कुंडिकादिद्रव्यम्। ज्ञानोपधिश्च संयमोपधिश्च शौचोपधिश्च ज्ञानोपधिसंयमोपधिशौचोपधयस्तेषां ज्ञानाद्युपधीनाम्। अण्णमवि—अन्यस्यापि संस्तरादिकस्य। उवहिं वा—उपधेर्वा उपकरणस्य संस्तरादिनिमित्तस्य उपकरणस्य प्राकृतलक्षणबलादत्र षष्ठीविभक्तिर्द्रष्टव्या। पयदं-प्रयत्नेनोपयोगं कृत्वा। गहणिक्खेवो-ग्रहणं ग्रहः निक्षेपणं निक्षेपः, ग्रहश्च निक्षेपश्च ग्रहनिक्षेपौ। समिदी-समितिः। आदाणणिक्खेवा-आदाननिक्षेपा। ज्ञानोपधिसंयमोपधिशौचोपधीनामन्यस्य चोपधेर्यत्नेन यौ ग्रहणनिक्षेपौ प्रतिलेखनपूर्वकौ सा आदाननिक्षेपा समितिर्भवतीत्यर्थः ॥

पंचमसमितिस्वरूपनिरूपणायाह—

एगंते अचित्ते दूरे गूढे विसालमविरोहे।

उच्चारादिच्चाओ पदिठावणिया हवे समिदी १५

एकांते अचित्ते दूरे गूढे विशाले अविरोधे ।

उच्चारादित्यागः प्रतिष्ठापनिका भवेत् समितिः ॥१५॥

एगंते-एकान्ते विजने यत्रासंयतजनप्रचारो नास्ति । अचित्ते-हरितकायत्रसकायादिविविक्ते दग्धे दग्धसमे स्थण्डिले । दूरे ग्रामादिकाद्विप्रकृष्टे प्रदेशे । गूढे-संवृते जनानामचक्षुर्विषये । विसालं-विशाले विस्तीर्णे बिलादिविरहिते । अविरोहे-अविरोधे यत्र लोकापवादो नास्ति । उच्चारादि-उच्चारो मलं आदिर्यस्य स उच्चारादिस्तस्य उच्चारादेः मूत्रपुरीषादेः । चागो—त्यागः । पदिठावणिगा--प्रतिष्ठापनिका । हवे--भवेत् । समिदी-समितिः । एकान्ताचित्तदूरगूढविशालाविरोधेषु प्रदेशेषु यत्नेन कायमलादेर्यस्त्यागः सा उच्चारप्रस्रवणप्रतिष्ठापनिका समितिर्भवतीत्यर्थः ॥

इंद्रियनिरोधव्रतस्वरूपनिरूपणायोत्तरविभागसूत्रमाह—

चक्खू सोदं घाणं जिब्भा फासं च इंदिया पंच ।
सगसगविसएहिंतो णिरोहियव्वा सया मुणिणा ॥

चक्षुः श्रोत्रं घ्राणं जिह्वा स्पर्शश्च इंद्रियाणि पंच ।

स्वकस्वकविषयेभ्यो निरोधयितव्या सदा मुनिना १६

चक्खु--चक्षुः । सोदं--श्रोत्रम् । घाणं-घ्राणम् । जिब्भा-जिह्वा । फासं -स्पर्शः । चः समुच्चयार्थः । इंदिया--इन्द्रि-

याणि मतिज्ञानावरणक्षयोपशमशक्तयः। इन्द्रियं द्विविधं द्रव्येंद्रियं भावेन्द्रियं चेति। तत्र द्रव्येन्द्रियं द्विविधं निर्वृत्तिरुपकरणं च। कर्मणा निर्वर्त्यते इति निर्वृत्तिः, सा च द्विविधा बाह्याभ्यन्तरा चेति उत्सेधाङ्गुलासंख्येयभागप्रमितानां शुद्धानामात्मप्रदेशानां प्रतिनियतचक्षुःश्रोत्रघ्राणरसनस्पर्शनेन्द्रियसंस्थानेनावस्थितानां वृत्तिराभ्यन्तरा निर्वृत्तिः। तेषु आत्मप्रदेशेषु इन्द्रियव्यपदेशभाग् यः प्रतिनियतसंस्थाननामकर्मोदयापादितावस्थाविशेषः पुद्गलप्रचयः सा बाह्या निर्वृत्तिः। येन निर्वृत्तेरुपकारः क्रियते तदुपकरणं। तदपि द्विविधं आभ्यन्तरबाह्यभेदेन। तत्राभ्यन्तरं कृष्णशुक्लमण्डलं। बाह्यमक्षिपत्रपक्ष्मद्वयादि। एवं श्रोत्रेन्द्रियघ्राणेन्द्रियरसनेंद्रियस्पर्शनेन्द्रियाणां वक्तव्यं बाह्याभ्यन्तरभेदेन द्वैविध्यम्। भावेन्द्रियमपि द्विविधं लब्ध्युपयोगभेदेन। लम्भनं लब्धिः। का पुनरसौ ज्ञानावरणकर्मक्षयोपशमविशेषः। यत्सन्निधानादात्मा द्रव्येन्द्रियनिर्वृत्तिं प्रति व्याप्रियते सा लब्धिः। तन्निमित्त आत्मनः परिणाम उपयोगः कारणधर्मस्य कार्ये दर्शनात्। वीर्यान्तरायमतिज्ञानावरणक्षयोपशमांगोपांगनामलाभावष्टम्भबलादात्मना स्पृश्यतेऽनेनेति स्पर्शनम्, रस्यतेऽनेनेति रसनम्, घ्रायतेऽनेनेति घ्राणम्, चष्टेऽर्थान् पश्यत्यनेनेति चक्षुः, श्रूयतेऽनेनेति श्रोत्रम्। स्वातन्त्र्यविवक्षा च दृश्यते कर्तृकरणयोरभेदात् इदं मे चक्षुः सुष्ठु पश्यति। अयं मे कर्णः सुष्ठु शृणोति। स्पृशतीति स्पर्शनम्। रसतीति रसनम्। घ्रायती-

ति घ्राणम् । चष्टे इति चक्षुः । शृणोतीति श्रोत्रमिति । एवमिन्द्रियाणि पंच । तद्विषयाश्च पंच । वर्ण्यत इति वर्णः । शब्द्यते इति शब्दः । गन्ध्यत इति गन्धः । रस्यत इति रसः । स्पृश्यत इति स्पर्शः इति । पंच–संख्यावचनमेतत् । सगसगविसएहिंतो-स्वकीयेभ्यः स्वकीयेभ्यो विषयेभ्यो रूपशब्दगन्धरसस्पर्शेभ्यः स्वभेदभिन्नेभ्यो मनोहरामनोहररूपेभ्यः । णिरोहियव्वा–निरोधयितव्यानि--सम्यक् ध्याने प्रवेशयितव्यानि । सया–सदा सर्वकालम् । मुणिणा-मुनिना संयमप्रियेण । स्वकीयेभ्यः स्वकीयेभ्यो विषयेभ्यो रूपशब्दगन्धरसस्पर्शेभ्यश्चक्षुरादीनां निरोधनानि मुनेर्यानि तानि पंचेंद्रियनिरोधनानि पंच मूलगुणा भवन्तीत्यर्थः । अथवा ये पंच निरोधा इंद्रियाणां क्रियंते मुनिना स्वविषयेभ्यस्ते पंचेंद्रिय-निरोधाः पंच मूलगुणा भवंतीत्यर्थः ।

प्रथमस्य चक्षुर्निरोधव्रतस्य स्वरूपनिरूपणार्थमाह—

सचित्ताचित्ताणं किरियासंठाणवण्णभेएसु ।
रागादिसंगहरणं चक्खुणिरोहो हवे मुणिणो १७

सचित्ताचित्तानां क्रियासंस्थानवर्णभेदेषु ।
रागादिसंगहरणं चक्षुर्निरोधो भवेत् मुनेः ॥ १७ ॥

सचित्ताचित्ताणं—सहचित्तेन सामान्यज्ञानदर्शनोपयोगनिमित्तचैतन्येन वर्तन्त इति सचित्तानि सजीवरूपाणि देवमनुष्यादियोषिद्रूपाणि, न चित्तानि अचित्तानि सचित्तद्रव्यप्रति-

विम्बानि, अजीवद्रव्याणि च । सचित्तानि, चाचित्तानि च सचित्ताचित्तानि, तेषां सचित्ताचित्तानाम् । किरिया-संठाणवण्णभेएसु--क्रिया-गीतविलासनृत्यचंक्रमणात्मिका, संस्थानं समचतुरस्रन्यग्रोधाद्यात्मकं वैशाखबन्धपुटाद्यात्मकं च, वर्णाः गौरश्यामादयः । क्रिया च संस्थानं च वर्णाश्च क्रियासंस्थानवर्णाः, तेषां भेदा विकल्पाः क्रियासंस्थानवर्णभेदास्तेषु क्रियासंस्थानवर्णभेदेषु. नृत्यगीतकटाक्षनिरीक्षणसमचतुरस्राकारगौरश्यामादिविकल्पेषु शोभनाशोभनेषु । रागादिसंगहरणं-राग आदिर्येषां ते रागादयः रागादयश्च ते संगाश्च रागादिसंगाः संगाश्चाशक्तयस्तेषां हरणं निराकरणं रागादिसंगहरणं रागद्वेषाद्यनभिलाषः । चक्खुणिरोहो—चक्षुषोर्निरोधश्चक्षुर्निरोधः चक्षुरिन्द्रियाप्रसरः । हवे भवेत् । मुणिणो—मुनेरिन्द्रिययमनायकस्य । स्त्रीपुरुषाणां स्वरूपलेपकर्मादिव्यवस्थितानां ये क्रियासंस्थानवर्णभेदास्तद्विषये यदेतत् रागादिनिराकारणं तच्चक्षुर्निरोधव्रतं मुनेर्भवतीत्यर्थः ॥

श्रोत्रेन्द्रियनिरोधव्रतस्वरूपनिरूपणायाह—

सड्गादिजीवसद्दे वीणादिअजीवसंभवे सद्दे ।
रागादीण णिमित्ते तदकरणं सोदरोधो दु ॥१८॥

षड्गादिजीवशब्दा वीणाद्यजीवसंभवाः शब्दाः ।
रागादीनां निमित्तानि तदकरणं श्रोत्ररोधस्तु ॥१८॥

सङ्गादिजीवसद्दे-षड्जः स्वरविशेषः स आदिर्येषां ते षड्जादयः जीवस्य शब्दा जीवशब्दाः षड्जादयश्च जीवशब्दाश्च षड्जादिजीवशब्दाः षड्जर्षभगान्धारमध्यमधैवतपंचमनिषादभेदा उरःकण्ठशिरःस्थानभेदभिन्नाः, आरोह्यवरोहिस्थायिसंचारिवर्णयुक्ता मन्द्रतारादिसमन्विताः, अन्ये च दुःस्वरशब्दा रासभादिसमुत्था ग्राह्याः। वीणादिअजीवसंभवा-वीणा आदिर्येषां ते वीणादयो वीणादयश्च ते अजीवाश्च वीणाद्यजीवास्तेभ्यः संभवन्तीति वीणाद्यजीवसम्भवा वीणात्रिशरीरावणहस्तालाबनिमृदंग-भेरी-पटहादयुद्भवाः। सद्दे-शब्दाः। रागादीण-राग आदिर्येषां ते रागादयस्तेषां रागादीनां रागद्वेषादीनाम्। णिमित्ते—निमित्तानि हेतवो रागादिकारणभूताः। तदकरणं तेषां षड्जादीनामकरणमश्रवणं च तदकरणं स्वतो न कर्तव्या नापि तेऽन्यैः क्रियमाणा रागाद्याविष्टचेतसा श्रोतव्या इति। सोदरोधो दु--श्रोत्रस्य श्रोत्रेन्द्रियस्य रोधः श्रोत्ररोधः। दु विशेषार्थः। रागादिहेतवो ये षड्जादयो जीवशब्दा वीणाद्यजीवसम्भवाश्च, तेषां यदश्रवणं आत्मना अकरणं च तच्छ्रोत्रव्रतं मुनेर्भवतीत्यर्थः। अथवा षड्जादिजीवशब्दविषये वीणाद्यजीवसंभवे शब्दविषये च रागादीनां यन्निमित्तं तस्याकरणमिति॥

तृतीयस्य घ्राणेन्द्रियनिरोधव्रतस्य स्वरूपनिरूपणार्थमाह—

पयडीवासणगंधे जीवाजीवप्पगे सुहे असुहे।

रागद्देसाकरणं घाणणिरोहो मुणिवरस्स ॥१९॥

प्रकृतिवासनागंधे जीवाजीवात्मके सुखे असुखे।
रागद्वेषाकरणं घ्राणनिरोधो मुनिवरस्य ॥ १९ ॥

पयडीवासणागंधे--प्रकृतिः स्वभावः, वासना अन्यद्रव्यकृतसंस्कारः, प्रकृतिश्च वासना च प्रकृतिवासने ताभ्यां गन्धः सौरभ्यादिगुणः प्रकृतिवासनागन्धस्तस्मिन् स्वभावान्यद्रव्यकृते सौरभ्यादिगुणे। जीवाजीवप्पगे—जीवति जीविष्यति जीवितपूर्वो वा चेतनालक्षणो जीवः सुखदुःखयोः कर्ता, न जीवोऽजीवस्तद्विपरीतः, जीवश्चाजीवश्च जीवाजीवौ तौ प्रगच्छतीति जीवाजीवप्रगः जीवाजीवस्वरूपः तस्मिन् जीवाजीवस्वरूपे कस्तूरीयक्षकर्दमचंदनादिसुगन्धद्रव्ये। सुहे—सुखे स्वात्मप्रदेशाल्हादनरूपे। असुहे-असुखे स्वप्रदेशपीडाहेतौ सुखदुःखयोर्निमित्ते। रागद्देसाकरणं-रागश्च द्वेषश्च रागद्वेषौ तयोरकरणं अनभिलाषः रागद्वेषाकरणमनुरागजुगुप्सानभिलाषः। घाणणिरोहो—घ्राणेन्द्रियनिरोधः घ्राणेन्द्रियाप्रसरः। मुणिवरस्स-मुनीनां वरः श्रेष्ठो मुनिवरः यतिकुञ्जरस्तस्य मुनिवरस्य। जीवगते अजीवगते च प्रकृतिगन्धे वासनागन्धे च सुखरूपेऽसुखरूपे च यदेतद्रागद्वेषयोरकरणं मुनिवरस्य तत् घ्राणेन्द्रियनिरोधव्रतं भवतीत्यर्थः ॥

चतुर्थरसनेन्द्रियनिरोधव्रतस्वरूपनिरूपणार्थमाह—

असणादिचदुवियप्पे पंचरसे फासुगम्हि णिरवज्जे।
इट्ठाणिट्ठाहारे दत्ते जिब्भाजओऽगिद्धी ॥२०॥

अशनादिचतुर्विकल्पे पंचरसे प्रासुके निरवद्ये ।
इष्टानिष्टाहारे दत्ते जिह्वाजयोऽगृद्धिः ॥ २० ॥

असणादिचदुवियप्पे-अशनमादिर्येषां तेऽशनादयो भोजनादयः, चत्वारश्च ते विकल्पाश्च चतुर्विकल्पाः अशनादयश्चतुर्विकल्पा यस्मिन्नसौ अशनादिचतुर्विकल्पस्तस्मिन्नशनपानखाद्यस्वाद्यभेदे भक्तदुग्धलड्डुकैलादिस्वभेदभिन्ने। पंचरसे-पंच रसा यस्मिन्नसौ पंचरसस्तस्मिन् पंचरसे तिक्तकटुकषायाम्लमधुरभेदभिन्ने लवणस्य मधुररसेऽन्तर्भावः। फासुए-प्रासुके जीवसम्मूर्च्छनादिरहिते। णिरवद्ये-अवद्यादोषान्निर्गतो निरवद्यस्तस्मिन् निरवद्ये पापागमविरहिते कुत्सादिदोषमुक्ते च। इट्ठाणिट्ठ—इष्टोऽभिप्रेतो मनोह्लादकः, अनिष्टोऽनभिप्रेतः मनोदुखदः, इष्टश्च अनिष्टश्चेष्टानिष्टस्तस्मिन्निष्टानिष्टे। आहारे-आहारो बुभुक्षाद्युपशामकं द्रव्यं तस्मिन्नाहारे दत्ते प्राप्ते दातृजनोपनीते। जिब्भाजयो-जिह्वाया जयो जिह्वाजयो रसनेन्द्रियात्मवशीकरणम्। अगिद्धी-अगृद्धिरनाकांक्षा। आहारे अशनादिचतुष्प्रकारे पंचरससमन्विते प्रासुके निरवद्ये च प्राप्ते सति येयमगृद्धिस्तज्जिह्वाजयव्रतं भवतीत्यर्थः ॥

स्पर्शनेन्द्रियनिरोधव्रतस्य स्वरूपं प्रतिपादयन्नुत्तरसूत्रमाह—

जीवाजीवसमुत्थे कक्कडमउगादिअट्ठभेदजुदे ।
फासे सुहे य असुहे फासणिरोहो असंमोहो ॥

जीवाजीवसमुत्थे कर्कशमृदुकाद्यष्टभेदयुते ।
स्पर्शे सुखे वा असुखे स्पर्शनिरोधः असंमोहः ॥२१॥

जीवाजीवसमुत्थे—जीवश्च अजीवश्च जीवाजीवौ जीवाजीवयोः समुत्तिष्ठते सम्भवतीति जीवाजीवसमुत्थस्तस्मिंश्चेतनाचेतनसम्भवे । कक्कडमउगादि अट्ठभेदजुदे-कर्कशः कठिनः, मृदुः कोमलं कर्कशश्च मृदुश्च कर्कशमृदू तावादिर्येषां ते कर्कशमृदादयः अष्टौ च ते भेदाश्चाष्टभेदाः कर्कशमृदादयश्च ते अष्टभेदाश्च कर्कशमृदाद्यष्टभेदास्तैर्युक्तः कर्कशमृदाद्यष्टभेदयुक्तस्तस्मिन् कर्कशमृदुशीतोष्णस्निधरूक्षगुरुलघुगुणविकल्पसमन्विते वनितातूलिकाद्याधारभूते । फासे—स्पर्शे । सुहे—सुखे सुखहेतौ । असुहे य—असुखे च दुःखहेतौ फासणिरोहो—स्पर्शनिरोधः स्पर्शनेन्द्रियजयः । असंमोहो—न सम्मोह असम्मोहोऽनाल्हाद इत्यर्थः । जीवाजीवसमुद्भवे कर्कशमृदाद्यष्टभेदयुक्ते सुखासुखस्वरूपनिमित्ते स्पर्शविषये योऽयमसम्मोहोऽनभिलाषः स्पर्शनेन्द्रियनिरोधव्रतं भवतीत्यर्थः ॥

पंचेन्द्रियनिरोधव्रतानां स्वरूपं निरूप्य षडावश्यकव्रतानां स्वरूपं नामनिर्देशं च निरूपयन्नाह—

समदा थवो य वंदण पाडिक्कमणं तहेव णादव्वं ।

पच्चक्खाण विसग्गो करणीया वासया छप्पि २२

समता स्तवश्च वंदना प्रतिक्रमणं तथैव ज्ञातव्यं ।

प्रत्याख्यानं विसर्गः करणीया आवश्यकाः षडपि २२

समदा—समस्य भावः समता रागद्वेषादिरहितत्वं त्रिकालपंचनमस्कारकरणं वा । थवो=स्तवः चतुर्विंशतितीर्थकरस्तुतिः । वंदणा—वन्दना एकतीर्थकृत्प्रतिबद्धा दर्शनवन्दनादिपंचगुरुभक्तिपर्यन्ता वा । पडिक्कमणं—प्रतिक्रमणं प्रतिगच्छति पूर्वसंयमं येन तत् प्रतिक्रमणं स्वकृतादशुभयोगात्प्रतिनिवृत्तिः दैवसिकादयः सप्तकृतापराधशोधनानि । तहेव—तथैव तेनैव प्रकारेणागमाविरोधेनैव । णायव्वं—ज्ञातव्यं सम्यगवबोद्धव्यम् । पच्चक्खाणं प्रत्याख्यानमयोग्यद्रव्यपरिहारः, तपोनिमित्तं योग्यद्रव्यस्य वा परिहारः । विसग्गो—व्युत्सर्गः देहे ममत्वनिरासः जिनगुणचिन्तायुक्तः कायोत्सर्गः । करणीया-करणीयाअनुष्ठेयाः । आवसया—आवश्यका आवश्यकानि वा, न वशोऽवशः अवशस्य कर्मावश्यकाः निश्चयक्रियाः । छप्पी—षडपि न पंच नापि सप्त । समतास्तववन्दनाप्रतिक्रमणानि तथैव प्रत्याख्यानकायोत्सर्गौ, एवं षडावश्यका निश्चयक्रिया यास्ता नित्यं षडपि कर्तव्याः ।

मूलगुणा इति कृत्वेति सामान्यस्वरूपं प्रतिपाद्य विशेषार्थं प्रतिपादयन्नाह—

जीविदमरणे लाभालाभे संजोयविप्पओगे य ।
बंधुरिसुहदुक्खादिसु समदा सामाइयं णाम २३

जीवितमरणयोः लाभालाभयोः संयोगविप्रयोगे च ।
बंध्वरिसुखदुःखादिषु समता सामायिकं नाम ॥२३॥

जीविदमरणे—जीवितमौदारिकवैक्रियिकादिदेहधारणं, मरणं मृत्युः प्राणिप्राणवियोगलक्षणं जीवितं च मरणं च जीवितमरणे तयोर्जीवितमरणयोः । लाभालाभे—लाभोऽभिलषितप्राप्तिः, अलाभोऽभिलषितस्याप्राप्तिः लाभश्चालाभश्च लाभालाभौ तयोर्लाभालाभयोराहारोपकरणादिषु प्राप्त्वप्राप्त्योः । संजोगविप्पओगे य—संयोग इष्टादिसन्निकर्षः, विप्रयोग इष्टवियोगः संयोगश्च विप्रयोगश्च संयोगविप्रयोगौ तयोः संयोगविप्रयोगयोः, इष्टानिष्टसन्निकर्षासन्निकर्षयोः । बन्धुरिसुखदुक्खादिसु—बन्धुश्च अरिश्च सुखं च दुःखं च बन्ध्वरिसुखदुःखानि तान्यादीनि येषां ते बन्ध्वरिसुखदुःखादयस्तेषु स्वजनमित्रशत्रुसुखदुःखक्षुत्पिपासाशीतोष्णादिषु । समदा—समता चारित्रानुविद्धसमपरिणामः । सामाइयं णाम—सामायिकं नाम भवति । जीवितमरणलाभालाभसंयोगविप्रयोगबन्ध्वरिसुखदुःखादिषु यदेतत्समत्वं समानपरिणामः त्रिकालदेववन्दनाकरणं च तत्सामायिकं व्रतं भवतीत्यर्थः ॥

चतुर्विंशतिस्तवस्वरूपं निरूपयन्नाह—

उसहादिजिणवराणं णामणिरुत्तिं गुणाणुकित्तिं च
काऊण अच्चिदूण य तिसुद्धिपणमो थवो णेओ ॥

ऋषभादिजिनवराणां नामनिरुक्तिं गुणानुकीर्तिं च ।
कृत्वा अर्चयित्वा च त्रिशुद्धिप्रणामः स्तवो ज्ञेयः २४

उसहादिजिणवराणं—ऋषभः प्रथमतीर्थकर आदिर्येषां ते ऋषभादयस्ते च ते जिनवराश्च ऋषभादिजिनवरास्तेषामृषभादिजिनवराणां वृषभादिवर्धमानपर्यन्तानां चतुर्विंशतितीर्थकराणां । णामणिरुत्तिं—नाम्नामभिधानानां निरुक्तिर्नामनिरुक्तिस्तां नामनिरुक्तिं प्रकृतिप्रत्ययकालकारकादिभिर्निश्चयेन अनुगतार्थकथनं ऋषभाजितसम्भवाभिनन्दनसुमतिपद्मप्रभसुपार्श्वचन्द्रप्रभपुष्पदन्तशीतलश्रेयोवासुपूज्यविमलानन्तधर्मशान्तिकुन्थ्वरमल्लिमुनिसुव्रतनम्यरिष्टनेमिपार्श्ववर्धमानाः नामकीर्तनमेतत् । गुणाणुकित्तिं च—गुणानामसाधारणधर्माणामनुकीर्तिरनुख्यापनं गुणानुकीर्तिस्तां गुणानुकीर्तिं च निर्दोषाप्तलक्षणस्तुतिम् लोकस्योद्योतकरा धर्मतीर्थकराः सुरासुरमनुष्येंद्रस्तुताः दृष्टपरमार्थतत्त्वस्वरूपाः विमुक्तघातिकठिनकर्माणः, इत्येवमादिगुणानुकीर्तनं । काऊण—कृत्वा गुणग्रहणपूर्वकं नामग्रहणं प्रकृत्य । अच्चिदूण य—अर्चयित्वा च गन्धपुष्पधूपादिभिः प्रासुकैरानीतैर्द्रव्यरूपैश्च दिव्यैर्निराकृतमलपटलसुगन्धैश्चतुर्विंशतितीर्थकरपदयुगलानामर्चनं कृत्वा-

न्यस्याश्रुतत्वात्तेषामेव ग्रहणम् । तिसुद्धिपणमो—तिस्रश्च ताः शुद्धयश्च त्रिशुद्धयस्ताभिः त्रिशुद्धिभिः प्रणामः त्रिशुद्धिप्रणामः मनोवाक्कायशुद्धिभिः स्तुतेः करणं । थवो स्तवः, चतुर्विंशतितीर्थकरस्तुतिः, नामैकदेशेऽपि शब्दस्य प्रवर्त्तनात् यथा सत्यभामा भामा, भीमो भीमसेनः । एवं चतुर्विंशतिस्तवः स्तवः । ज्ञेयो-ज्ञातव्यः । ऋषभादिजिनवराणां नामनिरुक्तिं गुणानुकीर्तनं च कृत्वा योऽयं मनोवचनकायशुद्धया प्रणामः स चतुर्विंशतिस्तव इत्यर्थः ।

बन्दनास्वरूपं निरूपयन्नाह—

अरहंतसिद्धपडिमातवसुदगुणगुरुगुरूण रादीणं।
किदियम्मेणिदरेण य तियरणसंकोचणं पणमो ॥

अर्हत्सिद्धप्रतिमातपःश्रुतगुणगुरुगुरूणां राधीनाम् ।
कृतकर्मणा इतरेण च त्रिकरणसंकोचनं प्रणामः ॥

अरहंतसिद्धपडिमा—अर्हन्तश्च सिद्धाश्चार्हत्सिद्धास्तेषामर्हत्सिद्धानां प्रतिमा अर्हत्सिद्धप्रतिमा अर्हत्सिद्धप्रतिबिम्बानि स्वरूपेण चार्हन्तः घातिकर्मक्षयादर्हन्तः, अष्टविधकर्मक्षयात्सिद्धाः । अथवा गतिवचनस्थानभेदात्तयोर्भेदः, अष्टमहाप्रातिहार्यसमन्विता अर्हत्प्रतिमा, तद्रहिता सिद्धप्रतिमा । अथवा कृत्रिमा यास्ता अर्हत्प्रतिमाः, अकृत्रिमाः सिद्धप्रतिमाः । तव-

१ श्रुतादेरप्रस्तावत्वात् ।

सुदगुणगुरुगुरूण-तपति दहति शरीरेन्द्रियाणि तपो द्वादशप्रकारमनशनादिकं, श्रुतमंगपूर्वादिरूपं मतिपूर्वकं, गुणा व्याकरणतर्कादिज्ञानविशेषाः, तपश्च श्रुतं च गुणाश्च तपःश्रुतगुणास्तैर्गुरवो महान्तस्तपःश्रुतगुणगुरवः, गुरुश्च येन दीक्षा दत्ता, तेषां, द्वादशविधतपोधिकानां, श्रुताधिकानां, गुणाधिकानां, स्वगुरोः, अर्हत्सिद्धप्रतिमानां च रादीणं-रात्र्यधिकानां दीक्षया महतां च । किदियम्मेण—क्रियाकर्मणा कायोत्सर्गादिकेन सिद्धभक्तिश्रुतभक्तिगुरुभक्तिपूर्वकेण इयरेण य—इतरेण च श्रुतभक्त्यादिक्रियापूर्वकमन्तरेण शिरःप्रणामेन मुंडवंदनया । तियरणसंकोचणं—त्रयश्च ते करणाश्च त्रिकरणा मनोवाक्कायक्रियाः तेषां संकोचनं त्रिकरणसंकोचनं मनोवाक्कायशुद्धक्रियं मनःशुद्ध्या वाक्शुद्ध्या कायशुद्ध्या इत्यर्थः । पणमो—प्रणामः स्तवनम् । अर्हत्सिद्धप्रतिमानां, तपोगुरूणां श्रुतगुरूणां गुणगुरूणां दीक्षागुरूणां दीक्षया महत्तराणां कृतकर्मणतरेण च त्रिकरणसंकोचनं यथा भवति तथा योऽयं प्रणामः क्रियते सा वन्दना नाम मूलगुण इति ॥

अथ किं प्रतिक्रमणमित्याशंकायामाह—

दव्वे खेत्ते काले भावे य कयावराहसोहणयं ।
णिंदणगरहणजुत्तो मणवचकायेण पडिक्कमणं ॥

द्रव्ये क्षेत्रे काले भावे च कृतापराधशोधनम् ।

निंदनगर्हणयुक्तो मनोवचःकायेन प्रतिक्रमणम् ॥

द्रव्ये—द्रव्ये आहारशरीरादिविषये । क्षेत्ते-क्षेत्रे वसतिकाशयनासनगमनादिमार्गविषये । काले—पूर्वाह्णापराह्णदिवसरात्रिपक्षमाससंवत्सरातीतानागतवर्तमानादिकालविषये । भावे—परिणामे चित्तव्यापारविषये । कथावराहसोहणयं—कृतश्चासावपराधश्च कृतापराधस्तस्य शोधनं कृतापराधशोधनं द्रव्यादिद्वारेण व्रतविषयोत्पन्नदोषनिर्हरणं । णिंदणगरहणजुत्तो—निन्दनमात्मदोषाविष्करणं, आचार्यादिषु आलोचनापूर्वकं दोषाविष्करणं गर्हणं, निन्दनं च गर्हणं च निन्दनगर्हणे ताभ्यां युक्तो निन्दनगर्हणयुक्तस्तस्य निन्दनगर्हणयुक्तस्यात्मप्रकाशपरप्रकाशसहितस्य । मणवचिकाएण-मनश्च वचश्च कायश्च मनोवचःकायं तेन मनोवचःकायेन शुभमनोवचःकायक्रियादिभिः । पडिक्कमणं—प्रतिक्रमणं स्वकृतादशुभयोगात्प्रतिनिवृत्तिः, अशुभपरिणामपूर्वककृतदोषपरित्यागः । निन्दनगर्हणयुक्तस्य मनोवाक्कायक्रियाभिर्द्रव्यक्षेत्रकालभावविषये तैर्वा कृतस्यापराधस्य व्रतविषयस्य शोधनं यत्तत् प्रतिक्रमणमिति ॥

प्रत्याख्यानस्वरूपनिरूपणार्थमाह—

णामादीणं छण्हं अजोगपरिवज्जणं तियरणेण ।
पच्चक्खाणं णेयं अणागयं चागमे काले ॥ २७ ॥

नामादीनां षण्णां अयोग्यपरिवर्जनं त्रिकरणैः ।
प्रत्याख्यानं ज्ञेयं अनागतं चागमे काले ॥ २७ ॥

णामादीणं—जातिद्रव्यगुणक्रियानिरपेक्षं संज्ञाकरणं नामाभिधानं तदादिर्येषां ते नामादयस्तेषां नामस्थापनाद्रव्यक्षेत्रकालभावानाम् । छण्हं—षण्णाम् । अजोगपरिवज्जणं—न योग्या अयोग्यास्तेषां नामादीनामयोग्यानां पापागमहेतूनां परिवर्जनं परित्यागः । तियरणेण-त्रिकरणैः शुभमनोवाक्कायक्रियाभिः अशुभाभिधानं कस्यचिन्न करोमि, न कारयामि, नानुमन्ये, तथा वचनेन न वच्मि, नापि कथयामि, नाप्यनुमन्ये, तथा मनसा न चिन्तयामि, नाप्यन्यं भावयामि, नानुमन्ये । एवं अशुभस्थापनामेनां कायेन न करोमि, न कारयामि, नानुमन्ये, तथा वाचा न भणामि, न भाणयामि, नानुमन्ये, तथा मनसा न चिंतयामि, नाप्यन्यं भावयामि, नानुमन्ये । तथा सावद्यं द्रव्यं क्षेत्रं कालं भावं च न सेवे, न सेवयामि, सेवन्तं नानुमन्ये । तथा वचसा त्वं सेवस्वेति न भणामि, न भाणयामि, नापि चिन्तयामीति पच्चक्खाणं प्रत्याख्यानं परिहरणं अयोग्यग्रहणपरित्यागः । णेयं—ज्ञातव्यम् । अणागयं च—अनागतं चानुपस्थितं च अथवा अनागते दूरेणागते काले । आगमे—आगते उपस्थिते । अथवा आगमिष्यति काले सन्निकृष्टे काले मुहूर्तदिवसादिके । नामस्थापनाद्रव्यक्षेत्रकालभावानां षण्णां अनागतानां त्रिकरणैर्यदे-

तत् परिवर्जनं आगते चोपस्थिते च यदेतद्दोषपरिवर्जनं तत्प्रत्याख्यानं ज्ञातव्यमिति । अथवा दूरे भविष्यति काले आगमिष्यति चासन्ने वर्तमाने तेषां षण्णामपि अयोग्यानां वर्जनं प्रत्याख्यानम् । अथवा अनागते काले अयोग्यपरिवर्जनं नामादिषट्प्रकारं यदेतदागतं मनोवचनकायैः तत्प्रत्याख्यानं ज्ञातव्यमिति । अथ प्रतिक्रमणप्रत्याख्यानयोः को विशेष इति चेन्नैष दोषः, अतीतकालदोषनिर्हरणं प्रतिक्रमणम् । अनागते वर्तमाने च काले द्रव्यादिदोषपरिहरणं प्रत्याख्यानमनयोर्भेदः । तपोऽर्थं निरवद्यस्यापि द्रव्यादेः परित्यागः प्रत्याख्यानं, प्रतिक्रमणं पुनर्दोषाणां निर्हरणायैवेति ॥

कायोत्सर्गस्वरूपनिरूपणार्थमाह—

देवस्सियणियमादिसु जहुत्तमाणेण उत्तकालम्हि।
जिणगुणचिंतणजुत्तो काउसग्गो तणुविसग्गो ॥

दैवसिकनियमादिषु यथोक्तमानेन उक्तकाले ।
जिनगुणचिंतनयुक्तः कायोत्सर्गः तनुविसर्गः ॥२८॥

देवस्सियणियमादिसु—दिवसे भवो दैवसिकः स आदिर्येषां ते दैवसिकादयस्तेषु दैवसिकरात्रिकपाक्षिकचातुर्मासिकसांवत्सरिकादिषु नियमेषु निश्चयक्रियासु । जहुत्तमाणेण—उक्तमनतिक्रम्य यथोक्तं, यथोक्तं च तन्मानं च यथोक्तमानं तेन अर्हत्प्रणीतेन कालप्रमाणेन पंचविंशतिसप्तविंशत्य-

ष्टोत्तरशताद्युच्छ्वासपरिमाणेन। उत्तकालम्हि-उक्तः प्रतिपादितः कालः समय उक्तकालस्तस्मिन्नुक्तकाले आत्मीयात्मीयवेलायां। यो यस्मिन् काले कायोत्सर्ग उक्तः स तस्मिन् कर्तव्यः। जिणगुणचिंतणजुत्तो-जिनस्य गुणा जिनगुणास्तेषां चिन्तनं स्मरणं तेन युक्तो जिनगुणचिन्तनयुक्तः, दयाक्षमासम्यग्दर्शनज्ञानचारित्रशुक्लध्यानधर्मध्यानानन्तज्ञानादिचतुष्टयादिगुणभावनासहितः। काउस्सग्गो—कायोत्सर्गः। तणुविसग्गो-तनोः शरीरस्य विसर्गस्तनुविसर्गो देहे ममत्वस्य परित्यागः। दैवसिकादिषु नियमेषु यथोक्तकाले योऽयं यथोक्तमानेन जिनगुणचिन्तनयुक्तस्तनुविसर्गः स कायोत्सर्ग इति ॥

लोच उक्तः स कथं क्रियते इत्यत आह—

वियतियचउक्कमासे लोचो उक्कस्समज्झिमजहण्णो सपडिक्कमणे दिवसे उववासेणेव कायव्वो ॥२९॥

द्वित्रिचतुष्कमासे लोचः उत्कृष्टमध्यमजघन्यः।
सप्रतिक्रमणे दिवसे उपवासेनैव कर्तव्यः॥ २९ ॥

वियतियचउक्कमासे-द्वौ च त्रयश्च चत्वारश्च द्वित्रिचत्वारस्ते च ते मासाश्च द्वित्रिचतुर्मासास्तेषु द्वित्रिचतुर्मासेषु, मासशब्दः प्रत्येकं अभिसम्बध्यते द्वयोर्मासयोः, त्रिषु मासेषु चतुर्षु मासेषु वा सम्पूर्णेषु असंपूर्णेषु वा। द्वयोर्मासयोरतिक्रान्तयोः सतोर्वा। त्रिषु मासेषु अतिक्रान्तेष्वनतिक्रान्तेषु सत्सु वा।

चतुर्षु मासेषु पूर्णेष्वपूर्णेषु वा नाधिकेषु इत्याध्याहारः कार्यः सर्वसूत्राणां सोपस्कारत्वादिति । लोचो—लोचः बालोत्पाटनं हस्तेन मस्तककेशश्मश्रूणामपनयनं जीवसम्मूर्च्छनादिपरिहारार्थं रागादिनिराकरणार्थं स्ववीर्यप्रकटनार्थं सर्वोत्कृष्टतपश्चरणार्थं लिंगादिगुणज्ञापनार्थं चेति । उक्कस्स—उत्कृष्टः, अत्यर्थमाचरणार्थाभिप्रायः । मज्झिम—मध्यमः अजघन्योत्कृष्टः । जहण्ण-जघन्यः मन्दाचरणाभिप्रायः । सपडिक्कमणे-सप्रतिक्रमणे सह प्रतिक्रमणेन वर्तते इति सप्रतिक्रमणस्तस्मिन्सप्रतिक्रमणे । दिवसे—अहोरात्रमध्ये । उववासेण—उपवासेन अशनादिपरित्यागयुक्तेन । एवकारोऽवधारणार्थः । कायव्वो-कर्तव्यः निर्वर्तनीयः । लोचस्य निरुक्तिर्नोक्ता सर्वस्य प्रसिद्धो यतः । सप्रतिक्रमणे दिवसे पाक्षिकचातुर्मासिकादौ उपवासेनैव द्वयोर्मासयोर्यत् केशश्मश्रूत्पाटनं स उत्कृष्टो लोचः । त्रिषु मासेषु मध्यमः, चतुर्षु मासेषु जघन्यः । अथवा विधानमेतत्, एतेषु कालविशेषेषु एवंविशिष्टो लोचः कर्तव्यः । एवकारेणोपवासे लोचोऽवधार्यते न दिवसः, तेन प्रतिक्रमणरहितेऽपि दिवसे लोचस्य सम्भवः । अथवा सप्रतिक्रमणे दिवसे इत्यनेन किमुक्तं भवति लोचं कृत्वा प्रतिक्रमणं कर्तव्यमिति । लुंचृ धातुरपनयने वर्तते तच्चापनयनं क्षुरादिनापि सम्भवति तत्किमर्थमुत्पाटनं मस्तके केशानां श्मश्रूणां चेति चेन्नैष दोषः, दैन्यवृत्तियाचनपरिग्रहपरिभवादिदोषपरित्यागादिति ॥

अचेलकत्वस्वरूपप्रतिपादनायोत्तरसूत्रमाह—

वत्थाजिणवक्केण य अहवा पत्ताइणा असंवरणं ।
णिब्भूसण णिग्गंथं अचेलकं जगदि पूज्जं ॥३०॥

वस्त्राजिनवल्कैश्च अथवा पत्रादिना असंवरणं ।
निर्भूषणं निर्ग्रंथं आचेलक्यं जगति पूज्यम् ॥ ३० ॥

वत्थाजिणवक्केण—वस्त्रं पटचीवरकम्बलादिकं, अजिनं चर्म मृगव्याघ्रादिसमुद्भवं, वल्कं वृक्षादित्वक्, वस्त्रं वाजिनं च वल्कं च वस्त्राजिनवल्कानि तैर्वस्त्राजिनवल्कैः पटचीवरचर्मवल्कलैरपि । अहवा—अथवा । पत्ताइणा—पत्रमादिर्येषां तानि पत्रादीनि तैः पत्रादिभिः पत्रबालतृणादिभिरसंवरणमनावरणमनाच्छादनं । णिब्भूसणं-भूषणानि कटककेयूरहारमुकुटाद्याभरणमंडनविलेपनधूपनादीनि तेभ्यो निर्गतं निर्भूषणं सर्वरागांगविकाराभावः । णिग्गंथं-ग्रन्थेभ्यः संयमविनाशकद्रव्येभ्यो निर्गतं निर्ग्रंथं बाह्याभ्यन्तरपरिग्रहाभावः । अच्चेलक्कं-अचेलकत्वं चेलं वस्त्रं तस्य मनोवाक्कायैः संवरणार्थमग्रहणं जगदिपुज्जं—जगतिपूज्यं महापुरुषाभिप्रेतवंदनीयम् । वस्त्राजिनवल्कलैः पत्रादिभिर्वा यदसंवरणं निर्ग्रंथं निर्भूषणं च तदचेलकत्वं व्रतं जगति पूज्यं भवतीत्यर्थः । अथ वस्त्रादिषु सत्सु को दोषः इति चेन्न हिंसार्जनप्रक्षालनयाचनादिदोषप्रसंगात्, ध्यानादिविघ्नाच्चेति ॥

अस्नानव्रतस्य स्वरूपं प्रतिपादयन्नाह——

ण्हाणादिवज्जणेण य विलित्तजल्लमलसेदसव्वंगं।
अण्हाणं घोरगुणं संजमदुगपालयं मुणिणो॥

स्नानादिवर्जनेन च विलिप्तजल्लमलस्वेदसर्वांगम्।
अस्नानं घोरगुणं संयमद्विकपालकं मुनेः॥ ३१॥

ण्हाणादिवज्जणेण य — स्नानं जलावगाहनं आदिर्येषां ते स्नानादयः स्नानोद्वर्तनाञ्जनजलसेकताम्बूललेपनादयस्तेषां वर्जनं परित्यागः स्नानादिवर्जनं तेन स्नानादिवर्जनेन जलप्रक्षालनसेचनादिक्रियाकृतांगोपांगसुखपरित्यागेन। विलित्तजल्लमलसेदसव्वंगं—जल्लं सर्वांगप्रच्छादकं मलं अंगैकदेशप्रच्छादकं स्वेदः प्रस्वेदो रोमकूपोद्गतजलं, जल्लं च मलं च स्वेदश्च जल्लमलस्वेदास्तैः विलिप्तं सर्वांगं विलिप्तजल्लमलस्वेदसर्वांगं। विलिप्तशब्दस्य पूर्वनिपातः। अथवा जल्लमलाभ्यां स्वेदो यस्मिन् जल्लमलस्वेदं सर्वं च तदंगं च सर्वांगं सर्वशरीरं विलिप्तं च तज्जल्लमलस्वेदं च सर्वांगं च तद्विलिप्तजल्लमलस्वेदसर्वांगम्। अथवा विलिप्ताः सूपचिता जल्लमलस्वेदा यस्मिन् सर्वांगे तद्विलिप्तजल्लमलस्वेदं तच्च तत् सर्वांगं च। अण्हाणं-अस्नानं जलावगाहनाद्यभावः। घोरगुणो-महागुणः प्रकृष्टव्रतं, अथवा घोराः प्रकृष्टा गुणा यस्मिन् तद् घोरगुणम्। संजमदुगपालयं—संयमः कषायेन्द्रियनिग्रहः

संयमस्य द्विकं द्वयं संयमद्विकं तस्य पालकं संयमद्विकपालकं इन्द्रियसंयमप्राणसंयमरक्षकम् । मुणिणो-मुनेः चारित्राभिमानिनो मुनेः । स्नानादिवर्जनेन विलिप्तजल्लमलस्वेदसर्वांगं महाव्रतपूतं यत्तदस्नानव्रतं घोरगुणं संयमद्वयपालकं भवतीत्यर्थः । नात्राशुचित्वं स्यात् स्नानादिवर्जनेन मुनेः व्रतैः शुचित्वं यतः । यदि पुनर्व्रतरहिता जलावगाहनादिना शुचयः स्युस्तदा मत्स्यमकरदुश्चरित्रासंयताः सर्वेऽपि शुचयो भवेयुः । न चैवं, तस्मात् व्रतनियमसंयमैर्यः शुचिः स शुचिरेव । जलादिकं तु बहु कश्मलं नानासूक्ष्मजन्तुप्रकीर्णं सर्वसावद्यमूलं न तत्संयतैर्यत्र तत्र प्राप्तकालमपि सेवनीयमिति ॥

क्षितिशयनव्रतस्य स्वरूपं प्रपंचयन्नाह—

फासुयभूमिपएसे अप्पमसंथारिदम्हि पच्छण्णे ।
दंडंधणुव्व सेज्जं खिदिसयणं एयपासेण ॥३२॥

प्रासुकभूमिप्रदेशे अल्पासंस्तरिते प्रच्छन्ने ।
दंडो धनुरिव शय्या क्षितिशयनं एकपार्श्वेण ॥ ३२ ॥

फासुयभूमिपएसे-प्रगता असवः प्राणा यस्मिन्नसौ प्रासुको जीववधादिहेतुरहितः भूमेः प्रदेशो भूमिप्रदेशः प्रासुकश्चासौ भूमिप्रदेशश्च प्रासुकभूमिप्रदेशस्तस्मिन् जीवहिंसामर्दनकलहसंक्लेशादिविमुक्तभूमिप्रदेशे । अप्पमसंथारिदम्हि—अल्पमपि स्तोकमपि असंस्तरितं अप्रक्षिप्तं यस्मिन् सोऽल्पासंस्त-

रितस्तस्मिन्नल्पासंस्तरिते अथवा अल्पवति संस्तरिते येन बहुसंयमविघातो न भवति तस्मिन् तृणमये काष्ठमये शिलामये भूमिप्रदेशे च संस्तरे गृहस्थयोग्यप्रच्छादनविरहिते आत्मना वा संस्तरिते नान्येन। अथवा आत्मानं मिमीत इति आत्ममं आत्मप्रमाणं संस्तरितं चारित्रयोग्यं तृणादिकं यस्मिन् स आत्ममसंस्तरितप्रदेशस्तस्मिन्। प्रच्छन्ने गुप्तैकप्रदेशे स्त्रीपशुषंडकविवर्जिते असंयतजनप्रचारविवर्जिते। दण्डं—दण्ड इव शयनं दण्ड इत्युच्यते धणु—धनुरिव शयनं धनुरित्युच्यते। शय्याशब्दः प्रत्येकमभिसम्बध्यते। दण्डेन शय्या धनुषा शय्या। अधोमुखेनोत्तानेन शय्या न कर्तव्या दोषदर्शनात्। खिदिसयणं—क्षितौ शयनं क्षितिशयनं। विवर्जितपल्यंकादिकं। एयपासेण—एकपार्श्वेन शरीरैकदेशेन। प्रासुकभूमिप्रदेशे चरित्राविरोधेनाल्पसंस्तरितेऽसंस्तरिते आत्मप्रमाणेनात्मनैव वा संस्तरिते प्रच्छन्ने दण्डेन धनुषा एकपार्श्वेन मुनेर्या शय्या शयनं तत् क्षितिशयनव्रतमित्यर्थः। किमर्थमेतदिति चेत् इन्द्रियसुखपरिहारार्थं तपोभावनार्थं शरीरादिनिस्पृहत्वाद्यर्थं चेति॥

अदन्तमनव्रतस्य स्वरूपं निरूपयन्नाह—

अंगुलिणहावलेहाणिकलीहिं पासाणछल्लियादीहिं
दंतमलासोहणयं संजमगुत्ती अदंतमणं ॥३३॥

अंगुलिनखावलेखनीकालिभिः पाषाणत्वचादिभिः ।
दंतमलाशोधनं संयमगुप्तिरदंतमनम् ॥ ३३ ॥

अंगुलि—अंगुलिः हस्ताग्रावयवः णह—नखः कररुहः । अवलेहणि—अवलिख्यते मलं निराक्रियतेऽनया सा अवलेखनी दन्तकाष्ठं कलिहिं—कलिस्तृणविशेषः, अत्र बहुवचनं द्रष्टव्यं प्राकृतलक्षणबलात् । अंगुलिनखावलेखनीकलयस्तैः । पासाणं—पाषाणं । छल्लि त्वक् वल्कलावयवः । पाषाणं च त्वक् च पाषाणत्वचं तदादिर्येषां ते पाषाणत्वचादयस्तैः पाषाणत्वचादिभिश्च । आदिशब्देन खर्परखण्डतन्दुलवर्तिकादयो गृह्यन्ते । संजमगुत्ती—संयमगुप्तिः । दंतमलासोहणयं—दन्तानां मलं तस्याशोधनमनिराकरणं दन्तमलाशोधनं । संजमगुत्ती संयमस्य गुप्तिः संयमगुप्तिः संयमरक्षा इन्द्रियसंयमरक्षणनिमित्तम् । समुदायार्थः-अंगुलिनखावलेखनीकलिभिः पाषाणत्वचादिभिश्च यदेतदन्तमलाशोधनं संयमगुप्तिनिमित्तं तददन्तमनव्रतं भवतीत्यर्थः । किमर्थं वीतरागख्यापनार्थं सर्वज्ञाज्ञानुपाननिमित्तं चेति ॥

स्थितिभोजनस्य स्वरूपं निरूपयन्नाह—

अंजलिपुडेण ठिचा कुड्डाइविवज्जणेण समपायं ।
पडिसुद्धे भूमितिए असणं ठिदिभोयणं णाम ३४

अंजलिपुटेन स्थित्वा कुड्यादिविवर्जनेन समपादम्

परिशुद्धे भूमित्रिके अशनं स्थितिभोजनं नाम ॥३४॥

अंजलिपुडेण–अञ्जलिरेव पुटं अञ्जलिपुटं तेन अञ्जलिपुटेन पाणिपात्रेण स्वहस्तपात्रेण । ठिच्चा–स्थित्वा ऊर्ध्वाधःस्वरूपेण नोपविष्टेन नापि सुप्तेन न तिर्यग्व्यवस्थितेन भोजनं कार्यमित्यर्थः । ऊर्ध्वजंघः संस्थाय । कुड्डाइविवज्जणेण-कुड्यमादिर्येषां ते कुड्यादयस्तेषां विवर्जनं परिहरणं कुड्यादिविवर्जनं तेन कुड्यादिविवर्जनेन भित्तिविभागस्तंभादीननाश्रित्य । समपायं–समौ पादौ यस्य क्रियाविशेषस्य तत्समपादं चतुरंगुलप्रमाणं पादयोरन्तरं कृत्वा स्थातव्यमित्यर्थः । परिसुद्धे–परिशुद्धे जीवबधादिविरहिते । भूमितिए–भूमित्रिके भूमेस्त्रिकं भूमित्रिकं तस्मिन् स्वपादप्रदेशोत्सृष्टपतनपरिवेषकप्रदेशे । असणं-अशनं आहारग्रहणम्। ठिदिभोयणं-स्थितस्य भोजनं स्थितिभोजनं नामसंज्ञकं भवति। परिशुद्धे भूमित्रिके कुड्यादिविवर्जनेनाञ्जलिपुटेन समपादं यथाभवति तथा स्थित्वा यदेतदशनं क्रियते तत्स्थितिभोजनं नाम व्रतं भवतीति । समपादाञ्जलिपुटाभ्यां न सर्वः एकभक्तकालः त्रिमुहूर्तमात्रोऽपि विशिष्यते किन्तु भोजनं मुनेर्विशिष्यते तेन त्रिमुहूर्तकालमध्ये यदा यदा भुङ्क्ते तदा तदा समपादं कृत्वा अञ्जलिपुटेन भुञ्जीत । यदि पुनर्भोजनक्रियायां प्रारब्धायां समपादौ न विशिष्यते अञ्जलिपुटं च न विशिष्यते हस्तप्रक्षालने कृतेऽपि तदानीं जानूपरिव्यतिक्रमो योऽयमन्तरायः पठितः स न

स्यात् । नाभेरधो निर्गमनं योऽन्तरायः सोऽपि न स्यात् । अतो ज्ञायते त्रिमुहूर्तमध्ये एकत्र भोजनक्रियां प्रारभ्य केनचित् कारणान्तरेण हस्तौ प्रक्षाल्य मौनेनान्यत्र गच्छेत् भोजनाय- यदि पुनः सोऽन्तरायो भुञ्जानस्यैकत्र भवतीति मन्यते जानू- परिव्यतिक्रमविशेषणमनर्थकं स्यात् । एवं विशेषणमुपादीयेत समपादयोर्मनागपि चलितयोरन्तरायः स्यात् नाभेरधो निर्गमनं दूरत एव न सम्भवतीति अन्तरायपरिहारार्थमनर्थकं ग्रहणं स्यात् तथा पादेन किञ्चित् ग्रहणमित्येवमादीन्यन्तरायरूपा- णकानि सूत्राण्यनर्थकानि स्युः । तथाञ्जलिपुटं यदि न भिद्यते करेण किञ्चिद् ग्रहणमन्तरायस्य विशेषणमनर्थकं स्यात् । गृह्णातु वा मा वा अञ्जलिपुटभेदेन अन्तरायः स्यादित्ये- वमुच्यते । तथा जान्वधः परामर्शः सोऽप्यन्तरायस्य विशेषणं न स्यात् । एवमन्येऽपि अन्तरायाः न स्युरिति । न चैतेऽन्त- रायाः सिद्धभक्तावकृतायां गृह्यन्ते सर्वदैव भोजनाभावः स्यात् । न चैवं, यस्मात्सिद्धभक्तिं यावन्न करोति तावदुपवि- श्य पुनरुत्थाय भुङ्क्ते । मांसादीन् दृष्ट्वा च रोदनादिश्रव- णेन च उच्चारादींश्च कृत्वा भुङ्क्ते न च तत्र काकादिपि- डहरणं सम्भवति । अथ किमर्थं स्थितिभोजनमनुष्ठीयते चेन्नैष दोषः यावद्धस्तपादौ मम संवहतस्तावदाहारग्रहणं योग्यं नान्यथेति ज्ञापनार्थं । मिथस्तस्य हस्ताभ्यां भोजनं उपविष्टः सन् भाजनेनान्यहस्तेन वा न भुञ्जेऽहमिति प्रतिज्ञार्थं च, अ- न्यच्च स्वकरतलं शुद्धं भवति अन्तराये सति बहोर्विसर्जनं

च न भवति अन्यथा पात्रीं सर्वाहारपूर्णां त्यजेत् तत्र च दोषः स्यात् । इन्द्रियसंयमप्राणसंयमप्रतिपालनार्थं च स्थितिभोजनमुक्तमिति ॥

एकभक्तस्य स्वरूपं निरूपयन्नाह—

उदयत्थमणे काले णालीतियवज्जियम्हि मज्झम्हि ।
एकम्हि दुअ तिए वा मुहुत्तकालेयभत्तं तु ॥३५॥

उदयास्तमनयोः कालयोः नालीत्रिकवर्जिते मध्ये ।
एकस्मिन् द्वयोः त्रिषु वा मुहूर्तकाले एकभक्तं तु ॥

उदयत्थमणे—उदयश्चास्तमनं च उदयास्तमने तयोः सवितुरुदयास्तमनयोः । काले—कालयोः, अथवा उदयास्तमनकालौ द्वितीयान्तौ द्रष्टव्यौ । णालीतियवज्जियम्हि—नाडया घटिकायास्त्रिकं नाडीत्रिकं तेन नाडीत्रिकेण वर्जितं नाडीत्रिकवर्जितं तस्मिन् घटिकात्रिकवर्जिते । मज्झम्हि—मध्ये । एक्कम्हि—एकस्मिन् । दुअ—द्वयोः । तिए वा—त्रिषु वा । मुहुत्तकाले मुहूर्तकाले । एयभत्तं तु—एकभक्तं तु । उदयकालं नाडीत्रिकप्रमाणं वर्जयित्वा । अस्तमनकाल च नाडीत्रिकप्रमाणं वर्जयित्वा शेषकालमध्ये एकस्मिन् मुहूर्ते द्वयोर्मुहूर्तयोस्त्रिषु वा मुहूर्तेषु यदेतदशनं तदेकभक्तसंज्ञकं व्रतमिति पूर्वगाथासूत्रादशनमनुवर्तते तेन सम्बन्ध इति । अथवा नाडीत्रिकप्रमाणे उदयास्तमनकाले च वर्जिते मध्यकाले त्रिषु

मुहूर्तेषु भोजनक्रियाया या निष्पत्तिस्तदेकभक्तमिति । अथवा अहोरात्रमध्ये द्वे भक्तवेले तत्र एकस्यां भक्तवेलायां आहारग्रहणमेकभक्तमिति । एकशब्दः संख्यावचनः भक्तशब्दोऽपि कालवचन इति । एकभक्तैकस्थानयोः को विशेष इति चेन्न पादविक्षेपाविक्षेपकृतत्वाद्विशेषस्य, एकस्मिन् स्थाने त्रिमुहूर्तमध्ये पादविक्षेपमकृत्वा भोजनमेकस्थानं, त्रिमुहूर्तकालमध्ये एकक्षेत्रावधारणरहिते भोजनमेकभक्तमिति । अन्यथा मूलगुणोत्तरगुणयोरविशेषः स्यात् न चैवं प्रायश्चित्तेन विरोधः स्यात् । तथा चोक्तं प्रायश्चित्तग्रन्थेन, एकस्थानमुत्तरगुणः एकभक्तं तु मूलगुण इति । तत्किमर्थमिति चेन्न इन्द्रियजयनिमित्तं, आकांक्षानिवृत्त्यर्थं, महापुरुषाचरणार्थं चेति । किमर्थं महाव्रतानां भेद इति चेन्न, छेदोपस्थापन-शुद्धिसंयमाश्रयणात् । नापि महाव्रतसमितीनामभेदः सचेष्टाचेष्टाचरणविशेषाश्रयणात् । नाप्यात्मदुःखार्थमेतत्, अन्यथार्थत्वात् भिषक्क्रियावदिति । अथ तपसां गुप्तीनां च कान्तर्भाव इति प्रश्ने उत्तरमाह-अनशनं नाम अशनत्यागः स च त्रिप्रकारः । मनसा च न भुञ्जे न भोजयामि, भोजने व्यापृतस्य नानुमतिं करोमि भुंजे भुङ्क्ष्व वचसा न भणामीति चतुर्विधाहारस्याभिसन्धिपूर्वकं कायेनादानं न करोमि हस्तसंज्ञया प्रवर्तनं न करोमि नानुमतिसूचनं कायेन करोमि इत्येवं मनोवाक्कायक्रियाणां कर्मोपादानकारणानां त्यागोऽनशनं नाम । तथा योगत्रयेण तृप्तिकारिण्या भुजिक्रियाया दर्पवाहिन्या

निराकृतिरवमोदर्यं । तथा आहारसंज्ञाया जयः गृहादिगणनान्यायेन वृत्तिपरिसंख्यानं । तथा मनोवाक्कायक्रियाभीरसगोचरगार्द्धत्यजनं रसपरित्यागः । काये सुखाभिलाषत्यजनं कायक्लेशः । चित्तव्याकुलतापराजयो विवक्तशयनासनम् । स्वकृतापराधगूहनत्यजनं आलोचना । स्वकृतादशुभयोगात्मतिनिवृत्तिः प्रतिक्रमणं । तदुभयोज्झनमुभयम् । येन यत्र वा अशुभयोगोऽ भूत् तन्निराक्रिया ततोऽपगमनं विवेकः । देहे ममत्वनिरासः कायोत्सर्गः । तपोऽनशनादिकम् । असंयमजुगुप्सार्थं प्रव्रज्याहापनं छेदः । पुनश्चारित्रादानं मूलं । कालप्रमाणेन चातुर्वर्ण्यश्रमणसंघाद्बहिष्करणं परिहारः । विपरीतं गतस्य मनसः निवर्तनं श्रद्दधानं, दर्शनज्ञानचरित्रतपसामतीचारा अशुभक्रियास्तासामपोहनं विनयः । चारित्रस्य कारणानुमननं वैयावृत्त्यम् । अंगपूर्वाणां सम्यक् पठनं स्वाध्यायः । शुभविषये एकाग्रचिन्तानिरोधनं ध्यानम् । सावद्ययोगेभ्य आत्मनो गोपनं गुप्तिः । सा च मनोवाक्कायक्रियाभेदात्त्रिप्रकारा । एतेषां सर्वेषां तपसां गुप्तीनां च नित्ययुक्तानां च मूलगुणेष्वेवान्तर्भावः । कादाचित्कानां चोत्तरगुणेष्वन्तर्भाव इति, तथा सम्यक्त्वज्ञानचरित्राणामपि मूलगुणेष्वन्तर्भावस्तैर्विना तेषामभावादिति ॥

मूलगुणफलप्रतिपादनार्थोपसंहारगाथामाह—

एवं विहाणजुत्ते मूलगुणे पालिऊण तिविहेण ।

होऊण जगदि पुज्जो अक्खयसोक्खं लहइ मोक्खं॥


एवं विधानयुक्तान् मूलगुणान् पालयित्वा त्रिविधेन भूत्वा जगति पूज्यः, अक्षयसौख्यं लभते मोक्षम् ॥

एवं—अनेन प्रकारेण। विहाणजुत्ते-विधानयुक्तान् पूर्वोक्तक्रमभेदभिन्नान् सम्यक्त्वाद्यनुष्ठानपूर्वकान्। मूलगुणे—मूलगुणान् पूर्वोक्तलक्षणान्। पालिऊण—पालयित्वा सम्यगनुष्ठाय आचर्य। तिविहेण—त्रिविधेन मनसा वचसा कायेन वा। होऊण—भूत्वा। जगदिपूज्जो—जगति लोके पूज्योऽर्चनीयः। अक्खयसोक्खं अक्षयसौख्यं व्याघातरहितं। लभइ—लभते प्राप्नोति। मोक्खं—मोक्षं अष्टविधकर्मापायोत्पन्नजीवस्वभावम् ॥

इत्याचारवृत्तौ वसुनंदिविरचितायां प्रथमः परिच्छेदः ॥ १ ॥



बृहत्प्रत्याख्यानसंस्तरस्तवाधिकारः ॥ २ ॥



प्रत्याख्यानसंस्तरस्तवप्रतिपत्तृभ्यां सहाभेदं कृत्वात्मनः ग्रंथकर्ता प्रत्याख्यानसंस्तरस्तवनामधेयद्वितीयाधिकारार्थमाह। अथवा षट्कालायतीनां भवन्ति तत्रात्मसंस्कारसल्लेखनोत्तमार्थकालास्त्रयः आराधनायां कथ्यंते। शेषा दीक्षाशिक्षागणपोषणकाला आचारे, तत्राद्येषु त्रिषु कालेषु यद्युपस्थितं मरणं तत्रैवंभूतं परिणामं विदधेहमित्यत आह—

सव्वदुक्खप्पहीणाणं सिद्धाणं अरहदो णमो।
सद्दहे जिणपण्णत्तं पच्चक्खामि य पावयं ॥३७॥

सर्वदुःखप्रहीणेभ्यः सिद्धेभ्यः अर्हद्भ्यो नमः।
श्रद्दधे जिनप्रज्ञप्तं प्रत्याख्यामि च पापकं ॥ ३७ ॥

सव्वदुक्खप्पहीणाणं—सर्वाणि च तानि दुःखानि च सर्वदुःखानि समस्तद्वन्द्वानि तैः प्रहीणा रहिताः। अथवा सर्वाणि दुःखानि प्रहीणानि येषां ते सर्वदुःखप्रहीणास्तेभ्यः। सिद्धाणं—सिद्धेभ्यः सम्यक्त्वाद्यष्टगुणैश्वर्येभ्यः। अरहदो—अर्हद्भ्यश्च नवकेवललब्धिप्राप्तेभ्यश्च चशब्दोऽनुक्तोऽपि द्रष्टव्यः। णमो—नमो नमोऽस्त्वित्यर्थः। सद्दहे—श्रद्दधे रुचिं कुर्वे। जिणपण्णत्तं—कर्मारातीन् जयन्तीति जिनाः तैः प्रज्ञप्तं

कथितं जिनप्रज्ञप्तं जिनकथितं । पच्चक्खामि–प्रत्याख्यामि परिहरे । पावयं–पापकं दुःखनिमित्तम् । सर्वद्वंद्वरहितेभ्यः सिद्धेभ्योऽर्हद्भ्यो नमोस्तु । सर्वज्ञपूर्वक आगमो यतोऽतस्तन्नमस्कारानन्तरमागमश्रद्धानं श्रद्दधे जिनप्रज्ञप्तमित्युक्तं सम्यक्त्वपूर्वकं च यतः आचरणमतः प्रत्याख्यामि सर्वपापकमित्युक्तं । अथवा क्त्वान्तोऽयं नमःशब्दः प्राकृते लोपबलेन सिद्धः । सिद्धानर्हतश्च नमस्कृत्वा जिनोक्तं श्रद्दधे । पापं च प्रत्याख्यामीत्यर्थः । अथवा मिङन्तोऽयं नमःशब्दः तेनैवं सम्बन्धः कर्तव्यः–सर्वदुःखप्रहीणान् सिद्धान् अर्हतश्च नमस्यामि जिनागमं च श्रद्दधे । पापं च प्रत्याख्यामीत्येकक्षणेऽनेककिया एकस्य कर्तुः संभवंति इत्यनेकान्तद्योतनार्थमनेन न्यायेन सूत्रकारस्य कथनमिति ॥

भक्तिप्रकर्षार्थं पुनरपि नमस्कारमाह–

णमोत्थु धुदपावाणं सिद्धाणं च महेसिणं ।
संथरं पडिवज्जामि जहा केवलिदेसियं ॥ ३८ ॥

नमोस्तु धुतपापेभ्यः सिद्धेभ्यः च महर्षिभ्यः ।
संस्तरं प्रतिपद्ये यथा केवलिदेशितम् ॥ ३८ ॥

अथवा प्रत्याख्यानसंस्तरस्तवौ द्वावधिकारौ, द्वे शास्त्रे वा गृहीत्वा एकोऽयं अधिकारः कृतः, कुतो ज्ञायते नमस्कारद्वितयकरणादिति । णमोत्थु—नमोऽस्तु । धुदपावाणं—धुतं विहतं पापं कर्म यैस्ते धुतपापास्तेभ्यः । सिद्धाणं च सिद्धे-

भ्यश्च । महेसिणं-महर्षिभ्यश्च केवलर्द्धिप्राप्तेभ्यः । संथरं—संस्तरं सम्यग्दर्शनज्ञानचारित्रतपोमयं भूमिपाषाणफलकतृणमयं वा । पडिवज्जामि—प्रपद्ये अभ्युपगच्छामि । जहा जथा । केवलिदेसियं—केवलिभिर्दृष्टः केवलिदृष्टस्तं केवलज्ञानिभिः प्रतिपादितमित्यर्थः । धुतपापेभ्यः सिद्धेभ्यो महर्षिभ्यश्च नमोऽस्तु । केवलिदृष्टं संस्तरं प्रतिपद्येऽहं इति पूर्ववत्सम्बन्धः कर्तव्यः । सिद्धानां नमस्कारो मंगलादिनिमित्तं महर्षीणां च तदनुष्ठितत्वाच्चेति ।

प्रतिज्ञानिर्वहणार्थमाह—

जं किंचि मे दुच्चरियं सव्वं तिविहेण वोसरे ।
सामाइयं च तिविहं करेमि सव्वं णिरायारं ॥३९

यत् किंचित् दुश्चरितं सर्वं त्रिविधेन व्युत्सृजामि ।
सामायिकं च त्रिविधं करोमि सर्वं निराकारम् ॥ ३९

जंकिंचि—यत्किंचित् । मे—मम । दुच्चरियं—दुश्चरितं पापक्रियाः । सव्वं—सर्वं निरवशेषं । तिविहेण—त्रिविधेन मनोवचनकायैः । वोसरे—व्युत्सृजामि परिहरामि । सामाइयं च—सामायिकं समन्वीभावं च । तिविहं-त्रिप्रकारं मनोवचनकायगतं कृतकारितानुमतं वा । करेमि—कुर्वेऽहम् । सव्वं—सर्वं सकलम् । णिरायारं—आकारान्निर्गतं निराकारं निर्दिकल्पम् । समस्ताचरणं निर्दोषं यत्स्तोकमपि दुश्चरितं तत्सर्वं व्युत्सृजामि त्रिविधेन, सामायिकं च सर्वं निरतिचारं नि-

विकल्पं च यथा भवति तथा करोमीत्यर्थः, दुश्चरित्रकारणं यत् तत्सर्वं त्रिप्रकारैः मनोवाक्कायैः परिहरामीति।

उत्तरसूत्रमाह—

बज्झब्भंतरमुवहिं सरीराइं च (स) भोयणं।
मणेण वचि कायेण सव्वं तिविहेण वोसरे॥४०॥

बाह्याभ्यंतरमुपधिं शरीरादिंच (स) भोजनम्।
मनसा वचसा कायेन सर्वं त्रिविधेन व्युत्सृजामि॥४०

बज्झं—बाह्यं क्षेत्रादिकम्। अब्भंतरं—अभ्यन्तरमन्तरङ्गं मिथ्यात्वादि। उवहिं—उपधिं परिग्रहम्। सरीराइं च शरीरमादिर्यस्य तच्छरीरादिकम्। सभोयणं—सह भोजनेन वर्तत इति सभोजनं आहारेण सह। मणेणवचिकाएण—मनोवाक्कायैः। सव्वं सर्वम्। तिविहेण—त्रिप्रकारैः कृतकारितानुमतैः। वोसरे—व्युत्सृजामि। बाह्यं शरीरादिं सभोजनं परिग्रहं, अन्तरंगं च मिथ्यात्वादिकं सर्वं त्रिप्रकारैर्मनोवाक्कायैः परिहरामीत्यर्थः।

सव्वं पाणारंभं पच्चक्खामि अलीयवयणं च।
सव्वमदत्तादाणं मेहूण परिग्गहं चेव॥४१॥

सर्वं प्राणारंभं प्रत्याख्यामि अलीकवचनं च।
सर्वमदत्तादानं मैथुनं परिग्रहं चैव॥४१॥

सव्वं पाणारंभं—सर्वं प्राणारम्भं जीववधपरिणामम्।

पच्चक्खामि—प्रत्याख्यामि दयां कुर्वेऽहम् । अलीयवयणं च—अलीकवचनं च । सव्वं सर्वम् । अदत्तादाणं—अदत्तस्यादानं ग्रहणमदत्तादानम् । मेहूण—मैथुनं स्त्रीपुरुषाभिलाषम् । परिग्गहं चेव परिग्रहं चैव बाह्याभ्यन्तरलक्षणं । सर्वं हिंसाऽसत्यस्तेयाब्रह्ममूर्च्छास्वरूपं परित्यजामीत्यर्थः ।

सामायिकं करोमीत्युक्तं तत्किं स्वरूपमित्यतः प्राह—

सम्मं मे सव्वभूदेसु वेरं मज्झं ण केणवि ।
आसा वोसरित्ताणं समाहिं पडिवज्जए ॥ ४२ ॥

साम्यं मे सर्वभूतेषु वैरं मम न केनापि ।
आशाः व्युत्सृज्य इमं समाधिं प्रतिपद्ये ॥४२ ॥

सम्मं—समतासदृशत्वम् । मे—मम । सव्वभूदेसु—सर्वाणि च तानि भूतानि च सर्वभूतानि तेषु शत्रुमित्रादिषु प्राणिषु । वेरं—वैरं शत्रुभावः । मज्झं—मम । ण केण वि—न केनापि । आसा-आशा तृष्णा । वोसरित्ता—व्युत्सृज्य परित्यज्य । अणं—इमम् । समाहिं—समाधिं समाधानं । पडिवज्जामि (पडिवज्जए) प्रतिपद्येऽहम् । वैरं मम न केनापि सह यतः समता मे सर्वभूतेषु अतः आशा व्युत्सृज्य समाधिं प्रतिपद्येऽहमिति ।

कथं वैरं भवतो नास्तीत्यत आह—

खमामि सव्वजीवाणं सव्वे जीवा खमंतु मे ।
मित्ती मे सव्वभूदेसु वेरं मज्झं ण केणवि ॥४३॥

क्षमे सर्वजीवान् सर्वे जीवा क्षमंतां मम ।
मैत्री मे सर्वभूतेषु वैरं मम न केनापि ॥४३॥

खमामि–क्षमेऽहं क्रोधादिकं त्यक्त्वा मैत्रीभावं करोमि सव्वजीवाणं—सर्वे च ते जीवाश्च सर्वजीवास्तान् शुभाशुभपरिणामहेतून् । सव्वे जीवा—सर्वे जीवाः समस्तप्राणिनः । खमंतु क्षमन्तां सुष्ठूपशमभावं कुर्वन्तु । मे–मम । मित्ती–मैत्री मित्रत्वं । सव्वभूदेसु–सर्वभूतेषु । वेरं–वैरं । मज्झ–मम । ण केण वि–न केनापि । सर्वजीवान् क्षमेऽहं, सर्वे जीवा मे क्षमन्तां, एवं परिणामं यतः करोमि ततो वैरं मे न केनाऽपि मैत्री सर्वभूतेष्विति ।

न केवलं वैरं त्यजामि, वैरनिमित्तं च यत् तत्सर्वं त्यजामीत्यतः प्राह—

रायबंधं पदोसं च हरिसं दीणभावयं ।
उस्सुगत्तं भयं सोगं रदिमरदिं च वोसरे ॥ ४४ ॥
रागबंधं प्रद्वेषं च हर्षं दीनभावकम् ।
उत्सुकत्वं भयं शोकं रतिमरतिं च व्युत्सृजामि ॥

रायबंधं–रागस्य रागेण वा बन्धो रागबन्धः स्नेहानुबन्धस्तम् । पदोसं च प्रद्वेषमप्रीतिं च । हरिसं–हर्षं लाभादिना आनन्दम् । दीणभावयं–दीनभावं याच्चादिना करुणाभिलाषदैन्यं च । उस्सुगत्तं–उत्सुकत्वं सरागमनसान्यचिंतनं ।

भयं भीतिम् । सोयं-शोकं इष्टवियोगवशादनुशोचनम् । रइं-रतिमभिप्रेतप्राप्तिम् । अरइं-अरतिं अभिप्रेताऽप्राप्तिं । वोसरे-व्युत्सृजामि । रागानुबन्धद्वेषहर्षदीनभावमुत्सुकत्वमयशोकरत्यरतिं च त्यजामीत्यर्थः ।

ममत्तिं परिवज्जामि णिम्ममत्तिमुवट्ठिदो ॥
आलंबणं च मे आदा अवसेसाइं वोसरे ॥ ४५ ॥

ममतां परिवर्जयामि निर्ममत्वमुपस्थितः ।
आलंबनं च मे आत्मा अवशेषाणि व्युत्सृजामि ४५

ममत्तिं-ममत्वं । परिवज्जामि-परिवर्जामि परिहरेऽहं । णिम्ममत्तिं निर्ममत्वमसंगत्वं । उवट्ठिदो-उपस्थितः । यदि सर्वं भवता त्यज्यते किमालम्बनं भवष्यतीत्यत आह-आलंबणं च आलम्बनं चाश्रयः । मे मम । आदा-आत्मा । अवसेसाइं-अवशेषाणि अधिकानि । वोसरे-व्युत्सृजामि । किं बहुनोक्तेनानन्तज्ञानदर्शनसुखवीर्यरत्नत्रयादिकं मुक्त्वान्यत्सर्वं त्यजामीत्यर्थः ।

आत्मा च भवता किमिति कृत्वा न परित्यज्यते इत्यत आह

आदा हु मज्झ णाणे आदा मे दंसणे चरित्ते य
आदा पच्चक्खाणे आदा मे संवरे जोए ॥ ४६ ॥

आत्मा हि मम ज्ञाने आत्मा मे दर्शने चरित्रे च ।
आत्मा प्रत्याख्याने आत्मा मे संवरे योगे ॥ ४६ ॥

आदा–आत्मा। हु–स्फुटं। मज्झ–मम। णाणे–ज्ञाने। आदा–आत्मा। मे–मम। दंसणे–दर्शने तत्त्वार्थश्रद्धाने आलोके वा। चरित्ते य–चारित्रे च पापक्रियानिवृत्तौ। आदा आत्मा। पच्चक्खाणे–प्रत्याख्याने। आदा–आत्मा। मे–मम। संवरे–आस्रवनिरोधे। जोए –जोगे शुभव्यापारे॥

एओ य मरइ जीवो एओ य उववज्जइ।
एयस्स जाइमरणं एओ सिज्झइ णीरओ॥४७॥

एकश्च म्रियते जीव एकश्च उत्पद्यते।
एकस्य जातिमरणं एकः सिद्ध्यति नीरजाः॥ ४७॥

एओ य–एकश्चासहायश्च। मरइ–म्रियते शरीरत्यागं करोति। जीवो--जीवः चेतनालक्षणः। एओ य–एकश्च। उववज्जइ--उत्पद्यते। एयस्स--एकस्य। जाइ--जातिः। मरणं --मृत्युः। एओ--एकः। सिज्झइ--सिद्धयति मुक्तो भवति। णीरओ--नीरजाः कर्मरहितः।

एओ मे सस्सओ अप्पा णाणदंसणलक्खणो।
सेसा मे बाहिरा भावा सव्वे संजोगलक्खणा॥

एको मे शाश्वत आत्मा ज्ञानदर्शनलक्षणः।
शेषा मे बाह्या भावाः सर्वे संयोगलक्षणाः॥ ४८॥

एओ--एकः। मे--मम। सस्सओ शाश्वतो नित्यः। अप्पा--आत्मा। णाणदंसणलक्खणो --ज्ञानं च दर्शनं च ज्ञा-

नदर्शने ते एव लक्षणं यस्यासौ ज्ञानदर्शनलक्षणः । सेसा मे-शेषाः शरीरादिका मम । वाहिरा--बाह्या अनात्मीयाः । भावा--पदार्थाः । सव्वे--सर्वे समस्ताः । संजोगलक्खणा--संयोगलक्षणाः । अनात्मनीनस्यात्मभावः संयोगः, संयोग एव लक्षणं येषां ते संयोगलक्षणा विनश्वरा इत्यर्थः । ज्ञानदर्शनचारित्रप्रत्याख्यानसंवरयोगेषु ममात्मैव, यतो म्रियते उत्पद्यते च एक एव, यतः एकस्य जातिमरणे, यत एकश्च नीरजाः सन् सिद्धिं याति, यतः शेषाश्च सर्वे भावाः संयोगलक्षणा बाह्या यतः, अत एक एवात्मा ज्ञानदर्शनलक्षणः नित्यो ममेति ।

अथ किमिति कृत्वा संयोगलक्षणो भावः परिहियते इति चेदत आह—

संजोयमूलं जीवेण पत्तं दुक्खपरंपरं ।
तम्हा संजोयसंबंधं सव्वं तिविहेण वोसरे ॥४९॥

संयोगमूलं जीवेन प्राप्ता दुःखपरंपरा ।
तस्मात् संयोगसंबंधं सर्वं त्रिविधेन व्युत्सृजामि ॥४९

संजोयमूलं—संयोगनिमित्तं । जीवेण—जीवेन । पत्तं—प्राप्तं, लब्धं । दुक्खपरपरं—दुःखानां परम्परा दुःखपरम्परा क्लेशनैरन्तर्यम् । तम्हा—तस्मात् । संजोयसंबंधं—(संयोगसम्बन्धम्) । सव्वं—सर्वम् । तिविहेण—त्रिविधेन मनोवचनकायैः । वोसरे—व्युत्सृजामि । संयोगहेतोर्जीवेन यत्

दुःखपरम्परा प्राप्ता, तस्मात् संयोगसम्बन्धं सर्वं त्रिविधेन व्युत्सृजामीत्यर्थः ।

पुनरपि दुश्चरित्रस्य परिहारार्थमाह—

मूलगुणउत्तरगुणे जो मे णाराहिओ पमाएण ।
तमहं सव्वं णिंदे पडिक्कमे आगमिस्साणं ॥ ५० ॥

मूलगुणोत्तरगुणेषु यो मया न आराधितः प्रमादेन ।
तमहं सर्वं निंदामि प्रतिक्रमामि आगामिष्यति ॥५०

मूलगुणउत्तरगुणे—मूलगुणाः प्रधानगुणाः, उत्तरगुणा अभ्रावकाशादयो मूलगुणदीपकास्तेषु मध्ये । जो मे-यः कश्चिन्मया णाराहिओ—नाराधितो नानुष्ठितः । पमाएण—प्रमादेन केनचित्कारणान्तरेण सालसभावात् । तमहं—तच्छब्दः पूर्वप्रक्रान्तपरामर्शी, तदहं मूलगुणाद्यनाराधनम् । सव्वं—सर्वम् । णिंदे—निन्दामि आत्मानं जुगुप्से । पडिक्कमे—प्रतिक्रमामि निर्हरे न केवलमतीतवर्तमानकाले आगमिस्साणं आगमिष्यति च काले । ये गुणास्तेषां मध्ये यो नाराधितो गुणस्तमहं सर्वं निन्दयामि प्रतिक्रमामि चेति ।

तथा—

असंजममण्णाणं मिच्छत्तं सव्वमेव य ममत्तिं ।
जीवेसु अजीवेसु य तं णिंदे तं च गरिहामि ॥ ५१

असंयममज्ञानं मिथ्यात्वं सर्वमेव च ममत्वं ।

जीवेष्वजीवेषु च तत् निंदामि तच्च गर्हे ॥ ५१ ॥

असंजमं—असंयमं पापकारणम् । अणाणं—अज्ञानं अश्रद्धानपूर्वकवस्तुपरिच्छेदम् । मिच्छत्तं—मिथ्यात्वपतत्त्वार्थश्रद्धानम् । सव्वमेव य—सर्वमेव च । ममत्तिं—ममत्वमनात्मीये आत्मीयभावम् । जीवेसु अजीवेसु य—जीवाजीवविषयं च । तं णिंदे—तं निन्दामि । तं च—तच्च । गरिहामि—गर्हेऽहं परस्य प्रकटयामि । मूलोत्तरगुणेषु मध्ये यन्नाराधितं प्रमादतोऽतीतानागतकाले तत्सर्वं निन्दामि प्रतिक्रमामि च । असंयमाज्ञानमिथ्यात्वादि जीवाजीवविषयं ममत्वं च सर्वं गर्हे निन्दामि चेति प्रमाददोषेण दोषास्त्यज्यन्ते ।

प्रमादाः पुनः किं न परिहियन्त इति चेन्न तानपि परिहरामीत्यत आह—

सत्त भए अट्ठ मए सण्णा चत्तारि गारवे तिण्णि ।
तेतीसाच्चासणाओ रायद्दोसं च गरिहामि ॥५२॥

सप्त भयानि अष्टौ मदान् संज्ञाश्चतस्रः गौरवाणि त्रीणि त्रयस्त्रिंशदासादनां रागद्वेषौ च गर्हे ॥ ५२ ॥

सत्तभए—सप्तभयानि । अट्ठमए—अष्टौ मदानि । सण्णा चत्तारि—संज्ञाश्चतस्रः आहारभयमैथुनपरिग्रहाभिलाषान् । गारवे—गौरवाणि ऋद्धिरससातविषयगर्वान् तिण्णि—त्रीणि । तेतीसाच्चासणाओ—त्रिभिरधिका त्रिंशत् त्रयस्त्रिंशत् पदार्थैः सह सम्बन्धः । त्रयस्त्रिंशतां पदार्थानां, अच्चासणा—आसा-

दनाः परिभवास्तास्त्रयस्त्रिंशदासादनाः, अथवा तन्निमित्तत्वात् ताच्छब्द्यन्ते। रायद्दोसं च—रागद्वेषौ च, आत्मनीनानात्मनीनवस्तुप्रीत्यप्रीती। गरिहामि—गर्हे नाचरामीत्यर्थः। सप्तभयाष्टमदसंज्ञागौरवाणि त्रयस्त्रिंशत्पदार्थासादनं च रागद्वेषौ च त्यजामीत्यर्थः।

अथ कानि सप्तभयानि के चाष्टौ मदा इति पृष्टे तत आह—

इहपरलोयत्ताणं अगुत्तिमरणं च वेयणाकम्हिभया
विण्णाणिस्सरियाणा कुलबलतवरूवजाइ मया

इहपरलोकौ अत्राणमगुप्तिर्मरणं वेदनाकस्मिकभयानि विज्ञानमैश्वर्यं आज्ञा कुलबलतपोरूपजातिः मदाः ५३

इहपरलोयं—इह च परश्च इहपरौ तौ च तौ लोकौ चेहपरलोकौ। अत्ताणं—अत्राणमपालनं, इहलोकभयं, परलोकभयं, अत्राणभयं। अगुत्ति—अगुप्तिः प्राकाराद्यभावः मरणं च—मृत्युश्च। वेयणा—वेदना पीडा। अकम्हि—आकस्मिकं घनादिगर्जोद्भवम्। भयशब्दः प्रत्येकमभिसम्बध्यते। इहलोकभयं, परलोकभयं, अत्राणभयं, अगुप्तिभयं, मरणभयं, वेदनाभयं, आकस्मिकभयं चेति। विण्णाण—विज्ञानं अक्षरगन्धर्वादिविषयम्। इस्सरिय—ऐश्वर्यं द्रव्यादिसम्पत्। आणा—आज्ञा वचनानुल्लंघनम्। कुलं—शुद्धपैतृकाम्नायः इक्ष्वाक्वाद्युत्पत्तिर्वा। बलं—शरीराहारादिप्रभवा शक्तिः।

तव—तपः कायसन्तापः, रूवं—रूपं समचतुरस्रसंस्थान-गौरादिवर्णकान्तियौवनोद्भवरमणीयता । जाइ—जातिः मातृकसन्तानशुद्धिः । एतैरेतेषां वा, मया मदा गर्वाः । मदशब्दः प्रत्येकमभिसम्बध्यते । विज्ञानमदः, ऐश्वर्यमदः, आज्ञामदः, कुलमदः, बलमदः, जातिमदः, तपोमदः, रूपमद इति संज्ञाभेदैः सुगमत्वान्न विस्तरः ।

अथ के त्रयस्त्रिंशत्पदार्था येषां त्रयस्त्रिंशदासादनानीत्यत आह—

पंचेव अत्थिकाया छज्जीवणिकाय महव्वया पंच ।
पवयणमाउपयत्था तेतीसच्चासणा भणिया ॥ ५४

पंचैव अस्तिकायाः षड्जीवनिकाया महाव्रतानि पंच प्रवचनमातृकाः पदार्थाः त्रयस्त्रिंशदासादना भणिताः

पंचेव—पंचैव । अत्थिकाया—अस्तिकायाः कायो निचयः परस्परप्रदेशसम्बन्धो येषां तेऽस्तिकायाः अस्तिमन्तो द्रष्टव्या जीवपुद्गलधर्माधर्माकाशाः । कालस्य प्रदेशप्रचयो नास्तीत्यतोऽस्तिकायत्वं नास्ति । छज्जीवणिकाय—षट् च ते जीवनिकायाश्च षड्जीवनिकायाः पृथिवीकायिकादयः । महव्वया पंच—महाव्रतानि पंच । पवयणमाउ—प्रवचनमातृकाः पंचसमितयः त्रिगुप्तयश्च । पयत्था—पदार्थाः जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षपुण्यपापानि । तेतीसच्चासणा—त्रयस्त्रिंशदासादनाः । भणिया—भणिताः पंचास्तिकायादि-

विषयत्वात् पंचास्तिकायादय एवासादना उक्ताः, तेषां वा ये परिभवास्ता आसादना इति सम्बन्धः कर्तव्यः।

आत्मसंस्कारकालं नीत्वा संन्यासालोचनार्थमाचार्यः प्राह-

णिंदामि णिंदणिज्जं गरहामि य जं च मे गरहणीयं
आलोचेमि य सव्वं सब्भंतरबाहिरं उवहिं॥५५॥

निंदामि निंदनीयं गर्हे च यच्च मे गर्हणीयं।
आलोचयामि च सर्वं साभ्यंतरबाह्यं उपधिं॥५५॥

णिंदामि—निन्दामि आत्मन्याविष्करोमि। णिंदणिज्जं—निन्दनीयं आत्माविष्करणयोग्यम्। गरहामिय—गर्हे च आचार्यादीनामाविष्करोमि प्रकटयामि। जंच—यच्च। मे-मम। गरहणीयं—गर्हणीयं परप्रकाशयोग्यं। आलोचेमि य-आलोचयामि चापनयामि चारित्राचारालोचनापूर्वकं गर्हणां वा करोमि। (सव्वं)—सर्वं निरवशेषं। सब्भंतरबाहिरं—साभ्यन्तरबाह्यं। उवहिं-उपधिं च परिग्रहं च। यन्निंदनीयं तन्निंदामि, यद् गर्हणीयं तद्गर्हामि, सर्वं बाह्याभ्यन्तरं चोपधिं आलोचयामीति।

कथमालोचयितव्यमिति चेदत आह—

जह बालो जंपंतो कज्जमकज्जं च उज्जुयं भणदि।
तह आलोचेयव्वं मायामोसं च मोत्तूण॥५६॥

यथा बालो जल्पन् कार्यमकार्यं च ऋजु भणति।

तथा आलोचयितव्यं मायां मृषां च मुक्त्वा ॥ ५६ ॥

जह–यथा। बालो–बालः पूर्वापरविवेकरहितः। जंप्पंतो-जल्पन्। कज्जं–कार्यं स्वप्रयोजनं । अकज्जं च–अकार्यं अप्रयोजनं अकर्तव्यं च। उज्जुयं–ऋजु अकुटिलं। भणइ–भणति। तह–तथा। आलोचेयव्वं–आलोचयितव्यं। मायामोसं च–मायां मृषां च अपन्हवासत्यं च । मोत्तूण–मुक्त्वा। यथा कश्चिद्बालो जल्पन् कुत्सितानुष्ठानमकुत्सितानुष्ठानं च ऋजु भणति, तथा मायां मृषां च मुक्त्वा लोचयितव्यमिति ।

यस्यालोचना क्रियते स किंगुणविशिष्ट आचार्य इति चेदत आह—

णाणम्हि दंसणम्हियतवे चारित्ते य चउसुविअकंपो धीरो आगमकुसलो अपरस्सावी रहस्साणं ॥ ५७ ॥

ज्ञाने दर्शने च तपसि चरित्रे च चतुर्षु अपि अकंपः।
धीरः आगमकुशलः अपरश्रावी रहस्यानाम् ॥५७॥

णाणंहि–ज्ञाने। दंसणंहि य–दर्शने च। तवे तपसि। चरित्ते य–चरित्रे च। चउसुवि–चतुर्ष्वपि। अकंपो–अकंपोऽधृष्यः। धीरो–धीरो धैर्योपेतः । आगमकुसलो–आगमकुशलः स्वसमयपरसमयविचारदक्षः। अपरिस्साई–अपरिश्रावी आलोचितं न कस्यचिदपि कथयति। रहस्साणं–रहसि एकान्ते भवानि रहस्यानि गुह्यानुष्ठितानि । ज्ञानदर्शनतपश्चारित्रेषु चतुर्ष्वपि सम्यक्स्थितो यो रहस्यानामपरिश्रावी

धीरश्चागमकुशलश्च यस्तस्य आलोचना कर्तव्या नान्यस्येति।

आलोचनानन्तरं क्षमणं कर्तुकामः प्राह—

रागेण य दोसेण य जं मे अकदण्हुयं पमादेण।
जो मे किंचिवि भणिओ तमहं सव्वं खमावेमि॥५८

रागेण वा द्वेषेण वा यत् मया अकृतज्ञत्वं प्रमादेन।
यो मया किंचिदपि भणितः तमहं सर्वं क्षमयामि॥५८॥

रागेण य—रागेण वा मायालोभाभ्यां स्नेहेन वा। दोसेण य—द्वेषेण च क्रोधमानाभ्यां अप्रीत्या वा। जंमे—यन्मया अकदण्हुअं—अकृतज्ञत्वं युष्माकमयोग्यमनुष्ठितं। पमादेण—प्रमादेन। जो मे—यो मया। किंचिवि—किंचिदपि। भणिओ—भणितः। तमहं—तं जनं अहं। सव्वं—सर्वं। खमावेमि क्षमयामि संतोषयामि। रागद्वेषाभ्यां मनागपि यन्मया कृतमकृतज्ञत्वं योऽपि मया किंचिदपि भणितस्तमहं सर्वं मर्षयामीति।

क्षमणं कृत्वा क्षपकः संन्यासं कर्तुकामो मरणभेदान् पृच्छति कति मरणानि? आचार्यः प्राह—

तिविहं भणंति मरणं बालाणं बालपंडियाणंच।
तइयं पंडियमरणं जं केवलिणो अणुमरंति॥५९॥

त्रिविधं भणंति मरणं बालानां बालपंडितानां च।
तृतीयं पंडितमरणं यत् केवलिनो अनुम्रियंते॥५९॥

तिविहं– त्रिविधं त्रिप्रकारम् । भणंति–कथयन्ति । मरणं–मृत्युं । बालाणं–बालानां असयतसम्यग्दृष्टीनां । बालपंडियाणं च–बालाश्च ते पंडिताश्च बालपंडिताः । संयतासंयता एकेन्द्रियाविरतेर्बालाः द्वीन्द्रियादिवधविरताः पंडिताः । तइयं–तृतीयं । पंडियमरणं-पंडितमरणं पंडितानां मरणं देहपरित्यागः देहस्यान्यथाभावो वा पंडितमरणं । जं--यत् येन वा । केवलिणो–केवलं शुद्धं ज्ञानं विद्यते येषां ते केवलिनः । अणुमरंति–अनुम्रियन्ते अर्हद्भट्टारका गणधरदेवाश्च त्रिप्रकारं मरणं भणंति । प्रथमं बालमरणं, बालजीवस्वामित्वात्, द्वितीयं बालपंडितमरणं बालपंडितस्वामित्वात्, तृतीयं पंडितमरणं येन केवलिनोऽनुम्रियन्ते संयताश्च पंडितपंडितमरणस्यात्रैव पंडितेन्तर्भावः सामान्यसंयमस्वामित्वाभेदादिति । अन्यत्र बालबालमरणमुक्तं तदत्र किमिति कृत्वा नोक्तं तेन प्रयोजनाभावात् । ये अकुटिला ज्ञानदर्शनयुक्तास्ते एतैर्मरणैर्म्रियन्ते ।

अन्यथाभूताश्च कथमित्युत्तरसूत्रमाह—

जे पुण पणट्ठमदिया पचलियसण्णा य वक्कभावा य
असमाहिणा मरंते ण हु ते आराहया भणिया ॥

ये पुनः प्रणष्टमतिकाः प्रचलितसंज्ञाश्च वक्रभावाश्च ।
असमाधिना म्रियंते न हि ते आराधका भणिताः ॥६०॥

जे पुण–ये पुनः । पणट्ठमदिया–प्रणष्टा विनष्टा मति-

येषां ते प्रणष्टमतिकाः अज्ञानिनः । पचलियसण्णा य–प्रचलिता उद्गता संज्ञा आहारभयमैथुनपरिग्रहाभिलाषा येषां ते प्रचलितसंज्ञकाः । वक्कभावा य–कुटिलपरिणामाश्च । असमाहिणा—असमाधिना आर्तरौद्रध्यानेन । मरंते–म्रियन्ते भवान्तरं गच्छन्ति । ण हु–न खलु । आराधया–आराधकाः कर्मक्षयकारिणः । भणिया—भणिताः कथिताः । ये प्रणष्टमतिकाः प्रचलितसंज्ञा वक्रभावाश्च ते असमाधिना म्रियन्ते स्फुटं न ते आराधका भणिता इति ।

यदि मरणकाले विपरिणामः स्यात्ततः किंस्यादिति पृष्टे आचार्यः प्राह—

मरणे विराहिए देवदुग्गई दुल्लहा य किर बोही ।
संसारो य अणंतो होइ पुणो आगमे काले ॥६१॥

मरणे विराधिते देवदुर्गतिः दुर्लभा च किल बोधिः ।
संसारश्चानंतो भवति पुनरागमिष्यति काले ॥ ६१ ॥

मरणे–मृत्युकाले । विराहिए–विराधिते विनाशिते मरणकाले सम्यक्त्वे विराधित इत्यर्थः मरणकाले सम्यक्त्वस्य यद्विराधनं तन्मरणस्यैव साहचर्यादिति । अथवार्तरौद्रध्यानसहितं यन्मरणं तत्तस्य विराधनमित्युक्तम् । देवदुग्गई–देवदुर्गतिः भवनवासिवानव्यन्तरज्योतिष्कादिषूत्पत्तिः । दुल्लहाय–दुर्लभा दुःखेन लभ्यते इति दुर्लभा च । किर–किल । अयं कि-

लशब्दोऽनेकेष्वर्थेषु विद्यते, तत्र परोक्षे द्रष्टव्यः आगमे एवमु-मित्यर्थः । बोही--बोधिः सम्यक्त्वं रत्नत्रयं वा । संसारो य --संसारश्च चतुर्गतिलक्षणः । अणंतो--अनन्तः अर्द्धपुद्गल-प्रमाणः कुतोऽस्यानन्तत्वं ? केवलज्ञानविषयत्वात् । होइ--भवति पुणो--पुनः । आगमे काले--आगमिष्यति समये । मरणकाले सम्यक्त्वविराधने सति, दुर्गतिर्भवति, बोधिश्च दुर्लभा, आगमिष्यति काले संसारश्चानन्तो भवतीति ।

अत्रैवाभिसम्बंधे प्रश्नपूर्वकं सूत्रमाह—

का देवदुग्गईओ का बोही केण ण बुज्झए मरणं ।
केण व अणंतपारे संसारे हिंडए जीओ ॥६२॥

का देवदुर्गतयः का बोधिः केन न बुध्यते मरणं ।
केन वा अनंतपारे संसारे हिंडते जीवः ॥ ६२ ॥

का देवदुग्गईओ--का देवदुर्गतयः किंविशिष्टा देवदुर्गतयः । का बोही--का बोधिः । केण व--केन च । ण बुज्झए--न बुध्यते । मरण- मृत्युः । केण व--केन च कारणेन । अणन्तपारे अनन्तोऽपरिमाणः पारः समाप्तिर्यस्यासौ अनन्तपारस्तस्मिन् । संसारे--संसरणे । हिंडए हिंडते गच्छति । जीवो--जीवः । हे भट्टारक ! का देवदुर्गतयः का च बोधिः, केन च परिणामेन न बुध्यते मरणं, संसारे च केन कारणेन परिभ्रमति जीवः ।

क्षपकेण पृष्टः आचार्यः प्राह—

कंदप्पमाभिजोग्गं किव्विस सम्मोहमासुरत्तं च।
ता देवदुग्गईओ मरणम्मि विराहिए होंति॥६३॥

कांदर्पमाभियोग्यं कैल्विष्यं स्वमोहं आसुरत्वं च।
ता देवदुर्गतयो मरणे विराधिते भवंति॥ ६३॥

द्रव्यभावयोरभेदं कृत्वा चेदमुच्यते। कंदप्पं कंदर्पस्य भावः कान्दर्पमुपप्लवशीलगुणः। आभिजोग्गं--अभियोगस्य भावः आभियोग्यं तन्त्रमन्त्रादिभीरसादिगार्द्धयं। किव्विस--किल्विषस्य भावः कैल्विष्यं प्रतिकूलाचरणं। सम्मोह--स्वस्य मोहः स्वमोहस्तस्य भावः स्वमोहत्वं, शुनो मोह इव मोहो वेदोदयो यस्य स श्वमोहस्तस्य भावः श्वमोहत्वं सह मोहेन वा वर्तते इति तस्य भावः समोहत्वं मिथ्यात्वभावनात्पर्यं। आसुरत्तं च--असुरत्वं च--असुरस्य भावः असुरत्वं रौद्रपरिणामसहिताचरणं। ता एताः। देवदुग्गईओ--देवदुर्गतयस्तंगुणैस्ताः प्राप्यन्ते इतिकृत्वा तद्व्यपदेशः, कारणे कार्योपचारात्। मरणम्मि—मरणे मृत्युकाले सम्यक्त्वे, विराहिए-विराधिते परिभूते होंति-भवन्ति। सम्यक्त्वे विनाशिते मरणकाले एताः कन्दर्पाभियोग्यकिल्विषस्वमोहासुरदेवदुर्गतयो भवन्तीति।

किं तत्कान्दर्पं इत्यत आह—

असत्तमुल्लावेंतो पण्णावेंतो य बहुजणं कुणइं।

कंदप्प रइसमावण्णो कंदप्पेसु उववज्जइ ॥ ६४ ॥

असत्यमुल्लपन् प्रज्ञापयन् च बहुजनं करोति ।
कंदर्पं रतिसमापन्नः कांदर्पेषु उत्पद्यते ॥ ६४ ॥

असत्तं–असत्यं मिथ्या, उल्लावेंतो–उल्लपन् जल्पन् उल्लापयित्वा, पण्णावेंतो–प्रज्ञापयन् प्रतिपादयन्, बहुजणं बहुजनं बहून् प्राणिनः, कुणइं–करोति । कंदप्पं–कान्दर्पं रइसमावण्णो–रतिं समापन्नः प्राप्तो रतिसमापन्नो रागोद्रेकसहितः । कंदप्पेसु कन्दर्पकर्मयोगादेवा अपि कन्दर्पा नग्नाचार्यदेवास्तेषु उववज्जेइ–उत्पद्यते । यो रतिसमापन्नः असत्यमुल्लपन् तदेव च बहुजनं प्रतिपादयन् कन्दर्पभावनां करोति स कन्दर्पेषूत्पद्यते इत्यर्थः । अथवा असत्यं जल्पन् तदेव च भावयन् आत्मनो बहुजनं करोति योजयति असत्येन यः स कन्दर्परतिसमापन्नः कन्दर्पेषूत्पद्यत इत्यर्थः ।

अथ किमभियोगकर्मेति तेनोत्पत्तिश्च का चेदतः प्राह–

अभिजुंजइ बहुभावे साहू हस्साइयं च बहुवयणं ।
अभिजोगेहिं कम्मेहिं जुत्तो वाहणेसु उववज्जइ ६५

अभियुंक्ते बहुभावान् साधुः हास्यादिकं च बहुवचनं ।
अभियोगैः कर्मभिर्युक्तो वाहनेषु उत्पद्यते ॥ ६५ ॥

अभिजुंजइ–अभियुंक्ते करोति, बहुभावे—बहुभावान्

तंत्रमंत्रादिकान्। साहू–साधुः। हस्साइयं च–हास्यादिकं च हास्यकौत्कुच्यपरविस्मयनादिकं। बहुवयणं–बहुवचनं वाग्जालं। अहिजोगेहिं–अभियोगैः तादर्थ्यात्तच्छब्दत्वं आभिचारकैः, कम्मेहिं कर्मभिः क्रियाभिः। जुत्तो–युक्तस्तन्निष्ठः। वाहणेसु–वाहनेषु गजाश्वमेषमहिषस्वरूपेषु। उववज्जइ–उत्पद्यते जायते। यः साधूरसादिषु गृद्धः मंत्रतंत्रभूतिकर्मादिकमुपयुंक्ते हास्यादिकं बहुवचनं करोति स तैरभियोगैः कर्मभिर्वाहनेषु उत्पद्यत इति।

किल्बिषभावनास्वरूपं तथोत्पत्तिं च प्रतिपादयन्नाह—

तित्थयराणं पडिणीओ संघस्स य चेइयस्स सुत्तस्स
अविणीदो णियडिल्लो किव्विसियेसूववज्जेइ ६६

तीर्थकराणां प्रत्यनीकः संघस्य च चैत्यस्य सूत्रस्य।
अविनीतो निकृतिवान् किल्बिषेषु उत्पद्यते ॥ ६६ ॥

तित्थयराणं–तीर्थं संसारतरणोपायं कुर्वन्तीति तीर्थकराः अर्हद्भट्टारकास्तेषां। पडिणीओ–प्रत्यनीकः प्रतिकूलः। संघस्स य–संघस्य च ऋषियतिमुन्यनगाराणां ऋषिश्रावकश्राविकार्यिकाणां सम्यग्दर्शनज्ञानचारित्रतपसां वा। चेइयस्स–चैत्यस्य सर्वज्ञप्रतिमायाः। सुत्तस्स–सूत्रस्य द्वादशाङ्गचतुर्दशपूर्वरूपस्य अविणीओ–अविनीतः स्तब्धः। णियडिल्लो–निकृतिवान् वंचनाबहुलः प्रतारण–कुशलः। किव्विसेसूव-

वज्जेइ—किल्विषेषूत्पद्यते । पाटहिकादिषु जायते । तीर्थकराणां प्रत्यनीकः संघस्य चैत्यस्य सूत्रस्य वा अविनीतः मायावी च यः स किल्विषकर्मभिः किल्विषिकेषु जायते इति ।

सम्मोहभावनास्वरूपं तदुत्पत्त्या सह निरूपयन्नाह—

उम्मग्गदेसओमग्गणासओमग्गविपडिवण्णो य
मोहेण य मोहंतो संमोहेसूववज्जेदि ॥ ६७ ॥

उन्मार्गदेशको मार्गनाशको मार्गविप्रतिपन्नश्च ।
मोहेन च मोहयन् संमोहेषु उत्पद्यते ॥ ६७ ॥

उम्मग्गदेसओ—उन्मार्गस्य मिथ्यात्वादिकस्य देशकः उपदेशकर्ता उन्मार्गदेशकः । मग्गणासओ मार्गस्य सम्यग्ज्ञानदर्शनचारित्रात्मकस्य णासओ-नाशको विराधको मार्गनाशकः मग्गविपडिवण्णो य—मार्गस्य विप्रतिपन्नो विपरीतः स्वतीर्थप्रवर्तकः मार्गविप्रतिपन्नः । मोहेण य—मोहेन च मिथ्यात्वेन मायाप्रपंचेन वा । मोहंतो मोहयन् विपरीतान् कुर्वन् संमोहेसूववज्जेदि—स्वमोहेषु स्वच्छन्ददेवेषूत्पद्यते । य उन्मार्गदेशकः मार्गनाशकः मार्गविप्रतिकूलश्च मोहेन मोहयन् स सम्मोहकर्मभिः स्वमोहेषु जायते इति ।

आसुरीं भावनां तथोत्पत्तिं च प्रपंचयन्नाह—

खुद्दी कोही माणी मायी तह संकिलिट्ठो तवेचरितेय।

अणुबद्धवेररोई असुरेसूववज्जदे जीवो ॥ ६८ ॥

क्षुद्रः क्रोधी मानी मायावी तथा संक्लिष्टस्तपसि चरित्रे।
अनुबद्धवैररोची असुरेषूपपद्यते जीवो ॥ ६८ ॥

खुद्दो क्षुद्रः पिशुनः। कोही–क्रोधी। माणी–मानी-गर्वयुक्तः। माई–मायावी। तह य–तथा च। संकिलिट्ठो-संक्लिष्टः संक्लेशपरायणः। तवे–तपसि। चरित्ते य–चरित्रे च। अणुबद्धवेररोई–अनुबद्धं वैरं रोचते अनुबद्धवैररोची कषाय-बहुलेषु रुचिपरः। असुरेसूववज्जदे–असुरेषूत्पद्यते अंबावरी-षसंज्ञकभावनेषु। जीवो–जीवः। यः क्षुद्रः, क्रोधी, मानी, मायावी अनुबद्धवैररोची तथा तपसि, चरित्रे च यः संक्लिष्टः सोऽसुरभावनयासुरेषूत्पद्यते इति।

व्यतिरेकद्वारेण बोधिं प्रतिपादयन्नाह—

मिच्छादंसणरत्ता सणिदाणा किण्हलेसमोगाढा
इह जे मरंति जीवा तेसिं पुण दुल्लहा बोही ॥

मिथ्यादर्शनरक्ताः सनिदानाः कृष्णलेश्यामागाढाः।
इह ये म्रियंते जीवाः तेषां पुनः दुर्लभा बोधिः ॥६९॥

मिच्छादंसणरत्ता–मिथ्यात्वदर्शनरक्ताः अतत्त्वार्थरुचयः। सणिदाणा–सह निदानेनाकांक्षया वर्तत इति सनिदानाः। किण्हलेसं–कृष्णलेश्यां अनन्तानुबंध्यिकषायानुरञ्जितयोग-

प्रवृत्तिम् । ओगाढा—आगाढा प्रविष्टा रौद्रपरिणामाः । इह-अस्मिन् । जे—ये । मरंति म्रियन्ते प्राणांस्त्यजन्ति । जीवा-जीवाः प्राणिनः । तेसिं—तेषा । पुणा—पुनः । दुल्लहा-दुर्लभाः । बोही—बोधिः सम्यक्त्वसहितशुभपरिणामः । इह ये जीवाः मिथ्यात्वदर्शनरक्ताः, सनिदानाः, कृष्ण-लेश्यां प्रविष्टाश्च म्रियन्ते तेषां पुनरपि, दुर्लभा बोधिः । उत्कृष्टतोऽर्धपुद्गलपरिवर्तनमात्रात्सम्यक्त्वाविनाभावित्वाद्बो-धेरतस्तादात्म्यं ततो बोधेरेव लक्षणं व्याख्यातमिति ।

अन्वयेनापि बोधेर्लक्षणमाह—

सम्मद्दंसणरत्ता अणियाणा सुक्कलेसमोगाढा ।
इह जे मरंति जीवा तेसिं सुलहा हवे बोही ॥

सम्यग्दर्शनरक्ता अनिदानाः शुक्ललेश्यामागाढाः ।
इह ये म्रियंते जीवाः तेषां सुलभा भवेत् बोधिः ॥७०॥

सम्मद्दंसणरत्ता—सम्यग्दर्शनरक्ताः तत्त्वरुचयः । अणियाणा—अनिदाना इहपरलोकानाकांक्षाः । सुक्क-लेस्सं-शुक्ललेश्यां ओगाढा-आगाढा प्रविष्टाः । इह—अस्मिन् । जे—ये । मरंति म्रियंते । जीवा—जीवाः । तेसिं-तेषां । सुलहा—सुलभा सुखेन लभ्या । हवे—भवेत् । बोही-बोधिः । इह ये जीवाः सम्यक्त्वदर्शनरक्ताः, अनिदानाः, शुक्ललेश्यां प्रविष्टाः सन्तो म्रियन्ते तेषां सुलभा बोधिरिति ।

यद्यपि पूर्वसूत्रेणास्यार्थस्य प्रतीतिस्तथापि द्रव्यार्थिकपर्यायार्थिकशिष्यसंग्रहार्थः पुनरारम्भः एकान्तमतनिराकरणार्थं च।

संसारकारणस्वरूपं प्रतिपादयन्नाह—

जेपुणगुरुपडिणीयाबहुमोहाससबलाकुसीलाय।
असमाहिणा मरंते ते होंति अणंतसंसारा॥

ये पुनः गुरुप्रत्यनीका बहुमोहाः सशबलाः कुशीलाश्च असमाधिना म्रियंते ते भवंति अनंतसंसाराः॥ ७१

जे पुण—ये पुनः। गुरुपडिणीया—गुरूणां प्रत्यनीकाः प्रतिकूलाः गुरुप्रत्यनीकाः। बहुमोहा—मोहप्रचुराः रागद्वेषाभिहताः। ससबला सह शबलेन लेपेन वर्तते इति सशबलाः कुत्सिताचरणाः। कुसीला य—कुशीलाः कुत्सितं शीलं व्रतपरिरक्षणं येषां ते कुशीलाश्च। असमाहिणा असमाधिना मिथ्यात्वसमन्वितार्त्तरौद्रपरिणामेन। मरंते—म्रियन्ते। ते—ते। होंति—भवन्ति ते एवं विशिष्टाः। अणंतसंसारा—अनन्तसंसारा अर्धपुद्गलप्रमाणसंसृतयः। ये पुनः गुरुप्रतिकूलाः, बहुमोहाः कुशीलास्तेऽसमाधिना म्रियन्ते ततश्चानन्तसंसारा भवन्तीति।

अथ परीतसंसाराः कथं भवन्तीति चेदतः प्राह—

जिणवयणे अणुरत्ता गुरुवयणं जे करंति भावेण।
असबल असंकिलिट्ठा ते होंति परित्तसंसारा ७२।

जिनवचने अनुरक्ता गुरुवचनं ये कुर्वंति भावेन ।
अशबला असंक्लिष्टास्ते भवंति परीतसंसाराः ॥

जिणवयणे–जिनस्य वचनमागमः तस्मिन्नर्हत्प्रवचने । अणुरत्ता–अनुरक्ताः सुष्ठु भक्ताः । गुरुवयणं गुरुवचनमादेशं जे करंति–ये कुर्वंति । भावेण-भावेन भक्त्या मंत्रतंत्रशास्त्रानाकांक्षया । असबल—अशवला मिथ्यात्वरहिताः । असंकिलिट्ठा-असंक्लिष्टाः शुद्धपरिणामाः । ते होंति-ते भवंति । परित्तसंसारा-परीतः परित्यक्तः परिमितो वा संसारः चतुर्गतिगमनं येषां यैर्वा ते परीतसंसाराः परित्यक्तसंसृतयो वा । जिनप्रवचने येऽनुरक्ता गुरुवचनं च भावेन कुर्वन्ति, अशबलाः, असंक्लिष्टाः सन्तस्ते परित्यक्तसंसारा भवन्तीति ।

यदि जिनवचनेऽनुरागो न स्यादतः किं स्यादतः प्राह—

बालमरणाणि बहुसो बहुयाणिअकामयाणिमरणाणि । मरिहंति ते वराया जे जिणवयणं ण जाणंति॥

बालमरणानि बहुशो बहुकानि अकामकानि मरणानि मारिष्यंति ते वराका ये जिनवचनं न जानंति ॥७३॥

बालमरणाणि-बालानामतत्त्वरुचीनां मरणानि शरीरत्यागा बालमरणानि । बहुसो-बहुशः बहूनि बहुप्रकाराणि वा । बहुआणि-बहुकानि प्रचुराणि । अकामयाणि-अकामकृतानि

अनभिप्रेतानि मरणाणि-मृत्यून्। मरिहंति-मरिष्यन्ति मृत्युं प्राप्स्यन्तीत्यर्थः। ते वराया-त एवंभूता वराका अनाथाः। जे जिणवयणं-ये जिनवचनं सर्वज्ञागमं। ण जाणंति—न जानन्ति नावबुध्यंते। ये जिनवचनं न जानन्ति ते वराका बालमरणानि बहुप्रकाराणि अकामकृतानि च बहूनि मरणानि प्राप्स्यन्तीति।

अथ कानि तानि बालमरणानीत्यत आह—

सत्थग्गहणं विसभक्खणं च जलणं जलप्पवेसो य
अणयारभंडसेवी जम्मणमरणाणुबंधीणि॥७४॥

शस्त्रग्रहणं विषभक्षणं च ज्वलनं जलप्रवेशश्च।
अनाचारभांडसेवी जन्ममरणानुबंधिनः॥ ७४॥

सत्थग्गहणं-शस्त्रेणात्मनो ग्रहणं मारणं शस्त्रग्रहणं। शस्त्रग्रहणादुत्पन्नं मरणमपि शस्त्रग्रहणं कार्ये कारणोपचारात्। विसभक्खणं-विषस्य मारणात्मकद्रव्यस्य भक्षणमुपयुंजनं विषभक्षणं तथैव सम्बन्धः कर्तव्यः। चः समुच्चयार्थः। जलणं ज्वलनादग्नेरुत्पन्नं ज्वलनं। जलप्पवेसो य—जले पानीये प्रवेशो निमज्जनं निरुच्छ्वासं जलप्रवेशश्च तस्माज्जातं स एव वा मरणं। अणयारभंडसेवी—अनाचारभांडसेवी न आचारोऽनाचारः पापक्रिया स एव भांडं द्रव्यं तत्सेवत इत्यनाचारभांडसेवी मरणेन सम्बन्धः। अथवा पुरुषेण

सम्बन्धः अनाचारभांडसेवी तस्य । जम्मणमरणाणुबंधीणी जन्मोत्पत्तिः, मरणं मृत्युस्तयोरनुबन्धः सन्तानः स येषां विद्यते तानि जन्ममरणानुबन्धीनि संसारकारणानीत्यर्थः । एतानि मरणानि जन्ममरणानुबन्धीनि अनाचारभांडसेवीनि यतोऽतो बालमरणानीति । अथवा अनाचारसेवीनि एतानि मरणानि संसारकारणानीति न सदाचारस्य ।

एवं श्रुत्वा क्षपकः संवेगनिर्वेदपरायण एवं चिन्तयति—

उड्ढमधो तिरियम्हिदुकदाणिबालमरणाणिबहुगाणि दंसणणाणसहगदो पंडियमरणं अणुमरिस्से।७५।

ऊर्ध्वमधस्तिर्यक्षु तु कृतानि बालमरणानि बहुकानि।
दर्शनज्ञानसहगतः पांडितमरणं अनुमरिष्यामि ७५

उड्ढं-ऊर्ध्वं ऊर्ध्वलोके । अधो-अधसि अधोलोके नरकभवनव्यन्तरज्योतिष्ककल्पे । तिरियंहि दु-तिर्यक्षु च एकेन्द्रियादिपंचेन्द्रियपर्यन्तजातिषु । कदाणि-कृतानि प्राप्तानि बालमरणानि । बहुगाणि-बहूनि । दंसणणाणसहगदो-दर्शनज्ञानाभ्यां सार्धं, गदो-गतः प्राप्तः, पंडियमरणं-पण्डितमरणं शुद्धपरिणामचारित्रपूर्वकप्राणत्यागं । अणुमरिस्से-अनुमरिष्यामि संन्यासं करिष्यामि । ऊर्ध्वाधस्तिर्यक्षु च बहूनि बालमरणानि यतो मया प्राप्तानि, अतो दर्शनज्ञानाभ्यां सार्धं पण्डितमरणं गतोऽहं मरिष्यामीति ।

एतानि चाकामकृतानि मरणानि स्मरन पण्डितमरणमनुमरिष्यामीत्यत आह—

उव्वेयमरण जादीमरणं णिरएसु वेदणाओ य।
एदाणि संभरंतो पंडियमरणं अणुमरिस्से ॥७६॥

उद्वेगमरणं जातिमरणं निरयेषु वेदनाश्च।
एतानि संस्मरन् पंडितमरणं अनुमरिष्यामि ॥ ७६ ॥

उव्वेयमरण—उद्वेगमरणं इष्टवियोगानिष्टसंयोगाभ्यां त्रासेन वा मरणं। जादीमरणं—जातिमरणं उत्पन्नमात्रस्य मृत्युर्गर्भस्थस्य वा। णिरएसु नरकेषु। वेदणाओय—वेदनाश्च पीडाश्च। एदाणि—एतानि। संभरंतो—संस्मरन्। पंडिदमरणं—पंडितमरणं। अणुपरिस्से—अनुमरिष्यामि प्राणत्यागं करिष्यामि। एताणि उद्वेगजातिमरणानि नरकेषु वेदनाश्च संस्मरन पंडितमरणं प्राप्तः सन् प्राणत्यागं करिष्यामीति।

किमर्थं पंडितमरणं मरणेषु शुभतमं यतः—

एक्कं पंडिदमरणं छिंदादि जादीसयाणि बहुगाणि
तं मरणं मरिदव्वं जेण मदं सुम्मदं होदि ॥७७॥

एकं पंडितमरणं छिनत्ति जातिशतानि बहूनि।
तन्मरणं मर्तव्यं येन मृतं सुमृतं भवति ॥ ७७ ॥

एक्कं—एकं। पंडिदमरणं—पंडितमरणं। छिंददि—छिनत्ति

जादीसयाणि–जातिशतानि । वहुगाणि–बहूनि । तं–तत्तेन वा । मरणं–शरीरेंद्रिययोर्वियोगः । मरिदव्वं–मर्तव्यं मरणं प्राप्तव्यं । जेण–येन । मदं–मृतं । सुम्मदं–सुष्ठुमृतं । होइ–भवति । एकं पण्डितमरणं जातिशतानि बहूनि छिनत्ति यतोऽतस्तेन मरणेन मर्तव्यं येन पुनरुत्पत्तिर्न भवति तद्वानुष्ठातव्यं येन न पुनर्जन्म । किमुक्तं भवति--पंडितमरणमनुष्ठेयमिति ।

यदि संन्यासे पीडा-क्षुधादिकोत्पद्यते ततः किं कर्तव्यमित्याह—

जइ उप्पज्जइ दुःखं तो दट्ठव्वो सभावदो णिरये ।
कदमं मए ण पत्तं संसारे संसरंतेण ॥ ७७ ॥

यदि उत्पद्यते दुःखं ततो द्रष्टव्यः स्वभावतो नरके ।
कतमत् मया न प्राप्तं संसारे संसरता ॥ ७८ ॥

जइ-यदि । उप्पज्जइ– उत्पद्यते । दुक्खं–दुःखमसातं । तो ततः । दट्ठव्वो–द्रष्टव्यो मनसालोकनीयः । सभावदो-स्वभावतः स्वरूपं "दृश्यतेऽन्यत्रापी" ति तस्, प्राकृतबलादक्षराधिक्यं वा । णिरए–नरकस्य नरके वा । कदमं--कियदिदं कतमत् । मए–मया । ण पत्तं–न प्राप्तं । अथवा, अणं-ऋणं कृतं मया यत्तन्मयैव प्राप्तं । संसारे–जातिजरामरणलक्षणे । संसरंतेण–संसरता परिभ्रमता [illegible] यदुत्पद्यते

क्षुदादि दुःखं ततो नरकस्य स्वभावो द्रष्टव्यो यतः संसारे संसरता मया किमिदं न प्राप्तं यावता हि प्राप्तमेवेति चिन्तनीयमिति।

यथा प्रश्नं तथैव प्रतिपादयति—

संसारचक्कवालम्मि मए सव्वेपि पुग्गला बहुसो।
आहारिदा य परिणामिदा य ण य मे गदा तित्ती

संसारचक्रवाले मया सर्वेपि पुद्गला बहुशः।
आहृताश्च परिणामिताश्च न च मे गता तृप्तिः ॥७९

संसारचक्कवालम्मि—संसारचक्रवाले चतुर्गतिजन्मजरामरणावर्ते। मए-मया। सव्वेवि-सर्वेऽपि। पुग्गला-पुद्गला दधिखंडगुडौदननीरादिका। बहुसो-बहुशः बहुवारान् अनन्तवारान्। आहरिदा य-आहृता गृहीता भक्षिताः। परिणामिदा य-परिणामिताश्च जीर्णाश्च खलरसस्वरूपेण गमिता इत्यर्थः। ण य मे-न च मम। गदातित्ती-गता तृप्तिः सन्तोषो न जातः, प्रत्युत आकांक्षा जाता। संसारचक्रवाले सर्वेऽपि पुद्गला बहुशः आहृताः परिणामिताश्च मया न च मम गता तृप्तिरिति चिन्तनीयम्।

कथं न गता तृप्तिर्यथा—

तिणकट्ठेण व अग्गी लवणसमुद्दो णदीसहस्सेहिं।
ण इमो जीवो सक्को तिप्पेदुं कामभोगेहिं ॥ ८० ॥

तृणकाष्ठैरिवाग्निः लवणसमुद्रो नदीसहस्रैः !
न अयं जीवः शक्यः तृप्तुं कामभोगैः ॥ ८० ॥

तिणकट्ठेण व—तृणकाष्ठैरिव अग्गी—अग्निः । लवणसमुद्दो लवणसमुद्रः । णदीसहस्सेहिं—नदीसहस्रैश्चतुर्दशभिः सहस्रैर्द्विगुणद्विगुणैर्नदीनां समन्विताभिर्गंगासिंध्वादिचतुर्दशनदीभिः सागरो न पूर्णः । ण इमो जीवो—नायं जीवः सक्को—शक्यः । तिप्पेउं—तृप्तुं प्रीणयितुं । कामभोगेहिं—कामभोगैः, ईप्सितसुखाङ्गैराहारस्त्रीवस्त्रादिभिः । यथा अग्निः तृणकाष्ठैः, लवणसमुद्रश्च नदीसहस्रैः प्रीणयितुं न शक्यः तथा जीवोऽपि कामभोगैरिति ॥ ८० ॥

किं परिणाममात्राद्बन्धो भवति ? भवतीत्याह

कांखिदकलुसिदभूदो कामभोगेसु मुच्छिदो संतो।
अभुंजंतोवि य भोगे परिणामेण णिवज्झेइ ॥ ८१

कांक्षितकलुषितभूतः कामभोगेषु मूर्च्छितः सन् ।
अभुंजानोपि च भोगान् परिणामेन निबध्यते ॥८१॥

णिबंधदि इति वा पाठान्तरम् । कंखिद—कांक्षितः कांक्षास्य संजाता तां करोतीति वा कांक्षितः । कलुसिद—कलुषितः रागद्वेषाद्युपहतः । भूदो—भूतः सन् । कामभोगेसु—कामभोगेषु । मुच्छिदो मूर्च्छितः । संतो सन् ।

अभुंजनो वि य—अभुञ्जानोऽपि च असेवमानोऽपि च । भोगे भोगान् सांसारिकसुखहेतून् । परिणामेण परिणामेन चित्तव्यापारेण । णिबज्झेइ निबध्यते कर्मणा परवशः क्रियते-कर्म वा बध्नाति । कामभोगेषु मूर्च्छितः सन् कांक्षितः कलुषीभूतश्च भोगान्भुंजानोऽपि जीवः परिणामेन कर्म बध्नाति बध्यते वा कर्मणेति ॥ ८१ ॥

किमिच्छामात्रेणाभुंजानस्यापि पापं भवतीत्याह—

आहारणिमित्तं किर मच्छा गच्छंति सत्तमिं पुढविं
सच्चित्तो आहारो ण कप्पदि मणसावि पत्थेदुं ८२

आहारनिमित्तं किल मत्स्या गच्छंति सप्तमीं पृथ्वीं
सचित्तं आहारो न कल्प्यते मनसापि प्रार्थयितुम्॥८२॥

आहारणिमित्तं—आहारकारणात् । किर—किल आगमे कथितं नात्र संशयवचनमेतत् निश्चयवचनमेव । मच्छा मत्स्याः गच्छंति यांति प्रविशंति । सत्तमिं सप्तमीं । पुढविं पृथिवीं अवधिस्थानं । सच्चित्तो सह चित्तेन वर्तत इति सचित्तः सावद्योऽयोग्यः प्राणिघातादुत्पन्नः । आहारो भोजनं । न कप्पदि—न कल्पते न योग्यो भवति । मणसावि—मनसापि चित्तव्यापारेणापि । पत्थेदुं प्रार्थयितुं याचयितुं । आहारनिमित्तं मत्स्याः शालिसिक्थादयो निश्चयेन सप्तमीं पृथिवीं गच्छंति यतोऽतो मनसापि प्रार्थयितुं सावद्याहारो न कल्पते इति ॥ ८२ ॥

यतो मनसापि सावद्याहारो न योग्योऽतो भवान् शुद्ध-परिणामं कुर्यादित्याचार्यः प्राह—

पुव्वं कदपरियम्मो अणिदाणो ईहिदूण मदिबुद्धी
पच्छा मलिदकसाओ सज्जो मरणं पडिच्छाहि ८३

पूर्वं कृतपरिकर्मा अनिदानः ईहित्वा मतिबुद्धिभ्याम्।
पश्चात् मलितकषायः सद्यो मरणं प्रतीच्छ ॥८३॥

पुव्वं कदपरियम्मो—पूर्वं प्रथमतरं कृतमनुष्ठितं परिकर्म तपोऽनुष्ठानं येनासौ पूर्वकृतपरिकर्मा आदावनुष्ठिततपश्चरणः अणियाणो—अनिदान इहलोकपरलोकसुखानाकांक्षः। ईहिदूण—ईहित्वा चेष्टित्वा उद्योगं कृत्वा। मदिबुद्धी—मतिबुद्धिभ्यां प्रत्यक्षानुमानाभ्यां परोक्षप्रत्यक्षसम्पन्नः। पच्छा—पश्चात्। मलियकषाओ—मथितकषायः क्षमासम्पन्नः। सज्जो—सद्यः तत्परः कृतकृत्यो वा। मरणं—समाधिमृत्युं स्वाध्यायमरणं वा। पडिच्छाहि—प्रतीच्छानुतिष्ठ। विपरिणामान्नरकं गम्यते यतोऽतः प्रत्यक्षपरोक्षप्रमाणाभ्यामागमे निश्चयं कृत्वा पूर्वकृतपरिकर्मानिदानश्च सन् मथितकषायश्च सन् सद्यः मरणं प्रतीच्छेति ॥ ८३ ॥

पुनरपि शिक्षां ददाति—

हंदि चिरभाविदावि य जे पुरुसा मरणदेसयालम्मि

पुव्वकदकम्मगरुयत्तणेण पच्छा परिवडंति ८४ ॥

जानीहि चिरभाविता अपि च ये पुरुषा मरणदेशकाले पूर्वकृतकर्मगुरुकत्वेन पश्चात् प्रतिपतंति ॥ ८४ ॥

हंदि—जानीहि—सामान्यमरणं वा । चिरभाविदावि य-चिरभाविता अपि देशोनपूर्वकोटी कृताचरणा अपि । जे—यस्त्वं वा पुरुषैः सह सम्बन्धाभावात् । पुरिसा—पुरुषा मनुष्याः । मरणदेशयालम्मि—मरणकाले मरणदेशे वा । अथवा मरणकाल एवानेनाभिधीयते । पुव्वकदकम्मगरुयत्तणेण—पूर्वस्मिन् कृतं कर्म पूर्वकृतकर्म तेन गुरुकं तस्य भावः पूर्वकृतकर्मगुरुकत्वं तेन तन्मिन्नर्जितपापकर्मणा । पच्छा—पश्चात् परिवडंति—प्रतिपतन्ति रत्नत्रयात् पृथग्भवन्ति यतः ॥ ८४ ॥

तह्मा चंदयवेज्झस्स कारणेण उज्जदेण पुरिसेण ।
जीवो अविरहिदगुणो कादव्वो मोक्खमग्गम्मि

तस्मात् चन्द्रकवेध्यस्य कारणेन उद्यतेन पुरुषेण ।
जीवो अविरहितगुणः कर्तव्यः मोक्षमार्गः ॥८५॥

तम्हा—तस्मात् । चंदयवेज्झस्स—चंद्रकवेध्यस्य । कारणेन निमित्तेन । उज्जदेण—उद्यतेन उपर्युक्तेन । पुरिसेण—पुरुषेण । जीवो—जीवः आत्मा । अविरहिदगुणो—अविरहितगुणोऽविराधितपरिणामः । कादव्वो—कर्तव्यः । मोक्खम-

ग्गम्मि—मोक्षमार्गे—सम्यक्त्वज्ञानचारित्रेषु । यतश्चिरभाविता अपि पुरुषा मरणदेशकाले पूर्वकृतकर्मगुरुकत्वेन पश्चात् प्रतिपतन्ति तस्मात् यथा चन्द्रकवेध्यनिमित्तं जीवोऽविरहितगुणः क्रियते तथोद्यतेन पुरुषेणात्मा मोक्षमार्गे कर्तव्य इत्येवं जानीहि निश्चयं कुर्विति ॥ ८५ ॥

चन्द्रकवेध्यनिमित्तं जीवेऽविरहितगुणे कृते किंकृतं तेन चन्द्रकवेध्यस्य कर्तारं—

कणयलदा णागलदा विज्जुलदा तहेव कुंदलदा ।
एदा विय तेण हदा मिथिलाणयरिए महिंदयत्तेण
सायरगो बल्लहगो कुलदत्तो वड्डमाणगो चेव ।
दिवसेणिक्केण हदा मिहिलाए महिंददत्तेण ॥८७॥

कनकलता नागलता विद्युल्लता तथैव कुंदलता ।
एता अपि च तेन हता मिथिलानगर्यां महेंद्रदत्तेन॥८६
सागरको बल्लभकः कुलदत्तः वर्धमानकः चैव ।
दिवसेनैकेन हता मिथिलायां महेंद्रदत्तेन ॥ ८७ ॥

मिथिलानगर्यां महेन्द्रदत्तेन एताः कनकलतानागलताविद्युल्लतास्तथा कुन्दलता चैकहेलया हताः तथा तस्यां नगर्यांतेनैव महेंद्रदत्तेन सागरक-वल्लभक-कुलदत्तक-वर्धमानका हतास्तस्मात् यतिना समाधिमरणे यत्नः कर्तव्यः । कथानिका

चात्र व्याख्येया आगामोपदेशात् यत्नाभावे पुनर्यथा एतल्लोकानां भवति तथा यतीनामपि ॥ ८६ ॥ ८७ ॥

किं तत् ! इत्याह—

जहणिज्जावयरहियाणावाओवररदणसुपुण्णाओ पट्टणमासण्णाओ खु पमादमूला णिबुड्डंति ८८॥

यथा निर्यापकरहिता नावो वररत्नसुपूर्णाः।
पत्तनमासन्नाः खलु प्रमादमूला निबुडंति ॥ ८८ ॥

जह–यथा। णिज्जावयरहिया–निर्यापकरहिताः कर्णधारविरहिताः। णावाओ–नावः पोतादिकाः। वररदणसुपुण्णाओ श्रेष्ठरत्नसुपूर्णाः। पट्टणमासण्णाओ-पत्तनमासन्ना वेलाकूलसमीपं प्राप्ताः। खु–स्फुटं। पमादमूला–प्रमादः शैथिल्यं स्थूलं कारणं यासां ताः प्रमादमूलाः। णिबुड्डंति–निमज्जन्ति विनाशमुपयांति। यथा नावः पत्तनमासन्नाः कर्णधाररहिताः वररत्नसम्पूर्णाः, प्रमादकारणात् सागरे निमज्जन्ति तथा क्षपकनावः सम्यग्ज्ञानदर्शनचारित्ररत्नसम्पूर्णाः सिद्धिसमीपीभूतसन्यासपत्तनमासन्ना निर्यापकाचार्यरहिता प्रमादनिमित्तात् संसारसागरे निमज्जन्ति तस्माद्यत्नः कर्तव्य इति ॥ ८८ ॥

कथं यत्नः क्रियते यावता हि तस्मिन् कालेऽभ्रावकाशादिकं न कर्तुं शक्यते इत्याह—

बाहिरजोगविरहिओ अब्भंतरजोगझाणमालीणो
जह तम्हि देसयाले अमूढसण्णो जहसु देहं ॥८९॥

बाह्ययोगाविरहितः अभ्यंतरयोगध्यानमालीनः ।
यथा तस्मिन् देशकाले अमूढसंज्ञः जहीहि देहम्॥ ८९

बाहिरजोगविरहिदो–बाह्याश्च ते योगाश्च बाह्ययोगा अभ्रावकाशादयस्तै विरहितो हीनो बाह्ययोगविरहितः । अब्भंतरजोगझाणमालीणो–अभ्यंतरयोगं अन्तरंगपरिणामं ध्यानं एकाग्रचिन्तानिरोधनं आलीनः प्रविष्टः । जह–यथा । तम्हि–तस्मिन् । देसयाले–देशकाले संन्यासकाले । अमूढसण्णो–अमूढसंज्ञः आहारादिसंज्ञारहितः । जहसु–जहीहि त्यज । देहं–शरीरं । बाह्ययोगविरहितोऽपि, अभ्यन्तरध्यानयोगप्रविष्टः सन् तस्मिन् देशकाले अमूढसंज्ञो यथा भवति तथा शरीरं जहीहि ॥ ८९ ॥

अमूढसंज्ञके शरीरत्यागे सति किं स्यात् ! इत्यतः प्राह—

हंतूण रागदोसे छेत्तूण य अट्ठकम्मसंकलियं।
जम्मणमरणरहट्टं भेत्तूण भवाहिं मुच्चिहसि ॥९०

हत्वा रागद्वेषौ छित्त्वा च अष्टकर्मशृंखलां
जन्ममरणारहट्टं भित्त्वा भयेभ्यो मोक्ष्यसे ॥ ९० ॥

हंतूण–हत्वा । रागदोसे–रागद्वेषौ अनुरागाप्रीती । छे-

त्तूणय–छित्त्वा च। अट्ठकम्मसंखलियं–अष्टकर्मशृङ्खलाः। जम्मणमरणारहट्टं–जन्ममरणारहट्टं जातिमृत्युघटीपत्रं। भेत्तूण–भित्त्वा। भवाहि–भवेभ्यो भवैर्वा। मुच्चिहिसि–मोक्ष्यसे मुञ्चसि वा। रागद्वेषौ हत्वा, अष्टकर्म शृंखलाश्च छित्त्वा जन्ममरणारहट्टं च भित्त्वा, भवेभ्यो मोक्ष्यसे इत्येतत्स्यादिति॥९०॥

यद्येवं—

सव्वमिदं उवदेसं जिणदिट्ठं सद्दहामि तिविहेण।
तसथावरखेमकरं सारं णिव्वाणमग्गस्स॥९१॥

सर्वमिमं उपदेशं जिनदृष्टं श्रद्दधे त्रिविधेन
त्रसस्थावरक्षेमकरं सारं निर्वाणमार्गस्य॥ ९१॥

सव्वमिदं–सर्वमिमं। उवदेसं–उपदेशमागमं। जिणदिट्ठं–जिनदृष्टं कथितं वा। सद्दहामि–श्रद्दधे, तस्मिन् रुचिं करोमीति। तिविहेण–त्रिविधेन। तसथावरखेमकरं–त्रसन्ति उद्विजन्तीति त्रसा द्वीन्द्रियादिपंचेन्द्रियपर्यन्ताः। स्थानशीलाः स्थावराः पृथिवीकायिकादिवनस्पतिपर्यन्ताः। अथवा त्रसनामकर्मोदयात् त्रसाः स्थावरनामकर्मोदयात्स्थावराः तेषां क्षेमं दयां सुखं करोतीति त्रसस्थावरक्षेमकरस्तं सर्वजीवदयाप्रतिपादकं। सारं—प्रधानभूतं सारस्य कारणात्सारः। णिव्वाणमग्गस्स—निर्वाणमार्गस्य मोक्षवर्त्मनः सम्यग्ज्ञानदर्शनचारित्राणां तस्मिन् सति तेषां सद्भावान्निर्वाणमार्गस्य सारं त्र-

सस्थावरक्षेमकरं च सर्वमिमम्युपदेशं जिनदृष्टं त्रिविधेन श्रद्धेऽहमिति ॥ ९१ ॥

तस्मिन् काले यथा द्वादशांगचतुर्दशपूर्वविषया श्रद्धा क्रियते तथा समस्तश्रुतविषया चिंता पाठश्च कर्तुं किं शक्यते ? इत्याह

ण हि तम्हि देसयाले सक्को बारसविहो सुदक्खंधो सव्वो अणुचिंतेदुं बलिणावि समत्थचित्तेण ९२

नहि तस्मिन् देशकाले शक्यः द्वादशविधः श्रुतस्कंधः सर्वः अनुचिंतायितुं बलिना अपि समर्थचित्तेन ॥९२॥

न प्रतिषेधवचनं । हि यस्मादर्थे । तम्हि—तस्मिन् । देसयाले—देशकाले दिश अतिसर्जने दिश्यते अतिसृज्यते इति देशः शरीरं तस्य कालस्तस्मिन् शरीरपरित्यागकाले । सक्को—शक्यः । बारसविहो—द्वादशविधः द्वादशप्रकारः । सुदक्खंधो—श्रुतस्कंधः श्रुतवृक्ष इत्यर्थ । सव्वो सर्वं समस्तं । अणुचिंतेदुं—अनुचिन्तयितुं अर्थेन भावयितुं पठितुं च । बलिणावि—बलिनापि शरीरगतबलेनापि । समत्थचित्तेण—समर्थचित्तेन एकचित्तेन यतिना । तस्मिन् देशकाले बलयुक्तेन समर्थचित्तेनापि द्वादशविधं श्रुतस्कन्धं न शक्यमनुचिन्तयितुं ॥९२॥

यतस्ततः किं कर्तव्यं !

एक्कह्मि बिदियह्मि पदे संवेगो वीयरायमग्गम्मि ।

वच्चदि णरो अभिक्खं तं मरणंते ण मोत्तव्यं ॥

एकस्मिन् द्वितीये पदे संवेगो वीतरागमार्गे
व्रजति नरो अभीक्ष्णं तत् मरणांते न मोक्तव्यं ॥ ९३ ॥

एक्कंह्मि—एकस्मिन् नमोऽर्हद्भ्यः इत्येतस्मिन्। विदियं हि द्वयोः पूरणं द्वितीयं नमः सिद्धेभ्य इत्येतस्मिन्। संवेओ—संवेगः धर्मे हर्षः। पदे—अर्थपदे ग्रन्थपदे प्रमाणपदे वा पंचनमस्कारपदे च। अथवा एकम्हि बीजम्हि पदे—एकस्मिन्नपि बीजपदे यस्मिन्निति पाठान्तरम्। वीदरागमग्गम्मि—वीतरागमार्गे सर्वज्ञप्रवचने। वच्चदि—व्रजति गच्छति प्रवर्तते। णरो—नरेण सर्वसंगपरित्यागिना। अभिक्खं अभीक्ष्णं नैरन्तर्येण। तं-तत् मरणंते—मरणान्ते कण्ठगतप्राणेऽस्यसमये वा। ण मोत्तव्वं—न मोक्तव्यं न परित्यजनीयं। एकपदे द्वितीयपदे वा पंचनमस्कारपदे वा वीतरागमार्गे अस्मिन् संवेगो ऽभीक्ष्णं गच्छति तत्पदं मरणान्तेऽपि न मोक्तव्यं नरेण; नरो वा संवेगं यथा भवति तथा यस्मिन्पदे गच्छति प्रवर्तते तत्पदं तेन न मोक्तव्यमिति सम्बन्धः।

किमिति कृत्वा तन्न मोक्तव्यं यतः—

एदह्मादो एकं हि सिलोगं मरणदेसयालह्मि।
आराहणउवजुत्तो चिंतंतो राधओ होदि ॥९४॥

एतस्मात् एकं हि श्लोकं मरणदेशकाले

आराधनोपयुक्तः चिंतयन् आराधको भवति ॥९४॥

एदंहादो–एतस्मात् श्रुतस्कन्धात् पंचनस्काराद्वा । एक्कं हि एकं ह्यपि एकमपि तथ्यं । सिलोगं–श्लोकं । मरणदेसयालम्मि–मरणदेशकाले । आराहणउवजुत्तो–आराधनया उपयुक्तः सम्यग्ज्ञानदर्शनचारित्रतपोनुष्ठानपरः । चिंतंतो–चिंतयन् । आराधओ–आराधकः रत्नत्रयस्वामी । होइ–भवति सम्पद्यते । एतस्मात् श्रुतात् पंचनमस्काराद्वा मरणदेशकाले एकमपि श्लोकं चिंतयन् आराधनोपयुक्तः सन् आराधको भवति यतस्ततस्त्वयेदं न मोक्तव्यमिति सम्बन्धः ॥ ९४ ॥

यदि पीडोत्पद्यते मरणकाले । किमौषधं ? इत्याह—

जिणवयणमोसहमिणंविसयसुहविरयणं अमिदभूदं जरमरणवाहिवेयणखयकरणं सव्वदुक्खाणं ९५

जिनवचनमौषधमिदं विषयसुखविरेचनं अमृतभूतं जरामरणव्याधिवेदनानांक्षयकरणंसर्वदुःखानाम्९५

जिणवयणं–जिनवचनं । ओसहं–औषधं रोगापहरं द्रव्यं । इणं–एतत् । विसयसुहविरेयणं–विषयेभ्यः सुखं विषयसुखं तस्य विरेचनं द्रावकं द्रव्यं विषयसुखविरेचनं । अमिदभूदं–अमृतभूतं । जरमरणवाहिवेयणा–जरामरणव्याधिवेदनानां बहुकालीना व्याधिः, आकस्मिका वेदना तयोर्भेदः । अथवा व्याधिभ्यो वेदना । खयकरणं–विनाशनिमित्तं । सव्व-

दुक्खाणं सर्वदुःखानां विषयसुखविरेचनं, अमृतभूतं चौषधमेतज्जिनवचनमिति सम्बन्धः ॥ ९५ ॥

किं तस्मिन्काले शरणं चेत्याह !

णाणं सरणं मे दंसणं च सरणं च चरियसरणं च।
तव संजमं च सरणं भगवं सरणो महावीरो ९६

ज्ञानं शरणं मम दर्शनं च शरणं च चारित्रशरणं च तपः संयमश्च शरणं भगवान् शरणो महावीरः ॥९६

णाणं–ज्ञानं यथावस्थितवस्तुपरिच्छेदः। सरणं–शरणं आश्रयः। मे–मम। दंसणं–दर्शनं प्रशमसंवेगानुकंपास्तिक्याभिव्यक्तलक्षणपरिणामः। सरणं–शरणं संसाराद्रक्षणं। चरियं–चरित्रं ज्ञानवतः संसारकारणनिवृत्तिं प्रत्यागूर्णवतोऽनुष्ठानं। सरणं च–सहायं च। सुखावबोधार्थं पुनः पुनः शरणग्रहणं। तवं–तपति दहति शरीरेन्द्रियाणि तपो द्वादशप्रकारं। संजमं–संयमः प्राणेन्द्रियसंयमनं। [सरणं]–शरणं। भगवं–भगवान् ज्ञानसुखवान्। सरणो–शरणः। महावीरो–वर्धमानस्वामी। ज्ञानदर्शनचारित्रतपांसि मम शरणानि तेषामुपदेष्टा च महावीरो भगवान् शरणमिति ॥ ९६ ॥

आराधनायाः किं फलं ? इत्यत आह—

आराहण उवजुत्तो कालं काऊण सुविहिओ सम्मं

उक्कस्सं तिण्णि भवे गंतूण य लहइ णिव्वाणं ॥

आराधनोपयुक्तः कालं कृत्वा सुविहितः सम्यक् उत्कृष्टं त्रीन् भवान् गत्वा च लभेत निर्वाणम् ॥९७॥

आराहणउवजुत्तो-आराधनोपयुक्तः सम्यग्दर्शनज्ञानादिषु तात्पर्यवृत्तिः । कालं काऊण-कालं कृत्वा । सुविहिओ-सुविहितः शोभनानुष्ठानः । सम्मं-सम्यक् । उक्कस्सं-उत्कृष्टेन । तिण्णि-त्रीन् । भवे-भवान् गंतूण य-गत्वा च । लहइ-लभते । णिव्वाणं-निर्वाणं । सुविहितः सम्यगाराधनोपयुक्तः कालं कृत्वा उत्कर्षेण त्रीन् भवान् प्राप्य ततो निर्वाणं लभते इति ॥ ९७ ॥

आचार्यानुशास्तिं श्रुत्वा शास्त्रं ज्ञात्वा क्षपकः कारणपूर्वकं परिणामं कर्तुकामः प्राह—

समणो मेत्ति य पढमं बिदियं सव्वत्थ संजदो मेत्ति
सव्वं च वोस्सरामि य एदं भणिदं समासेण ९८

श्रमणो मम इति प्रथमः द्वितीयः सर्वत्र संयतो ममेति सर्वं च व्युत्सृजामि च एतद् भणितं समासेन ॥९८

समणो मेत्तिय-श्रमणः समरसीभावयुक्तः, इति च पढमं-प्रथमः । बिदियं-द्वितीयः । सव्वत्थसंजदो-सर्वत्रसंयतः । मेत्ति-मम इति । अथवा श्रमणे मम प्रथमं मैत्र्यं । द्वितीयं च सर्व

संयतेषु। सव्वं च–सर्वं च। वोसरामिय–व्युत्सृजामि च। एदं–एतत्। भणिदं–भणितं। समासेण–समासेन संक्षेपतः। प्रथमस्तावत् समानभावोऽहं द्वितीयश्च सर्वत्र संयतोऽतः सर्वमयोग्यं व्युत्सृजामि एतद्भणितं संक्षेपतो मयेति सम्बन्धः संक्षेपालोचनमेतत् ॥ ९८ ॥

पुनरपि दृढपरिणामं दर्शयति

लद्धं अलद्धपुव्वं जिणवयणसुभासिदं अमिदभूदं
गहिदो सुग्गइमग्गो णाहं मरणस्स बीहेमि ॥९९

लब्धमलब्धपूर्वं जिनवचनसुभाषितं अमृतभूतं
गृहीतः सुगतिमार्गः नाहं मरणाद्बिभेमि ॥ ९९ ॥

लद्धं–लब्धं प्राप्तं। अलद्धपुव्वं–अलब्धपूर्वं। जिणवयणं–जिनवचनं। सुभासिदं–सुभाषितं प्रमाणनयाविरुद्धं। अमिदभूदं–अमृतभूतं सुखहेतुत्वात्। गहिदो–गृहीतः। सुग्गदिमग्गो–सुगतिमार्गः। णाहं मरणस्स बीहेमि–नाहं मरणाद्बिभेमि। अलब्धपूर्वं जिनवचनं सुभाषितं अमृतभूतं लब्धं मया सुगतिमार्गश्च गृहीतोऽतः नाहं मरणाद्बिभेमीति ॥ ९९ ॥

अतश्च—

धीरेण वि मरिदव्वं णिद्धीरेणावि अवस्स मरिदव्वं
जदि दोहिंवि मरिदव्वं वरं हि धीरत्तणेण मरिदव्वं

धीरेणापि मर्तव्यं निर्धैर्येणापि अवश्यं मर्तव्यं ।
यदि द्वाभ्यामपिमर्तव्यंवरंहिधीरत्वेनमर्तव्यम्॥१००

धीरेणवि–धीरेणापि सत्त्वाधिकेनापि । मरियव्वं–मर्तव्यं प्राणत्यागः कर्तव्यः। णिद्धीरेणवि–निर्धैर्येणापि धैर्यरहितेनापि कातरेणापि भीतेनापि । अवस्स–अवश्यं निश्चयेन मरिदव्वं मर्तव्यं । जइदोहिं वि–यदि द्वाभ्यामपि। मरिदव्वं–मर्तव्यं भवान्तरं गन्तव्यं विशेषाभावात् । वरं–श्रेष्ठं। हु स्फुटं। धीरत्तणेण–धीरत्वेन संक्लेशरहितत्वेन । मरिदव्वं–मर्तव्यं । यदि द्वाभ्यामपि धैर्यधैर्योपेताभ्यां प्राणत्यागः कर्तव्यो निश्चयेन ततो विशेषाभावात् धीरत्वेन मरणं श्रेष्ठमिति ॥१००

क्षुधादिपीडितस्य यदि शीलविनाशे कश्चिद्विशेषो विद्यतेऽजरामरणत्वं यावता हि—

सीलेणवि मरिदव्वं णिस्सीलेणवि अवस्स मरिदव्वं
जइ दोहिंवि मरियव्वं वरं हु सीलत्तणेणमरियव्वं
शीलेनापि मर्तव्यं निःशीलेनापि अवश्यं मर्तव्यम् ।
यदि द्वाभ्यामपि मर्तव्यंवरं हिशीलत्वेनमर्तव्यम्॥१०१

यदि द्वाभ्यामपि शीलनिःशीलाभ्यां मर्तव्य अवश्यं वरं शीलत्वेन शीलयुक्तेन मर्तव्यमिति । व्रतपरिरक्षणं शीलं यदि सुशीलनिःशीलाभ्यां निश्चयेन मर्तव्यं शीलेनैव मर्तव्यम् ॥ १०१ ॥

अत्र किं कृतो नियम ? इत्याह—

चिरउसिदबंभयारी पप्फोडेदूण सेसयं कम्मं।
अणुपुव्वीय विसुद्धो सुद्धो सिद्धिं गदिं जादि॥

चिरोषितब्रह्मचारी प्रस्फोट्य शेषं कर्म।
अनुपूर्व्याविशुद्धः शुद्धः सिद्धिं गतिं याति॥

चिरउसिद–चिरं बहुकालं उषितः स्थितः। बंभयारी–ब्रह्म मैथुनानभिलाषं चरति सेवत इति ब्रह्मचारी चिरोषितश्च स ब्रह्मचारी च चिरोषितब्रह्मचारी। अथवा चिरोषितं ब्रह्म चरतीति। पप्फोडेदूण–प्रस्फोट्य निराकृत्य। सेसयं कम्मं–शेषं च कर्म ज्ञानावरणादि। अणुपुव्वीय–आनुपूर्व्या च क्रमपरिपाट्या अथवायुःक्षयाद्गुणस्थानक्रमेण वा। विसुद्धो–विशुद्धः कर्मकलंकरहितः। सुद्धो–शुद्धः केवलज्ञानादियुक्तः। सिद्धिं गदिं जादि–सिद्धिं गतिं याति मोक्षं प्राप्नोतीत्यर्थः। अभग्नब्रह्मचारी शेषकं कर्म प्रस्फोट्य, असंख्यातगुणश्रेणिकर्मनिर्जरया च विशुद्धः संजातरततः शुद्धोभूत्वा सिद्धिं गतिं याति। अथवा अपूर्वापूर्व–परिणामसन्तत्या च विशुद्धः शुद्धः केवलोपेतः केवलज्ञानं प्राप्य परमस्थानं गच्छतीति॥ १०२॥

णिम्ममोणिरहंकारोणिक्कसाओजिदिंदिओधीरो
अणिदाणोदिट्ठिसंपण्णो मरंतोआराहओहोइ॥

निर्ममः निरहंकारः निष्कषायः जितेंद्रियः धीरः ।
अनिदानः दृष्टिसंपन्नः म्रियमाण आराधको भवति ॥

अथ आराधनोपायः कथितः, आराधकश्च किंविशिष्टो भवतीत्याह--

णिम्ममो--निर्ममः निर्मोहः । णिरहंकारो--अहंकारान्निर्गतः गर्वरहितः । णिक्कसाओ--निष्कषायः क्रोधादिरहितः । जिदिंदिओ--जितेन्द्रियः नियमितपंचेन्द्रियः । धीरो--धीरः सत्त्ववीर्यसम्पन्नः । अणिदाणो--अनिदानः अनाकांक्षः । दिट्ठिसंपण्णो--दृष्टिसम्पन्नः सम्यग्दर्शनसंप्राप्तः । मरंतो--म्रियमाणः । आराहओ--आराधकः । होइ--भवति । निर्मोहो निर्गर्वः निक्रोधादिर्जितेन्द्रियो धीरोऽनिदानो दृष्टिसंपन्नो म्रियमाण आराधको भवतीति ॥ १०३ ॥

कुत एतदित्याह—

णिक्कसायस्स दंतस्स सूरस्स ववसाइणो ।
संसारभयभीदस्स पच्चक्खाणं सुहं हवे ॥१०४॥

निष्कषायस्य दांतस्य शूरस्य व्यवसायिनः ।
संसारभयभीतस्य प्रत्याख्यानं सुखं भवेत् ॥ १०४ ॥

णिक्कसायस्स—निष्कषायस्य कषायरहितस्य । दन्तस्स--दान्तस्य दान्तेन्द्रियस्य । सूरस्स--शूरस्याकातरस्य । ववसाइणो व्यवसायो विद्यतेऽस्येति व्यवसायी तस्य चारि-

त्रानुष्ठानपरस्य । संसारभयभीदस्स-ससारभयभीतस्य संसाराद्भयं तस्माद्भीतस्त्रस्तः ससारभयभीतः तस्य ज्ञातचतुर्गतिदुःखस्वरूपस्य । पच्चक्खाणं प्रत्याख्यानं आराधना । सुहं-सुखं सुख निमित्तं । हवे-भवेत् । यतो निष्कषायस्य, दान्तस्य, शूरस्य, व्यवसायिनः, संसारभयभीतस्य, प्रत्याख्यानं सुखनिमित्तं भवेत्ततः तथाभूतो म्रियमाण आराधको भवतीति सम्बन्धः ॥ १०४ ॥

उपसंहारद्वारेणाराधनाफलमाह—

एदं पच्चक्खाणं जो काहदि मरणदेसयालम्मि ।
धीरो अमूढसण्णो सो गच्छइ उत्तमं ठाणं ॥१०५॥

एतत् प्रत्याख्यानं यः कुर्यात् मरणदेशकाले ।
धीरः अमूढसंज्ञः स गच्छति उत्तमं स्थानम् ॥१०५॥

एदं एतत् । पच्चक्खाणं-प्रत्याख्यानं । जो काहदि-यः कुर्यात् । मरणदेसयालम्मि-मरणदेशकाले । धीरो-धैर्योपेतः । अमूढसण्णो-अमूढसंज्ञः आहारादिसंज्ञास्वलुब्धः । सो-सः । गच्छदि-गच्छति । उत्तमं ठाणं-उत्तमं स्थानं निर्वाणमित्यर्थः । मरणदेशकाल एतत्प्रत्याख्यानं यः कुर्यात् धीरोऽमूढसंज्ञश्च स गच्छत्युत्तमं स्थानमिति ॥ १०५ ॥

अवसानमंगलार्थं क्षपकसमाध्यर्थं चाह—

वीरो जरमरणरिऊ वीरो विण्णाणणाणसंपण्णो ।

लोगस्सुज्जोययरो जिणवरचंदो दिसदु बोधिं ॥

वीरो जरामरणरिपुः वीरो विज्ञानज्ञानसंपन्नः।
लोकस्य उद्योतकरो जिनवरचंद्रो दिशतु बोधिम् ॥

वीरो--वर्धमानभट्टारकः । जरमरणरिऊ--जरामरणरिपुः । विण्णाणणाणसंपण्णो--विज्ञानं चारित्रं, ज्ञानमवबोधस्ताभ्यां सम्पन्नो युक्तः । वीरो--वीरः । लोगस्स--लोकस्य भव्यजनस्य पदार्थानां वा । उज्जोययरो--उद्योतकरः प्रकाशकरः । जिणवरचंदो--जिनवरचंद्रः । दिसदु--दिशतु ददातु । बोधिं--समाधिं सम्यक्त्वपूर्वकाचरणं वा । जिनवरचन्द्रो जरामरणशत्रुः चारित्रज्ञानादिसंयुक्तो लोकस्य चोद्योतकरो वीरो मह्यं दिशतु बोधिमिति सम्बन्धः ॥१०६॥

किंचिदपि निदानं न कर्तव्यं, कर्तव्यं चेत्याह—

जा गदी अरहंताणं णिद्ठिदट्ठाणं च जा गदी।
जा गदी वीदमोहाणं सा मे भवदु सस्सदा॥१०७

या गतिः अर्हतां निष्ठितार्थानां च या गतिः।
या गतिः वीतमोहानां सा मे भवतु शश्वत् ॥ १०७ ॥

जा गदी—या गतिः । अरहंताणं-अर्हतां । णिट्ठिदट्ठाणं च निष्ठितार्थानां च या गतिः सिद्धानामित्यर्थः । जा गदी--या गतिः । वीदमोहाणं--वीतमोहानां क्षीणकषायाणां । सा मे भवदु--सा मे भवतु । सस्सदा--शश्वत् सर्वदा । अर्हतां या

गतिः, या च निष्ठितार्थानां वीतमोहानां च या, सा मे भवतु सर्वदा नान्यत् किंचिद्याचेऽहमिति । नात्र पुनरुक्तादयो दोषाः पर्यायार्थिकशिष्यप्रतिपादनात् तत्कालयोग्यकथनाच्च । नापि विभक्त्यादीनां व्यत्ययः प्राकृतलक्षणेन सिद्धत्वात् । छन्दोभंगोऽपि न चात्र गाथाविगाथाश्लोकादिसंग्रहात्, तेषां चात्र प्रपचो न कृतः ग्रन्थबाहुल्यभयात् संक्षेपेणार्थकथनाच्चेति ॥ १०७ ॥

इत्याचारवृत्तौ वसुनन्दिविरचितायां द्वितीयः परिच्छेदः ॥ २ ॥

संक्षेपप्रत्याख्यानाधिकारः ॥ ३ ॥

बृहत्प्रत्याख्यानं व्याख्यातमिदानीं यदि भृशमाकस्मिकं सिंहव्याघ्राग्निव्याध्यादिनिमित्तं मरणमुपस्थितं स्यात् तत्र कस्मिन् ग्रथे भावना क्रियते इति पृष्टे तदवस्थायां यद्योग्यं संक्षेपतरं प्रत्याख्यानं तदर्थं तृतीयमधिकारमाह—

एस करोमि पणामं जिणवरवसहस्स वड्ढमाणस्स।
सेसाणं च जिणाणं सगणगणधराणं च सव्वेसिं ॥

एष करोमि प्रणामं जिनवरवृषभस्य वर्धमानस्य ।
शेषाणां च जिनानां सगणगणधराणां च सर्वेषाम् ॥

एस--एष आत्मनः प्रत्यक्षवचनमेतत् एषोऽहं अतिसंक्षेपरूपप्रत्याख्यानकथनाद्यतः एवं च कृत्वा नात्र संग्रहवाक्य कृतं सामर्थ्यलब्धत्वात् तस्येति । करेमि--करोमि कुर्वे वा

पणामं--प्रणामं-स्तुतिं । जिणवरवसहस्स-जिनानां वरा प्रमत्तादिक्षीणकषायपर्यन्तास्तेषां वृषभः प्रधानः सयोगी अयोगी सिद्धो वा तस्य जिनवरवृषभस्य । वड्ढमाणस्स--वर्धमानस्य । सेसाणं च--शेषाणां च । जिणाणं--जिनानां सर्वेषां च । सगणगणधराणं च--सह गणेन यतिमुन्यृष्यनगारकदम्बकेन वर्तते इति सगणास्ते च ते गणधराश्च सगणगणधराः । तेषां च श्रीगोतमप्रभृतीनां च । सव्वेसिं--सर्वेषां । एषोहं ग्रन्थकरणाभिप्रायः, जिनवरवृषभस्य वर्धमानस्य शेषाणां च जिनानां च सर्वेषां च सगणगणधराणां च प्रणामं कुर्वे अथवा सगणगणधराणां जिनानां विशेषणं द्रष्टव्यमिति ॥ १०८ ॥

नमस्कारानन्तरमुररीकृतस्यार्थस्य प्रकटनार्थमाह—

सव्वं पाणारंभं पच्चक्खामि अलीयवयणं च ।
सव्वमदत्तादाणं मेहूणपरिग्गहं चेव ॥ १०९ ॥

सर्वं प्राणारंभं प्रत्याख्यामि अलीकवचनं च ।
सर्वमदत्तादानं मैथुनपरिग्रहौ चैव ॥ १०९ ॥

प्रथमं तावत् व्रतशुद्धिं करोमीति । सव्वं पाणारम्भं--सर्वं निरवशेषं प्राणारम्भं हिंसां । पच्चक्खामि प्रत्याख्यामि त्यजामि । अलीयवयणं च--व्यलीकवचनं च मिथ्यावादं च । सव्वं--सर्वं । अदत्तादाणं--अदत्तादानं । मेहुण--मैथुनं परिग्गहं चेव--परिग्रहं चैव । प्राणारम्भं, मिथ्यावचनं, अदत्तादानं, मैथुनपरिग्रहौ च प्रत्याख्यामीति ॥ १०९ ॥

सामायिकव्रतस्वरूपनिरूपणार्थमाह—

सम्मं मे सव्वभूदेसु वेरं मज्झ ण केणइ ।
आसाए वोसरित्ताणं समाधिं पडिवज्जए॥११०॥

साम्यं मे सर्वभूतेषु वैरं मम न केनापि ।
आशाः व्युत्सृज्य समाधिं प्रतिपद्ये ॥ १०० ॥

सम्मं--समस्य भावः साम्यं । मे--मम । सव्वभूदेसु--सर्वभूतेषु निरवशेषजीवेषु । वेरं--वैरं । मज्झ--मम । ण केणइ--न केनापि । आसाए--आशा आकांक्षाः । वोसरित्ताणं--व्युत्सृज्य । समाहिं--समाधिं शुभपरिणामं । पडिवज्जए--प्रतिपद्ये यतः साम्यं मम सर्वभूतेषु वैरं मम न केनाप्यत आशा व्युत्सृज्य समाधिं प्रतिपद्ये इति ॥ ११० ॥

पुनरपि परिणामशुद्ध्यर्थमाह—

सव्वं आहारविहिं सण्णाओ आसए कसाए य ।
सव्वं चेय ममत्तिं जहामि सव्वं खमावेमि ॥१११॥

सर्वं आहारविधिं संज्ञा आशाः कषायांश्च ।
सर्वं चैव ममत्वं त्यजामि सर्वं क्षामयामि ॥ १११ ॥

सर्वमाहारविधिं अशनपानादिकं संज्ञाश्चाहारादिका आशा इहलोकाद्याकांक्षाः कषायांश्च सर्वं चैव ममत्वं जहामि त्यजामि सर्वं जनं क्षामयामीति ।

द्विविधप्रत्याख्यानार्थमाह—

एदम्हि देशयाले उवक्कमो जीविदस्स जदि मज्झं ।
एदं पच्चक्खाणं णित्थिण्णे पारणा हुज्ज ॥११२॥

एतस्मिन् देशकाले उपक्रमो जीवितस्य यदि मम ।
एतत् प्रत्याख्यानं निस्तीर्णे पारणा भवेत् ॥११२॥

एदम्हि—एतस्मिन । देसयाले—देशकाले । उवक्कमो-उपक्रमः प्रवर्तनं अस्तित्वं । जीविदस्स—जीवितस्य । जइ-मज्झं—यदि मम । एदं—एतत् । पच्चक्खाणं—प्रत्याख्यानं । णित्थिण्णे—निस्तीर्णे समाप्ति गते पारणा—आहारग्रहणं । हुज्ज-भवेत् । एतस्मिन् देशकाले सोपसर्गेऽभिप्रेते वा मध्ये यदि जीवितव्यं नास्ति चतुर्विधाहारस्यैतत्प्रत्याख्यानं मम भवेत् तस्मिंस्तु देशकाले निस्तीर्णे जीवितव्यस्योपक्रमे च सति पारणा भवेदिति सन्देहावस्थायामेतत् ॥ ११२ ॥

निश्चयावस्थायां तु पुनरेतदित्याह—

सव्वं आहारविहिं पच्चक्खामि पाणयं वज्ज ।
उवहिं च वोसरामि य दुविहं तिविहेण सावज्जं ॥

सर्वं आहारविधिं प्रत्याख्यामि पानकं वर्जयित्वा ।
उपधिं च व्युत्सृजामि च द्विविधं त्रिविधेन सावद्यम् ॥

सव्वं—सर्वं निरवशेषं । आहारविहिं—भोजनविधिं । पच्च-

क्खामि--प्रत्याख्यामि । पाणयं वज्ज--पानकं वर्जयित्वा । उवहिं च--उपधिं च । वोसरामि य--व्युत्सृजामि च । दुविहं-द्विविधं बाह्याभ्यन्तरलक्षणं तिविहेण त्रिविधेन मनोवचनकायेन सावज्ज सावद्यं पापकारणं । पानकं वर्जयित्वा सर्वमाहारविधिं प्रत्याख्यामि, बाह्याभ्यन्तरोपधिं च व्युत्सृजामि द्विविधं त्रिविधेन सावद्यं च यदिति ॥ ११३ ॥

उत्तमार्थार्थमाह—

जो कोइ मज्झ उवही सब्भंतरबाहिरो य हवे ।
आहारं च सरीरं जावज्जीवा य वोसरे ॥११४॥

यः कश्चित् मम उपधिः साभ्यंतरबाह्यश्च भवेत् ।
आहारं च शरीरं यावज्जीवं च व्युत्सृजामि ॥११४॥

जो कोइ—यः कश्चित् । मज्झ उवही—ममोपधिः परिग्रहः । सब्भंतरबाहिरो य—साभ्यन्तरबाह्यश्च । हवे भवेत् । तं सर्वं । आहारं च चतुर्विकल्पभोजनं शरीरं च । जावज्जीवा य जीवं जीवितव्यमनतिक्रम्य यावज्जीवं यावच्छरीरे मम जीव इत्यर्थः । वोसरे व्युत्सृजे । यः कश्चित् मम सबाह्याभ्यन्तरोपधिर्भवेत् तं आहारं शरीरं च यावज्जीवं व्युत्सृजे इत्यर्थः ॥ ११४ ॥

आगमस्य माहात्म्यं दृष्ट्वोत्पन्नहर्षो नमस्कारमाह—

जम्मलीणा जीवा तरंति संसारसायरमणंतं ।

तं सव्वजीवसरणं णंददु जिणसासणं सुइरं॥११५

यदालीना जीवाः तरंति संसारसागरं अनंतं ।
तत् सर्वजीवशरणं नंदतु जिनशासनं सुचिरं ।११५।

जं यत् । आलीणा आलीना आश्रिताः । जीवा प्राणिनः तरंति प्लवंते पारं गच्छंति । संसारसायरं-संसरणं संसारः स एव सागरः समुद्रः संसारसागरस्तं । अणंतं न विद्यतेऽन्तो यस्यासौ अनन्तस्तं अपर्यन्तं । तं तत् । सव्वजीवसरणं सर्वे च ते जीवाश्च सर्वजीवास्तेषां शरणं सर्वजीवशरणं । णंददु नन्दतु वृद्धिं गच्छतु । जिणसासणं जिनशासनं । सुइरं सुचिरं सर्वकालं । यज्जिनशासनमाश्रिताः जीवाः संसारसागरं तरन्ति तत्सर्वजीवशरणं नन्दतु सर्वकालं, यदनुष्ठानान्मुक्तिर्भवति तस्यैव नमस्कारकरणं योग्यमिति ॥ ११५ ॥

आराधनाफलार्थमाह—

जा गदी अरहंताणं णिट्ठिदट्ठाणं च जा गदी।
जा गदी वीदमोहाणं सा मे भवदु सस्सदा॥११६

या गतिः अर्हतां निष्ठितार्थानां च या गतिः ।
या गतिः वीतमोहानां सा मे भवतु शश्वत् ॥११६॥

व्याख्यातार्था गाथेयं । अर्हतां च या गतिः निष्ठिता-

र्थानां वीतमोहानां च या गतिः सा मे भवतु सर्वदा नान्यद्या-चेऽहमिति ॥ ११६ ॥

सर्वसंगपरित्यागं कृत्वा, चतुर्विधाहारं च परित्यज्य जिनं हृदये कृत्वा किमर्थं म्रियते चेदतः प्राह-

एगं पंडियमरणं छिंदइ जाईसयाणि बहुगाणि॥
तं मरणं मरिदव्वं जेण मदं सुम्मदं होदि ॥११७॥

एकं पंडितमरणं छिनत्ति जातिशतानि बहूनि ।
तन्मरणेन मर्तव्यं येन मृतं सुमृतं भवति ॥ ११७ ॥

इयं च व्याख्यातार्था गाथेति। यतः एकं पंडितमरणं जाति-शतानि बहूनि छिनत्ति येन च मरणेन न पुनर्म्रियते किन्तु सुमृतं भवति पुनर्नोत्पद्यते तन्मरणमनुष्ठानीयमिति ॥ ११७ ॥

मरणकाले समाधानार्थमाह—

एगम्हि य भवगहणे समाहिमरणं लहिज्ज जदि जीवो
सत्तट्ठभवग्गहणे णिव्वाणमणुत्तरं लहदि ॥११८॥

एकस्मिन् भवग्रहणे समाधिमरणं लभते यदि जीवः
सप्ताष्टभवग्रहणे निर्वाणमनुत्तरं लभते ॥ ११८ ॥

एकस्मिन् भवग्रहणे समाधिमरणं यदि लभते जीवस्त-तः सप्ताष्टभवग्रहणेषु व्यतीतेषु निश्चयेन निर्वाणमनुत्तरं लभते यतस्ततः समाधिमरणमनुष्ठेयते इति। शरीरे सति जन्मा-दीनि दुःखानि यतस्ततः सुमरणेन शरीरत्यागः कर्तव्यः॥११८॥

कानि जन्मादीनि दुःखानीत्याह—

णत्थि भयं मरणसमं जम्मणसमयं ण विज्जदे दुक्खं
जम्मणमरणादंकं छिंदि ममत्तिं सरीरादो॥११९॥

नास्ति भयं मरणसमं जन्मसमकं न विद्यते दुःखं ।
जन्ममरणातंकं छिंधि ममत्वं शरीरतः ॥ ११९ ॥

मरणसमं मृत्युसदृशं भयं जीवस्य नान्यत्, जन्मनोत्पत्त्या समकं च दुःखं च न विद्यते । यतोऽतो जन्ममरणान्तकं छिंधि विदारय । शरीरतश्च ममत्वं छिंधि । शरीरे सति यतः सर्वमेतदिति ॥ ११९ ॥

त्रीणि प्रतिक्रमणानि आराधनायामुक्तानि तान्यत्रापि संक्षिप्ते काले सम्भवन्तीत्याह—

पढमं सव्वदिचारं बिदियं तिविहं भवे पडिक्कमणं
पाणस्स परिच्चयणं जावज्जीवायमुत्तमट्ठं च॥१२०

प्रथमं सर्वातिचारं द्वितीयं त्रिविधं भवेत् प्रतिक्रमणं
पानस्य परित्यजनं यावज्जीवमुत्तमार्थं च ॥

क्रमप्रतिपादनार्थं चैतत् । पढमं–प्रथमं । सव्वदिचारं–सर्वातिचारस्य तपःकालमाश्रित्य दोषविधानस्य । विदियं द्वितीयं । तिविहं–त्रिविधाहारस्य । भवे–भवेत् । पडिक्कमणं प्रतिक्रमणं परिहरणं । पाणस्स–पानकस्य । परिच्चयणं–

परित्यजनं । जावज्जीवाय—यावज्जीवं । उत्तमट्ठं य—उत्तमार्थं च तन्मोक्षनिमित्तमित्यर्थः । प्रथमं तावत्सर्वातिचारस्य प्रतिक्रमणं, द्वितीयं प्रतिक्रमणं त्रिविधाहारस्य, तृतीयमुत्तमार्थे पानकस्य परित्यजनं यावज्जीवं चेति तस्मिन् काले त्रिविधं प्रतिक्रमणमेव न केवलं किन्तु योगेन्द्रियशरीरकषायाणां च । तत्र त्रिविधस्य योगस्य निग्रहो योगप्रतिक्रमणं, पंचेन्द्रियाणां च निग्रह इन्द्रियप्रतिक्रमणं, पंचविधस्य च शरीरस्य च त्यागः कृशता वा शरीरप्रतिक्रमणं, षोडशविधकषायस्य नवविधस्य च नोकषायस्य निग्रहः कृशता कषायप्रतिक्रमणं, हस्तपादानां च ॥ १२० ॥

ननु कषायशरीरसल्लेखना आराधनायां आगमे कथिता, एतेषां पुनर्योगेन्द्रियहस्तपादानां न श्रुता, नैतत्, एतेषां चागमेऽस्तीत्याह—

पंचवि इंदियमुंडा वचमुंडा हत्थपायमणमुंडा ।
तणुमुंडेण वि सहिया दस मुंडा वण्णिया समए

पंचापि इंद्रियमुंडा वाग्मुंडा हस्तपादमनोमुंडा ।
तनुमुंडेन अपि सहिता दशमुंडा वर्णिताः समये ॥

पंचानामपि इन्द्रियाणां मुण्डनं खंडनं स्वविषयव्यापारान्निवर्तनं । वचिमुण्डा वचनस्याप्रस्तुतप्रलापस्य खण्डनं । हस्तपादमनसां वाऽसंस्तुतसंकोचप्रसारणचिन्तननिवर्तनं ततः

शरीरस्य च मुण्डनं एते दश मुण्डाः समये वर्णिता यतोऽतो न स्वमनीषया व्याख्यानमेतदिति । अथवा एतैर्मुण्डैर्मुण्ड-धारी भवति नान्यैः सावद्यैरिति ॥ १२१ ॥

इत्याचारवृत्तौ वसुनन्दिविरचितायां तृतीयः परिच्छेदः ॥३॥

समाचाराधिकारः ॥ ४ ॥

एवं संक्षेपस्वरूपं प्रत्याख्यानमासन्नतममृत्योर्व्याख्याय यस्य पुनः सत्यायुषि निरतिचारं मूलगुणा निर्वहंति तस्य कथं प्रवृत्तिरिति पृष्टे तदर्थं चतुर्थमधिकारं समाचाराख्यं नमस्कारपूर्वकमाह—

तेलोक्कपूयणीए अरहंते वंदिऊण तिविहेण ।
वोच्छं सामाचारं समासदो आणुपुव्वीयं ॥ १२२ ॥

त्रिलोकपूजनीयान् अर्हतः वंदित्वा त्रिविधेन ।
वक्ष्ये समाचारं समासत आनुपूर्व्या ॥

तेलोक्कपूयणीए—त्रयाणां लोकानां भवनवासीमनुष्यदेवानां पूजनीया वन्दनीयास्त्रिलोकपूजनीयास्तान् त्रिकालग्रहणार्थपदनीयेन निर्देशः । अरहंते—अर्हतः घातिचतुष्टयजेतॄन् । वंदिऊण—वन्दित्वा । तिविहेण—त्रिविधेन मनोवचनकायैः । वोच्छं—वक्ष्ये । समाचारं—मूलगुणानुरूपमाचारं समासदो—समासतः संक्षेपेण "कायाः" तस् । आणुपुव्वीयं

---

१ का इति जैनेंद्रव्याकरणे पंचमीविभक्तेः संज्ञा ।

आनुपूर्व्या अनुक्रमेण त्रिविधं व्याख्यानं भवति पूर्वानुपूर्व्या, पश्चादानुपूर्व्या, यत्र तत्रानुपूर्व्या च। तत्र पूर्वानुपूर्व्या ख्यापनार्थमानुपूर्वीग्रहणं क्षणिकनित्यपक्षनिराकरणार्थं च। क्त्वान्तेन नमस्कारकरणपूर्वकं प्रतिज्ञाकरणं। अर्हत्स्त्रलोकपूजनीयांस्त्रिविधेन वन्दित्वा समासादानुपूर्व्या समाचारं वक्ष्ये इति ॥ १२२ ॥

समाचारशब्दस्य निरुक्त्यर्थं संग्रहगाथासूत्रमाह—

समदा सामाचारो सम्माचारो समो व आचारो।
सव्वेसिं सम्माणं सामाचारो दु आचारो। १२३।

समता सामाचारः सम्यगाचारः समो वा आचारः।
सर्वेषां समानः समाचारस्तु आचारः ॥

चतुर्भिरर्थैः समाचारशब्दो व्युत्पाद्यते, तद्यथा—समदासामाचारो—समस्य भावः समता रागद्वेषाभावः स समाचारः अथवा त्रिकालदेववन्दना पंचनमस्कारपरिणामो वा समता, सामायिकव्रतं वा। सम्माचारो-सम्यक् शोभनं निरतिचारं, मूलगुणानुष्ठानमाचरणमाचारः सम्यगाचारः अथवा सम्यगाचरणमवबोधो निर्दोषभिक्षाग्रहणं वा समाचारः, चरेर्भक्षणगत्यर्थत्वात्। समो व आचारो—समो वा आचारः पंचाचारः। सव्वेसिं—सर्वेषां प्रमत्ताप्रमत्तादीनां सर्वेषां यतीनामाचारः। समो प्राणिवधादिभिर्यतोऽतः समाचा-

रः । अथवा सम उपसमः क्रोधाद्यभावस्तेन परिणामेना-चरणं समाचारः । समशब्देन दशलाक्षणिकधर्मो गृह्यते स समाचारः । अथवा भिक्षाग्रहणदेववन्दनादिभिः सह योगः समाचारः । समाणं–सह मानेन परिणामेन वर्तते इति समानं सहस्य सः, समानं वा मानं, समानस्य सभावः । अथवा सर्वेषां समानः पूज्योऽभिप्रेतो वा आचारो यः स समाचारः । अथवा समदा सम्यक्त्वं, सम्माचारो–चारित्रं, समाणं–ज्ञानं, समो-वा आचारो–तपः । एतेषां सर्वेषां योऽयं समाचारः ऐक्यं स समाचारः, आचारो वा समाचारः । यस्तु समाचारः स आचार एवेत्यविनाभावः । अथवा पञ्चभिरर्थैर्निर्देशः, समदा समरसीभावः समयाचारो–स्वसमयव्यवस्थयाचारः, सम्माचा-रो–सम्यगाचारः, समोवा सहाचरणं । सव्वेसु–सर्वेषु क्षेत्रेषु समाणं–समाचारः । संक्षेपार्थं समताचारः, सम्यगाचारः, समो य आचारो वा सर्वेषां स समाचारो हानिवृद्धिरहितः, कायोत्सर्गादिभिः समानं मानं यस्याचारस्य स वा समा-चार इति ॥ १२३ ॥

अस्यैव समाचारस्य लक्षणभेदप्रतिपादनार्थमाह—

दुविहो सामाचारो ओघोविय पदविभागिओ चेव
दसहा ओघो भणिओ अणेगहा पदविभागी य ॥

द्विविधः समाचार औघिकः पदविभागिकश्चैव ।
दशधा औघिको भणितः अनेकधा पदविभागी च ॥

दुविहो–द्विविधः द्विप्रकारः । सामाचारो–समाचारः सम्यगाचार एव सामाचारः प्राकृतबलाद्वा दीर्घत्वमादेः। ओघोवि य –औघिकः सामान्यरूपः । पदविभागीओ -पदानां अर्थप्रतिपादकानां विभागो भेदः स विद्यते यस्यासौ पदविभागिकश्च । एवकारोऽवधारणार्थः । स सामाचारः औघिकपदविभागिकाभ्यां द्विविध एव ।

तयोर्भेदप्रतिपादनार्थमाह–दसहा–दशधा दशप्रकारः । ओघो-औघिकः । भणिओ-भणितः । अणेयधा–अनेकधाऽनेकप्रकारः । पदविभागी य—पदविभागी च । य औघिकः स दशप्रकारोऽनेकधा च पदविभागी ॥ १२४ ॥

आद्यस्य ये दशप्रकारास्ते केऽतः प्राह—

इच्छामिच्छाकारोतधाकारोयआसिआणिसिही आपुच्छापडिपुच्छाछंदणसणिमंतणायउवसंपा

इच्छामिथ्याकारौ तथाकारः च आसिका निषेधिका आपृच्छा प्रतिपृच्छा छंदनं सनिमंत्रणा च उपसंपत्॥

इच्छामिच्छाकारो—इच्छामभ्युपगमं करोतीति इच्छाकार आदरः, मिथ्या व्यलीकं करोतीति मिथ्याकारो विपरिणामस्य त्यागः, एकस्य कारशब्दस्य निवृत्तिः, समासान्तस्य वा कृदुत्पत्तिः । तथाकारो य–तथाकारश्च सदर्थे प्रतिपादिते एवमेव वचनं । आसिया–आसिका आपृच्छ्य गमनं ।

णिसिही -निषेधिका परिपृच्छय प्रवेशनं । आपुच्छा—आपृच्छा स्वकार्यं प्रति गुर्वाद्यभिप्रायग्रहणं । पडिपुच्छा-प्रतिपृच्छा निषिद्धस्य अनिषिद्धस्य वा वस्तुनस्तद्ग्रहणं प्रति पुनः प्रश्नः । छंदणा—छन्दनं छन्दानुवर्तित्वं यस्य गृहीतं किंचिदुपकरणं तदभिप्रायानुवर्तनं । सणिमंतणाय—सनिमंत्रणा च सत्कृत्य याचनं च । उवसंपा—उपसम्पत् आत्मनो निवेदनं । नायं पृच्छाशब्दोऽपशब्दः उत्सर्गापवादसमावेशात् । एतासामिच्छाकारमिथ्याकार-तथाकारासिका-निषेधिकापृच्छा-प्रतिपृच्छा-छन्दन-संनिमंत्रणोपसम्पदां को विषय इत्यत आह—गाथात्रयेण सम्बन्धः ॥ १२५ ॥

इट्ठे इच्छाकारो मिच्छाकारो तहेव अवराहे ।
पुडिसुणणह्मितहत्तियणिग्गमणेआसियाभणिया
पविसंतेयणिसीहीआपुच्छणियासकज्जआरंभे ।
साधम्मिणायगुरुणापुव्वणिसिट्ठह्मि पडिपुच्छा
छंदणगाहिदेदव्वेअगिहददव्वेणिमंतणाभणिदा ।
तुह्ममहंतिगुरुकुलेआदणिसग्गो दु उवसंपा ॥

इष्टे इच्छाकारो मिथ्याकारः तथैव अपराधे ।
प्रतिश्रवणे तथेति च निर्गमने आसिका भणिताः १२६
प्रविशति च निषेधिका आपृच्छनीयं स्वकार्यारंभे ।

सधर्मणा च गुरुणा पूर्वनिसृष्टे प्रतिपृच्छा ॥ १२७ ॥
छंदनं गृहीते द्रव्ये अगृहीतद्रव्ये निमंत्रणा भणिता।
युष्माकं अहमिति गुरुकुले आत्मानिसर्गस्तु उपसंपत् ॥

इट्ठे–इष्टे सम्यग्दर्शनादिके शुभपरिणामे वा। इच्छाकारो–इच्छाकारोऽभ्युपगमो हर्षः स्वेच्छया प्रवर्तनं। मिच्छाकारो–मिथ्याकारः कायमनसा निवर्तनं। तहेव–तथैव। क, अवराहे–अपराधेऽशुभपरिणामे व्रताद्यतिचारे। पडिसुणणं–हि–प्रतिश्रवणे सूत्रार्थग्रहणे, तहत्ति य तथेति च यथैव भवद्भिः प्रतिपादितं तथैव नान्यथेत्येवमनुरागः। णिग्गमणे–निर्गमने गमनकाले। आसिआ–आसिका देवगृहस्थादीन् परिपृच्छ्य यानं पापक्रियादिभ्यो मनो निर्वर्तनं वा। भणिया–भणिताः कथिताः। पविसंते य-प्रविशति च प्रवेशकाले। णिसिही–निषेधिका तत्रस्थानभ्युपगम्य स्थानकरणं सम्यग्दर्शनादिषु स्थिरभावो वा। आपुच्छणिया य–आपृच्छनीयं च गुर्वादीनां वन्दनापूर्वकं प्रश्नकरणं। सकज्जआरम्भे—स्वस्यात्मनः कार्यं प्रयोजनं तस्यारम्भ आदिक्रिया स्वकार्यारम्भस्तस्मिन् पठनगमनयोगादिके। साधम्मिणा य-समानो धर्मोऽनुष्ठानं गुरुर्वा यस्यासौ सधर्मा तेन सधर्मणा च। गुरुणा–दीक्षाशिक्षोपदेशकर्त्रा तपोऽधिकज्ञानाधिकेन वा, पुव्वणिसिट्ठम्हि–पूर्वस्मिन्निसृष्टं प्रतिदत्तं समर्पितं यद्वस्तूपकरणादिकं तस्मिन् पूर्वनिसृष्टे वस्तुनि पुनर्ग्रहणाभिप्राये। पडिपुच्छा–प्रतिपृ-

च्छा पुनः प्रश्नः । छंदणं–छंदनं छंदो वा तदभिप्रायेण सेवनं, गहिदे–गृहीते द्रव्ये पुस्तकादिके । अगहिददव्वे–अगृहीतद्रव्ये अन्यदीयपुस्तकादिवस्तुनि स्वप्रयोजने जाते । णिमंतणा—निमंत्रणा—सत्कारपूर्वकं याचनं गृहीतस्य विनयेन निवेदनं वा । भणिदा–भणिता । तुम्हं-युष्माकं । अहंति–अहमिति । गुरुकुले-आम्नाये त्वद्वृहत्पादमूले । आदणिसग्गो–आत्मनो निसर्गस्त्यागः तदानुकूल्याचरणं, । तु–अत्यर्थवाचकः, उवसम्पा–उपसम्पत् ॥ २२६–१२८ ॥

एवं दशप्रकारौघिकसमाचारस्य संक्षेपार्थं पदविभागिनश्च विभागार्थमाह—

ओघियसामाचारोएसोभणिदोहुदमविहोणेओ
एत्तोय पदविभागी समासदो वण्णइस्सामि ॥

औघिकसामाचारः एष भणितः हि दशविधो ज्ञेयः ।
इतश्च पदविभागी समासतः वर्णयिष्यामि ॥ १२९ ॥

एष औघिकः सामाचारो दशप्रकारोऽपि भणितः कथितः समासतः संक्षेपतो ज्ञातव्यो अनुष्ठेयो वा । एत्तोय–इतश्चोर्ध्वं । पदविभागिनं समाचारं । समासदो–समासतः । वर्णयिष्यामि । यथोद्देशस्तथा निर्देश इति न्यायादिति ॥ १२९ ॥

उग्गमसूरप्पहुदी समणाहोरत्तमंडले कसिणे ।
जं अच्चरंति सददं एसो भणिदो पदविभागी ॥

उद्गमसूरप्रभृतौ श्रमणा अहोरात्रमंडले कृत्स्ने ।
यदाचरंति सततं एष भणितः पदविभागी ॥ १३० ॥

उग्ग-मू-प्पहुदी-उद्गच्छतीत्युद्गमः सूर आदित्यो यस्मिन् काले स उद्गमसूर उदयादित्यकालः, अथवा सूरस्योद्गमः उद्गमसूरः उद्गमस्य पूर्वनिपातः स प्पहुदि—प्रभृतिरादिर्यस्यासौ उद्गमसूरप्रभृतिस्तस्मिन्नुदयसूर्यादौ । समणा—श्राम्यंति तपस्यतीति श्रमणा मुनयः । अहोरत्तमंडले—अहश्च रात्रिश्चाहोरात्रमस्य मण्डलं सन्ततिरहोरात्रमंडलं तस्मिन् दिवसरात्रिमध्यक्षणसमुदये । कसिने—कृत्स्ने निरवशेषे । जं आचरंति—यदाचरन्ति यन्नियमादिकं निर्वर्तयन्ति । सददं—सततं निरतरं । एसो—एष प्रत्यक्षवचनमेतत् । भणिओ—भणितोऽर्हद्भट्टारकैः कथितः आप्तस्तृप्तिपादनमेतत् । पदविभागी—पदस्यानुष्ठानं । उद्गमसूरप्रभृतौ कृत्स्नेऽहोरात्रमण्डले यदाचरन्ति श्रमणाः सतत स एष पदविभागीति कथितः । उत्तरपदापेक्षया पुल्लिंगतेति न दोषो लिंगव्यत्ययः ॥१३०॥

इष्टे वस्तुन्याच्छाकारः कर्तव्य इत्युक्तं पुरस्तात् तत्कमित्याह—

संजमणाणुवकरणे अण्णुवकरणे च जायणे अण्णे ।
जोगग्गहणादीसु अइच्छाकारो दुकादव्वो ॥

संयमज्ञानोपकारणे अन्योपकरणे च याचने अन्ये ।

योगग्रहणादिषु च इच्छाकारस्तु कर्तव्यः ॥

संजमणाणुवकरणे—संयम इन्द्रियनिरोधः प्राणिदया च, ज्ञानं ज्ञानावरणक्षयोपशमोत्पन्नवस्तुपरिच्छेदात्मकप्रत्ययः श्रुतज्ञानं वा तयोरुपकरणं पिच्छिकापुस्तकादि तस्मिन् संयमज्ञानोपकरणहेतौ विषये वा । अण्णुवकरणे च—अन्यस्य तपःप्रभृतेरुपकरणं कुंडिकाहारादिकं तस्मिंश्च तद्विषये च । जायणे—याचने भिक्षणे । अण्णे—अन्यस्मिन् परविषये औषधादिके परनिमित्ते वा । अथवा च द्रष्टव्यः । एतेषां याचने परनिमित्तमात्मनिमित्तं वा इच्छाकारः कर्तव्यः मनः प्रवर्तयितव्यं, न केवलमत्र किन्तु, योगग्रहणादिसुय—योगग्रहणादिषु च आतापनवृक्षमूलाभ्रावकाशादिषु च किं बहुना शुभानुष्ठाने सर्वत्र परिणामः कर्तव्य इति ॥ १३१ ॥

अथ कस्यापराधे मिथ्याकारः स इत्याह—

जंदुक्कडंतुमिच्छातंअच्छादिदुक्कडंपुणोकादुं ।
भावेणयपडिकंतो तस्सभवेदुक्कडे मिच्छा ॥

यत् दुष्कृतं तु मिथ्या तत् नेच्छति दुष्कृतं पुनः कर्तुं भावेन च प्रतिक्रांतः तस्य भवेत् दुष्कृते मिथ्या ॥

यद्दुष्कृतं यत्पापं मया कृतं तद्दुष्कृतं मिथ्या मम भवतु, अहं पुनस्तस्य कर्ता न भवामीत्यर्थः । एवं यन्मिथ्यादुष्कृतं कृतं तु तद्दुष्कृतं पुनः कर्तुं नेच्छेत् न कुर्यात् । भावेन च प्र-

तिक्रान्तो यो न केवलं वचसा किन्तु मनसा कायेन च वर्तमानातीतभविष्यत्काले तस्यापराधस्य यो न कर्ता तस्य दुष्कृते मिथ्याकार इति ॥ १३२ ॥

अथ किं तत्प्रतिश्रवणं यस्मिन् न तथाकार इत्यत आह-

वायणपडिच्छणाए उवदेसे सुत्तअत्थकहणाए ।
अवितहमेदत्ति पुणो पडिच्छणाए तधाकारो ॥

वाचनाप्रतीच्छायामुपदेशे सूत्रार्थकथने
अवितथमेतदिति पुनः प्रतीच्छायां तथाकरः ॥

वायणापडिच्छणाए—वाचनस्य जीवादिपदार्थव्याख्यानस्य प्रतीच्छा श्रवणं वाचनाप्रतीच्छा तस्यां, सिद्धान्तश्रवणे उवदेसे—उपदेशे आचार्यपरम्परागतेऽविसंवादरूपे मंत्रतंत्रादिके । सुत्तअत्थकहणाए—सूचनात्सूत्रमार्थस्य सूत्रं वृत्तिवार्तिकभाष्यनिबन्धनं तस्यार्थो जीवादयस्तस्य तयोर्वा कथनं प्रतिपादनं तस्मिन् सूत्रार्थकथने कथनायां वा । अवितहं—अवितथं सत्यं एवमेव । एतदेत्ति—एतदिति यद्भट्टारकैः कथितं तदेवमेवेति नान्यथेति कृत्वा । पुणो—पुनः । (पडिच्छणाए—) प्रतीच्छायां पुनरपि यच्छ्रवणं क्रियते । तधाकारो—तथाकारः । वाचनाप्रतिश्रवणे उपदेशे सूत्रार्थयोजने गुरुणा क्रियमाणे अवितथमेतदिति कृत्वा पुनरपि यच्छ्रवणं तत्तथाकार इति ॥ १३३ ॥

केषु प्रदेशेषु प्रविशता निषेधिका क्रियते इत्याह—

कंदरपुलिणगुहादिसुपवेसकालेणिसिद्धियंकुज्जा
तेहिंतो णिग्गमणे तहासिया होदि कायव्वा ॥

कंदरपुलिनगुफादिषु प्रवेशकाले निषेधिकां कुर्यात्।
तेभ्यो निर्गमने तथा आसिका भवति कर्तव्या ॥१३४

कंदरं—कंदरः उदकदारितप्रदेशः। पुलिणं—पुलिनं जलमध्ये जलरहितप्रदेशः। गुहा—पर्वतपार्श्वेविवरं ता आदिर्येषां ते कन्दरपुलिनगुहादयस्तेषु अन्येषु च निर्जन्तुकप्रदेशेषु नद्यादिषु। पवेसकाले— प्रवेशकाले। णिसीहियं—निषेधिकां। कुज्जा—कुर्यात् कर्तव्या। अत आसिका कुतः? तेहिंता—तेभ्य एव कन्दरादिभ्यः। णिग्गमणे—निर्गमने निर्गमनकाले। तहासिया—तथैवासिका। होदि-भवति। कायव्वा—कर्तव्या इति ॥ १३४ ॥

प्रश्नश्च केषु स्थानेषु इत्युच्यते—

आदावणादिगहणेसण्णाउव्भामगादिगमणे वा।
विणयेणायरियादिसु आपुच्छाहोदिकायव्वा॥

आतापनादिग्रहणे संज्ञायां उद्भामकादिगमने वा।
विनयेनाचार्यादिषु आपृच्छा भवति कर्तव्या ॥१३५

आदावणादिगहणे—आतपनं व्रतपूर्वकमुष्णसहनं आदि-

र्येषां ते आतापनादयस्तेषां ग्रहणमनुष्ठानं तस्मिन्नातपनवृक्ष-मूलाभ्रावकाशकायोत्सर्गादिग्रहणे। सण्णा उब्भामगादिगमणे वा संज्ञायामाहारकालशोधनादिकेच्छायां उद्भ्रम्यते भ्रम्यते उद्भ्रम उद्भ्रम एवोद्भ्रमकोऽन्यग्रामः स आदिर्येषां ते उद्भ्रमकादयस्तेषां गमनं प्रापणं तस्मिन्वा, निमित्तवशादन्य-ग्रामगमने वा । विणयेण-विनयेन नमस्कारपूर्वकप्रणामेन आइरियादिसु—आचार्य आदिर्येषां ते आचार्यादयस्तेषु आचार्यपर्वतकस्थविरगणधरादिषु । आपुच्छा—आपृच्छा । होदि भवति । कादव्वा-कर्तव्या । यत्किंचित्कार्यं करणी-यं तत्सर्वमाचार्यादीनापृच्छ्य क्रियते यदि आपृच्छा भवति तत इति ॥ १३५ ॥

प्रतिपृच्छास्वरूपनिरूपणार्थमाह—

जंकिंचिमहाकज्जं करणीयंपुच्छिऊणगुरुआदी ।
पुणरविपुच्छदिसाहूतंजाणसुहोदिपडिपुच्छा ॥

यत् किंचित् महाकार्यं करणीयं पृष्ट्वा गुर्वादीन् ।
पुनरपि पृच्छति साधून् तत् जानीहि भवति प्रतिपृच्छा

जंकिंचि-यत्किंचित् सामान्यवचनमेतत् । महाकज्जं-महत्कार्यं बृहत्प्रयोजनं । करणीयं-कर्तव्यमनुष्ठानीयं । पुच्छि-ऊण-पृष्ट्वा । गुरुआदी-गुरुरादिर्येषां ते गुर्वादयस्तान् गुरु-प्रवर्तकस्थविरादीन् । पुणरवि-पुनरपि । पुच्छदि-पृच्छति ।

साहू—साधून् परिशेषधर्मोद्युक्तान्। अथवा स साधुः पुनरपि पृच्छति येन पूर्वं याचितं। तं जाणसु—तज्जानीहि बुध्यस्व। होदि—भवति। पडिपुच्छा—प्रतिपृच्छा। यत्किंचित् कार्यं महत्करणीयं गुर्वादीन् पृष्ट्वा पुनरपि साधून् पृच्छति साधुर्वा तत्कार्यं तदेव प्रश्नावधानं प्रतिपृच्छां जानीहीति ॥ १३६ ॥

अष्टमं सूत्रं प्रपंचयन्नाह—

गहिदुवकरणेविणएवंदनसुत्तत्थपुच्छणादीसु ।
गणधरवसभादीणं अणुवुत्तिं छंदणिच्छाए ॥

गृहीतोपकरणे विनये वंदनासूत्रार्थप्रश्नादिषु ।
गणधरवृषभादीनामनुवृत्तिः छंदनामिच्छया ॥१३७॥

गहिदुपकरणे गृहीते स्वीकृते उपकरणे संयमज्ञानादिप्रतिपालनकारणे आचार्यादिप्रदत्तपुस्तकादिके। विणए विनये विनयकाले वंदण-वन्दनायां वंदनाकाले क्रियाग्रहणेन कालस्यापि ग्रहणं तदभेदात्। सुत्तत्थपुच्छणादीसु-सूत्रस्य अर्थस्तस्य प्रश्नः स आदिर्येषां ते सूत्रार्थप्रश्नादयस्तेषु। गणधरवसभादीणं—गणधरवृषभादीनां आचार्यादीनां। अणुवुत्ती—अनुवृत्तिरनुकूलाचरणं। छन्दणं—छन्दः छन्दोऽनुवर्तित्वं। इच्छाए—इच्छया। सूत्रार्थप्रश्नादिषु उपकरणद्रव्ये च गृहीते विनये वंदनायां च गणधरवृषभादीनामिच्छयानुवृत्तिश्छन्दनमिति। अथवोपकर-

शद्रव्यस्वामिन इच्छया गृहीतुरनुवृत्तिश्छंदनमाचार्यादीनां च प्रश्नादिषु विनयकाले वन्दनाकाले चेति ॥ १३७ ॥

नवमस्य सूत्रस्य विवरणार्थमाह—

गुरुसाहाम्मियदव्वं पुच्छयमण्णं च गेण्हिदुं इच्छे ।
तेसिं विणयेण पुणो णिमंतणा होइ कायव्वा ॥

गुरुसाधर्मिकद्रव्यं पुस्तकमन्यच्च गृहीतुं इच्छेत् ।
तेषां विनयेन पुनर्निमंत्रणा भवति कर्तव्या ॥ १३८

गुरुसाहंमियदव्वं—गुरुश्च साधर्मिकश्च गुरुसाधर्मिकौ तयोर्द्रव्यं गुरुसाधर्मिकद्रव्यं । पुच्छयं—पुस्तकं ज्ञानोपकारकं । अण्णं च—अन्यच्च कुण्डिकादिकं । गेण्हिदुं—ग्रहीतुं आदातुं इच्छे इच्छेद्वा इच्छेत् । तेसिं—तेषां गुरुसाधार्मिकद्रव्याणां गृहीतुमिष्टानां । विणएण—विनयेन नम्रतया । पुणो—पुनः । णिमंतणा निमंत्रणा याचना । होइ—भवति । कायव्वा—कर्तव्या । यदि गुरुसाधर्मिकादिद्रव्यं पुस्तकादिकं गृहीतुमिच्छेत् तदानीं तेषां विनयेन याचना भवति कर्तव्या इति ॥ १३८ ॥

उपसम्पत्सूत्रभेदप्रतिपादनार्थमाह—

उवसंपया य णेया पंचविहा जिणवरेहि णिद्दिट्ठा ।
विणए खेत्ते मग्गे सुहदुक्खे चेव सुत्ते य ॥

उपसंपत् च ज्ञेया पंचविधा जिनवरैः निर्दिष्टा ।

विनये क्षेत्रे मार्गे सुखदुःखे चैव सूत्रे च ॥ १३९ ॥

उवसंपयाय—उपसम्पच्चोपसेवात्मनो निवेदनमुपसम्पत् । णेया ज्ञेया ज्ञातव्या । पंचविहा—पंचविधा पंचप्रकारा । जिणवरेहिं—जिनवरैः । णिद्दिट्ठा—निर्दिष्टा कथिता । के ते पंच प्रकारा इत्याह—विणये—विनये । खेत्ते—क्षेत्रे । मग्गे—मार्गे । सुहदुक्खे—सुखदुःखयोः । चशब्दः समुच्चये । एवकारोऽवधारणे । सुत्ते-य—सूत्रे च । विषयनिर्देशोऽयं विनयादिषु विषयेषूपसम्पत् पंचप्रकारा भवति विनयादिभेदैर्वेति ॥ १३९ ॥

तत्र विनयोपसम्पत्प्रतिपादनार्थमाह—

पाहुणविणउवचारो तेसिं चावासभूमिसंपुच्छा ।
दाणाणुवत्तणादी विणये उवसंपया णेया ॥

प्राघूर्णिकविनयोपचारौ तेषां चावासभूमिसंपृच्छा दानानुवर्तनादयःविनये उपसंपत् ज्ञेया ॥ १४० ॥

पाहुणविण उवचारो—विनयश्चोपचारश्च विनयोपचारौ प्राघूर्णिकानां पादोष्णानां विनयोपचारौ, अंगमर्दनप्रियवचनादिको विनयः, आसनादिदानमुपचारः । आवासभूमिसंपुच्छा—आवासः स्थानं गुरुगृहं भूमिः मार्गोऽध्वा तयोः संपृच्छा संप्रश्नः आवासभूमिसंप्रश्नः । दाणं—दानं संस्तरपुस्तकशास्त्रोपकरणादिनिवेदनं । अणुवत्तणादी—अनुवर्तनादयस्तदनुकूलाचरणादयः । विणये उवसंपया—विनयोपसम्पत्

णेया—ज्ञेया। पादोष्णानां विनयोपचारकरणं यत्तेषां चावासभूमिसम्पृच्छया दानानुवर्तनादयश्च ये तेषां क्रियन्ते तत्सर्वं विनयोपसम्पदुच्यते। सर्वत्रात्मनः समर्पणं तस्य वा ग्रहणमुपसम्पदिति ॥ १४० ॥

यतः का क्षेत्रोपसम्पदित्यत्रोच्यते—

संजमतवगुणसीला जमणियमादी य जह्मि खेत्तह्मि वड्ढंति तह्मि वासो खेत्ते उवसंपया णेया ॥१४१॥

संयमतपोगुणशीला यमनियमादयश्च यस्मिन् क्षेत्रे वर्धंते तस्मिन् वासः क्षेत्रे उपसंपत् ज्ञेया ॥ १४१ ॥

संजमतवगुणसीला—संयमतपोगुणशीलानि। यमणियमादीय—यमनियमादयश्च आमरणात्प्रतिपालनं यमः कालादिपरिमाणेनाचरणं नियमः, व्रतपरिरक्षणं शीलं, कायादिखेदस्तपः, उपशमादिलक्षणो गुणः प्राणेन्द्रियसंयमनं संयमः, अतो नैषामैक्यं। जह्मि—यस्मिन्। खेत्तंहि क्षेत्रे। वड्ढंति—वर्द्धन्ते उत्कृष्टा भवंति। तह्मि—तस्मिन् वासो—वसनं। खेत्ते उपसंपया—क्षेत्रोपसम्पत्। णेया—ज्ञेया। यस्मिन् क्षेत्रे संयमतपोगुणशीलानि यमनियमादयश्च वर्द्धन्ते तस्मिन् वासो यः सा क्षेत्रोपसम्पदिति ॥ १४१ ॥

तृतीयायाः स्वरूपप्रतिपादनार्थमाह—

पहुणवत्थव्वाणं अण्णोण्णागमणगमणसुहपुच्छा

उवसंपदा य मग्गे संजमतवणाणजोगजुत्ताणं
पादोष्णवास्तव्यानामन्योन्यागमनगमनसुखप्रश्नः।
उपसंपत् च मार्गे संयमतपोज्ञानयोगयुक्तानाम् ॥

पाहुणवच्छव्वाणं—पादोष्णवास्तव्यानां आगन्तुकस्वस्थान-स्थितानां। अण्णोण्ण—अन्योन्यं परस्परं। आगमणगमणे आगमनं च गमनं चागमनागमने तयोर्विषये सुहपुच्छा—सुखप्रश्नः-किं सुखेन तत्रभवान् गत आगतश्च। उपसंपदादु—उपसंपत्। मग्गे—मार्गे पथिविषये। संजमतवणाणजोगजुत्ताणं—संयमतपोज्ञानयोगयुक्तानां। पादोष्णवास्तव्यानां अन्योऽन्यं योऽयं गमनागमनसुखप्रश्नः सा मार्गविषयोपसम्पदित्यत्रोच्यत इति ॥ १४२ ॥

अथ का सुखदुःखोपसम्पदित्यत्रोच्यते—

सुहदुक्खे उवयारो वसहीआहारभेसजादीहिं।
तुह्मं अहंति वयणं सुहदुक्खुवसंपया णेया ॥
सुखदुःखयोःउपचरो वसतिकाहारभेषजादिभिः।
युष्माकं अहं इति वचनं सुखदुःखोपसंपत् ज्ञेया ॥

सुहदुक्खे—सुखदुःखयोर्निमित्तभूतयोः, अथवा तद्योगात्तच्छब्दं सुखदुःखयुक्तयोः पुरुषयोरिति। उवयारो—उपचारः उपग्रहः। वसहीआहारभेसजादीहिं—वसतिकाहारभैषज्यादिभिः

सुखिनो निर्वृत्तस्य शिष्यादिलाभे कुंडिकादिदानं, दुःखिनो व्याध्युपपीडितस्य सुखशय्यासनौषधान्नपानमर्दनादिभिरुपकार उपचारः। तुम्हं अहंति वयणं—युष्माकमहमिति वचनं युष्माभिर्यदादिश्यते तस्य सर्वस्याहं कर्ता इति। अथवा युष्माकमेतत्सर्वं मदीयमिति वचनं। सुहदुक्खुवसंपया—सुखदुःखोपसंपत्। णेया—ज्ञातव्या। सुखदुःखनिमित्तं पिंछवसतिकादिभिरुपचारो युष्माकमिति वचनं उपसम्पत् सुखदुःखविषयेति॥ १४३॥

पंचम्या उपसम्पदः स्वरूपनिरूपणार्थमाह—

उवसंपया य सुत्ते तिविहा सुत्तत्थतदुभया चेव।
एक्केका विय तिविहा लोइय वेदे तहा समये॥

उपसंपत् च सूत्रे त्रिविधा सूत्रार्थतदुभया चैव।
एकैकापि च त्रिविधा लौकिके वेदे तथा समये॥

सूत्रविषयोपसम्पच्च त्रिविधा त्रिप्रकारा। सुत्तत्थतदुभया चेव सूत्रार्थतदुभया चैव सूत्रार्थो यत्नः सूत्रोपसम्पत्, अर्थनिमित्तो यत्नोऽर्थोपसम्पत्, सूत्रार्थोभयहेतुर्यत्नः तदुभयोपसंपत् तादर्थ्यात्तात्च्छब्द्यमिति। एकैकापि च सूत्रार्थोभयसम्पत् लौकिकवैदिकसामायिकशास्त्रभेदात्त्रिविधा। लौकिकसूत्रार्थतदुभयानामवगमः। तथा वैदिकानां सामायिकानां च। हुण्डावसर्पिण्यपेक्षया वैदिकशास्त्रस्य ग्रहणं। अथवा

सर्वकालं नयाभिप्रायस्य सम्भवाद्दैदिकस्य न दोषः । अथवा वेदे सिद्धान्ते समये तर्कादौ इति । तुह्मं महद्गुरुकुले आत्मनो निसर्गः उपसम्पदुक्ता ॥ १४४ ॥

पदविभागिकस्य सामाचारनिरूपणार्थमाह —

कोई सव्वसमत्थो सगुरुसुदं सव्वमागमित्ताणं ।
विणएणुवक्कमित्ता पुच्छइ सगुरुं पयत्तेण ॥

काश्चित् सर्वसमर्थःस्वगुरुश्रुतं सर्वमवगम्य ।
विनयेनोपक्रम्य पृच्छति स्वगुरुं प्रयत्नेन ॥१४५॥

कोई—कश्चित् । सव्वसमत्थो—सर्वैरपि प्रकारैर्वीर्यधैर्यविद्याबलोत्साहादिभिः समर्थः कल्पः सर्वसमर्थः । सगुरुसुदं—स्वगुरुश्रुतं आत्मीयगुरूपाध्यायागतं शास्त्रं । सव्वं—सर्वं निरवशेषं । आगमित्ताणं—आगम्य ज्ञात्वा । विणएण—विनयेन मनोवचनकायपणामैः । उवक्कमित्ता—उपक्रम्य प्रारभ्योपढौक्य । पुच्छदि—पृच्छति अनुज्ञां याचते । सगुरुं—स्वगुरुं । पयत्तेण—प्रयत्नेन प्रमाद त्यक्त्वा । कश्चित् सर्वशास्त्राधिगमबलोपेतः स्वगुरुशास्त्राधिगम्य, अन्यदपि शास्त्रमधिगन्तुमिच्छन् विनयेनोपक्रम्य प्रयत्नेन स्वगुरुं पृच्छति गुरुणानुज्ञातेन गन्तव्यमित्युक्तं भवति ॥ १४५ ॥

किंतत्पृच्छति ? इत्यत्रोच्यते—

तुज्झं पादपसाएण अण्णमिच्छामि गंतुमायदणं ।

तिण्णि व पंच व छा वा पुच्छाओ एत्थ सो कुणइ॥
युष्माकं पादप्रसादेन अन्यदिच्छामि गंतुमायतनम्।
तिस्रः वा पंच वा षट् पृच्छाःअत्र स करोति ॥ १४६ ॥

तुब्भं पादपसादेण--त्वत्पादप्रसादात् त्वत्पादानुज्ञया । अण्णं--अन्यत् । इच्छामि--अभ्युपैमि । गंतुं--यातुं । आयतनं सर्वशास्त्रपारंगतं चरणकरणोद्यतमाचार्यं, यद्यपि षडायतनानि लोके सर्वज्ञः, सर्वज्ञालयं, ज्ञानं, ज्ञानोपयुक्तः, चारित्रं चारित्रोपयुक्त इति भेदाद्भवन्ति तथापि ज्ञानोपयुक्तस्याचार्यस्य ग्रहणमधिकारात् । किमेकं प्रश्नं करोति नेत्याह तिण्णिव- तिस्रः । पंच व-पंच वा । छाव षड्वा । चशब्दाच्चतस्रोधिका वा । पुच्छाओ--पृच्छाः प्रश्नान् । एत्थ- अत्रावसरे । कुणदि--करोति । अनेनात्मोत्साहो विनयो वा प्रदर्शितः । भट्टारकपादप्रसन्नैः अन्यदायतनं गंतुमिच्छामीत्यनेन प्रकारेण तिस्रः पंच षड्वा पृच्छाः सोऽत्र करोतीति

ततः किंकरोत्यसावित्याह—

एवं आपुच्छित्ता सगवरगुरुणा विसज्जिओ संतो।
अप्पचउत्थो तदिओ बिदिओ वासो तदो णीदी॥
एवं आपृच्छ्य स्वकवरगुरुणा विसर्जितः सन् ।
आत्मचतुर्थःतृतीयो द्वितीयो वा स ततो निरेति ॥१४७

एवं-पूर्वोक्तेन न्यायेन । आपुच्छित्ता--आपृच्छयाभ्युपगमय्य। सगवरगुरुणा--स्वकीयवरगुरुभिः दीक्षाश्रुतगुर्वादिभिः । विमज्जिदो विसृष्टो मुक्तः । संतो--सन् । किमेकाकयसौ गच्छति नेत्याह-अप्पचउत्थो--चतुर्णां पूरणश्चतुर्थः आत्मा चतुर्थो यस्यासावात्मचतुर्थः । त्रयाणां द्वयोर्वा पूरणस्तृतीयो द्वितीयः । आत्मा तृतीयो द्वितीयो वा यस्यासावात्मतृतीय आत्मद्वितीयः । त्रिभिर्द्वाभ्यामेकेन वा सह गंतव्यं नैकाकिना । सो तदो—स साधुस्ततः तस्मात् स्वगुरुकुलात् । णीदि--निर्गच्छति । एवमापृच्छ्य स्वकीयवरगुरुभिश्च विसृष्टः सन्नात्मचतुर्थो निर्गच्छति, आत्मतृतीय आत्मद्वितीयो वा उत्कृष्टमध्यमजघन्यभेदात् ॥ १४७ ॥

किमिति कृत्वान्येन न्यायेन विहारो न युक्तो यतः —

गिहिदत्थेयविहारोविदिओऽगिहिदत्थसंसिदोचेव
एत्तो तादेयविहारो णाणुण्णादो जिणवरेहिं ॥

गृहीतार्थैकविहारो द्वितीयो ऽगृहीतार्थसंश्रितश्चैव ।
एताभ्यां तृतीयो विहारो नानुज्ञातो जिनवरैः ॥१४८॥

गिहिदत्थेय—गृहीतो ज्ञातोऽर्थो जीवादितत्त्वं येनासौ गृहीतार्थश्च एकः प्रथमः । विहारो--विहरणं देशान्तरगमनेन चारित्रानुष्ठानं । अथवा विहरतीति विहारः एकश्च विहारश्चैकविहारः । विदिओ--द्वितीयः अगृहीतार्थेन संश्रितो

युक्तः । अथ को द्वितीयः, अगृहीतार्थस्तस्यानेन सहाचरणं नैकस्य । एतोएताभ्यां--गृहीतार्थागृहीतार्थसंश्रिताभ्यामन्यः । तदियविहारो--तृतीयविहारः । णाणुण्णादो--नानुज्ञातः नाभ्युपगतो जिनवरैरर्हद्भिः । एको गृहीतार्थस्य विहारोऽपरोगृहीतार्थेन संश्रितस्य तृतीयो नानुज्ञातः परमेष्ठिभिरिति १४८

किंविशिष्ट एकविहारीत्यत आह—

तवसुत्तसत्तएगत्तभावसंघडणधिदिसमग्गो य ।
पविआआगमबलिओ एयविहारी अणुण्णादो ॥

तपःसूत्रसत्त्वैकत्वभावसंहननधृतिसमग्रश्च ।
प्रव्रज्यागमबली एकविहारी अनुज्ञातः ॥ १४९ ॥

तपो द्वादशविधं सूत्रं द्वादशांगचतुर्दशपूर्वरूपं कालक्षेत्रानुरूपो वाऽऽगमः प्रायश्चित्तादिग्रन्थो वा सत्त्वं—कायगतं अस्थिगतं च बलं देहात्मकं वा भावसत्वं, एकत्वं शरीरादिविविक्ते स्वात्मनि रतिः, भावः शुभपरिणामः सत्त्वकार्यं, संहननं अस्थित्वग्दृढता वज्रर्षभनाराचादित्रयं, धृतिः मनोबलं, क्षुदाद्यबाधनं चैतासां द्वंद्वः एताभियुक्तस्तपःसूत्रसत्त्वैकत्वभावसंहननधृतिसमग्रः । न केवलमेवंविशिष्टः किन्तु पवियाआगमबलिओ—प्रव्रज्यागमबलवांश्च तपसा वृद्धः, आचारसिद्धान्तज्ञानश्च यः स एकविहारी अनुज्ञातोऽनुमतो जिनवरैरिति सम्बन्धः ॥ १४९ ॥

न पुनरेवंभूतः—

सच्छंदगदागदीसयणाणिसयणादाणभिक्खवोसरणे
सच्छंदजंपरोचि य मा मे सत्तूवि एगागी ॥ १५० ॥

स्वच्छंदगतागतिशयननिषीदनादानभिक्षाव्युत्सर्गेषु।
स्वछंदजल्परुचिश्च मा मे शत्रुरप्येकाकी ॥ १५० ॥

सच्छंदगदागदी—स्वैरं स्वेच्छया गत्यागती गमनागमने यस्यासौ स्वैरगतागतिः। केषु स्थानेष्वित्याह-सयणं—शयनं। णिसयणं—निषदनं आसनं। आदाणं—आदानं ग्रहणं। भिक्ख—भिक्षा। वोसरणं—मूत्रपुरीषाद्युत्सर्गः। एतेषु प्रदेशेषु शयनासनादानभिक्षाद्युत्सर्गकालेषु। सच्छंदजंपिरोचिय—स्वेछया जल्पनशीलश्च स्वेच्छया जल्पने रुचिर्यस्य वा एवंभूतो यः सः। मे—मम शत्रुरप्येकाकी माभूत् किं पुनर्मुनिरिति ॥ १५० ॥

यदि पुनरेवंभूतोऽपि विहरति ततः किं स्यादतः प्राह—

गुरुपरिवादो सुदवुच्छेदो तित्थस्स मइलणा जडदा
विभलकुसीलपासत्थदा य उस्सारकप्पम्हि ॥

गुरुपरिवादःश्रुतव्युच्छेदःतीर्थस्य मालिनत्वं जडता।
विह्वलकुशीलपार्श्वस्थता च उत्सारकल्पे ॥१५१ ॥

गुरुपरिवादो—गुरोः परिवादः परिभवः केनायं निःशीलो लुञ्चितः इति लोकवचनं। सुदवुच्छेदो—श्रुतस्य व्युच्छे-

दो विनाशः स तथाभूतस्तं दृष्ट्वा अन्योऽपि भवति अन्योऽपि कश्चिदपि न गुरुगृहं सेवते ततः श्रुतविनाशः । तित्थस्स –तीर्थस्य शासनस्य । मइलणा–मलिनत्वं नमोस्तूनां शासने एवंभूताः सर्वेऽपीति मिथ्यादृष्टयो वदन्ति । जडता मूर्खत्वं । विहल–विह्वल आकुलः । कुसील कुशीलः । पासत्थ–पार्श्वस्थ एतेषां भावः विह्वलकुशीलपार्श्वस्थता । उस्सारकप्पम्हि –उत्सारकल्पे त्याज्यकल्पे गणं त्यक्त्वा एकाकिनो विहरणे इत्यर्थः । मुनिनैकाकिना विहरमाणेन गुरुपरिभवश्रुतव्युच्छेदा तीर्थमलिनत्वजडताः कृता भवन्ति तथा विह्वलत्व-कुशीलत्वपार्श्वस्थत्वानि कृतानीति ॥ १५१ ॥

न केवलमेते दोषा किन्त्वात्मविपत्तिश्चेत्यत आह—

कंटयखाणुयपडिणियसाणागेणादिसप्पमेच्छेहिं
पावइ आदविवत्तीं विसेण व विसूइया चेव ॥१५२

कंटकस्थाणुप्रत्यनीकश्वगवादिसर्पम्लेच्छैः ।
प्राप्नोतिआत्मविपत्तिं विषेण वा विसूचिकया चैव १५२

कंटय–कण्टकाः । खाणुय–स्थाणुः । पडिणिय–प्रत्य-नीकाः क्रुद्धाः । साणागेणादि श्वगवादयः । सप्पमेच्छ–स-र्पम्लेच्छाः । एतेषां द्वन्द्वस्तैः कण्टकस्थाणुप्रत्यनी श्व-गवादिसर्पम्लेच्छैः । पावइ-प्राप्नोति । आदविवत्ती–आत्म-विपत्तिं स्वविनाशं । विसेणव–विषेण च मारणात्मकेन द्रव्येण ।

विसूइया चेव–विसूचिकया वाजीर्णेन । एवकारो निश्चयार्थः निश्चयेनैकाकी विहरन् कण्टकादिभिर्विषेण विसूचिकया वात्मविपत्तिं प्राप्नोति ॥ १५२ ॥

विहरंस्तावत्तिष्ठतु तिष्ठन् कश्चित् पुनर्निर्धर्मो गुरुकुलेऽपि द्वितीयं नेच्छतीत्याह—

गारविओ गिद्धीओ माइल्लो अलसलुद्धणिद्धम्मो
गच्छेविसंवसंतो णेच्छइ संघाडयं मंदो ॥१५३॥

गौरविको गृद्धिको मायावी अलसलुब्धनिर्धर्मः ।
गच्छेपि संवसन् नेच्छति संघाटकं मंदः ॥१५३॥

गारविओ–गौरवसमन्वितः ऋद्धिरससातप्राप्त्या अन्यानधिक्षिपति । गिद्धीओ–गृद्धिक आकांक्षितभोगः ग्रहिको वा । माइल्लो–मायावी कुटिलभावः । अलस–आलस्ययुक्तः उद्योगरहितः । लुद्धो–लुब्धः अत्यागशीलः । णिद्धम्मो–निर्धर्मः पापबुद्धिः । गच्छेवि–गुरुकुलेपि ऋषिसमुदायमध्येऽपि त्रैपुरुषिको गणः, सप्तपुरुषिको गच्छः । संवसंतो–संवसन् तिष्ठन् । णेच्छइ–नेच्छति नाभ्युपगच्छति । संघाडयं–संघाटकं द्वितीयं । मंदो–मंदः शिथिलः । कश्चिन्निर्धर्मोऽलसो लुब्धो मायावी गौरविकः कांक्षावान् गच्छेऽपि संवसन् द्वितीयं नेच्छति शिथिलत्वयोगादिति ॥ १५३ ॥

किमेतान्येव पापस्थानानि एकाकिनो विहरतो भवन्तीत्युतान्यान्यपीत्यत आह—

आणा अणवत्था वियमिच्छत्ताराहणादणासाय ।
संजमविराहणावियएदेदुणिकाइयाठाणा॥१५४॥

आज्ञाकोपःअनवस्थापिचामिथ्यात्वाराधनात्मनाशश्च संयमविराधनापिचएतानितुणिकाचितानिस्थानानि

आणा—आज्ञा कोपः सर्वज्ञशासनोल्लंघनं। नन्वाज्ञाग्रहणात्कथमाज्ञाभंगस्य ग्रहणं, एकदेशग्रहणात् यथा भामाग्रहणात् सत्यभामाया ग्रहणं सेनग्रहणाद्वा भीमसेनस्य। अथवोत्तरत्राज्ञाकोपादिग्रहणाद्वा। यद्यत्राज्ञाया एव ग्रहणं स्यादुत्तरत्र कथमाज्ञाकोपादिकाः पंचापि दोषाः कृतास्तेनेत्याचार्यो भणति तस्मात्प्राकृतलक्षणबलात् कोपशब्दस्य निवृत्तिं कृत्वा निर्देशः कृतः। अणवत्था--अनवस्था अतिप्रसङ्गः, अन्येऽपि तेनैवप्रकारेण प्रवर्तेरन्। अवि य--अपि च। मिच्छत्ताराहणा -- मिथ्यात्वस्याराधना सेवा। आदणासो य—आत्मनो नाशश्चात्मीयानां सम्यग्दर्शनज्ञानचारित्राणां विघातः, आत्मीयस्य कार्यस्य वा। संयमविराहणावियं—संयमस्य विराधनापि च, इन्द्रियप्रसरोऽविरतिश्च। एदेदु—एतानि तु। णिकाइया (णिकाचिदाणि) निकाचितानि पापागमनकारणानि निश्चितानि पुष्टानि वा। ठाणा (णि) स्थानानि अपिचशब्दादन्यान्यपि कृतानि भवन्ति इत्यध्याहारः। एकाकिनो विहरत एतानि पंचस्थानानि भवन्त्येवान्यानि पुनर्भाष्यानीति।

एवंभूतस्य तस्य सश्रुतस्य ससहायस्य विहरतः कथंभूते गुरुकुले वासो न कल्पते इत्याह —

तत्थणकप्पइवासो जत्थ इमे णत्थि पंच आधारा ।
आइरियउवज्झायापवत्तथेरा गणधरा य ॥१५५॥

तत्र न कल्पते वासःयत्रेमे न संति पंच आधाराः ।
आचार्योपाध्यायाः प्रवर्तकस्थाविरा गणधराश्च ॥ १५५॥

तत्थ तत्र गुरुकुले । ण कप्पइ—न कल्पते न युज्यते । वासो वसनं वासः स्थानं । जत्थ—यत्र यस्मिन् गुरुकुले । णत्थि—न संति न विद्यन्ते । इमे—एते । पंच आधारा—आधारभूताः अनुग्रहकुशलाः । के तेऽत आह--आयरिय—आचार्यः । उवज्झाय—उपाध्यायः, आचर्यतेऽस्मादाचार्यः, उपेत्यास्मादधीयते उपाध्यायः । पवत्ति—प्रवर्तकः, संघं प्रवर्तयतीति प्रवर्तकः । थविर—स्थविरः यस्मात् स्थिराणि आचरणानि भवन्तीति स्थविरः । गणधराय—गणधराश्च गणं धरतीति गणधरः । यत्र इमे पंचाधारा आचार्योपाध्यायप्रवर्तकस्थविरगणधरा न सन्ति तत्र न कल्पते वास इति ॥१५५॥

अथ किंलक्षणास्तेऽत आह —

सिस्साणुग्गहकुसलो धम्मुवदेसो य संघवट्टवओ ।
मज्जादुवदेसोवि य गणपरिरक्खो मुणेयव्वो ॥

शिष्यानुग्रहकुशलःधर्मोपदेशकश्च संघप्रवर्तकः ।
मर्यादोपदेशकोपि च गणपरिरक्षः ज्ञातव्यः ॥ १५६ ॥

एतेषामाचार्यादीनामेतानि यथासंख्येन लक्षणानि । सिस्साणुग्गहकुसलो—शिष्यस्य शासितुं योग्यस्यानुग्रह उपादानं तस्मिंस्तस्य वा कुशलो दक्षः शिष्यानुग्रहकुशलो दीक्षादिभिरनुग्राहकः परस्यात्मनश्च । धम्मुवदेसोय—धर्मस्य दशप्रकारस्योपदेशकः कथकः धर्मोपदेशकः । संघवट्टवओ—संघप्रवर्तकश्चर्यादिभिरुपकारकः । मज्जादुवदेसोविय—मर्यादायाः स्थितेरुपदेशको मर्यादोपदेशकः । गणपरिरक्खो—गणस्य परिरक्षकः पालको गणपरिरक्षकश्च । मुणेयव्वो—मन्तव्यो ज्ञातव्यः । मन्तव्यशब्दः सर्वत्र संबंधनीयः । यत्र चैते पंचाधाराः सन्ति तत्र वासः कर्तव्य इति शेषः ॥१५६॥

अथ तेन गच्छता यद्यन्तराले किंचिल्लब्धं पुस्तकादिकं तस्य कोऽर्ह इत्याह—

जंतेणंतरलद्धं सचित्ताचित्तमिस्सयं दव्वं ।
तस्स य सो आइरिओ अरिहदि एवंगुणो सोवि॥

यत् तेनांतरलब्धं सचित्ताचित्तामिश्रकं द्रव्यं ।
तस्य च स आचार्यः अर्हति एवंगुणः सोपि ॥ १५७॥

जंतेण—यत्तेन । अंतरलद्धं—अन्तराले लब्धं प्राप्तं । सचित्ताचित्तमिस्सयं दव्वं—सचित्ताचित्तमिश्रकं द्रव्यं सचित्तं

छात्रादिकं, अचित्तं पुस्तकादिकं, मिश्रं पुस्तकादिसमन्वितं जीवद्रव्यं । तस्स य—तस्य च । सो आयरिओ—स आचार्यः । अरिहदि—अर्हः । अथवा तद्द्रव्यं आचार्योऽर्हति । सचित्ताचित्तमिश्रकं द्रव्यं यत्तेनान्तराले लब्धं तस्य स आचार्योऽर्होऽर्हति वा तद्द्रव्यमिति वा आचार्योऽपि कथं विशिष्टः एवंगुणः सोऽपि !

कथंगुणोत आह —

संगहणुग्गहकुसलो सुत्तत्थविसारओ पहियकित्ती
किरिआचरणसुजुत्तो गाहुयआदेज्जवयणो य ॥

संग्रहानुग्रहकुशलःसूत्रार्थविशारदःप्रथितकीर्तिः ।
क्रियाचरणसुयुक्तो ग्राह्यादेयवचनश्च ॥ १५८ ॥

संगहणुग्गहकुसलो—संग्रहणं संग्रहः, अनुग्रहणमनुग्रहः, कोऽनयोर्भेदो दीक्षादिदानेनात्मीयकरणं संग्रहः दत्तदीक्षस्य शास्त्रादिभिः संस्करणमनुग्रहस्तयोः कर्तव्ये ताभ्यां वा कुशलो निपुणः संग्रहानुग्रहकुशलः । सुत्तत्थविसारओ—सूत्रं चार्थश्च सूत्रार्थौ तयोस्ताभ्यां वा विशारदोऽवबोधको विस्तारको वा सूत्रार्थविशारदः । पहिदकित्ती—प्रख्यातकीर्तिः । किरियाचरणसुजुत्तो—क्रिया त्रयोदशप्रकारा पंचनमस्कारावश्यकासिकानिषेधिकाभेदात् । आचरणमपि त्रयोदशविधं पंचमहाव्रतपंचसमितित्रिगुप्तिविकल्पात् । तयोस्ताभ्यां

वा सुयुक्तः आशक्तः क्रियाचरणसुयुक्तः । गाहुयं-ग्राह्यं । आदेज्जं-आदेयं । ग्राह्यं आदेयं वचनं यस्यासौ ग्राह्यादेयवचनः । उक्तमात्रस्य ग्रहणं ग्राह्यं एवमेवैतदित्यनेन भावेन ग्रहणं, आदेयं प्रमाणीभूतम् ॥ १५८ ॥

पुनरपि—

गंभीरो दुद्धरिसो सूरो धम्मप्पहावणासीलो ।
खिदिससिसायरसरसो कमेण तं सो दु संपत्तो ॥

गंभीरो दुर्धर्षः शूरः धर्मप्रभावनाशीलः ।
क्षितिशशिसागरसदृशः क्रमेण तं स तु संप्राप्तः ॥ १५९

गंभीरो-अक्षोभ्यो गुणैरगाधः । दुद्धरिसो-दुःखेन धृष्यत इति दुर्धर्षः प्रवादिभिरकृतपरिभवः । सूरो-शूरः शौर्योपेतः समर्थः । धम्मप्पहावणासीलो-धर्मश्च प्रभावना च धर्मस्य वा प्रभावना तयोस्ताभ्यां वा शीलं तात्पर्येण वृत्तिर्यस्यासौ धर्मप्रभावनाशीलः । खिदि-क्षितिः पृथिवी, ससि-शशी चन्द्रमाः, सायर-सागरः समुद्रः । क्षमया क्षितिः सौम्येन शशी निर्मलत्वेन सागरोऽतस्तैः सरिसो-सदृशः समः क्षितिशशिसागरसदृशः । एवंगुणविशिष्टो य आचार्यस्तमाचार्यं । कमेण-क्रमेण न्यायेनागमोक्तेन । सो दु-स तु शिष्यः । संपत्तो-संप्राप्तः प्राप्तवानिति ॥ १५९ ॥

तस्यागतस्याचार्यादयः किं कुर्वन्तीत्याह—

आएसे एज्जंतं सहसा दट्ठूण संजदा सव्वे ।
वच्छल्लाणासंगहपणमणहेदुं समुट्ठंति ॥ १६० ॥

आयासेन आगच्छतं सहसा दृष्ट्वा संयताः सर्वे ।
वात्सल्याज्ञासंग्रहप्रणमनहेतोः समुत्तिष्ठंते ॥ १६० ॥

आएसं—आगतं पादोष्णं प्राघूर्णकं आयस्यायासं कृत्वा वा । एज्जंतं—आगच्छन्तं । सहसा—तत्क्षणादेव । दट्ठूण—दृष्ट्वा । संजदा—संयताः । सव्वे—सर्वेऽपि । समुट्ठंति—समुत्तिष्ठंते ऊर्ध्वज्ञवो भवन्ति । किंहेतोरित्याह—वच्छल्ल—वात्सल्यनिमित्तं । आणा—सर्वज्ञाज्ञापालनकारणं । संगह—संग्रह आत्मीयकरणार्थं । पणमणहेदुं—प्रणमनहेतोश्च ॥१६०॥

पुनरपि—

पच्चुग्गमणं किच्चा सत्तपदं अण्णमण्णपणमं च ।
पाहुणकरणयकदे तिरयणसंपुच्छणंकुज्जा ॥ १६१

प्रत्युद्गमनं कृत्वा सप्तपदं अन्योन्यप्रणामं च ।
पादोष्णकरणीयकृते तिरत्नसंप्रश्नं कुर्यात् ॥ १६१ ॥

पच्चुग्गमणं किच्चा—प्रत्युद्गमनं कृत्वा । सत्तपदं—सप्तपदं यथा भवति । अण्णमण्णपणामं च—अन्योऽन्यप्रणामं च परस्परवन्दनाप्रतिवन्दने च । ततः पाहुणकरणीयकदे—पादोष्णस्य यत्कर्तव्यं तस्मिन् कृते प्रतिपादिते सति पश्चात् । ति-

रयणसंपुच्छणं–त्रिरत्नसंप्रश्नं सम्यग्दर्शनज्ञानचारित्रसंप्रश्नं। कुज्जा कुर्यात्करोतु ॥ १६१ ॥

पुनरपि तस्यागतस्य किं क्रियत इत्याह—

आएसस्स तिरत्तं णियमा संघाडओ दु दायव्वो ।
किरियासंथारादिसु सहवासपरिक्खणाहेऊं ॥

आगतस्य त्रिरात्रं नियमात् संघाटकस्तु दातव्यः ।
क्रियासंस्तारादिषु सहवासपरीक्षणाहेतोः १६२

आएसस्स–आगतस्य पादोष्णस्य । तिरत्तं–त्रिरात्रं त्रयो दिवसाः । णियमा–नियमान्निश्चयेन । संघाडओ–संघाटकः सहायः । त्वेवकारार्थे । दायव्वो–दातव्यः । केषु प्रदेशेष्वत आह—किरिया–क्रियाः स्वाध्यायवन्दनाप्रतिक्रमणादिकाः । संथार–संस्तारं शयनीयप्रदेशस्तावादिर्येषां ते क्रियासंस्तारादयस्तेषु षडावश्यकक्रियास्वाध्यायसंस्तरभिक्षामूत्रपुरीषोत्सर्गादिषु । किंनिमित्तमत आह–(सहवास)-सहवसनं सहवासतेन सार्द्धमेकस्मिन् स्थाने सम्यग्दर्शनादिषु सहाचरणं तस्य परिक्खणाहेऊं परीक्षणं परीक्षा वा तदेव हेतुः कारणं सहवासपरीक्षणहेतुस्तस्मात्तेन सहाचरणं करिष्याम इति हेतोः । आगतस्य नियमात्त्रिरात्रं संघाटको दातव्यः क्रियासंस्तरादिषु सहवासपरीक्षणनिमित्तमिति ॥ १६२ ॥

आगंतुयवत्थव्वा पाडिलेहाहिं तु अण्णमण्णाहिं ।

अण्णोण्णकरणचरणंजाणणहेदुपरिक्खंति॥१६३

आगंतुकवास्तव्याःप्रतिलेखनाभिस्तु अन्योन्याभिः
अन्योन्यकरणचरणं ज्ञानहेतु परीक्षंते ॥ १६३ ॥

आगंतुयवत्थव्वा— आगन्तुकाश्च वास्तव्याश्चागन्तुक-वास्तव्याः । पडिलेहाहिं—प्रतिलेखनाभिः परीक्षाभिः । अण्णमण्णाहिं—अन्याभिरन्याभिः क्रियाभिः प्रतिलेखनेन भोजनेन स्वाध्यायेन प्रतिक्रमणादिभिश्च । अण्णोण्णं—परस्परं । करणचरणं—त्रयोदशक्रियाचारित्र ॥ अथवान्योऽन्यस्य करणचरणे तयोर्ज्ञानं तदर्थं अन्योन्यकरण-चरणज्ञानहेतोः । परिक्खंति—परीक्षन्ते गवेषयन्ति । पर-स्परं त्रयोदशविधकरणचरणं आगन्तुकवास्तव्याः परीक्षन्ते काभि कृत्वाः ? परस्परं दर्शनप्रतिदर्शनक्रियाभिः किंहेतोर-वबोधार्थमिति ॥ १६३ ॥

केषु प्रदेशेषु परीक्षन्ते तत आह—

आवासयठाणादिसु पडिलेहणवयणगहणणिक्खेव सज्झाएग्गविहारे भिक्खग्गहणे परिच्छंति ॥१६४

आवश्यकस्थानादिषु प्रतिलेखनवचनग्रहणनिक्षेपेषु स्वाध्याये एकविहारे भिक्षाग्रहणे परीक्षंते ॥१६४ ॥

आवासयठाणादिसु—आवश्यकस्थानादिषु षडावश्यक-

क्रियाकायोत्सर्गादिषु आदिशब्दाद्यद्यपि शेषस्य संग्रहः तथापि स्पष्टार्थमुच्यते। पडिलेहणं—प्रतिलेखनं चक्षुरिंद्रियपिच्छिकादिभिस्तात्पर्यं। वयणं- वचनं। गहणं--ग्रहणं। णिक्खेवो-निक्षेप एतेषां द्वन्द्वः प्रतिलेखनवचनग्रहणनिक्षेपेषु। सज्झाये-स्वाध्याये। एगविहारे-एकाकिनो गमनागमने। भिक्खग्गहणे-भिक्षाग्रहणे चर्यामार्गे। परिच्छंति-परीक्षन्तेऽन्वेषयन्ति॥ १६४॥

परीक्ष्यागन्तुको यत्करोति तदर्थमाह-

विस्समिदो तद्दिवसं मीमांसित्ता णिवेदयदि गाणिणे
विणएणागमकज्जं बिदिए तदिए व दिवसम्मि॥

विश्रांतः तद्दिवसं मीमांसित्वा निवेदयति गाणिने।
विनयेनागमकार्यं द्वितीये तृतीये वा दिवसे॥

विस्समिदो-विश्रान्तः सन् विश्रम्य पथश्रमं त्यक्त्वा तद्दिवसं-तस्मिन्वा दिने-तद्दिवसं विश्रम्य गमयित्वा। मीमंसित्ता-मीमांसित्वा परीक्ष्य तच्छुद्धाचरणं ज्ञात्वा। णिवेयइ-निवेदयति प्रतिबोधयति। गणिणे-गणिने आचार्याय। विणएण-विनयेन। आगमकज्जं-आगमनकार्यं स्वकीयागमनप्रयोजनं। विदिए-द्वितीये। तदिए-तृतीये दिवसम्मि-दिवसे। तं दिवसं विश्रम्य द्वितीये तृतीये वा दिवसे विनयेनोपढौक्याचरणं च परीक्षाचार्यायागमनकार्यं निवेदय-

त्यागन्तुकः । अथवाचार्यस्य गृह्यास्तं परीक्ष्य निवेदयन्ति गणिने इति ॥ १६५ ॥

एवं निवेदयते यदाचार्यः करोति तदर्थमाह—

आगंतुकणामकुलं गुरुदिक्खामाणवरसवासं च।
आगमणदिसासिक्खापडिकमणादी य गुरुपुच्छा

आगंतुकनामकुलं गुरुदीक्षामानवर्षावासं च।
आगमनदिशाशीक्षाप्रातिक्रमणादयश्च गुरुपृच्छा ॥

आगन्तुक (णामकुलं)—आगन्तुकस्य पादोष्णस्य, नाम संज्ञा, कुलं गुरुसंतानः, गुरुःप्रव्रज्याया दाता। दिक्खा-माणं—दीक्षाया मानं परिमाणं। वरिसवासं च वर्षस्य वासः वर्षवासश्च वर्षकालकरणं च, आगमणदिसा—आगमनस्य दिशा कस्या दिश आगतः। सिक्खा—शिक्षा श्रुतपरिज्ञानं। पडिक्कमणादीय—प्रतिक्रमणा आदिर्येषां ते प्रतिक्रमणादयः। गुरुपुच्छा—गुरोः पृच्छा गुरुपृच्छा। एवं गुरुणा तस्यागतस्य पृच्छा क्रियते किं तव नाम,? कुलं च ते किं? गुरुश्च युष्माकं कः? दीक्षापरिमाणं च भवतः कियत्?, वर्षकालश्च भवद्भिः क्व कृतः? कस्या दिशो भवानागतः? किं पठितः? किं च श्रुतं त्वया, कियन्त्यः प्रतिक्रमणास्तव संजाताः, न च भूताः कियन्त्यः। प्रतिक्रमणाशब्दो युजन्तोऽयं द्रष्टव्यः। किंच त्वया श्रवणीयं? कियतोऽध्वन आगतो भवानित्यादि ॥ १६६ ॥

एवं तस्य स्वरूपं ज्ञात्वा—

जदि चरणकरणसुद्धो णिच्चुज्जुत्तोविणीदमेधावी।
तस्सिट्ठं कधिदव्वं सगसुदमत्तीए भणिऊण॥

यदि चरणकरणशुद्धो नित्योद्युक्तो विनीतो मेधावी।
तस्येष्टं कथयितव्यं स्वकश्रुतशक्त्या भणित्वा॥१६७॥

जइ- यदि चरणकरणसुद्धो— चरणकरणशुद्धः चरणकरणयोर्लक्षण व्याख्यातं ताभ्यां शुद्धः। णिच्चुज्जुत्तो— नित्योद्युक्तो विगतातीचारः। विणीद—विनीतः। मेधावी- बुद्धिमान्। तस्सिट्ठं- तस्येष्टं यथावाञ्छितं। कधिदव्वं- कथयितव्यं निवेदयितव्य। सगसुदमत्तीए—स्वकीयश्रुतशक्त्या यथास्वपरिज्ञानं। भणिऊण- भणित्वा प्रतिपाद्य। यद्यसौ चरणकरणशुद्धो विनीतो बुद्धिमान् नित्योद्युक्तश्च तदानीं तेनाचार्येण तस्येष्टं कथयितव्यं स्वकीयश्रुतशक्त्या भणित्वा भणतीति॥ १६७॥

अथैवमसौ न भवतीति तदानीं किं कर्तव्यं? इत्युत्तरमाह-

जदि इदरो सोऽजोग्गो छेदमुवट्ठावणं च कादव्वं।
जदि णेच्छदि छंडेज्जो अह गेण्हदि सोवि छेदरिहो

यदि इतरः स अयोग्यः छेद उपस्थापनं च कर्तव्यः।
यदि नेच्छति त्यजेत् अथ गृह्णाति सोपि छेदार्हः॥१६८

जदि-यदि। इदरो-इतरो व्रतचरणैरशुद्धः। सो—सः। अग-

न्तुकः । अजोगो–अयोग्यो देववन्दनादिभिः, अथवा योग्यः प्रायश्चित्तशास्त्रदृष्टः । छेदो–छेदः तपोयुक्तस्य कालस्य पादत्रिभागार्धादेःपरिहारः । उवट्ठावणं च–उपस्थापनं च । यदि सर्वथा व्रताद् भ्रष्टः पुनर्व्रतारोपणं । कादव्वो-कर्तव्यः करणीयः कर्तव्यं वा । जदि णेच्छदि–यदि नेच्छेत् अथ नाभ्युगच्छति अथवा लडन्तोयं प्रयोगः । छंडेज्जो–त्यजेत् परिहरेत् । अध गिण्हदि अथ तादृग्भूतमपि छेदार्हतं गृणहाति अदत्तप्रायश्चित्तं तदानीं सोवि सोप्याचार्यः । छेदरिहो–छेदार्हः प्रायश्चित्तयोग्यः संजातः । यदि स शिष्यः प्रायश्चित्तयोग्यो भवति तदानीं तस्य च्छेदः कर्तव्यः उपस्थापनं वा कर्तव्यं अथ नेच्छति छेदमुपस्थानं वा तं त्यजेत् । यदि पुनर्मोहात्तं गृणहाति सोऽप्याचार्यश्छेदार्हो भवतीति ॥ १६८ ॥

तत ऊर्ध्वं किं कर्त्तव्यं ? इत्याह––

एवं विधिणुववण्णो एवं विधिणेव सोवि संगहिदो ।
सुत्तत्थं सिक्खंतो एवं कुज्जा पयत्तेण ॥ १६९ ॥

एवं विधिना उपपन्नःएवंविधिनैव सोपि संगृहीतः ।
सूत्रार्थं शिक्षमाणः एवं कुर्यात् प्रयत्नेन ॥ १६९ ॥

एवं कथितविधानेनैवंविधिना । उववण्णो उपपन्न उपस्थितः पादोष्णः तेनाप्याचार्येण एवंविधिना कथितविधानेन कृताचरणशोधनेन । सोवि–सोऽपि शिक्षकः । संग-

हिदो-संगृहीतः आत्मीकृतः सन्। एवं कुज्जा—एवं कुर्यात् एवं कर्तव्यं तेन। पयत्तेण-प्रयत्नेनादरेण। कथमेवं कुर्यात्। सुत्तत्थं-सूत्रार्थं। सिक्खंतो-शिक्षमाणः। सूत्रार्थं शिक्षमाणं कुर्यात्। सूत्रार्थं शिक्षमाणेनैतत्कर्तव्यमिति वा।

किं तत्तेन कर्तव्यमित्याह—

पडिलेहिऊण सम्मं दव्वं खेत्तं च कालभावे य।
विणयउवयारजुत्तेणज्झेदव्वं पयत्तेण ॥ १७० ॥

प्रत्यालेख्य सम्यक् द्रव्यं क्षेत्रं च कालभावौ च।
विनयोपचारयुक्तेनाध्येतव्यं प्रयत्नेन ॥ १७० ॥

पडिलेहिऊण-प्रतिलेख्य निरूप्य। सम्मं-सम्यक्। दव्वं-द्रव्यं शरीरगतं पिंडकादित्रणगतं भूमिगतं चर्मास्थिमूत्रपुरीषादिकं। खेत्तं च क्षेत्रं च हस्तशतमात्रभूमिभागं। कालभावेय-कालभावौ च संध्यागर्जनविद्युदुत्पादादिसमयविवर्जनं कालशुद्धिः। क्रोधमानमायालोभादिविवर्जनं भावशुद्धिः परिणामशुद्धिः, क्षेत्रगताशुद्ध्यपनयनं क्षेत्रशुद्धिः, शरीरादिशोधनं द्रव्यशुद्धिः। विणयउवयारजुत्तेण—विनयश्चोपचारश्च विनय एवोपचारस्ताभ्यां तेन वा युक्तः समन्वितो विनयोपचारयुक्तस्तेन। अज्झेयव्वं—अध्येतव्यं पठितव्यं। पयत्तेण—प्रयत्नेन द्रव्यक्षेत्रकालभावान् सम्यक् प्रतिलेख्य तेन शिष्येण विनयोपचारयुक्तेन प्रयत्नेनाध्येतव्यं नोपेक्षणीयमिति ॥ १७० ॥

यदि पुनः—

दव्वादिवदिक्कमणं करेदि सुत्तत्थसिक्खलोहेण
असमाहिमसज्झायं कलहं वाहिं वियोगं च १७१

द्रव्यादिव्यतिक्रमणं करोति सूत्रार्थशिक्षालोभेन ।
असमाधिरस्वाध्यायःकलहो व्याधिःवियोगश्च ॥१७१॥

दव्वादिवदिक्कमणं—द्रव्यमादिर्येषां ते द्रव्यादयस्तेषां व्यतिक्रमणमतिक्रमोऽविनयो द्रव्यादिव्यतिक्रमणं द्रव्यक्षेत्रकालभावैः शास्त्रस्य परिभवं । करेदि—करोति कुर्यात् । सुत्तत्थसिक्खलोहेण—सूत्रं चार्थश्च सूत्रार्थौ तयोः शिक्षात्मसंस्कारोऽवबोध आगमनं तस्या लोभ आशक्तिस्तेन सूत्रार्थशिक्षालोभेन । असमाहिं असमाधिः मनसोऽसमाधानं सम्यक्त्वादिविराधनं । असज्झायं—अस्वाध्यायः शास्त्रादीनामलाभः शरीरादेर्विघातो वा । कलहं—कलह आचार्यशिष्ययोः परस्परं द्वन्द्वः, अन्यैर्वा । वाहिं—व्याधिः ज्वरश्वासकासभगंदरादिः । विओगं च—वियोगश्च । चः समुच्चयार्थः । आचार्यशिष्ययोरेकस्मिन्ननवस्थानं । यदि पुनर्द्रव्यादिव्यतिक्रमणं करोति सूत्रार्थशिक्षालोभेन शिष्यस्तदानीं किं स्यात् ? असमाध्यस्वाध्यायकलहव्याधिवियोगाः स्युः ।१७१।

न केवलं शास्त्रपठननिमित्तं शुद्धिः क्रियते तेन किंतु जीव—दयानिमित्तं चेति ।

संथारवासयाणं पाणीलेहाहिं दंसणुज्जोवे ।
जत्तेणुभये काले पडिलेहा होदि कायव्वा॥१७२॥

संस्तारावकाशानां पाणिरेखाभिः दर्शनोद्योते ।
यत्नेनोभयोःकालयोःप्रतिलेखा भवति कर्तव्या॥१७२॥

संथारवासयाणं–संस्तारश्चतुर्धा भूमिशिलाफलकतृणभेदात् आवासोऽवकाशः आकाशप्रदेशसमूहः संस्तरादिप्रदेश इत्यर्थः । संस्तरश्चावकाशश्च संस्तरावकाशौ तावादिर्येषां ते संस्तरावकाशादयः बहुवचननिर्देशादादिशब्दोपादानं तेषां संस्तरावकाशादीनां । पाणीलेहाहिं–पाणिलेखाभिर्हस्ततलगतलेखाभिः । दंसणुज्जोवे–दर्शनस्य चक्षुष उद्योतः प्रकाशो दर्शनोद्योतस्तस्मिन् दर्शनोद्योते पाणिरेखादर्शनहेतुभूते चक्षुःप्रकाशे यावता चक्षुरुद्योतेन हस्तरेखा दृश्यन्ते तावति चक्षुषः प्रकाशेऽथवा पाणिरेखानामभिदर्शनं परिच्छेदस्तस्य निमित्तभूतोद्योते पाणिरेखाभिर्दर्शनोद्योते । अथवा प्राणिनो लिहंत्यास्वादयन्ति यस्मिन् स प्राणिलेहः स चासौ अभिदर्शनोद्योतश्च तस्मिन् प्राणिभोजननिमित्तनयनप्रसरे इत्यर्थः । जत्तेण–यत्नेन तात्पर्येण । उभये काले–उभयोः कालयोः पूर्वाह्णेऽपराह्णे च संस्तरादानदानकाल इत्यर्थः । पडिलेहा–प्रतिलेखा शोधनं सन्मार्जनं । होइ–भवति । कादव्वा–कर्तव्या । उभयोः कालयोः हस्तलेखादर्शनोद्योते संजाते यत्नेन संस्तरावकाशादीनां प्रतिलेखा भवति कर्तव्येति ॥१७२॥

परगणे वसता तेन किं स्वेच्छया प्रवर्तितव्यं ? नेत्याह–

उब्भामगादिगमणे उत्तरजोगे सकज्जआरंभे ।
इच्छाकारणिजुत्ते आपुच्छा होइ कायव्वा ॥७३

उद्भ्रामकादिगमने उत्तरयोगे स्वकार्यारंभे ।
इच्छाकारनियुक्ता आपृच्छा भवति कर्तव्या ॥१७३॥

उब्भामगादिगमणे—उद्भ्रामको ग्रामः चर्या वा स आदिर्येषां ते उद्भ्रामकादयस्तेषामुद्भ्रामकादीनां गमनमनुष्ठानं तस्मिन् ग्रामभिक्षाव्युत्सर्गादिके । उत्तरजोगे—उत्तरः प्रकृष्टः योगः वृक्षमूलादिस्तस्मिन्नुत्तरयोगे । सकज्जआरम्भे—स्वस्यात्मनः कार्यं प्रयोजनं तस्यारम्भ आदिक्रिया तस्मिन् स्वकार्यारंभे इच्छाकारणिजुत्तो इच्छाकारेण कर्तुमभिप्रायेण नियुक्त उद्युक्तः स्थितस्तेन इच्छाकारनियुक्तेन, अथवा आपृच्छाया विशेषणं इच्छाकारनियुक्ता प्रणामादिविनयनियुक्ता आपुच्छा आपृच्छा सर्वेषां प्रश्नः होदि भवति, कादव्वा—कर्तव्या कार्या । तेन स्वगणे वसता यथा उद्भ्रामकादिगमने उत्तरयोगे स्वकार्यारम्भे इच्छाकारनियुक्तेनापृच्छा भवति कर्तव्या तथा परगणे वसतापीत्यर्थः ॥ १७३ ॥

तथा वैयावृत्यमपीत्याह—

गच्छे वेज्जावच्चं गिलाणगुरुबालबुड्ढसेहाणं ।
जहजोगं कादव्वं सगसत्तीए पयत्तेण ॥१७४॥

गच्छे वैयावृत्त्यं ग्लानगुरुबालवृद्धशैक्षाणां ।
यथायोग्यं कर्तव्यं स्वकशक्त्या प्रयत्नेन ॥ १७४ ॥

गच्छे-ऋषिसमुदाये चातुर्वर्ण्यश्रमणसंघे वा सप्तपुरुषकल्पिपुरुषको वा तस्मिन् । वेज्जावच्चं-वैयावृत्त्यं कायिकव्यापाराहारादिभिरुपग्रहणं । गिलाण-ग्लानः व्याध्याद्युपपीडितः, क्षीणशक्तिकः । गुरुः-शिक्षादीक्षाद्युपदेशकः ज्ञानतपोऽधिको वा । बालो-नवकः पूर्वापरविवेकरहितो वा । बुड्ढ-वृद्धो जीर्णो जराग्रस्तो दीक्षादिभिरधिको वा । सेह-शैक्षः शास्त्रपठनोद्युक्तः स्वार्थपरः निर्गुणो दुराराध्यो वा एतेषां द्वन्द्वस्तेषां ग्लानगुरुबालवृद्धशैक्षाणां लक्षणनियोगात् पूर्वापरनिपातो द्रष्टव्यः । जहजोगं-यथायोग्यं क्रममनतिलंघ्य तदभिप्रायेण वा । कादव्वं-कर्तव्यं करणीयं । सगसत्तीए-स्वशक्त्या स्वशक्तिमनवगूह्य । पयत्तेण प्रयत्नेनादरेण गच्छे ग्लानगुरुबालवृद्धशैक्षाणां यथायोग्यं प्रयत्नेन स्वशक्त्या वैयावृत्यं कर्तव्यमिति ॥ १७४ ॥

अथ तेन परगणे वन्दनादिक्रियाः किमेकाकिना क्रियंते नेत्याह—

दिवसियरादियपक्खियचाउम्मासियवरिस्सकिरियासुरिसिदेवबंदणादिसु सहजोगो होदि कायव्वो

दैवसिकीरात्रिकीपाक्षिकीचातुर्मासिकीवार्षिकीक्रियासु ऋषिदेवबंदनादिषु सहयोगो भवति कर्तव्यः ॥ १७५॥

दिवसिय-दिवसे भवा दैवसिकी अपराण्हनिर्वर्त्या । रादिय-रात्रौ भवा रात्रिकी पश्चिमरात्रावनुष्ठेया । पक्खिय-

पक्षान्ते चतुर्दश्याममावास्यायां पौर्णमास्यां वा पक्षशब्दः प्रवर्तते तस्मिन् भवा पाक्षिकी । (चाउम्मासिय—) चतुर्षु मासेषु भवा चातुर्मासिकी । (वारिसिय)—वर्षेषु भवा वार्षिकी । एताश्च ता क्रियाश्च । दैवसिकीरात्रिकीपाक्षिकीचातुर्मासिकीवार्षिकीक्रियास्तासु । रिसिदेववंदणादिसु—ऋषयश्च ते देवाश्च ऋषिदेवास्तेषां वन्दनादिर्यासां ता ऋषिदेववन्दनादयस्तासु ऋषिदेववन्दनादिषु क्रियासु । सह—सार्धं एकत्र । जोगो—योग उपयुञ्जनं । अथवाऽखण्डोऽयं शब्दः सहयोगः । दैवसिकादिक्रियासहचरिता वेलाः परिगृह्यन्ते दैवसिकादिवेलासु सहयोगः । दैवसिकादिक्रियाः सर्वैरेकत्र कर्तव्या भवंति । दैवसिकादिषु ऋषिदेववन्दनादिषु च क्रियासु सहयोगो भवति कर्तव्य इति ॥ १७५ ॥

अथ यद्यपराधस्तत्रोत्पद्यते किं तत्रैव शोध्यते उतान्यत्र तत्रैवेत्याह—

मणवयणकायजोगेणुप्पण्णवराध जस्स गच्छम्मि।
मिच्छाकारं किच्चा णियत्तणं होदि कायव्वं॥१७६॥

मनोवचनकाययोगैःउत्पन्नापराधः यस्य गच्छे ।
मिथ्याकारं कृत्वा निवर्तनं भवति कर्तव्यम् ॥ १७६ ॥

मणवयणकायजोगेण—मनोवचनकाययोगैः । उप्पण्ण—उत्पन्नः संजातः । अवराध—अपराधो व्रताद्यतिचारः । जस्स

यस्य। गच्छम्मि गच्छेगणे चतुःप्रकारे संघे। अथवा जस्स यस्मिन् गच्छे। मिच्छाकारं किच्चा-मिथ्याकारं कृत्वा पश्चात्तापंकृत्वा। णियत्तणं-निवर्तनमप्रवर्तनमात्मनः। होदि-भवति। कादव्वं-कर्तव्यं करणीयं। यस्मिन् गच्छे यस्य मनोवचनकाययोगैरपराध उत्पन्नस्तेन तस्मिन् गच्छे मिथ्याकारं कृत्वा निवर्तनं भवति कर्तव्यमिति। अथवा जस्स गच्छे-यस्य पार्श्वेऽपराध उत्पन्नस्तेन सह मर्षणं कृत्वा तस्मादपराधान्निवर्तनं भवति कार्यमिति॥ १७६॥

तत्र गच्छे वसता तेन किं सर्वैः सहालापोऽवस्थानं च क्रियते नेत्याह—

अज्जागमणे काले ण अत्थिदव्वं तधेव एक्केण।
ताहिं पुण सल्लावो ण य कायव्वो अकज्जेण॥१७७॥

आर्यागमने काले न स्थातव्यं तथैवैकेन।
ताभिः पुनः संलापो न च कर्तव्योऽकार्येण॥ १७७॥

अज्जागमणे काले-आर्याणां संयतीनामुपलक्षणमात्रमेतत् सर्वस्त्रीणां, आगमनं यस्मिन् काले स आर्यागमनस्तस्मिन्नार्यागमने काले। ण अत्थिदव्वं-नासितव्यं न स्थातव्यं। तधेव-तथैव। एक्केण-एकेन एकाकिना विजनेन। ताहिं-ताभिरार्यिकाभिः। पुण-पुनः बाहुल्येन। सल्लावो-सल्लापो वचनप्रवृत्तिः। ण य कायव्वो-नैव कर्तव्यो न कार्यः। अक-

ज्जेण—अकार्येण प्रयोजनमन्तरेण धर्मकार्योत्पत्तौ कदाचिद्-वर्धं । आर्यागमनकाले एकाकिना विजनेन न स्थातव्यं, धर्मकार्यमन्तरेण ताभिः सहालापोऽपि न कर्तव्य इति ॥ १७७ ॥

यद्येवं कथं तासां प्रायश्चित्तादिकथनं प्रवर्तत इति प्रश्ने-ऽतः प्राह—

तासिं पुण पुच्छाओ इक्किस्से णय कहिज्ज एक्को दु ।
गणिणी पुरओ किच्चा जदि पुच्छइ तो कहेदव्वं ॥

तासां पुनः पृच्छा एकस्या नैव कथयेत् एकस्तु ।
गणिनीं पुरतः कृत्वा यदि पृच्छति ततः कथयितव्यं ॥

तासिं—तासामार्याणां । पुण—पुनः पुनरपि । पुच्छा-ओ पृच्छाः प्रश्नान् कार्याणि । इक्किस्से—एकस्या एकाकिन्या ण य कहिज्ज—नैव कथयेत् नैव कथनीयं । एक्को दु—एक-स्तु एकाकी सन् अपवादभयात् । यद्येवं कथं क्रियते—गणिणी—गणिनीं तासां महत्तरिकां प्रधानां । पुरओ—पुरोऽग्रतः । किच्चा— कृत्वा । यदि पुच्छदि—यदि पृच्छति प्रश्नं कुर्यात् । तो—ततोऽनेन विधानेन । कहेदव्वं कथयितव्यं प्रतिपादयि-तव्यं नान्यथा । तासां मध्ये एकस्याः कार्यं नैव कथयेदे-काकी सन, गणिनीं पुरः कृत्वा यदि पुनः पृच्छति ततः कथ-नीयं मार्गप्रभावनामिच्छतेति ॥ १७८ ॥

व्यतिरेकद्वारेण प्रतिपाद्यान्वयद्वारेण प्रतिपादयन्नाह—

तरुणो तरुणीए सह कहा व सल्लावणं च जदिकुज्जा आणाकोवादीया पंचवि दोसा कदा तेण ॥१७९॥

तरुणःतरुण्या सह कथां वा संलापं च यदि कुर्यात् ।
आज्ञाकोपादय पंचापि दोषाः कृताः तेन ॥ १७९ ॥

यदि कथितन्यायेन न प्रवर्तते चेत् । तरुणो यौवनपिशाचगृहीतः । तरुणीए-तरुण्या उन्मत्तयौवनया । सह-सार्धं कहाव-कथां वा प्राक्प्रबन्धचरितं । सल्लावणं च-सल्लापं च अथवा-(असब्भावणं च) प्रहासप्रवचनं च । जदि कुज्जा-यदि कुर्यात् विधेयश्चेत् । आणाकोधा (वा)दीया आज्ञाकोपादयः आज्ञाकोपानवस्थामिथ्यात्वाराधनात्मनाशसंयमविराधनानि । पंचवि- पंचापि । दोसा-दोषाः पापहेतवः कदा-कृता अनुष्ठिताः । तेण-तेनैवंकुर्वता । यदि तरुणस्तरुण्या सह कथामवसल्लापं च कुर्यात्ततः किं स्यात् ? आज्ञाकोपादिकाः पंचापि दोषाः कृतास्तेन स्युरिति ॥ १७९ ॥

यत्र बह्वयस्तिष्ठन्ति तत्र किमावासादिक्रिया युक्ताः ? नेत्याह-

णो कप्पदि विरदाणं विरदीणमुवासयाहि चिट्ठेदुं।
तत्थ णिसेज्जउवट्टणसज्झायाहारभिक्खवोसरणं ॥

न कल्पते विरतानां विरतीनामुपाश्रये स्थातुम् ।
तत्र निषद्योद्वर्तनस्वाध्यायाहारभिक्षाव्युत्सर्जनानि ॥

णो कप्पदि—न कल्पते न युज्यते । विरदाणं—विरतानां संयतानां पापक्रियाक्षयकरणोद्यतानां । विरदीणं-विरतीनां आर्यिकाणां उवासयम्हि—आवासे वसतिकादौ । चिट्ठदुं—चेष्टयितु स्थातुं वसितुं न केवलं । तत्थ—तत्र दीर्घकालाः क्रिया न युक्ताः किन्तु क्षणमात्रा याः क्रियास्ता अपि । णिसेज्ज—निषद्योपवेशनं । उवट्टणं—उद्वर्तनं शयनं लोटनं । सज्झाय—स्वाध्यायः शास्त्रव्याख्यानं परिवर्तनादयो वा । आहारभिक्खा—आहारभिक्षाग्रहणं । वोसरणं प्रतिक्रमणादिकं अथवा व्युत्सर्जनं मूत्रपुरीषाद्युत्सर्गः प्रदेशसाहचर्यात् एतेषां द्वन्द्वः सः । अन्याश्चैवमादयश्च क्रिया न युक्ताः । विरतानां चेष्टितुं आर्यिकाणामावासे न कल्पते, निषद्योद्वर्तनस्वाध्यायाहारभिक्षाव्युत्सर्जनानि च तत्र न कल्पंते । आहारभिक्षयोः को विशेष इति चेत् तत्कृतान्यकृतभेदात् ताभिर्निष्पादितं भोजनं आहारः, श्रावकादिभिः कृतं यत्तत्र दीयते सा भिक्षा । अथवा मध्यान्हकाले भिक्षार्थं पर्यटनं भिक्षा ओदनादिग्रहणमाहारः इति ॥ १८० ॥

किमर्थमेताभिः सह स्थविरत्वादिगुणसमन्वितस्यापि संसर्गो वार्यते यतः—

थेरं चिरपव्वइयं आयरियं बहुसुदं च तवसिं वा ।
ण गणेदि काममलिणो कुलमवि समणो विणासेइ

स्थविरं चिरप्रव्राजितं आचार्यं बहुश्रुतं च तपस्विनं वा ।

न गणयति काममलिनःकुलमपि श्रमणो विनाशयति

थेरं—स्थविरं आत्मानं सर्वत्र सम्बंधनीयं सामर्थ्यात् सोपस्कारत्वात् सूत्राणां। चिरपव्वइयं-चिरप्रव्रजितं प्ररूढव्रतं आयरियं—आचार्यं। बहुसुदं—बहुश्रुतं सर्वशास्त्रपारगं। तवसिं वा—तपस्विनं वा षष्ठाष्टमादिकयुक्तं चकाराद्वात्मनः समुच्चयः, अथवा स्थविरत्वादयो गुणा गृह्यंते, अथवात्मनोऽन्ये स्थविरत्वादयस्तान्। ण गणेदि—न गणयति नोऽपेक्षते नो पश्यति न गणयेद्वा। काममलिणो—कामेन मलिनः कश्मलः काममलिनो मैथुनेच्छोपद्रुतः। कुलमवि—कुलमपि कुलं मातृपितृकुलं सम्यक्त्वादिकं वा। समणो—श्रमणः। विणासेदि—विनाशयति विराधयति। स्थविरं चिरप्रव्रजिताचार्यंबहुश्रुतं तपस्विनमात्मानं केवलं न गणयति काममलिनः सन् श्रमणः कुलमपि विनाशयति। अथवा न केवलमात्मनः स्थविरत्वादीन् गुणान् न गणयति सम्यक्त्वादिगुणानपि विनाशयति। अथवा न केवलं कुलं विनाशयति किंतु स्थविरत्वादीनपि न गणयति परिभवतीत्यर्थः॥ १८१॥

एताः पुनराश्रयन् यद्यपि कुलं न विनाशयत्यात्मानं वा तथाप्यपवादं प्राप्नोतीत्याह—

कण्णं विधवं अंतेउरियं तह सइरिणी सलिंगं वा।
आचिरेणालियमाणो अववादं तत्थ पप्पोदि॥

कन्यां विधवां आंतःपुरिकां तथा स्वैरिणीं सलिंगिनीं।
अचिरेणालीयमानः अपवादं तत्र प्राप्नोति ॥

कण्णं—कन्यां विवाहयोग्यां। विहवं—विगतो मृतो गतो धवो भर्ता यस्याः सा विधवा तां। अंतेउरियं—अन्तःपुरे भवा आन्तःपुरिका तामान्तःपुरिकां स्वार्थे कः—राज्ञीं राज्ञीसमानां विलासिनीं वा। तह—तथा। सइरिणीं—स्वेच्छया परकुलानीयतीति स्वैरिणी तां स्वेच्छाचारिणीं। सलिंगं वा—समानं लिंगं सलिंगं व्रतादिकं कुलं वा तद्विद्यते यस्याः सा सलिंगिनी तां। अथवा सह लिंगेन वर्तते इति सलिंगा तां स्वदर्शनेऽन्यदर्शने वा प्रव्रजितां। अचिरेण—क्षणमात्रेण मनागपि। अल्लियमाणो—आलीयमानः आश्रयमाणः सहवासालापादिक्रियां कुर्वाणः। अववादं—अपवादं अकीर्तिं। तत्थ—तत्राश्रयणे। पप्पोदि—प्राप्नोति अर्जयतीति। कन्यां विधवां आन्तःपुरिकां स्वैरिणीं सलिंगिनीं वालीयमानोऽचिरेण तत्र अपवादं प्राप्नोतीति ॥ १८२ ॥

नन्वार्यादिभिः सह संसर्गः सर्वथा यदि परित्यजनीयः कथं तासां प्रतिक्रमणादिकं क एवमाह सर्वथा त्यागो यावतैवं विशिष्टेन कर्तव्य इत्याह—

पियधम्मो दढधम्मो संविग्गोऽवज्जभीरु परिसुद्धो
संगहणुग्गहकुसलो सददं सारक्खणाजुत्तो ॥८३

प्रियधर्मा दृढधर्मा संविग्नःअवद्यभीरुःपरिशुद्धः।

संग्रहानुग्रहकुशलः सततं सारक्षणायुक्तः ॥ १८३ ॥

पियधम्मो-प्रिय इष्टो धर्मः क्षमादिकश्चारित्रं वा यस्यासौ प्रियधर्मा उपशमादिसमन्वितः । दढधम्मो-दृढः स्थिरो धर्मो धर्माभिप्रायो यस्यासौ दृढधर्मा। संविग्गो-संविग्नो धर्मतत्फलविषये हर्षसम्पन्नः । अवज्जभीरु-अवद्यभीरुरवद्यं पापं कुत्स्यं तस्माद्भयनशीलोऽवद्यभीरुः । परिसुद्धो-परिसमन्ताच्छुद्धः परिशुद्धोऽखण्डिताचरणः । संगह-संग्रहो दीक्षाशिक्षाव्याख्यानादिभिरुपग्रहः, अणुग्गह-अनुग्रहः प्रतिपालनं आचार्यत्वादिदानं ताभ्यां तयोर्वा (कुसलो) कुशलो निपुणः संग्रहानुग्रहकुशलः पात्रभूतं गृणहाति गृहीतस्य च शास्त्रादिभिः संयोजनं । सददं-सततं सर्वकालं । सारक्खणाजुत्तो-सहारक्षणेन वर्तत इति सारक्षणा क्रिया पापक्रियानिवृत्तिस्तया युक्त रक्षायां युक्तः हितोपदेशदातेति ॥१८३॥

गंभीरो दुद्धरिसो मिदवादी अप्पकोदुहल्लो य ।
चिरपव्वइदो गिहिदत्थो अज्जाणं गणधरो होदि॥

गंभीरो दुर्धर्षो मितवादी अल्पकुतूहलश्च ।
चिरप्रव्रजितःगृहीतार्थःआर्याणां गणधरो भवति १८४

गंभीरो-गुणैरगाधोऽलब्धपरिमाणः। दुद्धरिसो-दुर्धर्षोऽकदर्थ्यः स्थिरचित्तः । मिदवादी-मितं परिमितं वदतीत्येवं शीलो मितवादी अल्पवदनशीलः । अप्पकोदुहल्लो य-अल्पं

स्तोकं कुतूहलं कौतुकं यस्यासावल्पकुतूहलोऽविस्मयनीयोऽथवा अल्पगुह्यदीर्घस्तब्धः प्रश्रवादिरहितः । चशब्दः समुच्चयार्थः । चिरपव्वइदो–चिरप्रव्रजितः निर्व्यूढव्रतभारो गुणज्येष्ठः । गिहिदत्थो–गृहीतो ज्ञातोऽर्थः पदार्थस्वरूपं येनासौ गृहीतार्थः आचारप्रायश्चित्तादिकुशलः । अज्जाणं–आर्याणां संयतीनां । गणधरो मर्यादोपदेशकः प्रतिक्रमणाद्याचार्यः । होदि–भवति । प्रियधर्मा दृढधर्मा संविग्नोऽवद्यभीरुः परिशुद्धः संग्रहानुग्रहकुशलः संततं सारक्षणयुक्तो गम्भीरदुर्धर्षमितवाद्यल्पकौतुकचिरप्रव्रजितगृहीतार्थश्च यः स आर्याणां गणधरो भवतीति ॥ १८४ ॥

अथान्यथाभूतो यदि स्यात् तदानीं किं स्यादित्यत आह—

एवंगुणवदिरित्तो जदि गणधारित्तं करेदि अज्जाणं ।
चत्तारि कालगा से गच्छादिविराहणा होज्ज ॥१८५

एवंगुणव्यतिरिक्तः यदि गणधरत्वं करोति आर्याणाम् ।
चत्वारःकालकाःतस्य गच्छादिविराधना भवेत् ॥

एवं–अनेन प्रकारेण एतैर्गुणैः । वदिरित्तो–व्यतिरिक्तो मुक्तः । जदि–यदि । गणधारित्तं–गणधारित्वं प्रतिक्रमणादिकं । करेदि–करोति । अज्जाणं–आर्याणां तपस्विनीनां । चत्तारि–चत्वारः । कालगा–कालकाः गणपोषणात्मसंस्कारसल्लेखनोत्तमार्थकाला आद्या वा विराधिता भवन्तीति वाक्यशेषः । अथवा कलिकाग्रहणेन प्रायश्चित्तानि परिगृह्यन्ते

चत्वारि प्रायश्चित्तानि परिगृह्यन्ते च्छेदमूलपरिहारपारंचिकानि । अथवा चत्वारो मासाः कांजिकभक्ताहारेण । से-तस्य आर्यागणधरस्य भवन्तीत्यर्थः । गच्छादि-गच्छ ऋषिकुलं आदिर्येषां ते गच्छादयस्तेषां, विराहणा-विराधना विनाशो विपरिणामो वा गच्छादिविराधना गच्छात्मगण-कुलश्रावकमिथ्यादृष्ट्यादयो विराधिता भवन्तीत्यर्थः । अथवा गच्छात्मविनाशः होज्ज-भवेत् । पूर्वोक्तगुणव्यतिरिक्तो यद्यार्याणां गणधरत्वं करोति तदानीं तस्य चत्वारः काला विनाशमुपयान्ति, अथवा चत्वारि प्रायश्चित्तानि लभते गच्छादेर्विराधना च भवेदिति ॥ १८५ ॥

तस्मात्तेन परगणस्थेन यत्तस्याचार्यस्यानुमतं तत्कर्तव्यं सर्वथा प्रकारेणेत्यतः आह—

किंबहुणा भणिदेण दु जा इच्छा गणधरस्स सासव्वा
कादव्वा तेण भवे एसेव विधी दु सेसाणं ॥ १८६ ॥

किं बहुना भणितेन तु या इच्छा गणधरस्य सा सर्वा ।
कर्तव्या तेन भवेत् एषैव विधिस्तु शेषाणाम् ॥ १८६ ॥

किंबहुणा-किं बहुना । भणिदेणदु भणितेन तु किं बहुनोक्तेन । जा इच्छा-येच्छा योभिप्रायः । गणधरस्स-गणधरस्याचार्यस्य । सा सव्वा-सर्वैव सा कादव्वा कर्तव्या । तेण पादोष्णेन । भवे भवेत् । किं परगणस्थेनैव कर्तव्या नेत्याह

एसेव विधीदु सेसाणं–एष एव इत्थंभूत एव विधिरनुष्ठानं शेषाणां स्वगणस्थानामेकाकिनां समुदायव्यवस्थितानां च । किं बहुनोक्तेन येच्छा गणधरस्य सा सर्वा तेन कर्तव्या भवेत् न केवलमस्य शेषाणामप्येष एव विधिरिति ॥ १८६ ॥

यदि यतीनामयं न्याय आर्यिकाणां क इत्यत आह—

एसो अज्जाणंपि अ सामाचारो जहाक्खिओ पुव्वं ।
सव्वह्मि अहोरत्ते विभासिदव्वो जधाजोग्गं ।
एष आर्याणामपि च समाचारःयथाख्यातःपूर्वम् ।
सर्वस्मिन् अहोरात्रे विभाषितव्यो यथायोग्यं ॥ १८७ ॥

एसो–एषः । अज्जाणंविय–आर्याणामपि च । समाचारो–समाचारः जहाक्खिओ–यथाख्यातो यथा प्रतिपादितः । पुव्वं–पूर्वस्मिन् । सव्वम्मि–सर्वस्मिन् । अहोरत्ते–अहोरात्रे रात्रौ दिवसे च । विभासिदव्वो–विभाषयितव्यः प्रकटयितव्यो विभावयितव्यो वा । जहाजोग्गं–यथायोग्यं आत्मानुरूपो वृक्षमूलादिरहितः । सर्वस्मिन्नहोरात्रे एषोपि सामाचारो यथायोग्यमार्यिकाणां आर्यिकाभिर्वा प्रकटयितव्यो विभावयितव्यो वा यथाख्यातः पूर्वस्मिन्निति ॥१८७॥

वसतिकायां ताः कथं गमयन्ति कालमिति पृष्टेऽत आह–

अण्णोण्णणुकूलाओ अण्णोण्णहिरक्खणाभिजुत्ताओ । गयरोसवेरमायासलज्जमज्जादकिरियाओ ।

अन्योन्यानुकूलाःअन्योन्याभिरक्षणाभियुक्ताः ।
गतरोषवैरमायाःसलज्जमर्यादक्रियाः ॥ १८८ ॥

अण्णोण्णणुकूलाओ—अन्योन्यस्यानुकूलास्त्यक्तमत्सरा अन्योन्यानुकूलाः परस्परत्यक्तमात्सर्याः । अण्णोण्णहिरक्खणाभिजुत्ताओ—अन्योन्यासां परस्पराणामभिरक्षणं प्रतिपालनं तस्मिन्नभियुक्ता उद्युक्ता अन्योन्याभिरक्षणाभियुक्ताः । गयरोसवेरमाया—रोषश्च वैरं च माया च रोषवैरमायाः गता विनष्टा रोषवैरमाया यासां ता गतरोषवैरमायास्त्यक्तमोहनीयविशेषक्रोधमानपरिणामकौटिल्याः । सलज्जमज्जादकिरियाओ लज्जा च मर्यादा च क्रिया च लज्जामर्यादक्रियाः सह ताभिर्वर्तन्त इति सलज्जमर्यादक्रियाः लोकापवादादात्मनो भयपरिणामो लज्जा, रागद्वेषाभ्यां न्यायादनन्यथा वर्तनं मर्यादा, उभयकुलानुरूपाचरणं क्रियेति ॥ १८८ ॥

पुनरपि ताः कथं विशिष्टा इत्यत आह—

अज्झयणे परियट्टे सवणे कहणे तहाणुपेहाए ।
तवविणयसंजमेसु य अविरहिदुपओगजुत्ताओ ॥
अध्ययने परिवर्ते श्रवणे कथने तथानुप्रेक्षासु ।
तपोविनयसंयमेषु च आविरहिता उपयोगयुक्ताः १८९

अज्झयणे—अध्ययनेऽनधीतशास्त्रपठने । परियट्टे—परिवर्तने पठितशास्त्रपरिपाट्यां । सवणे—श्रवणे श्रुतस्याश्रुत-

स्य च शास्त्रस्यावधारणे । कहणे–कथने आत्मज्ञातशास्त्रान्यनिवेदने । अणुपेहाए–अनुप्रेक्षासु श्रुतसर्ववस्तुध्रुवान्यत्वादिचिन्तासु श्रुतस्य शास्त्रस्यानुचिन्तने वा । तवविणयसंजमेसु य–तपश्च विनयश्च संयमश्च तपोविनयसंयमास्तेषु चानशनप्रायश्चित्तादिक्रियामनोवचनकाया (य) स्तब्धत्वेन्द्रियनिरोधजीववधपरित्यागेषु । अविरहिद–अविरहिताः स्थिता नित्योद्युक्ताः । उवओग–उपयोगः तात्पर्यं ज्ञानाभ्यासः । जोग–योगो मनोवचनकायाः शुभानुष्ठानमेताभ्यां, जुत्ताओ–युक्ताः उपयोगयोगयुक्ताः ॥ १८९ ॥

पुनरपि ताः विशेष्यन्ते—

अविकारवत्थवेसा जल्लमलविलित्तचत्तदेहाओ ।
धम्मकुलकित्तिदिक्खापडिरूपविसुद्धचरियाओ

अविकारवस्त्रवेशाः जल्लमलविलिप्तत्यक्तदेहाः ।
धर्मकुलकीर्तिदीक्षाप्रतिरूपविशुद्धिचर्याः ॥ १९० ॥

अविकारवत्थवेसा–न विद्यते विकारो विकृतिः स्वभावादन्ययाभावो वा येषां तेऽ विकाराः वस्त्राणि च वेषश्च शरीरादिसंस्थानं च वस्त्रवेषा अविकारा वस्त्रवेषा यासां ता अविकारवस्त्रवेषा रक्तांकितादिवस्त्रगतिभंगादिभ्रूविकारादि वेषरहिताः । जल्लं सर्वांगीनं प्रस्वेदयुक्तं रजः । अंगैकदेशभवं मलं ताभ्यां विलित्ता–विलिप्ता युक्ता जल्लमलविलिप्ताः

चत्तदेहाओ-त्यक्तोऽसंस्कृतो देहः शरीरं यासां तास्त्यक्तदेहाः, जल्लमलविलिप्ताश्च तास्त्यक्तदेहाश्च तास्तथाभूताः। धम्म-धर्मः। कुलं-कुलं। कित्ति-कीर्तिः। दिक्खा-दीक्षा। तासां, पडिरूव-प्रतिरूपा सदृशाः। विसुद्ध-विशुद्धा। चरियाओ-चर्यानुष्ठानं यासां ता धर्मकुलकीर्तिदीक्षाप्रतिरूपविशुद्धचर्याः क्षमामार्दवादिमातृपितृकुलात्मयशोव्रतसदृशाभग्नाचरणा इति ॥ १९० ॥

कथं च तास्तिष्ठन्त्यत आह—

अगिहत्थमिस्सणिलये असण्णिवाएविसुद्धसंचारे दो तिण्णि व अज्जाओ बहुगीओ वा सहत्थंति ॥

अगृहस्थमिश्रनिलये असंनिपाते विशुद्धसंचारे।
द्वे तिस्रो वा आर्या बह्व्यो वा सह तिष्ठंति ॥१९१॥

अगिहत्थमिस्सणिलए-गृहे तिष्ठन्तीति गृहस्थाः स्वदारपरिग्रहाशक्तास्तैः, मिस्स-मिश्रो युक्तो न गृहस्थमिश्रोऽगृहस्थमिश्रः स चासौ निलयश्च वसतिका तस्मिन्नगृहस्थमिश्रनिलये यत्रासंयतजनैः सह सम्पर्को नास्ति तत्र। असण्णिवाए-असतां पारदारिकचौरपिशुनदुष्टतिर्यक्प्रभृतीनां निपातो विनाशोऽभावो यत्र तस्मिन्नसन्निपाते। अथवा सतां यतीनां निपातः प्रसरः सन्निकृष्टता सन्निपातः स न विद्यते यत्र सोऽसन्निपातस्तस्मिन्। अथवा असंज्ञिनां पातोऽसंज्ञिपातो

बाधारहिते प्रदेशे इत्यर्थः । विसुद्धसंचारे–विशुद्धः संक्लेशरहितो गुप्तो वा संचरणं संचारः मलोत्सर्गप्रदेशयोग्यः गमनागमनार्हो वा यत्र स विशुद्धसंचारस्तस्मिन् बालवृद्धरोगिशास्त्राध्ययनयोग्ये । दो–द्वे । तिण्णि–तिस्रः । अज्जाओ –आर्याः संयतिकाः । बहुगीओ वा–बह्व्यो वा त्रिंशत्वारिंशद्वा । सह–एकत्र । अत्थंति–तिष्ठन्ति वसन्तीति । अगृहस्थमिश्रनिलयेऽसन्निपाते विशुद्धसंचारे द्वे तिस्रो बह्व्यो वार्या अन्योन्यानुकूलाः परस्पराभिरक्षणाभियुक्ता गतरोषवैरमायाः सलज्जमर्यादक्रिया अध्ययनपरिवर्तनश्रवणकथनतपोविनयसंयमेषु अनुप्रेक्षासु च तथास्थिता उपयोगयोगयुक्ताश्चाविकारवस्त्रवेषा जल्लमलविलिप्तास्त्यक्तदेहा धर्मकुलकीर्तिदीक्षाप्रतिरूपविशुद्धचर्याःसन्त्यस्तिष्ठन्तीति समुदायार्थः १९१

किं ताभिः परगृहं न कदाचिदपि गन्तव्यमित्यतः आह-

ण य परगेहमकज्जे गच्छे कज्जे अवस्सगमणिज्जे ।
गणिणीमापुच्छित्ता संघाडेणेव गच्छेज्ज ॥१९२॥

न च परगेहमकार्ये गच्छेयुः कार्ये अवश्यंगमनीये।
गणिनीमापृच्छ्य संघाटेनैव गच्छेयुः ॥ १९२ ॥

णय–नच । परगेहं–परगृहं गृहस्थनिलयं यतिनिलयं वा । अकज्जे–अकार्येऽप्रयोजने कारणमन्तरेण । गच्छे गच्छेयुः यान्ति । कज्जे–कार्ये उत्पन्ने प्रयोजने । अवस्स-

गमणिज्जे–अवश्यं गमनीयेऽवश्यं गन्तव्ये भिक्षाप्रतिक्रमणादिकाले । गणिणी–गणिनीं महत्तरिकां । आपुच्छित्ता–आपृच्छ्यानुज्ञां लब्ध्वा । संघाडेणेव–संघाटकेनैवान्याभिः सह । गच्छेज्ज–गच्छेयुः गच्छन्तीति । परगृहं च ताभिर्न गन्तव्यं, किं सर्वथा नेत्याह अवश्यंगमनीये कार्ये गणिनीमापृच्छ्य संघाटकेनैव गन्तव्यमिति ॥ १९२ ॥

स्ववासे परगृहे वा एताः क्रियास्ताभिर्न कर्तव्या इत्यत आह-

रोदणण्हावणभोयणपयणं सुत्तं च छव्विहारंभे ।
विरदाण पादमक्खणधोवणगेयं च ण य कुज्जा ॥

रोदनस्नपनभोजनपचनं सूत्रं च षड्विधारंभान् ।
विरतानां पादम्रक्षणधावनं गीतं च न च कुर्युः १९३॥

रोदण–रोदनमश्रुविमोचनं दुःखार्तस्य । ण्हावण–स्नपनं बालादीनां मार्जनं । भोयण–भोजनं तेषामेव बलभनपानादिक्रियाः । पयणं–पचनं ओदनादीनां पाकनिर्वर्तनं । सुत्तं च–सूत्रं सूत्रकरणं च । छव्विहारम्भे–षट् प्रकारा येषां ते षड्विधास्ते च ते आरम्भाश्चेति षड्विधारम्भाः । असिमषिकृषिवाणिज्यशिल्पलेखक्रियाप्रारम्भास्तान् जीवघातहेतून् । विरादण–विरतानां संयतानां । पादमक्खणधोवण–म्रक्षणं अभ्यङ्गनं धावनं प्रक्षालनं पादयोश्चरणयोर्म्रक्षणधावनं पादम्रक्षणधावनं । गेयं–गीतं च रागपूर्वकं गन्धर्वं ।

णय–न च । कुज्जा–कुर्युः न कुर्वन्ति । परगृहं गता आर्यिका रोदनस्नपनभोजनपचनसूत्राणि षड्विधारम्भाश्च न कुर्वन्ति, विरतानां पादम्रक्षणधावनं वा न कुर्युः स्वावासे परवासे वान्याश्च या अयोग्याः क्रियास्ता न कुर्वन्त्यपवादहेतुत्वादिति ॥१९३॥

अथ भिक्षाचर्यायां कथमवतरन्ति ता इत्यत आह—

तिण्णिवपंचवसत्तवअज्जाओअण्णमण्णरक्खाओ थेरीहिं सहंतरिदा भिक्खाय समोदरंति सदा ॥

तिस्रो वा पंच वा सप्त वा आर्या अन्योन्यरक्षाः ।
स्थविराभिः सहांतरिता भिक्षायै समवतरंति सदा ॥

तिण्णि व–तिस्रो वा । पंच व–पंच वा । सत्त व–सप्त वा अज्जाओ–आर्यिकाः । अण्णमण्णरक्खाओ–अन्योन्यरक्षा यासां ता अन्योन्यरक्षाः परस्परकृतयत्नाः । थेरीहिं–स्थविराभिः वृद्धाभिः । सह–सार्धं । अंतरिदा–अन्तरिता व्यवहिताः काभिर्वृद्धाभिरेवान्यासामश्रुतत्वात् । भिक्खाय–भिक्षायै भिक्षार्थं भिक्षाभ्रमणकाले वोपलक्षणमात्रमेतद् भिक्षाग्रहणं यथा काकेभ्यो दधि रक्षतामिति । समोदरंति–समवतरन्ति सम्यक्पर्यटन्ति । सदा–सर्वकालं । यत्र तासां गमनं भवति तत्रानेन विधानेन नान्येनेति । तिस्रः पंच सप्त वा अन्योन्यरक्षाः स्थविराभिः सहान्तरिताश्च भिक्षार्थं समवतरन्ति सदेति ॥१९४॥

आचार्यादीनां च वन्दनां कुर्वन्ति ताः किं यथा मुनयो नेत्याह—

पंच छ सत्त हत्थे सूरी अज्झावगो य साधू य।
परिहरिऊणज्जाओ गवासणेणेव वंदंति ॥१९५॥

पंच षट् सप्त हस्तान् सूरिं अध्यापकं च साधूंश्च।
परिहृत्य आर्याः गवासनेनैव वंदंते ॥ १९५ ॥

पंचछसत्तहत्थे—पंचषट्सप्तहस्तान् यथासंख्येन। सूरीअ-ज्झावगोय—सूर्यध्यापकौ चाचार्योपाध्यायौ च। साधूय—साधूंश्च। परिहरिऊण—परिहृत्य एतावदन्तरे स्थित्वा। अज्जाओ—आर्याः। गवासणेण—गवासनेन यथा गौरुपविशति तथोपविश्य एवकारोऽवधारणार्थः। वंदंति—वन्दन्ते प्रणमन्ति। पंचषट्सप्तहस्तैर्व्यवधानं कृत्वा आचार्योपाध्यायौ च साधूंश्च गवासनेनैव वन्दन्ते आर्या नान्येन प्रकारेणेत्यर्थः। आलोचनाध्ययनस्तुतिभेदात् क्रमभेद इति ॥१९५॥

उपसंहारार्थमाह—

एवंविधाणचरियं चरितं जे साधवो य अज्जाओ।
ते जगपुज्जं कित्तिं सुहं च लद्धूण सिज्झंति ॥१९६

एवंविधानचर्यां चरंति ये साधवश्च आर्याः।
ते जगत्पूजां कीर्तिं सुखं च लब्ध्वा सिध्यंति ॥१९६॥

एवंविधाए चरियं—एवंविधा चर्या एवंप्रकारानुष्ठानं। चरंति—आचरन्ति। जे—ये। साधवो य—साधवश्च मुनयश्च। अज्जाओ—आर्याः ते साधव आर्याश्च। जगपुज्जं—जगतः पूजा जगत्पूजा तां जगत्पूजां। किर्त्ति—कीर्तिं-यशः। सुहं च सुखं च। लद्धूण—लब्ध्वा। सिज्झंति—सिद्धयन्ति। एवंविधानचर्यां ये चरन्ति साधव आर्याश्च ते ताश्च जगत्पूजां कीर्तिं सुखं च लब्ध्वा सिद्धयन्तीति ॥१९६॥

ग्रन्थकर्तात्मगर्वनिरासार्थसमर्पणार्थमाह—

एवं सामाचारो बहुभेदो वण्णिदो समासेण।
वित्थारसमावण्णो वित्थरिदव्वो बुहजणेहिं ॥

एवं-अनेन प्रकारेण। समाचारो सामाचारः—आगमप्रसिद्धानुष्ठानं। बहुभेदो बहवो भेदा यस्यासौ बहुभेदो बहुप्रकारः। वण्णिदो-वर्णितः कथितः। समासेन—संक्षेपेण। वित्थारसमावण्णो—विस्तारं प्रपंचं समापन्नः प्राप्तो विस्तारयोग्यः। वित्थरियव्वो—विस्तारयितव्यः प्रपंचनीयः। बुहजणेहिं—बुधजनैरागमव्याकरणादिकुशलैः। एवं पूर्वस्मिन् यो बहुभेदः सामाचारोऽभूत् स मया संक्षेपेण वर्णितो यतोऽतो विस्तारयोग्यत्वाद्विस्तारयितव्यो बुधजनैरिति।

इत्याचारवृत्तौ वसुनन्दिविरचितायां चतुर्थः परिच्छेदः।

—:o:—

अथ पंचाचाराधिकारः॥५॥

पंचाचाराधिकारप्रतिपादनार्थं नमस्कारमाह—

तिहुयणमन्दरमहिदे तिलोयबुद्धे तिलोगमत्थत्थे
तेलोक्कविदिदवीरे तिविहेण य पणिविदे सिद्धे १

त्रिभुवनमंदिरमहितान्त्रिलोकबुद्धान्त्रिलोकमस्तकस्थान्
त्रैलोक्यविदितवीरान् त्रिविधेन च प्रणिपतामि सिद्धान्

तिहुयणमंदरमहिदे—मन्दरे मेरौ महिताः पूजिताः स्नापिताः मन्दरमहिताः त्रयाणां भुवनानां लोकानां समाहारस्त्रिभुवनं तेन मन्दरमहितास्त्रिभुवनमन्दरमहिताः । अथवा त्रिभुवनस्य मन्दरा प्रधानाः सौधर्मेन्द्रादयस्तैर्महितास्त्रिभुवनमन्दरमहितास्तांस्त्रिभुवनमन्दरमहितान् । तिलोगबुद्धे—त्रिलोकानां त्रिलोकैर्वा बुद्धा ज्ञातारः ज्ञाता वा त्रिलोकबुद्धास्तांस्त्रिलोकबुद्धान् । तिलोगमत्थत्थे—त्रिलोकस्य मस्तकं सिद्धक्षेत्रं तस्मिंस्तिष्ठन्तीति त्रिलोकमस्तकस्थास्तांस्त्रिलोकमस्तकस्थान् सिद्धक्षेत्रस्थान् । तेलोक्कविदिदवीरे—त्रिषु लोकेषु विदितः ख्यातो वीरो वीर्यं येषां, अथवा त्रिलोकानां विदिताः प्रख्यातास्ते च ते वीराश्च शूराश्च त्रिलोकविदितवीरा त्रैलोक्यस्य वा विदितं वीर्यं यैस्ते त्रैलोक्यविदितवीर्यास्तान् त्रैलोक्यविदितवीर्यान् त्रिलोकविदितवीरान्वा । तिविहेण—

त्रिविधेन त्रिप्रकारेण मनोवचनकर्मभिः। पणिविदे–प्रणिपत्य कत्वान्तोऽयं, अथवा प्रणिपतामि मिङन्तोऽयं क्रियाशब्दः। सिद्धे–सिद्धान् निराकृतनिर्मूलकर्मणः। न चात्र तेषामसिद्धता पूर्वापराविरुद्धागमतत्स्वरूपप्रतिपादकप्रमाणसद्भावात्, तत्सद्भावबाधकप्रमाणाभावाद्वा। न चेतरेतराश्रयसद्भावः। द्रव्यार्थिकनयार्पणयानादिनिधनस्यागमस्य स्वमहिम्नैव प्रामाण्यात्। पर्यायार्थिकनयाश्रयणाच्च घातिकर्मविनिर्मुक्तार्हत्प्रणीतत्वाद्वा। न च जीवानां कर्मबन्धाभावाभावो हानिर्वृद्धिदर्शनादिति। त्रिभुवनमन्दरमहितानर्हतस्त्रिलोकमस्तकस्थांस्त्रैलोक्यविदितवीर्यान् सिद्धांश्च प्रणिपत्य वक्ष्ये, इति सम्बन्धः। अथवा सर्वाणि शास्त्राणि नमस्कारपूर्वाणि, कुतः सर्वज्ञपूर्वकत्वात् तेषां यतोऽतः स्वंतन्त्रोऽयं नमस्कारः त्रिभुवनमन्दरमहितानर्हतः सिद्धांश्च प्रणिपतामि। शेषाणि विशेषणान्यनयोरेव। अथवा सिद्धानामेव नमस्कारोऽयं भूतपूर्वगतिन्यायेन विशेषणानां सद्भावादिति। वक्ष्ये इति क्रियापदमुक्तं।

किं वक्ष्ये? किमर्थं वा नमस्कार इति पृष्टेऽतः आह—

दंसणणाणचरित्तेतव्वेविरियाचरह्मि पंचविहे।
वोच्छं अदिचारेऽहं कारिदे अणुमोदिदे अ कदे॥

दर्शनज्ञानचरित्रे तपसि वीर्याचारे पंचविधे। वक्ष्ये अतीचारान् अहं कारितान् अनुमोदितान् च कृतान्

दंसणं–दर्शनं सम्यक्त्वं तत्त्वरुचिः । णाणं–ज्ञानं तत्त्वप्रकाशनं । चरित्तं–चरित्रं पापक्रियानिवृत्तिः । नात्रविभक्त्यन्तरं प्राकृतलक्षणेनाकारस्यैकारः कृतो यतः । तव्वे–तपः तपति दहति शरीरेन्द्रियाणि तपः बाह्याभ्यन्तरलक्षणं कर्मदहनसमर्थं । वीरियं–वीर्यं शक्तिरस्थिशरीरगतबलं, एतेषां द्वन्द्वः दर्शनज्ञानचारित्रतपोवीर्याणि तेषां तान्येव वा आचारो अनुष्ठानं तस्मिन् दर्शनज्ञानचारित्रतपोवीर्याचारे । तत्त्वार्थविषयपरमार्थश्रद्धानुष्ठानं दर्शनाचारः । नात्रावलोकनार्थवाची दर्शनशब्दोऽनधिकारात् । पंचविधज्ञाननिमित्तं शास्त्राध्ययनादिक्रिया ज्ञानाचारः । प्राणिवधपरिहारेन्द्रियसंयमनप्रवृत्तिश्चारित्राचारः । कायक्लेशाद्यनुष्ठानं तप आचारः, वीर्यस्यानिन्हवो वीर्याचारः शुभविषयस्वशक्त्योत्साहः । पंचविधे–पंचप्रकारे । वोच्छं–वक्ष्ये कथयिष्यामि । अदिचारे अतीचारान् प्रमादादन्यथाचरितानि । अहंकारादिदं अहं--आत्मनः प्रयोगः । कारिदे-कारितान् । अणुमोदिदे–अनुमतान् । चशब्दः समुच्चयार्थः । कदे–कृतान् । आचारे दर्शनज्ञानचारित्र--तपोवीर्यभेदे पंचप्रकारे कृतकरितानुमतानतीचारानहं वक्ष्ये इति सम्बन्धः ।

दर्शनातिचारप्रतिपादनार्थं तावदाह ते चाष्टौ शंकादिभेदेन कृतो यतः—

दंसणचरणविसुद्धी अट्ठविहा जिणवरेहिं णिद्दिट्ठा

दंसणमलसोहणयं वोच्छं तं सुणह एयमणा ॥३॥

दर्शनचरणविशुद्धिः अष्टविधा जिनवरैः निर्दिष्टा ।
दर्शनमलशोधनकं वक्ष्ये तत् शृणुत एकमनसः ॥ ३॥

दंसणचरणविसुद्धी–दर्शनावरणस्य विशुद्धिर्निर्मलता दर्शनाचरणविशुद्धिः । अट्ठविहा–अष्टविधाऽष्टप्रकारा । जिणवरेहिं–कर्मारातीन् जयन्तीति जिनास्तेषां वराः श्रेष्ठाः जिनवरास्तैः णिद्दिट्ठा–निर्दिष्टा कथिता । दंसणमलसोहणयं–दर्शनस्य सम्यक्त्वस्य मलमतीचारस्तस्य शोधनकं निराकरणं दर्शनमलशोधनकं । वोच्छं–वक्ष्ये । तं–तत् । सुणह–शृणुत जानीध्वं । एयमणा–एकाग्रमनसः तद्गतचित्ताः । पूर्वं संग्रहसूत्रेण पंचाचारार्थं प्रतिज्ञा कृता, इयं पुनः संग्रहसूत्रेण दर्शनातीचारार्थं जिनवरैर्दर्शनविशुद्धिरष्टप्रकारा निर्दिष्टा यतोऽतस्तन्नेदादशुद्धिरप्यष्टविधास्तद्दर्शनमलशोधनकं वक्ष्येऽहं यूयं शृणुतैकाग्रमनस इति ।

अष्टप्रकारा शुद्धिरुक्ता के तेऽष्टप्रकारा इत्यत आह—

णिस्संकिद णिक्कंखिद णिव्विदिगिंच्छा अमूढदिट्ठी य । उवगूहण ठिदिकरणं वच्छल्ल पभावणा य ते अट्ठ

निःशंकिता निष्कांक्षिता निर्विचिकित्सता अमूढदृष्टिः च । उपगूहनं स्थितिकरणं वात्सल्यं प्रभावना एते अष्ट ॥

णिस्संकिद–शंका निश्चयाभावः शुद्धपरिणामाच्चलनं शंकाया निर्गतो निःशंकस्तस्य भावो निःशंकता तत्त्वरुचौ शुद्धपरिणामः। णिक्कंखिद—कांक्षा इहपरलोकभोगाभिलाषः, कांक्षाया निर्गतो निष्कांक्षस्तस्य भावो निष्कांक्षता सांसारिकसुखारुचिः। णिव्विदिगिंछा–विचिकित्सा जुगुप्सा अस्नानमलधारणनग्नत्वादिव्रतारुचिर्विचिकित्साया निर्गतो निर्विचिकित्सस्तस्य भावो निर्विचिकित्सता द्रव्यभावद्वारेण विपरिणामाभावः। अमूढदिट्ठीय–मूढान्यत्रगता न मूढा अमूढा अमूढा दृष्टिः रुचिर्यस्यासावमूढदृष्टिस्तस्य भावोऽमूढदृष्टिता लौकिकसामयिकवैदिकमिथ्याव्यवहारापरिणामः। उवगूहण–उपगूहनं चातुर्वर्ण्यश्रमणसंघदोषापहरणप्रमादाचरितस्य च संवरणं। ठिदिकरणं–अस्थिरः स्थिरः क्रियते सम्यक्त्वचारित्रादिषु स्थिरीकरणं रत्नत्रये शिथिलस्य दृढयनं हितमितोपदेशादिभिः। वच्छल्ल–वत्सलस्य भावो वात्सल्यं चातुर्वर्ण्यश्रवणसंघे सर्वथानुपवर्तनं धर्मपरिणामेनापद्यनापदि सधर्मजीवानामुपकाराय द्रव्योपदेशादिना हितमाचरणं। पभावणाय–प्रभावना च प्रभाव्यते मार्गोऽनयेति प्रभावना वादपूजादानव्याख्यानमंत्रतंत्रादिभिः सम्यगुपदेशैर्मिथ्यादृष्टिरोधं कृत्वार्हत्प्रणीतशासनोद्योतनं ते एते निःशंकितादयो गुणाः। अट्ठ–अष्टौ वेदितव्याः। एतेषां वैपरीत्येन तावन्तोऽतीचारा व्यतिरेकद्वारेण कथिता एवातो नातिचारकथनं प्रतिज्ञाय शुद्धिकथनं दोषायेति।

अथ दर्शनं किं लक्षणं ? यस्य शुद्धयोऽतीचाराश्चोक्ता दर्शनं मार्गः सम्यक्त्वं कुत इत्यत आह—

मग्गो मग्गफलं ति य दुविहं जिणसासणे समक्खादं
मग्गो खलु सम्मत्तं मग्गफलं होइ णिव्वाणं ॥५॥

मार्गः मार्गफलं इति च द्विविधं जिनशासने समाख्यातं
मार्गः खलु सम्यक्त्वं मार्गफलं भवति निर्वाणं ॥ ५ ॥

मग्गो—मार्गो मोक्षमार्गाभ्युपायः सम्यग्दर्शनज्ञानचारित्रतपसामन्योन्यापेक्षया वर्तनं । मग्गफलंति य—मार्गस्य फलं सम्यक्सुखाद्यवाप्तिःमार्गफलमिति च । इतिशब्दो व्यवच्छेदार्थः नान्यत्त्रैविध्यमित्यर्थः । दुविहं—द्वौ प्रकारावस्य द्विविधं तस्य भावो द्वैविध्यं । जिणसासणे—जिनस्य शासनमागमस्तस्मिन् जिनशासने । समाक्खादं—समाख्यातं सम्यगुक्तं । अथवा प्रथमान्तमेतज्जिनशासनमिति । मग्गो—मार्गः । खलुस्फुटं । सम्मत्तं—सम्यक्त्वं । ननु सम्यग्दर्शनज्ञानचारित्राणि समुदितानि मार्गस्ततः कथं सम्यक्त्वमेव मार्गः । नैष दोषः अवयवे समुदायोपचारात् मार्गं प्रति सम्यक्त्वस्य प्राधान्याद्वा । मग्गफलं—मार्गस्य फलं मार्गफलं । होइ—भवति । णिव्वाणं निर्वाणं अनन्तचतुष्टयावाप्तिः । किमुक्तं भवति, जिनशासने मार्गमार्गफलाभ्यामेव द्वैविध्यमाख्यातं कार्यकारणाभ्यां विनान्यस्याभावात् । अतो मार्गः सम्यक्त्वं कारणं, मार्गफलं च

निर्वाणं कार्यरूपं। अथवा मार्गमार्गफलाभ्यामिति कृत्वा जिनशासनं द्विविधमेव समाख्यातं। स मार्गः सम्यक्त्वं, शेषश्च फलं निर्वाणमिति।

यद्यपि मार्गः सम्यक्त्वं इति व्याख्यातं तथापि सम्यक्त्वस्याद्यापि स्वरूपं न बुध्यते तद्बोधनार्थमाह—

भूयत्थेणाभिगदा जीवाजीवा य पुण्णपावं च।
आसवसंवरणिज्जरबंधो मोक्खो य सम्मत्तं॥ ६॥

भूतार्थेनाभिगता जीवाजीवाः च पुण्यपापं च।
आस्रवसंवरनिर्जराबंधो मोक्षश्च सम्यक्त्वं च॥ ६॥

अवयवार्थपूर्विका वाक्यार्थप्रतिपत्तिरिति कृत्वा तावदवयवार्थो व्याख्यायते। भूदत्थेण—भूतइत्यासावर्थश्च भूतार्थस्तेन यद्यप्ययं भूतशब्दः पिशाचजीवसत्यपृथिव्याद्यनेकार्थे वर्तते तथाप्यत्र सत्यवाची परिगृह्यते, तथार्थशब्दो यद्यपि पदार्थप्रयोजनस्वरूपाद्यर्थे वर्तते तथापि स्वरूपार्थे वर्तमानः परिगृहीतोऽन्यार्थवाचकेन प्रयोजनाभावात्, भूतार्थेन सत्यस्वरूपेण याथात्म्येन। अभिगदा—अभिगताः अधिगताः स्वेन स्वेन स्वरूपेण प्रतिपन्नाः जीवाश्चेतनलक्षणा ज्ञानदर्शनसुखदुःखानुभवनशीलाः। तद्व्यतिरिक्ता अजीवाश्च पुद्गलधर्माधर्मास्तिकायाकाशकालाः रूपादिगतिस्थित्यवकाशवर्तनालक्षणाः। पुण्णं शुभप्रकृतिस्वरूपपरिणतपुद्गलपिंडो जीवाल्हा-

दननिमित्तः । पावं—पापं चाशुभकर्मस्वरूपपरिणतपुद्गलप्रचयो जीवस्यासुखहेतुः । आसव--आसमन्तात् स्रवत्युपढौकते कर्मानेनास्रवः । संवर--कर्मागमनद्वारं संवृणोतीति संवरणमात्रं वा संवरोऽपूर्वकर्मागमननिरोधः । णिज्जर--निर्जरणं निर्जरयत्यनया वा निर्जरा जीवलग्नकर्मप्रदेशहानिः । बंधो -बध्यतेऽनेन बन्धनमात्रं वा बन्धो जीवकर्मप्रदेशान्योन्यसंश्लेषोऽस्वतंत्रीकरणं । मोक्खो--मुच्यतेऽनेन मुक्तिर्वा मोक्षो जीवप्रदेशानां कर्मरहितत्वं स्वतंत्रीभावः । चशब्दः समुच्चयार्थः । सम्मत्तं-- सम्यक्त्वं । एतेषां यथाक्रम एव न्यायः, जीवस्य प्राधान्यादुत्तरोत्तराणां पूर्वपूर्वोपकाराय पवृत्तत्वाद्वा । न चैतेषामभावो ज्ञानरूपमुपचारो वा धर्मार्थकाममोक्षाणामभावादाश्रयाभावात्मुख्याभावाच्च प्रमाणप्रमेयव्यवहाराभावाल्लोकव्यवहाराभावाच्च । जीवाजीवा भूतार्थेनाधिगताः सम्यक्त्वं । तथा पुण्यपापं चाधिगतं सम्यक्त्वं । तथा आस्रवसंवरनिर्जराबन्धमोक्षाश्चाधिगताः सन्तः सम्यक्त्वं भवति । ननु कथमेतेऽधिगताः सम्यक्त्वं यावतैषामधिगतानां यत्प्रधानं तत् सम्यक्त्वमित्युक्तं, नैष दोषः, श्रद्धानरूपैवेयमधिगतिरन्यथा परमार्थाधिगतेरभावात् कारणे कार्योपचाराद्वा जीवादयोऽधिगताः सम्यक्त्वमित्युक्तं । जीवादीनां परमार्थानां यच्छ्रद्धानं तत्सम्यक्त्वं । अनेन न्यायेनाधिगमलक्षणं दर्शनमुक्तं भवति ।

आदौ निर्दिष्टस्य जीवस्य भेदपूर्वकं लक्षणं प्रतिपादयन्नाह—

दुविहा य होंति जीवा संसारत्था य णिव्वुदा चेव।
छद्धा संसरत्था सिद्धगदा णिव्वुदा जीवा ॥७॥

द्विविधाः च भवंति जीवाः ससारस्थाश्च निर्वृताश्चैव ॥
षट्धा संसारस्थाः सिद्धगता निर्वृता जीवाः ॥ ७ ॥

दुविहा य–द्विप्रकारा द्वौ प्रकारौ येषां ते द्विप्रकारा द्विभेदाः द्विप्रकारा जीवाः प्राणिनः। संसारत्थाय–संसारे तिष्ठन्तीति संसारस्थाश्चतुर्गतिनिवासिनः। णिव्वुदा चेय–निर्वृताश्चेति मुक्ति गता इत्यर्थः। छद्धा–षट्धा षट्प्रकाराः। संसारत्था–संसारस्थाः। सिद्धिगदा–सिद्धिगता उपलब्धात्मस्वरूपाः णिव्वुदा–निर्वृता जीवास्तेषां भेदकारणाभावादभेदास्ते। संसारमुक्तिवासभेदेन द्विविधा जीवाः। संसारस्थाः पुनः षट्प्रकारा एकरूपाश्च निर्वृता इति सम्बन्धः ॥ ७॥

के ते षट्प्रकारा इत्याह—

पुढवी आऊ तेऊ वाऊ य वणप्फदी तहा य तसा।
छत्तीसविहा पुढवी तिस्से भेदा इमे णेया ॥८॥

पृथिव्यापस्तेजोवायुश्च वनस्पतिस्तथा च त्रसाः।
षट्त्रिंशद्विधा पृथिवी तस्या भेदा इमे ज्ञेयाः ॥८॥

पुढवी–पृथिवी चतुष्प्रकारा पृथिवी, पृथिवीशरीरं, पृथिवी–कायिकः, पृथिवीजीवः। आपोऽप्कायाऽप्कायिकोऽप्जी-

वः । तेजस्तेजस्कायस्तैजस्कायिकस्तेजोजीवः । वायुर्वायुकायो वायुकायिको वायुजीवः । वनस्पतिर्वनिस्पतिकायो वनस्पतिकायिको वनस्पतिजीवः । यथा पृथिवी चतुष्प्रकारा तथाप्तेजोवायुवनस्पतयः, चशब्दतथाशब्दाभ्यां सूचितत्वात् । जीवाधिकाराद् द्वयोर्द्वयोराद्ययोस्त्यागः शेषयोः सर्वत्र ग्रहणम् । आद्यस्य प्रकारस्य भेदप्रतिपादनार्थमाह–छत्तीसविहा पुढवी-षडभीरधिका त्रिंशत् षट्त्रिंशद्विधाः प्रकारा यस्याः सा षट्त्रिंशत्प्रकारा पृथिवी । तिस्से–तस्याः । भेदा–प्रकाराः । इमे–प्रत्यक्षवचनं । णेया–ज्ञेया ज्ञातव्याः ॥ ८ ॥

क इमे इत्यत आह—

पुढवी य बालुगा सक्करा य उवले सिला य लोणे य
अय तंव तउय सीसय रुप्प सुवण्णे य वइरे य ९ ॥

पृथिवी च बालुका शर्करा च उपलानि शिला च लवणंच
अयस्ताम्रं त्रपुषं सीसकं रूप्यं सुवर्णानि च वज्रं च

पुढवी–पृथिवी मृद्रूपा । बालुया–बालुका रूक्षागंगाद्युद्भवा । सक्करा–शर्करा परुषरूपा अत्र चतुरस्रादिरूपा । उवले–उपलानि वृत्तपाषाणरूपाणि । सिला य–शिला च बृहत्पाषाणरूपा । लोणेय–लवणभेदाः सामुद्रादयः । अय–अयो लोहरूपं । तंव–ताम्रं । तउय– त्रपुषं । सीसय–सीसकं श्यामवर्णं । रुप्प–रूप्यवर्णं शुक्लरूपं । सुवण्णेय–सुवर्णानि च

रक्तपीतरूपाणि । वइरेय–वज्रं च रत्नविशेषः ॥ ९ ॥

हरिदाले हिंगुलये मणोसिला सस्सगंजण पवालेय
अब्भपडलब्भवालुय बादरकाया मणिविधीया

हरितालं हिंगुलकं मनःशिला सस्यकं अंजनं प्रवालं च
अभ्रपटलं अभ्रबालुका बादरकाया माणिविधयः ॥१०

हरिदाले–हरितालं नटवर्णकं । हिंगुलये–हिंगुलकं रक्तद्रव्यं । मणोसिला–मनःशिला काशप्रतिकाराय प्रवृत्तं । सस्सग सस्यकं हरितरूपं । अंजण–अञ्जनं अक्ष्युपकारकं (चक्षुरुपकारकं) द्रव्यं । पवालेय–प्रवालं च । अब्भपडल अभ्रपटलं अब्भबालुग-अभ्रबालुका चैक्यचिक्यरूपा । बादरकाया–स्थूलकायाः । मणिविधीय–इत ऊर्ध्वं मणिविधयो मणिप्रकारा वक्ष्यन्त इति सम्बन्धः ॥ १० ॥

गोमज्झगेय रुजगे अंके फलिहे लोहिदंकेय ।
चंदप्पभेय वेरुलिए जलकंते सूरकंतेय ॥ ११ ॥

गोमध्यकश्च रुचकः अंकः स्फटिकः लोहितांकः ।
चंद्रप्रभः वैडूर्यः जलकांतः सूर्यकांतः ॥ ११ ॥

शर्करोपलशिलावज्रप्रवालवर्जिताः शुद्धाः पृथिवीविकाराः पूर्वे एते च खरपृथिवीविकाराः । गोमज्झगेय–

गोमध्यको मणिः कर्केतनमणिः । रुजगे–रुचकश्च मणी राजवर्तकरूपः । अंके–अंको मणिः पुलकवर्णः । फलिहे–स्फटिकमणिः स्वच्छरूपः । लोहिदंकेय–लोहितांको मणी रक्तवर्णः पद्मरागः । चंदप्पभेय–चन्द्रप्रभो मणिः । वेरुलिए वैडूर्यो मणिः । जलकंते–जलकान्तो मणिरुदकवर्णः । सूरकंतेय–सूर्यकान्तो मणिः ॥ ११ ॥

गेरुय चंदण वव्वग वयमोए तह मसारगल्लो य ।
ते जाण पुढविजीवा जाणित्ता परिहरेदव्वा ॥१२

गैरिकं चंदनवप्पगवकमोचाः तथा मसारगल्लश्च ।
तान् जानीहि पृथिवीजीवान् ज्ञात्वा परिहर्तव्याः ॥१२

गेरुय–गैरिकवर्णो मणी रुधिराक्षः । चंदण–चन्दनो मणिः श्रीखंडचन्दनगन्धः । वव्वग–वप्पको मणिर्मरकतमनेकभेदं । वग–वको मणिः वकवर्णाकारः पुष्परागः । मोए–मोचो मणिः कदलीवर्णाकारो नीलमणिः । तह–तथा । मसारगल्लेय–मसृणपाषाणमणिर्विद्रुमवर्णः । ते जाण–तान् जानीहि । पुढविजीवा–पृथिवीजीवान् । तैर्ज्ञातैः किं प्रयोजनं ? जाणित्ता– ज्ञात्वा । परिहरेदव्वा–परिहर्तव्या रक्षितव्याः संयमपालनाय । तानेतान् शुद्धपृथिवीजीवान् तथा खरपृथिवीजीवांश्च मणिप्रकारान् स्थूलान् जानीहि ज्ञात्वा च परिहर्तव्याः । सूक्ष्माः पुनः सर्वत्र ते विज्ञातव्याः आगमबलेन । षट्त्रिंशद्भे-

देषु पृथिवीविकारेषु पृथिव्यष्टक—मेरु—कुलपर्वत-द्वीप-वेदिका-विमान-भवन-प्रतिमा-तोरण-स्तूप-चैत्यवृक्ष-जम्बू-शाल्मलीद्रुमेष्वाकार-मानुषोत्तर-विजयार्ध-कांचनगिरि-दधिमुखाञ्जन-रतिकर-वृषभगिरि-सामान्यपर्वत-स्वयंभु-नगवरेन्द्र-वक्षार-रुचक-कुण्डलवर-दंष्ट्रा-पर्वतरत्नाकरादयोऽन्तर्भवन्तीति ॥१२॥

अप्कायिकभेदप्रतिपादनार्थमाह—

ओसाय हिमग महिगा हरदणु सुद्धोदगेघणुदगेय
ते जाण आउजीवा जाणित्ता परिहरेदव्वा ॥ १३

अवश्यायं हिमं माहिकां हरत् अणुं शुद्धोदकं घनोदकंच तान् जानीहि अप्जविान् ज्ञात्वा परिहर्तव्याः ॥ १३॥

ओसाय—अवश्यायजलं रात्रिपश्चिमप्रहरे निरभ्रावकाशात् पतितसूक्ष्मोदकं । हिमग—हिमं प्रालेयं जलबन्धकारणं । महिगा—महिका धूमाकारजलं कुहडरूपं । हरद—हरत् स्थूलविन्दुजलं । अणु—अणुरूपं सूक्ष्मविंदुजलं । सुद्ध—शुद्धजलं चन्द्रकान्तजलं । उदगे-उदकं सामान्यजलं निर्झराद्युद्भवं । घणुदएय—घनोदकं समुद्रहृदघनवाताद्युद्भवं घनाकारं । अथवा हरदणु-महाहृदसमुद्राद्युद्भवं । घणुदए मेघादुद्भवं घनाकारं, एवमाद्यप्कायिकान् जीवान जानीहि ततः किं? जाणित्ता-ज्ञात्वा । परिहरिदव्वाः-परिहर्त्तव्याः पालयितव्याः सरित्सागर-हृद-कूप-निर्झर-घनोद्भवाकाशज-हिमरूप—धूमरू-

प-मुम्युद्भव-चन्द्रकान्तजघनवाताद्यप्कायिका अत्रैवान्तर्भवन्तीति ॥ १३ ॥

तेजःकायिकभेदप्रतिपादनायाह—

इंगाल जाल अच्ची मुम्मुर सुद्धागणीय अगणी य
ते जाण तेउजीवा जाणित्ता परिहरेदव्वा ॥१४॥

अंगारं ज्वाला अर्चिर्मुर्मुरं शुद्धाग्निः अग्निश्च ।
तान् जानीहि तेजोजीवान् ज्ञात्वा परिहर्तव्याः ॥१४॥

इंगाल—अंगाराग्नि ज्वलितनिर्धूमकाष्ठादीनि । जाल—ज्वाला । अच्चि अर्चिः प्रदीपज्वालाद्यग्रं । मुम्मुर-मुर्मुरं कारीषाग्निः । सुद्धागणीय-शुद्धाग्निः वज्राग्निर्विद्युत्सूर्यकान्ताद्युद्भवः । अगणीय-सामान्याग्निर्धूमादिसहितः । वाडवाग्निनन्दीश्वरधूमकुण्डिकामुकुटानलादयोऽत्रैवान्तर्भवन्तीति । तानेतांस्तेजःकायिकजीवान् जानीहि ज्ञात्वा च परिहरणीया एतदेव ज्ञानस्य प्रयोजनमिति ॥ १४ ॥

वायुकायिकस्वरूपमाह—

वादुब्भामो उक्कलि मंडलि गुंजा महा घण तणू य
ते जाण वाउजीवा जाणित्ता परिहरेदव्वा ॥१५

वातोद्भामो उत्कलिः मंडलिः गुंजा महान् घनस्तनुश्च
तान् जानीहि वायुजीवान् ज्ञात्वा परिहर्तव्याः ॥१५॥

वादुब्भामो-वातः सामान्यरूपः उद्भ्रमो भ्रमन्नूर्ध्वं गच्छति। उक्कलि–उत्कलिरूपो मण्डलि–पृथिवीलग्नो भ्रमन् गच्छति। गुंजा–गुंजन् गच्छति। महा–महावातो वृक्षादिभंगहेतुः। घणतणुय–घनोदधिः घननिलयस्तनुवातः, व्यंजनादिकृतो वा तनुवातो लोकप्रच्छादकः। उदरस्थपंचवात–विमानाधार–भवनस्थानादिवाता अत्रैवान्तर्भवन्तीति तानेतान् वायुकायिकजीवान् जानीहि ज्ञात्वा च परिहारः कार्यः ॥ १५ ॥

वनस्पतिकायिकार्थमाह—

मूलग्गपोरबीजा कंदा तह खंधबीजबीजरुहा।
संमुच्छिमा य भणिया पत्तेयाणंतकाया य ॥ १६

मूलाग्रपर्वबीजाः कंदाः तथा स्कंदबीजबीजरुहाः।
सम्मूर्छिमाश्च भणिताः प्रत्येका अनंतकायाश्च ॥१६॥

मूल–मूलबीजा जीवा येषां मूलं प्रादुर्भवति ते च हरिद्रादयः। अग्ग–अग्रबीजा जीवाः कोरंटकपल्लिकाकुब्जकादयो येषामग्रं प्ररोहति। पोरबीया–पौरबीजजीवा इक्षुवेत्रादयो येषां पोरप्रदेशः प्ररोहति। कंदा–कन्दजीवाः कदलीपिण्डालुकादयो येषां कन्दादेशः प्रादुर्भवति। तह–तथा। खंधबीया–स्कन्धबीजजीवाः शल्लकीपालिभद्रकादयो येषां स्कन्धदेशो रोहति। बीयबीया–बीजबीजा जीवा यवगोधूमादयो येषां क्षेत्रोदकादिसामग्र्याः प्ररोहः। सम्मुच्छिमाय–सम्मूर्च्छि-

माश्च मूलाद्यभावेऽपि येषां जन्म। भणिया-भणिताः कथिताः क आगमे जिनवरैः । पत्तेया-प्रत्येकजीवाः पूगफल-नालिकेरादयः । अणंतकाया य—अनन्तकायाश्च स्नुहीगुडूच्यादयः, ये छिन्ना भिन्नाश्च प्ररोहन्ति, एकस्य यच्छरीरं तदेवानन्तानन्तानां साधारणाहारप्राणत्वात् साधारणानां, एकमेकं प्रति प्रत्येकं पृथक्कायादयः शरीरं येषां ते प्रत्येककायाः । अनन्तः साधारणः कायो येषां तेऽनन्तकायाः । एते मूलादयः सम्मूर्च्छिमाश्च प्रत्येकानन्तकायाश्च भवन्ति ॥ १६ ॥

अवयविरूपं व्याख्यायावयवभेदप्रतिपादनार्थमाह-अथवा वनस्पतिजातिर्द्विप्रकारा भवतीति बीजोद्भवा सम्मूर्च्छिमा च तत्र बीजोद्भवा मूलादिस्वरूपेण व्याख्याता। सम्मूर्च्छिमायाः स्वरूपप्रतिपादनार्थमाह—

कंदा मूला छल्ली खंधं पत्तं पवाल पुप्फफलं ।
गुच्छा गुम्मा वल्ली तणाणि तह पव्व काया य

कंदो मूलं त्वक् स्कंधः पत्रं पल्लवं पुष्पफलं ।
गुच्छः गुल्मं वल्ली तृणानि तथा पर्व कायश्च ॥१७॥

कन्दा—कन्दकः सूरणपद्मकन्दकादिः । मूला—मूलं पिण्डाधः प्ररोहकं हरिद्रकार्द्रकादिकं । छल्ली-त्वक् वृक्षादिबहिर्वल्कलशैलयुतकादिकं च । खंधं—स्कन्धः पिंडशाखयोरन्त-

भागः पालिभद्रादिकः । पत्तं–पत्रं अङ्कुरोर्ध्वावस्था । पवाल–प्रवालं पल्लवं पत्राणां पूर्वावस्था । पुप्फ–पुष्पं फलकारणं । फलं–पुष्पकार्यं पूगफलतालफलादिकं । गुच्छा–गुच्छो बहूनां समूह एककालीनोत्पत्तिः जातिमल्लिकादिः । गुम्म–गुल्मं करंजकंथारिकादिः । वल्ली–वल्लरी श्यामा लतादिका तणाणि--तृणानि । तह- तथा । पव्व--पर्व ग्रंथिकयोर्मध्यं वेत्रादि । काया--कायः स प्रत्येकमभिसम्बध्यते कन्द--कायो मूलकाय इत्यादि, एते सम्मूर्छिमाः प्रत्येकानन्तकायाश्च मूलमादायपत्रमादायोत्पद्यन्त इत्यर्थः । अथवा मूलकायावयवः कन्दकायावयवः इत्यादि, पूर्वाणां वीजमुपादानं कारणं एतेषां पुनः पृथिवी सलिलादिकं उपादानकारणं तथा च दृश्यते शृङ्गाच्छरः गोमयाच्छालूकं वीजमन्तरेणोत्पत्तिः पुष्पमन्तरेण च यस्योत्पत्तिः फलानां स फल इत्युच्यते, यस्य पुष्पाण्येव भवन्ति स पुष्प इत्युच्यते, यस्य पत्राण्येव न पुष्पाणि न फलानि स पत्र इत्युच्यते इत्यादि सम्बन्धः कर्तव्य इति ॥ १७ ॥

सेवाल पणग केण्णग कवगो कुहणोय बादरा काया
सव्वेवि सुहुमकाया सव्वत्थ जलत्थलागासे ॥१८

शैवालं पणकं कृष्णकं कवकः कुहनश्च बादराः कायाः सर्वेपि सूक्ष्मकायाः सर्वत्र जलस्थलाकाशे ॥ १८ ॥

सेवाल–शैवलं उदकगतकायिका हरितवर्णी । पणग

—पणकं भूमिगतं शैवलं इष्टकादिप्रभवा कायिका । केण-ग—आलम्बकछत्राणि शुक्लहरितनीलरूपाणि अपस्कारोद्भवानि । कवगो—शृंगालम्बकच्छत्राणि जटाकाराणि । कुहणो य—आहारकांजिकादिगतपुष्पिका । बादराकाया—स्थूलकायाः अन्तर्दीपकत्वात् सर्वैरतीतपृथिव्यादिभिः सह सम्बध्यते सर्वेपि पृथिवीकायिकादयो वनस्पतिपर्यन्ता व्याख्यातप्रकाराः स्थूलकाया इति । सूक्ष्मकायप्रतिपादनार्थमाह सव्वेपि —सर्वेपि पृथिव्यादिभेदा वनस्पतिभेदाश्च सुहुमकाया—सूक्ष्मकायाश्चांगुलासंख्यातभागशरीराः । सव्वत्थ—सर्वत्र सर्वस्मिन्लोके । जलत्थलागासे—जले स्थले आकाशे च । एते पृथिव्यादयो वनस्पतिपर्यन्ता बादरकायाः सूक्ष्मकायाश्च भवन्ति, किंतु पृथिव्यष्टकविमानादिकमाश्रित्य स्थूलकायाः, सूक्ष्मकायाः पुनः सर्वत्र जलस्थलाकाशे ॥ १८ ॥

सर्वत्र साधारणानां स्वरूपप्रतिपादनायाह—

गूढसिरसंधिपव्वं समभंगमहीरुहं च छिण्णरुहं ।
साहारणं सरीरं तव्विवरीयं च पत्तेयं ॥ १९ ॥

गूढसिरासंधिपर्वं समभंगमहीरुहं च छिन्नरुहं ।
साधारणं शरीरं तद्विपरीतं च प्रत्येकं ॥ १९ ॥

गूढसिरसंधिपव्वं—गूढा अदृश्यमानाः शिराः, सन्धयोऽङ्गबन्धा पर्वाणि ग्रन्थयो यस्य तद्गूढशिरासन्धिपर्व ।

समभंगं–समः सदृशो भंगः छेदो यस्य तत्समभंगं त्वग्रहितं। अहीरुहं–न विद्यते हीरुकं बालरूपं यस्य तदहीरुहं पुनः सूत्राकारादिवर्जितं मंजिष्ठादिकं। छिन्नरुहं–छेदेन रोहतीति च्छेदरुहं छिन्नो भिन्नश्च यो रोहमागच्छति। साधारणंसरीरं–तत्साधारणं सामान्यं शरीरं साधारणशरीरं। तव्विवरीयं (च)–तद्विपरीतं च साधारणलक्षणविपरीतं पत्तेयं–प्रत्येकं प्रत्येकशरीरं ॥ १९ ॥

किंभूतमिति पृष्टेऽत उत्तरमाह—

होदि वणप्फदि वल्ली रुक्खतणादी तहेव एइंदी।
ते जाण हरितजीवा जाणित्ता परिहरेदव्वा ॥२०

भवति वनस्पतिः वल्ली वृक्षतृणादीनि तथैव एकेंद्रियाः तान् जानीहि हरितजीवान् ज्ञात्वा परिहर्तव्याः ॥ २०

होदि–भवति। वणप्फदि–वनस्पतिः फलवान् वनस्पतिर्ज्ञेयः। वल्ली–वल्लरी लता। रुक्ख–वृक्षः पुष्पफलोपगतः। तणादी–तृणादीनि। तहेव–तथैव। एइंदी–एकेन्द्रियाः। अथवा साधारणानामेतद्विशेषणं पूर्वं प्रत्येककायानां एते मूलादिबीजाः कन्दादिकायाः साधारणशरीराः प्रत्येककायाश्च सूक्ष्माः स्थूलाश्च ये व्याख्यातास्तान् हरितकायान् जानीहि तथा एतेऽन्ये च पृथिव्यादयश्चैकेन्द्रिया ज्ञातव्याः परिहर्तव्याश्चान्तदीपकत्वात्। कथमेते जीवा इति चेन्नैषदोषः, आगमाद-

नुमानात्प्रत्यक्षाद्वा, आहारभयमैथुनपरिग्रहसंज्ञास्तित्वाद्वा । सचेतना एते संज्ञादिभीरागमे निरूप्यमाणत्वात्, सर्वत्वगपहरणे मरणात् उदकादिभिः साङ्वलभावात्, स्पृष्टस्य लज्जरिकादेः संकोचकारणत्वात् वनितागण्डूषसेकाद्धर्षदर्शनात् वनितापादताडनात्पुष्पांकुरादिप्रादुर्भावात्, निधानादिदिशि पादादिप्रसारणादिति ॥ २० ॥

त्रसस्वरूपप्रतिपादनार्थमाह—

दुविधा तसा य उत्ता विगला सगलेंदिया मुणेयव्वा
बितिचउरिंदिय विगला सेसा सगलिंदिया जीवा

द्विविधाः त्रसाश्च उक्ताः विकलाः सकलेंद्रिया ज्ञातव्याः
द्वित्रिचतुरिंद्रिया विकलाः शेषाः सकलेंद्रिया जीवाः

दुविहा—द्विविधा द्विप्रकाराः । तसा—त्रसा उद्वेजनबहुलाः । वुत्ता—उक्ताः प्रतिपादिताः । विकला विकलेन्द्रियाः । सकलाः सकलेन्द्रियाः । इन्द्रियशब्दः प्रत्येकमभिसम्बध्यते । मुणेदव्वा—ज्ञातव्याः । वितिचउरिंदिय—द्वे त्रीणि चत्वारीन्द्रियाणि येषां ते द्वित्रिचतुरिन्द्रिया द्वीन्द्रियास्त्रीन्द्रियाश्चतुरिन्द्रियाश्चेति । विगला—विकला विकलेन्द्रिया एते । सेसा—शेषाः सकलेन्द्रियाः सकलानि पूर्णानीन्द्रियाणि येषां ते सकलेन्द्रिया पंचेन्द्रिया इत्यर्थः । जीवा—जीवा ज्ञानाद्युपयोगवन्तः । जीवा द्विप्रकारा विकलेन्द्रियसकलेन्द्रियभेदेन ॥२१॥

के विकलेन्द्रियाः, के सकलेन्द्रिया इत्यत आह—

संखो गोभी भमरादिया दु विकलिंदिया मुणेदव्वा
सकलिंदिया य जलथलखचरा सुरणारयणरा य

शंखः गोपालिका भ्रमरादिकाः तु विकलेंद्रियाज्ञातव्याः
सकलेंद्रियाश्च जलस्थलखचराः सुरनारकनराश्च॥२२

संखो-शंखः। गोभी-गोपालिका। भमर-भ्रमरः। आदिशब्दः प्रत्येकमभिसम्बध्यते, शंखादयो गोभ्यादयो भ्रमरादयः। आदिशब्देन शुक्तिकृमि-वृश्चिक-मत्कुण-मक्षिका पतंगादयः परिगृह्यन्ते। एते विगलेंदिया-विकलेन्द्रियाः। मुणेदव्वा-ज्ञातव्याः। शेषाः पुनः सकलिंदिया-सकलेन्द्रियाः। के ते जलथलखचरा-जले चरन्तीति जलचरा मत्स्यमकरादयः स्थले चरन्तीति स्थलचराः सिंहव्याघ्रादयः खेचरन्तीति खचरा हंससारसादयः। सुरणारयणरा य-सुरा देवा भवनवासिवानव्यन्तरज्योतिष्ककल्पवासिनः, नारकाः सप्तपृथिवीनिवासिनो दुःखबहुलाः, नरा मनुष्या इति ॥२२॥

पुनरपि भेदप्रकरणायाह—

कुलजोणिमग्गणा विय णादव्वा सव्वजीवाणं।
णाऊण सव्वजीवे णिस्संका होदि कादव्वा॥ २३

कुलयोनिमार्गणा अपि ज्ञातव्याः सर्वजीवानां।

ज्ञात्वा सर्वजीवान् निःशंका भवति कर्तव्या ॥ २३ ॥

कुल—कुलं जातिभेदः । जोणि—योनिरुत्पत्तिकारणं । कुलयोन्योः को विशेष इति चेन्न, वटपिप्पलकृमिशुक्तिमत्कुणपिपीलिकाभ्रमरमक्षिका—गोश्वक्षत्रियादि कुलं । कन्दमूलाण्डगर्भरसस्वेद दियोनिः । मग्गणावि य—मार्गणाश्च गत्यादयः । णादव्वा—ज्ञातव्याः । सव्वजीवाणं—सर्वजीवानां पृथिव्यादीनां । णाऊण ज्ञात्वा । सव्वजीवे—सर्वजीवान् । निस्संका—निःशंका संदेहाभावः । होदि—भवति । कादव्वा—कर्तव्या । कुलयोनिमार्गणाभेदेन सर्वजीवान् ज्ञात्वा निःशंका भवति कर्तव्येति ॥ २३ ॥

कुलभेदेन जीवान् प्रतिपादयन्नाह—

बावीस सत्ततिण्णि असत्तयकुलकोडिसदसहस्साइं णेया पुढविदगागणिवाऊकायाण परिसंखा ॥२४

द्वाविंशतिःसप्त त्रीणिच सप्तच कुलकोटिशतसहस्राणि ज्ञेयाः पृथिव्युदकाग्निवायुकायानां परिसंख्या ॥२४॥

बावीस—द्वाविंशतिः । सत्तय—सप्त च । तिण्णि य—त्रीणिच । सत्त य—सप्त च । कुलकोडिसदसहस्साइं—कुलानां कोट्यः कुलकोट्यः कुलकोटीनां शतसहस्राणि तानि कुलकोटीशतसहस्राणि । द्वाविंशतिः सप्त त्रीणि च सप्त च । णेया—ज्ञातव्याः ।

पुढवि–पृथिवीकायिकानां । दग–अप्कायिकानां । अगणि–अग्निकायिकानां । वाऊ–वायुकायिकानां । परिसंखा–परिसंख्या । पृथिवीकायानां कुलकोटिलक्षाणि द्वाविंशतिः । अप्कायानां कुलकोटी लक्षाणि सप्त । अग्निकायिकानां कुलकोटी लक्षाणि त्रीणि । वायुकायिकानां कुलकोटी लक्षाणि सप्त यथाक्रमेण परिसंख्या ज्ञातव्येति ॥२४॥

कोडिसदसहस्साइं सत्तट्ठ व णव य अट्ठवीसं च ।
वेइंदियतेइंदियचउरिंदियहरिदकायाणं ॥२५॥

कोटिशतसहस्राणि सप्ताष्टौ च नव चाष्टाविंशतिश्च ।
द्वींद्रियत्रींद्रियचतुरिंद्रियहरितकायानाम् ॥ २५ ॥

कोटीशत सहस्राणि सप्ताष्टौ नवाष्टाविंशतिश्च यथासंख्यं द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियहरितकायानां । द्वीन्द्रियाणां कुलकोटी लक्षाणि सप्त । त्रीद्रियाणां कुलकोटी लक्षाण्यष्टौ । चतुरिंद्रियाणां कुलकोटी लक्षाणि नव । हरितकायानां कुलकोटी लक्ष्याण्यष्टाविंशतिरिति ॥ २५ ॥

अद्धत्तेरस बारस दसयं कुलकोडिसदसहस्साइं ।
जलचरपक्खिचउप्पयउरपरिसप्पेसु णव होंति २६

अर्धत्रयोदश द्वादश दशकं कुलकोटिशतसहस्राणि ।
जलचरपक्षिचतुष्पदउरःपरिसर्पेषु नव भवंति ॥१२६॥

अर्धत्रयोदश, द्वादश, दश च कुलकोटीशतसहस्राणि जलचरपक्षिचतुष्पदां । उरसा परिसर्पन्तीति उरःपरिसर्पाः, गोधासर्पादयस्तेषामुरःपरिसर्पाणां णव होंति नव भवंति। जलचराणां मत्स्यादीनां कुलकोटीलक्षाण्यर्धत्रयोदश । पक्षिणां हंसभेरुण्डादीनां कुलकोटीलक्षाणि द्वादश । चतुष्पदां सिंहव्याघ्रादीनां कुलकोटी लक्षाणि दश । उरःपरिसर्पाणां कुलकोटी लक्षाणि नव भवन्तीति सम्बन्धः ॥ २६ ॥

छव्वीसं पणवीसं चउदश कुलकोडिसदसहस्साइं
सुरणेरइयणराणं जहाकमं होइ णायव्वं ॥२७॥

षड्विंशतिः पंचविंशं चतुर्दश कुलकोटिशतसहस्राणि सुरनैरयिकनराणां यथाक्रमं भवति ज्ञातव्यम् ।२७।

षड्विंशतिः पंचविंशतिः चतुर्दश कुलकोटीशतसहस्राणि सुरनारकनराणां च यथाक्रमं भवन्ति ज्ञातव्यं । देवानां कुलकोटी लक्षाणि षड्विंशतिः। नारकाणां कुलकोटी लक्षाणि पंचविंशतिः। मनुष्याणां कुलकोटी लक्षाणि चतुर्दश सर्वत्र यथाक्रमं भवन्ति ज्ञातव्यं ययोद्देशस्तथा निर्देशः क्रमानतिलङ्घनं वेदितव्यम् ॥ २७ ॥

सर्वकुलसमासार्थं गाथोत्तरेति—

एया य कोडिकोडी णवणवदीकोडिसदसहस्साइं

पण्णासं च सहस्सा संवग्गीणं कुलाण कोडीओ॥

एका च कोटिकोटिः नवनवतिकोटिशतसहस्राणि।
पंचाशच्च सहस्राणि संवर्गेण कुलानां कोट्यः ॥२८॥

एका कोटीकोटी, नवनवतिः कोटी शतसहस्राणि पंचाशत्सहस्राणि च संवग्गेण–सर्वसमासेन कुलानां कोट्यः। सर्वसमासेन कुलानां एका कोटीकोटी नवनवतिश्च कोटीलक्षाणि पंचाशत्सहस्राणि च कोटीनामिति ॥ २८ ॥

योनिभेदेन जीवान्प्रतिपादयन्नाह—

णिच्चिदरधादु सत्त य तरु दस विगलिंदिएसु छच्चेव सुरणरयतिरिय चउरो चउदश मणुएसु सदसहस्सा

नित्येतरधातूनांसप्तचतरूणां दश विकलेन्द्रियेषुषट्चैव सुरनरकतिरश्चां चत्वारि चतुर्दश मनुष्ये शतसहस्राणि

णिच्च–नित्यनिकोतं यैस्सप्तसत्वं न प्राप्तं कदाचिदपि ते जीवा नित्यनिकोतशब्देनोच्यंते। इदर–इतरनिकोतं चतुर्गतिनिकोतं यैस्सप्तसत्वं प्राप्तं यद्यप्यत्र निकोतशब्दो नास्ति तथापि द्रष्टव्यो देशामर्शकत्वात्सूत्राणां । धादु–धातवः पृथिव्यप्तेजोवायुकायाश्चत्वारो धातव इत्युच्यन्ते। सत्त य–सप्त च तरु–तरूणां वृक्षाणां। दस–दश । विगलिंदिएसु–विकलेन्द्रियाणां द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियाणां । छच्चेव–षट् चैव।

सुरणरयतिरिय–सुरनारकतिरश्चां । चउरो–चत्वारः । चोद्दश–चतुर्दश । मणुएसु–मनुष्याणां । सदसहस्सा–शतसहस्राणि । नित्यनिकोतानां सप्त लक्षाणि, योनीनामिति च चतुर्गतिनिकोतानां सप्तलक्षाणि, पृथिवीकायिकानां सप्तलक्षाणि, अप्कायिकानां सप्तलक्षाणि, तेजःकायिकानां सप्तलक्षाणि, वायुकायानां सप्तलक्षाणि योनीनामिति संबंधः । तरूणां दश लक्षाणि, द्वीन्द्रियाणां द्वे लक्षे, त्रींद्रियाणां द्वे लक्षे, चतुरिंद्रियां द्वे लक्षे, सुराणां चत्वारि लक्षाणि, नारकाणां चत्वारि लक्षाणि, तिरश्चां पञ्चेन्द्रियाणां संज्ञिकानामसंज्ञिकानां च चत्वारि लक्षाणि । मनुष्याणां चतुर्दश लक्षाणि योनीनामिति । सर्वसमासेन चतुरशीतियोनिलक्षाणि भवन्तीति॥२९॥

मार्गणाद्वारेण च जीवभेदान् प्रतिपादयन्नाह—

तसथावरा य दुविहा जोगगइकसायइंदियविधीहिं
बहुविध भव्वाभव्वा एस गदी जीवाणिद्देसे ॥३०॥

त्रसस्थावराः च द्विविधा योगगतिकषायेंद्रियविधिभिः
बहुविधा भव्याभव्या एषा गतिः जीवानिर्देशे ॥ ३० ॥

कायमार्गणाद्वारेण तसथावराय–त्रसनशीलास्त्रसा द्वींद्रियादयः स्थानशीलाः स्थावरा पृथिव्यादिवनस्पत्यन्ताः । दुविहा–द्विप्रकारास्त्रसस्थावरभेदेन द्विप्रकारा जीवाः । जोग–योग आत्मप्रदेशपरिस्पन्दरूपो मनोवाक्कायलक्षणस्त्रिप्रकारस्तस्य

विधियोगविधिस्तेन जीवास्त्रिप्रकारा मनोयोगिनो वाग्योगिनः काययोगिनश्चेति। मनोयोगिनश्चतुष्प्रकाराः सत्यानृतसत्यानृतासत्यानृतभेदेन । एवं वाग्योगिनोऽपि चतुःप्रकाराः। काययोगिनःसप्तविधा औदारिकवैक्रियिकाहारकतन्मिश्रकार्मणभेदेन। गदि–गतिर्भवान्तरप्राप्तिः, गतेर्विधिर्गतिविधिस्तेन, गतिविधिना चतस्रो गतयस्तद्भेदेन जीवाश्चतुर्विधा भवन्ति नारकतिर्यङ्मनुष्यदेवभेदेन तेऽपि स्वभेदेनानेकविधाः। कसायकृषन्तीति कषायाः क्रोधमानमायालोभाः, अनंतानुबन्ध्यप्रत्याख्यानप्रत्याख्यानसंज्वलनभेदेन चतुःप्रकारास्तद्भेदेन प्राणिनोऽपि भिद्यन्ते। इंदिय-इन्द्र आत्मा तस्य लिंगं इन्द्रेण नामकर्मणा वा निर्वर्तितमिंद्रियं तस्य विधिरिंद्रियविधिस्तेनेंद्रियविधिना जीवाः पंचप्रकारा एकेंद्रिय–द्वींद्रिय-त्रींद्रिय-चतुरिन्द्रिय-पंचेन्द्रियभेदेन। बहुविहा–बहुविधा बहुप्रकारा अनेन किमुक्तं भवति स्त्रीपुंनपुंसकभेदेन, ज्ञान–दर्शन-संयम-लेश्या-सम्यक्त्व-संज्ञाहारभेदेन च बहुविधास्ते सर्वेऽपि। (भव्व–) भव्या निर्वाणपुरस्कृताः, (अभव्वा—) अभव्यास्तद्विपरीता भवन्ति। जीवसमासभेदेन गुणस्थानभेदेन च बहुविधाः। एसगदी एषा गतिः। जीवणिद्देसे—जीवनिर्देशे जीवप्रपंचे। गतींद्रियकाययोगवेदादिविधिभिः कुलयोन्यादिभिश्च बहुविधा जीवा इति, जीवनिर्देशे कर्तव्ये एतावती गतिः ॥ ३० ॥

ननु जीवभेदा एते ये व्याख्यातास्ते किंलक्षणाः ? इत्यत आह—

णाणं पंचविधं पिअ अण्णाणतिगं च सागरुवओगो
चदुदंसणमणगारो सव्वे तल्लक्खणा जीवा ३१
ज्ञानं पंचविधं अपि अज्ञानात्रिकं च साकारोपयोगः ।
चतुर्दर्शनमनाकारः सर्वे तल्लक्षणा जीवाः ॥ ३१ ॥

णाणं—जानाति ज्ञायतेऽनेन ज्ञानमात्रं वा ज्ञानं वस्तुपरिच्छेदकं । तच्च पंचविहं—पंचप्रकारं मतिश्रुतावधिमनःपर्ययकेवलभेदेन । षटत्रिंशत्त्रिशतभेदं चावग्रहेहावायधारणाभिः षडिन्द्रियाणि प्रगुणितानि तानि चतुर्विंशतिप्रकाराणि भवन्ति तत्र चतुर्षु व्यञ्जनावग्रहेषु प्रक्षिप्तेष्वष्टाविंशतिर्भवन्ति सा चाष्टाविंशतिर्बहुबहुविधक्षिप्रानिःसृतानुक्तध्रुवेतरभेदैर्द्वादशभिर्गुणिताः षट्त्रिंशत्त्रिशतभेदा भवन्ति मतिज्ञानमेतत् । श्रुतज्ञानमंगांगबाह्यभेदेन द्विविधं, अंगभेदेन द्वादशविधं पर्यायाक्षर-पद-संघात--प्रतिपत्तिकानुयोग--प्राभृतक-प्राभृतक-प्राभृतक—वस्तु-पूर्वभेदेन विंशतिविधं च । अवधिज्ञानं देशावधि—परमावधि-सर्वावधिभेदतस्त्रिप्रकारं । मनःपर्ययज्ञानं ऋजुमति—विपुलमतिभेदेन द्विप्रकारं । केवलमेकमसहायं । अण्णाणतिगं—अज्ञानमयथात्मवस्तुपरिच्छित्तिस्वरूपं तस्य त्रयमज्ञानत्रयं मत्यज्ञानश्रुताज्ञान-विभंगज्ञानभेदेन संशयविपर्ययानध्यवसायाकिञ्चित्करादिभेदेन चानेकप्रकारं । सागरुवओगो—सहाकारेण व्यक्त्यार्थेन वर्तत इति साकारः सविकल्पो गुणीभूतसामान्यविशेषग्रहणप्रवण उपयोगः । ज्ञानं पंचप्रका-

रमज्ञानत्रयं च साकार उपयोगः । चदुदंसणं–चत्वारि दर्शनानि चक्षुरचक्षुरवधिकेवलदर्शनभेदेन । अणगारो–अनाकारोऽविकल्पको गुणीभूतविशेषसामान्यग्रहणप्रधानः, चत्वारि दर्शनान्यनाकार उपयोगः । सव्वे–सर्वे । तल्लक्खणा–तौ ज्ञानदर्शनोपयोगौ लक्षणं येषां ते तल्लक्षणाः ज्ञानदर्शनोपयोगलक्षणाः सर्वे जीवा ज्ञातव्या इति ॥ ३१ ॥

जीवभेदोपंसहारादजीवभेदसूचनाय गाथा—

एवं जीवविभागा बहुभेदा वण्णिया समासेण ।
एवंविधभावरहियमजीवदव्वेत्ति विण्णेयं ॥३२॥

एवं जीवविभागा बहुभेदा वर्णिताः समासेन ।
एवंविधभावरहितमजीवद्रव्यमिति विज्ञेयं ॥ ३२ ॥

एवं–व्याख्यातप्रकारेण । जीवविभागा–जीवविभागाः । बहुभेदा–बहुप्रकाराः । वण्णिदा–वर्णिताः । समासेण–संक्षेपेण । एवंविधभावरहियं–व्याख्यातस्वरूपविपरीतमजीवद्रव्यमिति विज्ञेयम् ॥ ३२ ॥

अजीवभेदप्रतिपादनायाह—

अजीवा वि य दुविहा रूवारूवा य रूविणो चदुधा
खंधा य खंधदेसा खंधपदेसा अणू य तहा ॥३३॥

अजीवा अपि द्विविधा रूपिणोऽरूपिणश्च रूपिणः चतुर्धा

स्कंधश्च स्कंधदेशः स्कंधप्रदेशः अणुश्च तथा ॥ ३३ ॥

अजीवा विय–अजीवाश्चाजीवपदार्थाश्च। दुविहा–द्विप्रकाराः। रूवा–रूपिणो रूपरसगन्धस्पर्शवन्तो यतो रूपाविनाभाविनो रसादयस्ततो रूपग्रहणेन रसादीनामपि ग्रहणं। अरूवा य–अरूपिणश्च रूपादिवर्जिताः। रूविणो–रूपिणः पुद्गलाः। चदुधा–चतुःप्रकाराः। के ते चत्वारः प्रकारा इत्यत आह–खंधाय–स्कन्धः। खंधदेसा–स्कन्धदेशः। खंधपदेसा–स्कन्धप्रदेशः। अणूयतहा–अणुरपि तथा परमाणुः। रूप्यरूपिभेदेनाजीवपदार्था द्विप्रकाराः, रूपिणः पुनः स्कन्धादिभेदेन चतुःप्रकारा इति ॥ ३३ ॥

स्कन्धादिस्वरूपप्रतिपादनार्थमाह—

खंधं सयलसमत्थं तस्स दु अद्धं भणंति देसोत्ति ।
अद्धद्धं च पदेसो परमाणू चेय अविभागी॥३४॥

स्कंधः सकलसमर्थः तस्य तु अर्धं भणंति देश इति ।
अर्धार्धं च प्रदेशः परमाणुः चैव अविभागी ॥ ३४ ॥

खंधं–स्कन्धः। सयल–सह कलाभिर्वर्तते इति सकलं सभेदं परमाणवन्तं। समत्थं–समस्तं सर्वं पुद्गलद्रव्यं। सभेदं स्कन्धः सामान्यविशेषात्मकं पुद्गलद्रव्यमित्यर्थः। अतो न सकलसमस्तयोः पौनरुक्त्यं। तस्स दु तस्य तु स्कन्धस्य। अद्धं–अर्धं सकलं। भणंति–वदन्ति। देसोत्ति–देश इति तस्य सम-

स्तस्य पुद्गलद्रव्यस्यार्धं देश इति वदन्ति जिनाः । अर्द्धं च अर्धस्यार्धमर्धार्धं तत्समस्तपुद्गलद्रव्यार्धं तावदर्धेनार्धेन कर्तव्यं यावद् द्व्यणुकस्कन्धः ते सर्वे भेदाः प्रदेशवाच्या भवन्ति । परमाणूचेव-परमाणुश्च । अविभागी-निरंशो यस्य विभागो नास्ति तत्परमाणुद्रव्यम् ॥ ३४ ॥

अरूपिद्रव्यभेदनिरूपणार्थमाह—

ते पुणु धम्माधम्मागासा य अरूविणो य तह कालो
खंधा देस पदेसा अणुत्ति विय पोग्गला रूवी ३५

ते पुनःधर्माधर्माकाशानि च अरूपीणि तथा कालः।
स्कंधः देशः प्रदेशः अणुरिति अपि च पुद्गला रूपिणः

ते पुणु-तच्छब्दः पूर्वप्रक्रान्तपरामर्शी ते पुनररूपिणोऽजीवाः। धम्माधम्मागासा य-धर्माधर्माकाशानि । किंलक्षणानि अरूविणोय-अरूपीणि रूपरसगन्धस्पर्शरहितानि । तहकालो-तथा कालश्चारूपी लोकमात्रः सप्तरज्जूनां घनीकृतानां यावन्तः प्रदेशास्तावत्परिमाणानि, अलोकाकाशं पुनरनन्तं । स्कन्धादयः के ते आह-स्कन्धदेश प्रदेशा अणुरिति च पुद्गलाः पूरणगलनसमर्थाः । रूवी-रूपिणो रूपरसगन्धस्पर्शवन्तोऽनन्तपरिमाणाः । ननु कालः किमिति कृत्वा पृथग्व्याख्यातश्चेत् नैष दोषः, धर्माधर्माकाशान्यस्तिकायरूपाणि कालः पुनरनस्तिकायरूप एकैकप्रदेशरूपः; निचयाभावप्रतिपादनाय पृथ-

व्याख्यात इति । रूपिणः पुद्गला इति ज्ञापनार्थं पुनः स्कंधादिग्रहणमतो न पौनरुक्त्यं । धर्मादीनां च स्कन्धादिभेदप्रतिपादनार्थं च पुनर्ग्रहणम् ॥ ३५ ॥

ननु यदेवार्थक्रियाकारि तदेव परमार्थं सत् तदेषां धर्मादीनां किं कार्यं ? केषामेतानि कारणान्यत आह—

गदिठाणोग्गाहणकारणाणि कमसो दु वत्तणगुणोय रूवरसगंधफासादि कारणा कम्मबंधस्स ॥ ३६ ॥

गतिस्थानावगाहनकारणानि क्रमशः तु वर्तनागुणश्च रूपरसगंधस्पर्शादि कारणं कर्मबंधस्य ॥ ३६ ॥

गदि–गतिर्गमनक्रिया । ठाणं–स्थानं स्थितिक्रिया । ओगाहण–अवगाहनमवकाशदानमेषां कारणानि–निमित्तानि । कमसो–क्रमशः यथाक्रमेण । वत्तणगुणोय–वर्तनागुणश्च परिणामकारणं । गतेः कारणं धर्मद्रव्यं जीवपुद्गलानां । तथा तेषामेव स्थितेः कारणमधर्मद्रव्यं । अवकाशदाननिमित्तमाकाशद्रव्यं पंचद्रव्याणां । तथा तेषामपि वर्तनालक्षणं कालद्रव्यं स्वस्य च परमार्थकालग्रहणात् । धर्माधर्माकाशकालद्रव्याणि स्वपरिणामनिमित्तानि परेषां गत्यादीनां निमित्तान्यपि भवन्ति, अनेककार्यकारित्वाद् द्रव्याणां तस्मान्न विरोधो यथा मत्स्यः स्वगतेः कारणं, जलमपि च कारणं तद्गतेः, स्वगतेः कारणं पुरुषः सुखः पन्थाश्च । तथा स्वस्थितेः कारणं पुरुषः,

छायादिकं च कारणं। अथ रूपादयः कस्य कारणमिति चेत्, रूपरसगन्धस्पर्शादयः कारणं कर्मबन्धस्य, जीवस्वरूपान्यथानिमित्तकर्मबन्धस्योपादनहेतवः रूपादिवन्तः पुद्गलाः। कथं पुद्गला इति लभ्यन्ते, तेनाभेदोपचारात् तात्स्थ्याद्वा बन्धः पुद्गलरूपो भवतीत्यर्थः॥ ३६॥

कर्मबन्धो द्विधा पुण्यपापभेदादतस्तत्स्वरूपं तन्निमित्तं च प्रतिपादयन्नाह—

सम्मत्तेण सुदेण य विरदीए कसायणिग्गहगुणेहिं
जो परिणदो स पुण्णो तव्विवरीदेण पावं तु॥ ३७

सम्यक्त्वेन श्रुतेन च विरत्या कषायनिग्रहगुणैः।
यः परिणतस्तत्पुण्यं तद्विपरीतेन पापं तु॥ ३७॥

सम्यक्त्वेन, श्रुतेन, विरत्या पंचमहाव्रतपरिणत्या, तथा कषायनिग्रहगुणैरुत्तमक्षमामार्दवार्जवसन्तोषगुणैः चशब्दादिन्द्रियनिरोधैश्च जो परिणदो-यः परिणतो जीवस्तस्य यत्कर्मसंश्लिष्टं तत्पुण्यमित्युच्यते, अथवा सम्यक्त्वादिगुणपरिणतो जीवोऽपि पुण्यमित्युच्यते अभेदात्। अथवा सम्यक्त्वादिकारणेन यः कर्मबन्धः स पुण्यमित्युच्यते। तव्विवरीदेण—तद्विपरीतेन मिथ्यात्वाज्ञानासंयमकषायगुणैर्यः परिणतः पुद्गलनिचयस्तत्पापमेव। शुभप्रकृतयः पुण्यमशुभप्रकृतयःपापमिति पुण्यपापास्रवकौ जीवौ वानेन व्याख्यातौ,॥ ३७॥

इत ऊर्ध्वं पुण्यपापास्रवकारणमाह—

पुण्णस्सासवभूदा अणुकंपा सुद्ध एव उवओगो।
विवरीदं पावस्स दु आसवहेउं वियाणाहि ३८

पुण्यस्यास्रवभूता अनुकंपा शुद्ध एव उपयोगः।
विपरीतः पापस्य तु आस्रवहेतुं विजानीहि ॥ ३८ ॥

पुण्यस्य सुखनिमित्तपुद्गलस्कन्धस्यास्रवभूता आस्रवत्यागच्छत्यनेनेत्यास्रवः आस्रवणमात्रं वास्रवः आस्रवभूता द्वारभूता कारणरूपा अनुकम्पा कृपा दया शुद्धोपयोगश्च शुद्धमनोवाक्कायक्रिया इत्यर्थः शुद्धज्ञानदर्शनोपयोगश्चाभ्यामनुकम्पाशुद्धोपयोगाभ्यां । विवरीदं—विपरीतोऽननुकम्पाऽ शुद्धमनोवाक्कायक्रियाः मिथ्याज्ञानदर्शनोपयोगः। पावस्स दु—पापस्यैव । आसव—आस्रव आगमहेतुस्तमास्रवहेतुं । वियाणाहि विजानीहि बुध्यस्व । पूर्वगाथार्थेनास्य गाथार्थस्य नैकार्थं बन्धास्रवोपकारेण प्रतिपादनात् पूर्वैः कारणैः पुण्यबन्धः पापबन्धश्च व्याख्यातः, आभ्यां पुनः कारणाभ्यां शुभास्रवः शुभकर्मागमोऽशुभास्रवोऽशुभकर्मागमो व्याख्यातः। पुण्यस्यागमनहेतू अनुकम्पाशुद्धोपयोगौ जानीहि, पापागमस्य तु विपरीतावननुकंपाऽशुद्धोपयोगौ हेतू विजानीहीति ॥ ३८ ॥

ननु जीवप्रदेशानामपूर्तानां कथं कर्मपुद्गलैर्मूर्तैः सह

सम्बन्धोऽत्र आह—

णेहोउप्पिदगत्तस्स रेणुओ लग्गदे जधा अंगे।
तह रागदोसासिणेहोल्लिदस्स कम्मं मुणेयव्वं ३९

स्नेहार्पितगात्रस्य रेणवो लगंति यथा अंगे ।
तथा रागद्वेषस्नेहालिप्तस्य कर्म ज्ञातव्यं ॥ ३९ ॥

स्नेहो घृतादिकं तेनार्द्रीकृतस्य गात्रस्य शरीरस्य रेणवः पांसवो लगन्ति संश्रयंति यथा तथा रागद्वेषस्नेहार्द्रस्य जीवस्यांगे शरीरे कर्मपुद्गला ज्ञातव्यास्तैजसकार्मणयोः शरीरयोः सतोरित्यर्थः । रागः स्नेहः, कामादिपूर्विका रतिः, द्वेषोऽप्रीतिः क्रोधादिपूर्विकाऽरतिरिति ॥ ३९ ॥

तद्विपरीतेन पापस्यास्रव इत्युक्तं तन्मुख्यरूपेण किमित्यतः आह-

मिच्छत्तं अविरमणं कसायजोगा य आसवा होंति
अरिहंतवुत्तअत्थेसु विमोहो होइ मिच्छत्तं ४०

मिथ्यात्वं अविरमणं कषाययोगौ च आश्रवा भवंति।
अर्हदुक्तार्थेषु विमोहः भवति मिथ्यात्वं ॥ ४० ॥

मिथ्यात्वमविरमणं कषाया योगश्चैते आस्रवा भवन्ति। अथ मिथ्यात्वस्य किं लक्षणमित्यत आह–अर्हदुक्तार्थेषु सर्वज्ञभाषितपदार्थेषु विमोहः संशयविपर्ययानध्यवसायरूपो मिथ्यात्वमिति भवति ॥ ४० ॥

अविरमणादीन्प्रतिपादयन्नाह—

अविरमणं हिंसादी पंचवि दोसा हवंति णादव्वा
कोधादी य कसाया जोगो जीवस्स चेट्ठा दु ४१

अविरमणं हिंसादयः पंचापि दोषा भवंति ज्ञातव्याः
क्रोधादयः कषाया योगः जीवस्य चेष्टा तु ॥ ४१ ॥

हिंसादयः पंचापि दोषाः हिंसासत्यस्तेयाब्रम्हपरिग्रहा अविरमणं ज्ञातव्यं भवति । क्रोधमानमायालोभाः कषायाः । जीवस्य चेष्टा तु योगः ॥ ४१ ॥

संवरपदार्थस्य व्याख्यानायाह—

मिच्छत्तासवदारं रुंभइ सम्मत्तदढकवाडेण ।
हिंसादिदुवाराणिवि दढवदफलिहेहिं रुब्भंति४२

मिथ्यात्वास्रवद्वारं रुंधंति सम्यक्त्वदृढकपाटेन ।
हिंसादिद्वाराण्यपि दृढव्रतफलकैः रुंधंति ॥ ४२ ॥

मिथ्यात्वमेवास्रवद्वारं मिथ्यात्वास्रवद्वारं—रुब्भन्ति रुंधन्ति निवारयन्ति । सम्मत्तदढकवाडेण—सम्यक्त्वमेव दृढकपाटं तेन सम्यक्त्वदृढकपाटेन तत्त्वार्थश्रद्धानविधानेन हिंसादीनि द्वाराणि दृढव्रतफलकै रुन्धन्ति प्रच्छादयन्तीति ॥४२॥

आसवदि जंतु कम्मं कोधादीहिं तु अयदजीवाणं
तप्पडिवक्खेहिं विदु रुंभंति तमप्पमत्ता दु॥४३॥

आस्रवति यत्तु कर्म क्रोधादिभिस्तु अयतजीवानाम् ।
तत्प्रतिपक्षैः विद्वांसो रुंधंति तमप्रमत्तास्तु ॥ ४३ ॥

क्रोधादिभिर्यत्कर्मास्रवत्युपढौकतेऽयत्नपरजीवानां तत्प्रतिपक्षैस्तत्प्रतिकूलैः क्षमादिभिरप्रमत्ताः प्रमादरहिता विद्वांसो रुन्धन्ति प्रतिकूलयन्ति । अनेन संवारको जीवो व्याख्यात इति ॥ ४३ ॥

आस्रवसंवरसमुच्चयप्रतिपादनायोत्तरगाथा संवरकारणाय वा—

मिच्छत्ताविरदीहि य कसायजोगेहिं जं च आसवदि
दंसणविरमणणिग्गहणिरोधणेहिं तु णासवदि ॥
मिथ्यात्वाविरतिभिश्च कषाययोगैश्च यच्च आस्रवति ।
दर्शनविरमणानिग्रहनिरोधनैस्तु नास्रवति ॥ ४४ ॥

मिथ्यात्वाविरतिकषाययोगैर्यत्कर्मास्रवति, दर्शनविरतिनिग्रहनिरोधनैस्तु नास्रवति । न च पूर्वगाथानां पौनरुक्त्यं बन्धास्रवसंवरभेदेन व्याख्यानाद् द्रव्यार्थिकपर्यायार्थिकशिष्यसंग्रहाद्वा ॥ ४४ ॥

निर्जरार्थप्रतिपादनायोत्तरप्रबन्धः—

संयमजोगे जुत्तो जो तवसा चेट्ठदे अणेगविधं ।
सो कम्मणिज्जराए विउलाए वट्टदे जीवो ॥ ४५ ॥
संयमयोगेन युक्तः यः तपसा चेष्टते अनेकविधं ।

स कर्मनिर्जरायां विपुलायां वर्तते जीवः ॥ ४५ ॥

निर्जरकनिर्जरानिर्जरोपायास्तत्र निर्जरकः किंविशिष्ट इत्यत आह–संयमो द्विविध इन्द्रियसंयमः प्राणसंयमश्च । जोगे–योगः यत्नः शुभमनोवचनकायो ध्यानं वा । संयमयोगयुक्तो यस्तपसा तपसि वा चेष्टते प्रवर्ततेऽनेकविधे द्वादशविधे वा, द्वादशविधं तपो यः करोति यत्नपरः स कर्मनिर्जरायां कर्मविनाशे वर्तते जीवः । अनेन निर्जरोपायश्च व्याख्यातः । पूर्वसूत्रेष्वप्येवं व्याख्येयं, बन्धको बन्धो बन्धोपायः । आवस्रक आस्रव आस्रवोपायः । संवरकः संवरः संवरोपायः । अनेन व्याख्यानेन पौनरुक्त्यं च न भवतीति ॥ ४५ ॥

दृष्टान्तद्वारेण जीवकर्मणोः शुद्धिमाह—

जह धाऊ धम्मंतो सुज्झदि सो अग्गिणा दु संतत्तो
तवसा तधा विसुज्झदि जीवो कम्मेहिं कणयं व ॥

यथा धातुः धम्यमानः शुद्ध्यति स अग्निना तु संतप्तः
तपसा तथा विशुद्ध्यति जीवः कर्मभिः कनकं इव ४६

यथा धातुपाषाणः कनकोपलो धम्यमानस्तप्यमानः शुद्धयते सोऽग्निना तु संतप्तो दग्धः किट्टकालिकादिरहितः संजायते, तथा तपसा विशुद्धते जीवः कर्मभिः कनकमिव ।

यथा धातुः कनकं अग्निसंयोगेन शुद्धं भवति, तथा तपोयोगेन जीवः शुद्धो भवति ॥ ४६ ॥

किमर्थं सकारणा निर्जरा व्याख्याता बन्धादयश्च सहेतवः नित्यपक्षेऽनित्यपक्षे च किमर्थमिति। तत्सर्वं न घटते यतः कुतः ?

जोगा पयडिपदेसा ठिदिअणुभागं कसायदो कुणदि
अपरिणदुच्छिण्णेसु य बंधट्ठिदिकारणं णत्थि ४७

योगात् प्रकृतिप्रदेशौ स्थित्यनुभागौ कषायतः करोति
अपरिणतोच्छिन्नेषु च बंधस्थितिकारणं नास्ति ॥४७॥

चतुर्विधो बन्धः प्रकृतिस्थित्यनुभागप्रदेशभेदेन, कार्मणवर्गणागतपुद्गलानां ज्ञानावरणादिभावेन परिणामः प्रकृतिबन्धः। तेषां कर्मस्वरूपपरिणातानामनन्तानन्तानां जीवप्रदेशैः सह संश्लेषः प्रदेशबन्धः। तेषां जीवप्रदेशानुश्लिष्टानां जीवस्वरूपान्यथाकरणस्सोऽनुभागबन्धः। तेषामेव कर्मरूपेण परिणतानां पुद्गलानां जीवप्रदेशैः सह यावत्कालमवस्थितिः स स्थितिबन्धः। योगाज्जीवाः प्रकृतिबन्धं प्रदेशबन्धं च करोति। कषायेण स्थितिबन्धमनुभागबन्धं च करोति। अथवा योगः प्रकृतिबन्धं प्रदेशबन्धं च करोति। कषायाः स्थितिबन्धमनुभागबन्धं च कुर्वन्ति। यतोऽतोऽपरिणतस्य नित्यस्य, उच्छिन्नस्य निरन्वयक्षणिकस्य च बन्धस्थितेः कारणं नास्ति। अथवाऽयमभिसम्बन्धः कर्तव्यो

मिथ्यादृष्ट्याद्युपशान्तानामेतद् व्याख्यानं वेदितव्यं । कुतो यतो योगः प्रकृतिप्रदेशबन्धौ करोति कषायाश्च स्थित्यनुभागौ कुर्वन्ति, अतोऽपरिणतयोरयोगिसिद्धयोः सयोग्ययोगिनोर्वोच्छिन्नस्य क्षीणकषायस्य च बन्धस्थितेः कारणं नास्ति । ननु क्षीणकषायसयोगिनोर्योगोऽस्ति, सत्यमस्ति, किंतु तस्याकिञ्चित्करत्वादभाव एवेति ॥ ४७ ॥

निर्जराभेदार्थमाह—

पुव्वकदकम्मसडणं तु णिज्जरा सा पुणो हवे दुविहा
पढमा विवागजादा विदिया अविवागजादा य

पूर्वकृतकर्मसटनं तु निर्जरा सा पुनर्भवेत् द्विविधा ।
प्रथमा विपाकजाता द्वितीया अविपाकजाता च ४८॥

अथ का निर्जरा ? पूर्वकृतकर्मसटनं गलनं निर्जरेत्युच्यते सा पुनर्निर्जरा द्विविधा द्विप्रकारा भवेत् । प्रथमा विपाकजातोदयस्वरूपेण कर्मानुभवनं । द्वितीया निर्जरा भवेदविपाकजातानुभवमन्तरेणैकहेलया कारणवशात् कर्मविनाशः ॥ ४८ ॥

विपाकजाताविपाकजातयोर्निर्जरयोर्दृष्टान्तद्वारेण स्वरूपमाह-

कालेण उवाएण य पच्चंति जधा वणप्फदिफलाणि
तध कालेण उवाएण[1] य पच्चंति कदाणि कम्माणि ४९

कालेन उपायेन च पच्यंते यथा वनस्पतिफलानि ।

---

१ 'तवेण य' इत्यपि पाठः ।

तथा कालेन उपायेन च पच्यंते कृतानि कर्माणि ४९

यथा कालेन क्रमपरिणामेनोपायेन च यवगोधूमादेर्वनस्पतेः फलानि पच्यन्ते तथा कालेनोदयागतगोपुच्छैरुपायेन च सम्यक्त्वज्ञानचारित्रतपोभिः कृतानि कर्माणि पच्यन्ते विनश्यन्ति ध्वस्तीभवन्तीत्यर्थः ॥ ४९ ॥

मोक्षपदार्थं निरूपयन्नाह—

रागो बंधइ कम्मं मुच्चइ जीवो विरागसंपण्णो।
एसो जिणोवएसो समासदो बंधमोक्खाणं ५०

रागी बध्नाति कर्माणि मुंचति जीवः विरागसंपन्नः।
एष जिनोपदेशः समासतः बंधमोक्षयोः ॥५०॥

अत्रापि मोचको मोक्षो मोक्षकारणं च प्रतिपादयति बन्धस्य च बन्धपूर्वकत्वान्मोक्षस्य। रागी बध्नाति कर्माणि वीतरागः पुनर्जीवो मुच्यते। एष जिनोपदेशः आगमः समासतः संक्षेपात् कयोर्बन्धमोक्षयोः। संक्षेपेणायमुपदेशो जिनस्य, रागी बध्नाति कर्माणि वैराग्यं संप्राप्तः पुनर्मुच्यते इति॥ ५०

अथ पदार्थान् संक्षेपयन् प्रकृतेन च योजयन्नाह—

णव य पदत्था एदे जिणदिट्ठा वण्णिदा मए तच्चा
एत्थ भवे जा संका दंसणघादी हवदि एसो ५१॥

नव च पदार्था एते जिनदिष्टा वर्णिता मया तत्त्वं।

तत्र भवेत् या शंका दर्शनघाती भवति एषः ॥५१॥

अथ का शंका नाम, एते ये व्याख्याता नवपदार्था जिनोपदिष्टाः, अनेन किमुक्तं भवति वक्तुः प्रामाण्याद्वचनस्य प्रामाण्यं, वर्णिता व्याख्याता मया तत्त्वा-तत्त्वभूताः, जिनमतानुसारेण मयानुवर्णिता इत्यर्थः । एत्थभवे-एतेषु पदार्थेषु भवेत् यस्य शंका स जीवो दर्शनघात्येष मिथ्यादृष्टिः । अथवा शंका सन्दिग्धाभिप्राया सैषा दर्शनघातिनी स्यात् ।

किमेते पदार्था नित्या आहोस्विदनित्याः, किं सन्त आहोस्विदविद्यमानाः, यथैते वर्णिता एतैरन्यैरपि बुद्धकणादाक्षपादादिभिश्च वर्णिता न ज्ञायन्ते के सत्या इति संशयो दर्शनविनाशहेतुरिति शंकां प्रतिपाद्याकांक्षां निरूपयन्नाह-

तिविहा य होइ कंखा इह परलोए तथा कुधम्मे य
तिविहं पि जो ण कुज्जा दंसणसुद्धीमुपगदो सो ॥

त्रिविधा च भवति कांक्षा इह परलोके तथा कुधर्मे च ।
त्रिविधमपि यः न कुर्यात् दर्शनशुद्धिमुपगतः सः ५२

त्रिविधा भवति कांक्षाभिलाष इह लोकविषया परलोकविषया तथा कुधर्मविषया च । इह लोके मम यदि गजतुरगद्रव्यपशुपुत्रकलत्रादिकं भवति तदानीं शोभनोऽयं धर्मः । परलोके चैतन्मम स्यात्, भोगा मे सन्तु लोकधर्मश्च शोभनः सर्वेषु-

व्यस्तमहमपि करोमीति कांक्षा। तां त्रिप्रकारामपि यो न कुर्यात् स जीवो दर्शनशुद्धिमुपगतः। कांक्षामन्तरेण यदि सर्वं लभ्यते किमिति कृत्वा काङ्क्षा क्रियते। निंद्यते च सर्वैः काङ्क्षावानिति।

इह लोकाकाङ्क्षां परलोकाकांक्षां च प्रतिपादयन्नाह—

बलदेवचक्कवट्टीसेट्ठीरायत्तणादिआहिलासो।
इहपरलोगे देवत्तपत्थणा दंसणाभिघादी सो ५३

बलदेवचक्रवर्तिश्रेष्ठिराजत्वाद्यभिलाषः।
इहपरलोके देवत्वप्रार्थना दर्शनाभिघाती सः ५३

बलदेवचक्रवर्तिश्रेष्ठ्यादीनां राज्यमिलाष इहलोके यो भवति सेहलोकाकाङ्क्षा। परलोके च स्वर्गादौ देवत्वप्रार्थना यस्य स्यात् दर्शनाभिघाती सः। इहलोके षट्खण्डाधिपतित्वं, बलदेवत्वं, राजश्रेष्ठित्वं, परलोके इन्द्रत्वं, सामान्यदेवत्वं, महर्द्धिकत्वं, स्वस्वरूपत्वमित्येवमादि प्रार्थयन् मिथ्यादृष्टिर्भवति, निदानशल्यत्वात्कांक्षयेति ॥ ५३ ॥

कुधर्मकांक्षास्वरूपमाह—

रत्तपडचरगतावसपरिहत्तादीणमण्णतित्थीणं।
धम्मम्हि य अहिलासो कुधम्मकंखा हवदि एसा ॥

रक्तपटचरकतापसपरिव्राजादीनामन्यतैर्थिकानां।

धर्मे च अभिलाषः कुधर्मकांक्षा भवति एषा ॥ ५३ ॥

रक्तपट--चरक--तापस--परिव्राजकादीनामन्यतीर्थिकानां धर्मविषये योऽभिलाषः कुधर्मकांक्षैषा भवति । चत्वारो रक्तपटा वैभाषिकसौत्रान्तिकयोगाचारमाध्यमिकभेदात् । नैयायिकवैशेषिकदर्शने चरकशब्देनोच्येते कणचरादिर्वा । कन्दफलमूलाद्याहारा भस्मोद्धूलनपरा जटाधारिणो विनयपरास्तापसाः । सांख्यदर्शनस्थाः पंचविंशतितत्त्वज्ञाः परिव्राजकशब्देनोच्यन्ते इत्येवमाद्यन्येष्वपि तैर्थिकमतेष्वभिलाषः कुधर्मकांक्षेति । कथमेषां कुधर्मत्वं चेत् पदार्थानां तदीयानां विचार्यमाणानामयोगात्सर्वथा नित्यक्षणिकोभयत्वात् । इन्द्रियसंयमप्राणसंयमजीवविज्ञानपदार्थसर्वज्ञपुण्यपापादीनां परस्परविरोधाच्चेति ॥ ५४ ॥

विचिकित्सास्वरूपमाह—

विदिगिंच्छा वि य दुविहा
दव्वे भावे य होइ णायव्वा ।
उच्चारादिसु दव्वे
खुधादिए भावविदिगिंछा ५५

विचिकित्सापि च द्विविधा
द्रव्ये भावे च भवति ज्ञातव्या ।

उच्चारादिषु द्रव्येषु
क्षुधादिके भावविचिकित्सा ॥

विचिकित्सापि द्विप्रकारा द्रव्यभावभेदात् भवति ज्ञातव्या उच्चारप्रश्रवणादिषु मूत्रपुरीषादिदर्शने विचिकित्सा द्रव्यगता क्षुदादिषु क्षुत्तृष्णानग्नत्वादिषु भावविचिकित्सा व्याधितस्य वान्यस्य वा यतेर्मूत्राशुचिच्छर्दिश्लेष्मलालादिकं यदि दुर्गन्धिविरूपमिति कृत्वा घृणां करोति वैयावृत्यं न करोति स द्रव्यविचिकित्सायुक्तः स्यात् । सर्वमेतच्छोभनं क्षुधात्तृष्णानग्नत्वेन केशोत्पाटनादिना च दुःखं भवति एतद्विरूपकमित्येवं भावविचिकित्सेति ॥ ५५ ॥

द्रव्यविचिकित्साप्रपंचनार्थमाह—

उच्चारं पस्सवणं खेलं सिंघाणयं च चमट्ठी ।
पूयं च मंससोणिदवंतं जल्लादि साधूणं ॥ ५६ ॥
उच्चारं प्रस्रवणं श्लेष्मा सिंघानकं च चर्मास्थि ।
पूतिं च मांसशोणितवांतं जल्लादि साधूनाम् ॥

उच्चारं, प्रश्रवणं, खेलं—श्लेष्मा, सिंहानकं, चर्म, अस्थि-पूयं च क्लिन्नरुधिरं, मांसं, मलं, शोणितं, वान्तं जल्लं सर्वांगीन मलं, अंगैकदेशाच्छादकं, लालादिकं च साधूनामिति ॥ ५६ ॥

भावविचिकित्सां प्रपंचयनाह—

छुहतण्हा सीदुण्हा दंसमसयमचेलभावो य।
अरदिरदिइत्थिचरियाणिसीधिया सेज्जअक्कोसो
बधजायणं अलाहो रोग तणप्फास जल्लसक्कारो
तह चेव पण्णपरिसह अण्णाणमदंसणं खमणं ॥

क्षुत्तृष्णा शीतोष्णं दंशमशकमचेलभावश्च।
अरतिरती स्त्रीचर्या निषद्या शय्या आक्रोशः॥
बधयाचनं अलाभो रोगस्तृणस्पर्शः जल्लं सत्कारः।
तथा चैव प्रज्ञापरीषहः अज्ञानमदर्शनं क्षमणं ॥

छुह–क्षुत् चारित्रमोहनीयवीर्यान्तरायापेक्षाऽसातावेदनीयोदयादशनाभिलाषः। तण्हा—तृषा चारित्रमोहनीयवीर्यान्तरायापेक्षाऽसातावेदनीयोदयादुदकपानेच्छा। सीद शीतं तद्द्वयापेक्षाऽसातोदयात्मावरणेच्छाकारणपुद्गलस्कंधः। उण्हा—उष्णं पूर्वोक्तकारणेन सन्निधानाच्छीताभिलाषकारणादित्यज्वरादिसन्तापः। दंसमसयं—दंशश्च मशकाश्च दंशमशकं दंशमशकैः खाद्यमानस्य शरीरपीडा दंशमशकमित्युच्यते कार्ये कारणोपचारात्। अचेलभावो य–अचेलकत्वं नाग्न्यमिति यावत् अरदिरदि-अरतिरती चारित्रमोहोदयात् चारित्रद्वेषासंयमाभिलाषौ। इत्थि–स्त्रीकटाक्षेक्षणादिभिर्योषिद्बाधा कार्ये कारणोपचारात्। चरिया—चर्या आवश्यकाद्यनुष्ठानपरस्याति-

श्रान्तस्याप्युपानत्कादिरहितस्यापि मार्गयानं । निसीधिया—निषिद्या श्मशानोद्यानशून्यायतनादिषु वीरासनोत्कुटिकाद्यासनजनितपीडा । सेज्जा—शय्या स्वाध्यायध्यानाध्वश्रमपरिखेदितस्य खरविषमप्रचुरशर्कराद्याकीर्णभूमौ शयनस्यैकपार्श्वेन दण्डशयनादिशय्याकृतपीडा । अक्कोसो—आक्रोशस्तीर्थयात्राद्यर्थपर्यटतः मिथ्यादृष्टिविप्रमुक्तावज्ञासंघनिन्दावचनकृताबाधा । वह—बधः मुद्गरादिप्रहरणकृतपीडा । जायणं—अयाञ्चा अकारोत्र लुप्तो द्रष्टव्यः प्राणात्ययेऽपि रोगादिभिः पीडितस्यायाचयतः अयाञ्चापीडा । अथवा वरं मृतो न कश्चिद्याचितव्यः शरीरादिसंदर्शनादिभिः यांचा तु नाममहापीडा अलाहो अलाभः अंतरायकर्मोदयादाहाद्यलाभकृतपीडा। रोय रोगो ज्वरकासभगन्दरादिजनितव्यथा । तणप्फास—तृणस्पर्शः शुष्कतृणपरुषशर्कराकण्टकनिशितमृत्तिकाकृतशरीरपादवेदना । जल्ल—सर्वांगीणं मलमस्नानादिजनितप्रस्वेदाद्युद्भवा पीडा । सक्कारो—सत्कारः पूजाप्रशंसात्मकः । पुरस्कारो नमनक्रियारम्भादिष्वग्रतः करणमामंत्रणं । तह चेव—तथा चैव । पण्ण—प्रज्ञा विज्ञानमदोद्भूतगर्वः । परिसह—परीषहः । पीडाशब्दः सर्वत्रापि सम्बध्यते । क्षुत्परिषहः, तृणपरिषहः, दंशमशकपिपीलिकामत्कुणादिभक्षणपरीषह इत्यादि । अण्णाणं—अज्ञानं सिद्धान्तव्याकरणतर्कादिशास्त्रापरिज्ञानोद्भूतमनः—सन्तापः । अदंसणं—अदर्शनं महाव्रतानुष्ठानेनाप्यदृष्टातिशयवाञ्छा, उपलक्षणमात्रमेतत् अन्येप्यत्र पीडाहेतवो द्रष्टव्याः ।

एतैः परीषहैर्व्रताद्यभंगेऽपि संक्लेशकरणं भावविचिकित्सा । खमणं–क्षमणं सहनं तत्प्रत्येकमभिसम्बध्यते क्षुत्परीषहक्षमणं तृणपरीषहक्षमणमित्यादि । ततः परीषहजयो भवति ततश्च भावविचिकित्सा दर्शनमलं निराकृतं भवतीति ॥ ५७–५८ ॥

दृष्टिमोहप्रपंचनार्थमाह—

लोइयवेदियसामाइएसु तह अण्णदेवमूढत्तं ।
णच्चा दंसणघादी ण य कायव्वं ससत्तीए ॥ ५९

लौकिकवैदिकसामायिकेषु तथा अन्यदेवमूढत्वं ।
ज्ञात्वा दर्शनघाती न च कर्तव्यं सर्वशक्त्या ॥ ५९ ॥

लोइय–लोकः ब्राह्मणक्षत्रियवैश्यशूद्रास्तस्मिन् भवो लोकिकः आचार इति सम्बन्धः । वेदेषु सामऋग्यजुःषु भवो वैदिकः आचारः । समयेषु नैयायिकवैशेषिकबौद्धमीमांसकापिललोकायतिकेषु भव आचारः सामयिकस्तेषु लौकिकवैदिकसामयिकेषु आचारेषु क्रियाकलापेषु तथान्यदेवकेषु मूढत्तं–मूढत्वं मोहः परमार्थरूपेण ग्रहणं तद्दर्शनघाति । सम्यक्त्वविनाशं ज्ञात्वा तस्मात्तन्मूढत्वं सर्वशक्त्या न कर्तव्यं ॥ ५९ ॥

लौकिकमूढश्च [त्व] प्रपंचनार्थमाह—

कोडिल्लमासुरक्खा भारहरामायणादि जे धम्मा
होज्जु व तेसु विसुत्ती लोइयमूढो हवदि एसो ६०

कौटिल्यमासुरक्षः भारतरामायणादयो ये धर्माः।
भवेत् वा तेषु विश्रुतिः लौकिकमूढः भवति एषः ६०

कोडिल्ल—कुटिलस्य भावः कौटिल्यं तदेव प्रयोजनं यस्य धर्मस्य सः कौटिल्यधर्मः ठकादिव्यवहारो लोकप्रतारणाशीलो धर्मः परलोकाद्यभावप्रतिपादनपरो व्यवहारः। आसुरक्खा—असवः प्राणास्तेषां छेदनभेदनताडनत्रासनोत्पाटनमारणादिप्रपंचेन वञ्चनादिरूपेण वा रक्षा यस्मिन् धर्मे स आसुरक्षो धर्मो नगराद्यारक्षिकोपायभूतः। अथवा कौटिल्यधर्मः, इंद्रजालादिकं पुत्रबन्धुमित्रपितृमातृस्वाम्यादिघातनोपदेशः, चाणक्योक्तव आसुरक्षः मद्यमांसखादनाद्युपदेशः। बलाधानरोगाद्यपनयनहेतुः वैद्यधर्मः। भारतरामायणादिकाः पंचपाण्डवानामेका योषित्, कुंतिश्च पंचभर्तृका, विष्णुश्च सारथिः, रावणादयो राक्षसाः, हनुमानादयश्च मर्कटाः इत्येवमादिका असद्धर्मप्रतिपादनपरा ये धर्मास्तेषु या भवेद्विश्रुतिर्विपरिणामः एतेपि धर्मा इत्येवं मूढो लौकिकमूढो भवत्येष इति ॥ ६० ॥

वैदिकमोहप्रतिपादनार्थमाह—

ऋग्वेदसामवेदा वागणुवादादिवेदसत्थाइं।
तुच्छाणित्ताणि गेण्हइ वेदियमूढो हवदि एसो ॥

ऋग्वेदसामवेदौ वागनुवादादि वेदशास्त्राणि।

तुच्छानि तानि गृह्णाति वैदिकमूढो भवति एषः ॥

रिग्वेद–ऋग्वेदः । सामवेदः । वाग–वाक्, ऋचः । आणुवाग्–अनुवाक् कंडिकासमुदायः । अथवा वाक्—ऋग्वेदप्रतिबद्धमायश्चित्तादिः, अनुवाक्–मन्वादिस्मृतयः । आदिशब्देन यजुर्वेदाथर्वणादयः परिगृह्यन्ते । वेदसत्थाइं–वेदशास्त्राणि हिंसोपदेशकानि अग्न्याधिकार्यप्रतिपादकानि गृह्यसूत्रारण्यगर्भाधानपुंसवननामकर्मान्नप्राशनचौलोपनयनव्रतबन्धनसौत्रामण्यादिप्रतिपादकानि नन्दिकेशरगौतमयाज्ञवल्क्यपिप्पलादवररुचिनारदबृहस्पतिशुक्रबुद्धादिप्रणीतानि तुच्छानि धर्मरहितानि निरर्थकानीति यदि न गृह्णन्ति [यदि गृह्णाति] तदासौ वैदिकाचारमूढो भवत्येष इति ॥ ६१ ॥

सामायिकमोहप्रतिपादनार्थमाह—

रत्तवडचरगतावसपरिहत्तादीय अण्णपासंढा ।
संसारतारगत्ति य जदि गेण्हइ समयमूढो सो ६२

रक्तपटचरकतापसपरिव्राजकादयः अन्यपाषंडाः ।
संसारतारका इति च यदि गृह्णाति समयमूढः सः ॥

रत्तवड–रक्तपटः । चरग–चरकः । काजवाहेन कण्भिक्षाहाराः, अथवा भिक्षावेलायां हस्तलेहनशीला उत्सिष्टाः कालमुखादयः । तावसा–तापसाः कन्दमूलफलाद्याहारा वनवासिनः जटाकौपीनादिधारिणः । परिहत्ता–परिव्राजका

एकदण्डित्रिदण्डाद्यादयः स्नानशीलाः शुचिवादिनः। आदिशब्देन शैव-पाशुपति-कापालिकादयः परिगृह्यन्ते। (अण्ण पासंडा—)। एते लिंगिनः संसारतारकाः शोभनानुष्ठाना यद्येवं गृह्णाति समयमूढोऽसाविति ॥ ६२ ॥

देवमोहप्रतिपादनार्थमाह—

ईसरबंभाविण्हूअज्जाखंदादिया य जे देवा।
ते देवभावहीणा देवत्तणभावणे मूढो ॥ ६३ ॥

ईश्वरब्रह्माविष्णुआर्यास्कंदादयश्च ये देवाः।
ते देवभावहीना देवत्वभावने मूढः ॥ ६३ ॥

ईश्वर-ब्रह्म-विष्णु-भगवती-स्वामिकार्तिकादयो ये देवास्ते देवभावहीनाः चतुर्णिकायदेवस्वरूपेण सर्वज्ञत्वेन च रहितास्तेषूपरि यदि देवत्वपरिणामं करोति तदानीं देवत्वभावेन मूढो भवतीत्यर्थः ॥ ६३ ॥

उपगूहनस्वरूपप्रतिपादनार्थमाह—

दंसणचरणविवण्णे जीवे दट्ठूण धम्मभत्तीए।
उपगूहणं करिंतो दंसणसुद्धो हवदि एसो ॥ ६४

दर्शनचरणविपन्नान् जीवान् दृष्ट्वा धर्मभक्त्या।
उपगूहनं कुर्वन् दर्शनशुद्धो भवति एषः ॥ ६४ ॥

दर्शनचरणविपन्नान् सम्यग्दर्शनचारित्रम्लानान् जीवान्

दृष्ट्वा धर्मभक्त्या वानुपगूहयन् उज्जलयन् संवरयन्वाप-तेषामुपगूहनं संवरणं कुर्वन् दर्शनशुद्धो भवत्येष उपगूहना-कर्तेति ॥ ६४ ॥

स्थिरीकरणस्वरूपं प्रतिपादनायाह—

दंसणचरणुवभट्ठे जीवे दट्ठूण धम्मबुद्धीए।
हिदमिदमवगूहिय ते खिप्पं तत्तो णियत्तेइ[1] ६५

दर्शनचरणप्रभ्रष्टान् जीवान् दृष्ट्वा धर्मबुद्ध्या ।
हितामितमवगूह्य तान् क्षिप्रं ततः निवर्तयति ॥ ६५॥

दर्शनचरणोपभ्रष्टान् सम्यग्ज्ञानदर्शनचारित्रेभ्यो भ्रष्टान्निर्गतान् जीवान दृष्ट्वा धर्मबुद्धया हितमितवचनैः सुख-निमित्तैः पूर्वापरविवेकसहितैर्वचनैरवगूह्य स्वीकृत्य तेभ्यो दोषेभ्यः क्षिप्रं शीघ्रं तान्निर्वर्तयन निवर्तयति यः स स्थिरी-करणं कुर्वन् दर्शनशुद्धो भवतीति सम्बन्धः ॥ ६५ ॥

वात्सल्यार्थं प्रतिपादयन्नाह—

चादुव्वण्णे संघे चदुगदिसंसाराणित्थरणभूदे ।
वच्छल्लं कादव्वं वच्छे गावी जहा गिद्धी॥ ६६॥

चातुर्वर्णे संघे चतुर्गतिसंसारनिस्तरणभूते ।
वात्सल्यं कर्तव्यं वत्से गौः यथा गृद्धिः ॥ ६६ ॥

---

१ । णियत्तिज्जो अयमपि पाठः ।

चातुर्वर्णे ऋष्यार्जिकाश्रावकश्राविकासमूहे संघे चतुर्गतिसंसारनिस्तरणभूते नरकतिर्यग्मनुष्यदेवगतिषु यत्संसरणं भ्रमणं तस्य विनाशहेतौ वात्सल्यं कर्तव्यं यथा नवप्रसूता गौर्वत्से स्नेहं करोति । एवं वात्सल्यं कुर्वन् दर्शनविशुद्धो भवति । वात्सल्यं च कायिक-वाचिक-मानसिकानुष्ठानैः सर्वप्रयत्नेनोपकरणौषधाहारावकाशशास्त्रादिदानैः संघे कर्तव्यमिति ॥ ६६ ॥

प्रभावनास्वरूपप्रतिपादनार्थमाह—

धम्मकहाकहणेण य बाहिरजोगेहिं चावि णवजेहिं
धम्मो पहाविदव्वो जीवेसु दयाणुकंपाए ॥ ६७

धर्मकथाकथनेन च बाह्ययोगैश्चापि अनवद्यैः ।
धर्मः प्रभावयितव्यः जीवेषु दयानुकंपया ॥ ६७ ॥

धर्मकथाकथनेन त्रिषष्टिशलाकापुरुषचरिताख्यानेन सिद्धान्ततर्कव्याकरणादिव्याख्यानेन धर्मपापादिस्वरूपकथनेन वा बाह्ययोगैश्चापि अभ्रावकाशातापनवृक्षमूलानशनाद्यनवद्यैर्हिंसादिदोषरहितैर्धर्मः प्रभावयितव्यो मार्गस्योद्योतः कर्तव्यो जीवदयानुकम्पायुक्तेन, अथवा जीवदयानुकम्पया च धर्मः प्रभावयितव्यः तथापिशब्दसूचितैः परवादिजयाष्टांगनिमित्तदानपूजादिभिश्च धर्मः प्रभावयितव्य इति ॥

अधिगमस्वरूपं प्रतिपाद्य नैसर्गिकसम्यक्त्वस्वरूपप्रतिपादनायाह—

जं खलु जिणेवदिट्ठं तमेव तत्थमिति भावदो गहणं
सम्मद्दंसणभावो तव्विवरीदं च मिच्छत्तं ॥ ६८ ॥

यत् खलु जिनोपदिष्टं तदेव तथ्यमिति भावतो ग्रहणं
सम्यग्दर्शनभावः तद्विपरीतं च मिथ्यात्वं ॥ ६८ ॥

यत्तत्त्वं जिनैरुपदिष्टं प्रतिपादितं तदेव तथ्यं सत्यं खलु व्यक्तमित्येवं भावतः परमार्थेन ग्रहणं यत्सम्यग्दर्शनभावः आज्ञासम्यक्त्वमिति यावत्। तद्विपरीतं मिथ्यात्वमसत्यरूपेण जिनोपदिष्टस्य तत्त्वस्य ग्रहणं मिथ्यात्वं भवतीति ॥ ६८ ॥

दर्शनाचारसमर्पणाय ज्ञानाचारसूचनायोत्तरगाथा—

दंसणचरणो एसो णाणाचारं च वोच्छमट्ठविहं।
अट्ठविहकम्ममुक्को जेण य जीवो लहइ सिद्धिं।
दर्शनचरण एष ज्ञानाचारं च वक्ष्ये अष्टविधं।
अष्टविधकर्ममुक्तः येन च जीवः लभते सिद्धिम् ६९

दर्शनाचार एष मया वर्णितः समासेनेत ऊर्ध्वं ज्ञानाचारं वक्ष्ये कथयिष्याम्यष्टविधं येन ज्ञानाचारेणाष्टविधकर्ममुक्तो जीवो लभते सिद्धिं, ज्ञानभावनया कर्मक्षयपूर्विका सिद्धिरिति भावार्थः ॥ ६९ ॥

किं ज्ञानं यस्याचारः कथ्यते इति चेदित्याह—

जेण तच्चं विबुज्झेज्ज जेण चित्तं णिरुज्झदि।
जेण अत्ता विसुज्झेज्ज तं णाणं जिणसासणे ७०

येन तत्त्वं विबुध्यते येन चित्तं निरुध्यते।

येन आत्मा विशुध्यते तत् ज्ञानं जिनशासने ॥७०

येन तत्त्वं वस्तुयाथात्म्यं विबुध्यते परिच्छिद्यते येन च चित्तं मनोव्यापारो निरुद्ध्यते आत्मवशं क्रियते येन चात्मा जीवो विशुद्ध्यते वीतरागः क्रियते परिच्छिद्यते तज्ज्ञानं जिनशासने प्रमाणं मोक्षप्रापणाभ्युपायं संशयविपर्ययानध्यवसायार्किञ्चित्करविपरीतं प्रत्यक्षं परोक्षं च। तत्र प्रत्यक्षं द्विप्रकारं मुख्यममुख्यं च, मुख्यं द्विविधं देशमुख्यं परमार्थमुख्यं, देशमुख्यमवधिज्ञानं मनःपर्ययज्ञानं च, परमार्थमुख्य केवलज्ञानं, सर्वद्रव्यपर्यायपरिच्छेदात्मकं। अमुख्यं प्रत्यक्षेन्द्रियविषयसन्निपातानन्तरसमुद्भूतसविकल्पकमतिप्रत्यक्षभूतं। परोक्षं श्रुतानुमानार्थापत्तितर्कोपमानादिभेदेनानेकप्रकारं, श्रुतं मतिपूर्वकं इन्द्रियमनोविषयादन्यार्थविज्ञानं यथाग्निशब्दात् खपरविज्ञानं। अंगपूर्वं वस्तुप्राभृतकादि सर्वं श्रुतज्ञानं। अनुमानं त्रिरूपं त्रिविधलिंगादुत्पन्नं साध्याविनाभावलिङ्गादुत्पन्नं वा एतच्छ्रुतज्ञानेप्यन्तर्भवति। एकमर्थं जातं दृष्ट्वाविनाभावेनान्यस्यार्थस्य परिच्छित्तिरर्थापत्तिर्यथा शूनपीनांगो देवदत्तो दिवा न भुङ्क्ते अर्थादापन्नं रात्रौ भुंक्ते इति। प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानं यथा गौस्तथा गवय इति। साध्यसाधनसम्बन्धग्राहकस्तर्कः सर्वमेतत्परोक्षं ज्ञानम् ॥ ७० ॥

सम्यक्त्वसहचरं ज्ञानस्वरूपं व्याख्याय चारित्रसहचर-

स्य ज्ञानस्य स्वरूपं प्रतिपादयन्नाह—

जेण रागा विरज्जेज्ज जेण सेएसु रज्जदि ।
जेण मित्तीं पभावेज्ज तं णाणं जिणसासणे ॥ ७१

येन रागात् विरज्यते येन श्रेयसि रज्यते ।
येन मैत्रीं प्रभावयेत् तत् ज्ञानं जिनशासने ॥ ७१ ॥

येन रागात् स्नेहात् कामक्रोधादिरूपाद्विरज्यते पराङ्मुखो भवति जीवः । येन च श्रेयसि रज्यते रक्तो भवति । येन मैत्रीं द्वेषाभावं प्रभावयेत् तज्ज्ञानं जिनशासने । किमुक्तं भवति—अतत्त्वे तत्त्वबुद्धिरदेवे देवताभिप्रायो नागमे आगमबुद्धिरचारित्रे चारित्रबुद्धिरनेकान्ते एकान्तबुद्धिरित्यज्ञानम् ॥ ७१ ॥

ज्ञानाचारस्य कति भेदा इति पृष्टेऽत आह—

काले विणए उवहाणे बहुमाणे तहेव णिण्हवणे ।
वंजण अत्थ तदुभए णाणाचारो दु अट्ठविहो ॥

काले विनये उपधाने बहुमाने तथैवानिह्नवने ।
व्यंजनमर्थस्तदुभयं ज्ञानाचारस्तु अष्टविधः ॥ ७२ ॥

काले—स्वाध्यायवेलायां पठनपरिवर्तनव्याख्यानादिकं क्रियते सम्यक् शास्त्रस्य यत्स कालोऽपि ज्ञानाचार इत्युच्यते, साहचर्यात्कारणे कार्योपचाराद्वा । विणए—कायिकवाचिक-

मानसशुद्धपरिणामैः स्थितस्य तेन वा योऽयं श्रुतस्य पाठो व्याख्यानं परिवर्तनं यत्स विनयाचारः। (उवहाणे-) उपधानं अवग्रहविशेषेण पठनादिकं साहचर्यात् उपधानाचारे (रः)। बहुमानं पूजासत्कारादिकेन पाठादिकं बहुमानाचारः। तथैवानिन्हवनं यस्मात्पठितं श्रुतं स एव प्रकाशनीयः यद्वा पठित्वा श्रुत्वा ज्ञानी सञ्जातस्तदेव श्रुतं ख्यापनीयमिति अनिन्हवाचारः, व्यञ्जनं-वर्णपदवाक्यशुद्धिः, व्याकरणोपदेशेन वा तथा पाठादिर्व्यञ्जनाचारः। अत्थ-अर्थोऽभिधेयोऽनेकान्तात्मकस्तेन सह पाठादि अर्थाचारः। शब्दार्थशुद्धया पाठादि तदुभयाचारः। सर्वत्र साहचर्यात् कार्ये कारणाद्युपचाराद्वाऽभेदः। कालादिशुद्धिभेदेन वा ज्ञानाचारोऽष्टविध एव, अधिकरणभेदेन वाधारस्य भेदः। प्रथमा विभक्तिः सप्तमी वा द्रष्टव्या ॥ ७२ ॥

कालाचारप्रपंचप्रतिपादनार्थमाह—

पादोसियवेरत्तियगोसग्गियकालमेव गेण्हित्ता।
उभये कालह्मि पुणो सज्झाओ होदि कायव्वो७३

प्रादोषिकवैरात्रिकगौसर्गिककालमेव गृहीत्वा।
उभययोः कालयोः पुनः स्वाध्यायः भवति कर्तव्यः ॥

प्रकृष्टा दोषा रात्रिर्यस्मिन् काले स प्रदोषः कालः रात्रेः पूर्वभाग इत्यर्थः। तत्सामीप्यादिनपश्चिमभागोऽपि प्रदोष इ-

स्युच्यते ततः प्रदोषग्रहणेन द्वौ कालौ गृह्येते। प्रदोष एव प्रादोषिकः। विगता रात्रिर्यस्मिन् काले स विरात्री रात्रेः पश्चिमभागः, द्विघटिकासहितार्धरात्रादूर्ध्वकालः, विरात्रिरेव वैरात्रिकः। गवां पशूनां सर्गो निर्गमो यस्मिन् काले स कालो गोसर्गः। गोसर्ग एव गौसर्गिको द्विघाटिकोदयादूर्ध्वकालो द्विघाटिकासहितः मध्याह्नात्पूर्वः। एतत्कालचतुष्टयं गृहीत्वोभयकाले दिवसस्य पूर्वाह्णकालेऽपराह्णकाले च तथा रात्रेः पूर्वकालेऽपरकाले च पुनः अभीक्ष्णं स्वाध्यायो भवति कर्तव्यः पठनपरिवर्तनव्याख्यानादीनि कर्तव्यानि भवन्तीति ॥ ७३ ॥

स्वाध्यायस्य ग्रहणकालं परिसमाप्तिकालं च प्रतिपादयन्नाह—

सज्झाये पट्ठवणे जंघच्छायं वियाण सत्तपयं।
पुव्वण्हे अवरण्हे तावदियं चेव णिट्ठवणे ॥ ७४॥

स्वाध्याये प्रस्थापने जंघच्छायां विजानीहि सप्तपदां पूर्वाह्णे अपराह्णे तावत्कं चैव निष्ठापने ॥ ७४ ॥

स्वाध्यायस्य परमागमव्याख्यानादिकस्य प्रस्थापने प्रारम्भे, जंघयोश्छाया जंघच्छाया तां जंघच्छायां विजानीहि सप्तपदां सप्तवितस्तिमात्रां पूर्वाह्णेऽपराह्णे च तावन्मात्रां स्वाध्यायसमाप्तिकाले च्छायां विजानीहि। सवितुरुदये यदा जंघाच्छाया सप्तवितस्तिमात्रा भवति तदा स्वाध्यायो ग्राह्यः। अपरा-

ह्णे च सवितुरस्तमनकाले यदा जंघाच्छाया सप्तवितस्तिमात्रा तिष्ठति तदा स्वाध्याय उपसंहरणीय इति ॥ ७४ ॥

पूर्वाह्णे स्वाध्यायस्य परिसमाप्तिः कस्यां वेलायां क्रियत इति पृष्टेऽत आह—

आसाढे दुपदा छाया पुस्समासे चदुप्पदा।
वड्ढदे हीयदे चावि मासे मासे दुअंगुला ॥७५

आषाढे द्विपदा छाया पुष्यमासे चतुष्पदा।
वर्धते हीयते चापि मासे मासे द्व्यंगुला॥ ७५ ॥

जंघाच्छाया इत्यनुवर्तते। मिथुनराशौ यदा तिष्ठत्यादित्यः स काल आषाढमास इत्युच्यते। मासस्त्रिंशद्रात्रः समुदाये वर्तमानोऽप्यत्र मासावसाने दिवसे वर्तमानो गृह्यते समुदायेषु हि वृत्ताः शब्दा अवयवेष्वपि वर्तन्त इति न्यायात्। एवं पुष्यमासेऽपि निरूपयितव्यः। आषाढमासे यदा द्विपदा जंघाच्छाया पूर्वाह्णे तदा स्वाध्याय उपसंहर्त्तव्यः। अत्र षडंगुलः पादः परिगृह्यते। तथा पुष्यमासे मध्यान्होदये यदा चतुष्पदा जंघाच्छाया भवति तदा स्वाध्यायो निष्ठापयितव्यः। आषाढमासान्तदिवसादारभ्य मासे मासे द्वे द्वे अङ्गुले तावद्वृद्धिमागच्छते यावत्पुष्यमासे चतुष्पदाच्छाया सञ्जाता। पुनस्तस्मादारभ्य द्वे द्वे अंगुले मासे मासे हानिमुपनेतव्ये यावदाषाढे मासे द्विपदाच्छाया संजाता। ककेटसंक्रान्तेः प्रथम-

दिवसमारभ्य यावद्धनुःसंक्रान्तेरन्त्यदिनं तावद्दिनं प्रति दिन प्रति अगुंलस्य पंचदशभागो वृद्धिं गच्छति ततो हानिम्। अत्र त्रैराशिकक्रमेण हानिवृद्धी साधितव्ये। अपराह्णे स्वाध्यायप्रारम्भकालस्य रात्रौ स्वाध्यायकालस्य च कालपरिमाणं न ज्ञातं तज्ज्ञात्वा वक्तव्यम्। मध्यान्हादुपरिघटिकाद्वये स्वाध्यायो ग्राह्यः, तथा रात्रौ प्रथमघाटिकाद्वये सर्वासु संध्यादावन्ते च घटिकाद्वये वर्जयित्वा स्वाध्यायो ग्राह्यो हातव्यश्चेति ॥ ७५ ॥

दिग्विभागशुद्ध्यर्थमाह—

णवसत्तपंचगाहापरिमाणं दिसिविभागसोधीए।
पुव्वण्हे अवरण्हे पदोसकाले य सज्झाए ॥ ७६ ॥

नवसप्तपंचगाथापरिमाणं दिशाविभागशुद्ध्यै।
पूर्वाह्णे अपराह्णे प्रदोषकाले च स्वाध्याये ॥ ७६ ॥

दिशां विभागो दिग्विभागस्तस्य शुद्धिरुल्कापातादिरहितत्वं दिग्विभागशुद्धेर्निमित्तं कायोत्सर्गमास्थाय प्रतिदिशं पूर्वाह्णकाले स्वाध्यायविषये नव नव गाथापरिमाणं जाप्यं। तत्र यदि दिशादाहादीनि भवन्ति तदा कालशुद्धिर्न भवतीति वाचनाभंगो भवति। एषा कालशुद्धी रात्रिपश्चिमायामस्वाध्याये कर्तव्या। एवमपराह्णे स्वाध्यायनिमित्तं कायोत्सर्गमास्थाय प्रतिदिशं सप्तसप्तगाथापरिमाणं पाठ्यम्। अपरा-

ग्रहस्वाध्याये तथा प्रदोषवाचनानिमित्तं पंच पंचगाथाप्रमाणं प्रतिदिशं घोष्यमिति । सर्वत्र दिशादाहाद्यभावे कालशुद्धिरिति ॥ ७६ ॥

अथ के ते दिग्दाहादय इति पृष्टे तानाह—

दिसदाह उक्कपडणं विज्जु चडुक्कासणिंदधणुगं च
दुग्गंधसज्झदुद्दिणचंदग्गहसूरराहुजुज्झं च ७७

दिग्दाहः उल्कापतनं विद्युत् चडत्काराशनींद्रधनुश्च दुर्गंधसंध्यादुर्दिनचन्द्रग्रहसूरराहुयुद्धं च ॥ ७७ ॥

दिशां दाह उत्पातेन दिशोऽग्निवर्णाः । उल्कायाः पतनं गगनात् तारकाकारेण पुद्गलपिण्डस्य पतनं । विद्युच्चैक्यचिक्यं, चडत्कारः वज्रं मेघसंघट्टोद्भवं । अशनिः करकनिचयः । इन्द्रधनुः धनुषाकारेण पंचवर्णपुद्गलनिचयः । दुर्गन्धः पूतिगन्धः । सन्ध्या लोहितपीतवर्णाकारः । दुर्दिनः पतदुदकाभ्रसंयुक्तो दिवसः । चन्द्रयुद्धं, ग्रहयुद्धं, सूरयुद्धं राहुयुद्धं च । चन्द्रस्य ग्रहेण भेदः संघट्टो वा, ग्रहस्यान्योन्यग्रहेण भेदाः संघट्टादिर्वा, सूर्यस्य ग्रहेण भेदादिः, राहोश्चन्द्रेण सूर्येण वा संयोगो ग्रहणमिति । चशब्देन निर्घातादयो गृह्यन्त इति ॥ ७७ ॥

कलहादिधूमकेदू धरणिकंपं च अब्भगज्जं च ।
इच्चेवमाइबहुया सज्झाए वाजिदा दोसा ॥ ७८ ॥

कलहादिधूम्रकेतुः धरणीकंपश्च अभ्रगर्जं च ।
इत्येवमादिबहुका स्वाध्याये वर्जिता दोषाः ॥ ७८ ॥

कलहः क्रोधाद्याविष्टानां वचनप्रतिवचनैर्जल्पः महोपद्रवरूपः । आदिशब्देन खड्ग-कृपाणि-लकुटादिभिर्युद्धानि परिगृह्यन्ते । धूमकेतुर्गगने धूमाकाररेखाया दर्शनं । धरणीकम्पः पर्वतप्रासादादिसमन्विताया भूमेश्चलनं । चकारेण शोणितादिवर्षस्य ग्रहणं । अभ्रगर्जनं मेघध्वनिः । चकारेण महावाताग्निदाहादयः परिगृह्यन्ते । इत्येवमाद्यन्येऽपि बहवः स्वाध्यायकाले वर्जिताः परिहरणीया दोषाः सर्वलोकानामुपद्रवहेतुत्वात् । एते कालशुद्धयां क्रियमाणायां दोषाः पठनोपाध्यायसंघराष्ट्रराजादिविप्रकारिणो यत्नेन त्याज्या इति ॥७८॥

कालशुद्धिं विधाय द्रव्यक्षेत्रभावशुद्धयर्थमाह—

रुहिरादिपूयमंसं दव्वे खेत्ते सदहत्थपरिमाणं ।
कोधादिसंकिलेसा भावविसोही पढणकाले ७९

रुधिरादि-पूतिमांसं द्रव्ये क्षेत्रे शतहस्तपरिमाणं ।
क्रोधादिसंक्लेशो भावविशुद्धिः पठनकाले ॥ ७९ ॥

रुधिरं रक्तं । आदिशब्देनाशुचिशुक्रास्थित्रणादीनि परिगृह्यन्ते, पूयं—कुथितक्लेदः । मांसं आर्द्रं पंचेन्द्रियावयवः । द्रव्ये आत्मशरीरेऽन्यशरीरे (ण) वैतानि वर्जनीयानि । क्षेत्रे

स्वाध्यायकरणप्रदेशे चतसृषु दिक्षु हस्तशतचतुष्मात्रेण सर्वाणि वर्जनीयानि। यदि शोधयितुं न शक्यन्ते तत्क्षेत्रं द्रव्यं च त्याज्यं तस्मिन् सजीवे सति स्वाध्यायो न कर्तव्यः। प्रवक्तृश्रोत्रादिभिरुष्णोदकादीनि ग्राह्याणि, घृतप्रचुरहेत्वाहारादिर्न ग्राह्यः, जीर्णादयोऽपि न कर्तव्याः। द्रव्यशुद्धिं क्षेत्रशुद्धिं चेच्छुभिः क्रोधादयोऽपि संक्लेशा वर्जनीयाः। क्रोधमानमायालोभासूयेर्ष्यादीनामभावो भावशुद्धिः पठनकाले कर्तव्या अत्यर्थमुपसमादयो भावयितव्याः। कालशुद्ध्यादिभिः शास्त्रं पठितं कर्मक्षयाय भवत्यन्यथा कर्मबन्धायेति ॥ ७९ ॥

कालशुद्ध्यां यद्यत्सूत्रं पठ्यते तत्तत्केनोक्तमत आह—

सुत्तं गणधरकधिदं तहेव पत्तेयबुद्धिकथिदं च ।
सुदकेवलिणा कधिदं अभिण्णदसपुव्वकधिदं च

सूत्रं गणधरकथितं तथैव प्रत्येकबुद्धिकथितं च ।
श्रुतकेवलिना कथितं अभिन्नदशपूर्वकथितं च ८०

सूत्रं अंगपूर्ववस्तुप्राभृतादि गणधरदेवैः कथितं सर्वज्ञमुखकमलादर्थं गृहीत्वा ग्रन्थस्वरूपेण रचितं गौतमादिभिः। तथैवैकं कारणं प्रत्याश्रित्य बुद्धाः प्रत्येकबुद्धाः धर्मश्रवणाद्युपदेशमन्तरेण चारित्रावरणादिक्षयोपशमात्, ग्रहणोल्कापातादिदर्शनात् संसारस्वरूपं विदित्वा गृहीतसंयमाः प्रत्येकबुद्धास्तैः कथितं। श्रुतकेवलिना कथितं रचितं द्वादशांगचतु-

र्दशपूर्वधरैरुपदिष्टं । अभिन्नानि रामादिभिरपरिगतानि दश-पूर्वाणि उत्पात्पूर्वादीनि येषां तेऽभिन्नदशपूर्वास्तैः कथितं प्रतिपादितमभिन्नदशपूर्वकथितं च सूत्रमिति सम्बन्धः ॥८०॥

तत्सूत्रं किम् ?

तं पढिदुमसज्झाये–
णो कप्पदि विरद इत्थिवग्गस्स ।
एत्तो अण्णो गंथो–
कप्पदि पाढिदुं असज्झाए ॥८१॥

तत् पठितुमस्वाध्याये नो कल्प्यते विरते स्त्रीवर्गस्य ।
इतः अन्यः ग्रंथ कल्प्यते पठितुं अस्वाध्याये ॥ ८१॥

तत्सूत्रं पठितुमस्वाध्याये न कल्प्यते न युज्यते विरतवर्ग-स्य संयतसमूहस्य स्त्रीवर्गस्य चार्यिकावर्गस्य च । इतोऽस्मा-दन्यो ग्रन्थः कल्प्यते पठितुमस्वाध्यायेऽन्यत्पुनः सूत्रं काल-शुद्धाद्यभावेऽपि युक्तं पठितुमिति ॥ ८१ ॥

किं तदन्यत्सूत्रमित्यत आह—

आराहणाणिज्जुत्ती मरणविभत्ती यं संगहत्थुदिओ
पच्चक्खाणावासयधम्मकहाओ य एरिसओ ८२

आराधनानिर्युक्तिः मरणविभक्तिश्च संग्रहःस्तुतयः ।
प्रत्याख्यानावश्यकधर्मकथाश्च ईदृशः ॥ ८२ ॥

आराधना सम्यग्दर्शनज्ञानचारित्रतपसामुद्योतनोद्यवननिर्वाहणसाधनादीनि तस्या निर्युक्तिराराधनानिर्युक्तिः । मरणविभक्तिः सप्तदशमरणप्रतिपादकग्रन्थरचना । संग्रहः पंचसंग्रहादयः । स्तुतयः देवागमपरमेष्ठ्यादयः । प्रत्याख्यानं त्रिविधचतुर्विधाहारपरित्यागप्रतिपादनो ग्रन्थः सावद्यद्रव्यक्षेत्रादिपरिहारप्रतिपादनो वा । आवश्यकाः सामायिकचतुर्विंशतिस्तववन्दनादिस्वरूपप्रतिपादको ग्रन्थः । धर्मकथास्त्रिषष्टिशलकापुरुषचरितानि द्वादशानुप्रेक्षादयश्च । ईदृग्भूतोऽन्योऽपि ग्रन्थः पठितुमस्वाध्यायेऽपि च युक्तः ॥ ८२ ॥

कालशुद्ध्यनन्तरं कस्मिन् ग्रन्थे कस्मिंश्चावसरे काः क्रियाः कर्तव्या इति पृष्टेऽत आह—

उद्देस समुद्देसे अणुणापणए अ होंति पंचेव ।
अंगसुदखंधझेणुवदेसा विय पदविभागी य ॥

उद्देशे समुद्देशे अनुज्ञार्पणायां च भवंति पंचैव ।
अंगश्रुतस्कंधप्राभृतप्रदेशा अपि पदविभागी च ॥८३

उद्देशे प्रारम्भकाले, समुद्देशे शास्त्रसमाप्तौ, अनुज्ञार्पणायां गुरोरनुज्ञायां भवन्ति पंचैव । नात्र केचन निर्दिष्टास्तथाप्युपदेशादुपवासाः कायोत्सर्गा वा ग्राह्याः । अथवा अनुज्ञायां एतावत्पंच पञ्चका व्यवहाराः प्रायश्चित्तानि पंचैव भवन्ति ते चोपवासाः कायोत्सर्गा वा । अंगं द्वादशाङ्गानि । श्रुतं

चतुर्दशपूर्वाणि । स्कन्धः वस्तूनि । श्रेणुव–प्राभृतं । देशश्च प्राभृतप्राभृतं । पदविभागादेकैकशः । अंगस्याध्ययनप्रारम्भे समाप्तौ बुद्धिपच्छिष्यानुज्ञायामुपवासाः कायोत्सर्गा वा पंच कर्तव्या भवन्ति । एवं पूर्वाणां, वस्तूनां, प्राभृतानां, प्राभृतप्राभृतानां प्रारम्भे समाप्तौ अनुज्ञायामेकैकशः पंच पंचोपवासाः कायोत्सर्गा वा कर्तव्या भवन्तीति ॥ ८३ ॥

पदविभागतः पृथक्पृथक्कालशुद्धिं व्याख्याय विनयशुद्ध्यर्थमाह—

पलियंकणिसेज्जगदो
पडिलेहिय अंजलीकदपणामो ।
सुत्तत्थजोगजुत्तो
पढिदव्वो आदसत्तीए ॥ ८४ ॥

पर्यंकनिषद्यागतः प्रतिलेख्य अंजलिकृतप्रणामः ।
सूत्रार्थयोगयुक्तः पठितव्यः आत्मशक्त्या ॥ ८४ ॥

पर्यङ्केण निशय्यां गत उपविष्टः पर्यंकनिशय्यागतः पर्यंकेन वीरासनादिभिर्वा सम्यग्विधानेनोपविष्टस्तेन, प्रतिलिख्य चक्षुषा पिच्छिकया शुद्धजलेन च पुस्तकं भूमिहस्तपादादिकं च सम्मार्ज्य । अञ्जलिना कृतः प्रणामो येनासावञ्जलिकृतप्रणामस्तेन करमुकुलाङ्कितचक्षुषा सूत्रार्थसंयोगः

सम्पर्कस्तेन युक्तः समन्वितः सूत्रार्थयोगयुक्तोऽङ्गादिग्रन्थः पठितव्योऽध्येतव्यः । आत्मशक्त्या सूत्रार्थाव्यभिचारेण शुद्धोपयोगेन शक्तिमनवगुह्य यत्नेन जिनोक्तं सूत्रमर्थयुक्तं पठनीयमिति ।

उपधानशुद्ध्यर्थमाह—

आयंविल णिव्वियडी
अण्णं वा होदि जस्स कादव्वं ।
तं तस्स करेमाणो
उपहाणजुदो हवदि एसो ॥८५॥

आचाम्लं निर्विकृतिः अन्यत् वा भवति यस्य कर्तव्यं।
तत् तस्य कुर्वाणः उपधानयुतो भवति एषः ॥ ८५ ॥

आचाम्लं सौवीरौदनादिकं, विकृतेर्निर्गतं निर्विकृतं घृतदध्यादिविरहितौदनः, अन्यद्वापक्वान्नादिकं यस्य शास्त्रस्य कर्तव्यमुपधानं सम्यक्सन्मानं तदुपधानं कुर्वाणस्तस्य शास्त्रस्योपधानयुक्तो भवत्येषः । साधुनावग्रहादिकं कृत्वा शास्त्रं सर्वं श्रोतव्यमिति तात्पर्यं पूजादरश्च कृतो भवति ॥ ८५ ॥

बहुमानस्वरूपं प्रतिपादयन्नाह—

सुत्तत्थं जप्पंतो वायंतो चावि णिज्जराहेदुं ।

आसादणं ण कुज्जा तेण किदं होदि बहुमाणं ॥

सूत्रार्थं जल्पयन् वाचयंश्चापि निर्जराहेतोः ।
आसादनां न कुर्यात् तेन कृतं भवति बहुमानं ॥ ८५ ॥

अङ्गश्रुतादीनां सूत्रार्थं यथास्थितं तथैव जल्पन्नुच्चरन् पाठयन वाचयंश्चापि प्रतिपादयंश्चाप्यन्यस्य निर्जराहेतोः कर्मक्षयनिमित्तं च आचार्यादीनां शास्त्रादीनामन्येषामपि आसादनं परिभवं न कुर्याद्विनयितो न भवेत्तेन शास्त्रादीनां बहुमानं पूजादिकं कृतं भवति । शास्त्रस्य गुरोरन्यस्य वा परिभवो न कर्तव्यः पूजावाचनादिकं च वक्तव्यमिति तात्पर्यार्थः ॥ ८६ ॥

अनिन्हवस्वरूपं प्रतिपादयन्नाह—

कुलवयसीलविहूणे
सुत्तत्थं सम्मगागामित्ताणं ।
कुलवयसीलमहल्ले
णिण्हवदोसो दु जप्पंतो ॥ ८६ ॥

कुलव्रतशीलविहीनाः सूत्रार्थं सम्यगवगम्य ।
कुलव्रतशीलमहतो निह्नवदोषस्तु जल्पंतः ॥८७ ॥

कुलं गुरुसन्ततिः, व्रतानि हिंसादिविरतयः, शीलं व्रतपरिरक्षणाद्यनुष्ठानं तैर्विहीना म्लानाः कुलव्रतशीलविहीनाः ।

मठादिपालनेनाज्ञानादिना वा गुरुः सदोषस्तस्य शिष्यो ज्ञानी तपस्वी च कुलहीन इत्युच्यते। अथवा तीर्थकरगणधरसप्तर्धिसंप्राप्तेभ्योऽन्ये यतयः कुलव्रतशीलविहीनास्तेभ्यः कुलव्रतशीलविहीनेभ्यः सम्यक्शास्त्रमवगम्य ज्ञात्वा कुलव्रतशीलैर्ये महान्तस्तान् यदि कथयति तेभ्यो मया शास्त्रं ज्ञातमित्येवं तस्य जल्पतो निन्हवदोषो भवति। आत्मनो गर्वमुद्वहता शास्त्रनिन्हवो गुरुनिन्हवश्च कृतो भवति। ततश्च महान् कर्मबन्धः। जैनेन्द्रं च शास्त्रं पठित्वा श्रुत्वा पश्चाज्जल्पति न मया तत्पठितं, न तेनाहं ज्ञानीति किन्तु नैयायिक-वैशेषिक-सांख्य-मीमांसा- धर्मकीर्त्यादिभ्यो मम बोधः संजात इति निर्ग्रन्थयतिभ्यः शास्त्रमवगम्यान्यत्प्रतिपादयति ब्राह्मणादीन, कस्माल्लोकपूजाहेतोर्यदा मिथ्यादृष्टिरसौ तदाप्रभृति मन्तव्यः निन्हवदोषेणेति। सामान्ययतिभ्यो ग्रन्थं श्रुत्वा तीर्थकरादीन प्रतिपादयत्येवमपि निन्हवदोष इति॥ ८७॥

व्यञ्जनार्थोभयशुद्धिस्वरूपार्थमाह—

विंजणसुद्धं सुत्तं अत्थविसुद्धं च तदुभयविसुद्धं।
पयदेण य जप्पंतो णाणविसुद्धो हवइ एसो॥

व्यंजनशुद्धं सूत्रं अर्थविशुद्धं च तदुभयविशुद्धं।
प्रयत्नेन च जल्पन् ज्ञानविशुद्धो भवति एषः॥८८॥

व्यञ्जनशुद्धं, अक्षरशुद्धं पदवाक्यशुद्धं च द्रष्टव्यं देशा-

र्षकत्वात्सूत्राणां । अर्थविशुद्धं—अर्थसहितं । तदुभयविशुद्धं च व्यञ्जनार्थसहितं सूत्रमिति सम्बन्धः । प्रयत्नेन च व्याकरणाद्धारेणोपदेशेन वा जल्पन् पठन् प्रतिपादयन् वा ज्ञानविशुद्धो भवत्येषः । सिद्धांतादीनक्षरविशुद्धानर्थशुद्धान् ग्रंथार्थशुद्धांश्च पठन् वाचयन् प्रतिपादयंश्च ज्ञानविशुद्धो भवत्येषः । अक्षरादिव्यत्ययं न करोति यथाव्याकरणं यथोपदेशं पठतीति ॥ ८८ ॥

किमर्थं विनयः क्रियत इत्याह—

विणएण सुदमधीदं
जदिवि पमादेण होदि विस्सरिदं।
तमुवट्ठादि परभवे
केवलणाणं च आवहदि ॥ ८९ ॥

विनयेन श्रुतमधीतं यद्यपि प्रमादेन भवति विस्मृतं।
तदुपतिष्ठते परभवे केवलज्ञानं च आवहति ॥ ८९ ॥

विनयेन श्रुतमधीतं यद्यपि प्रमादेन विस्मृतं भवति तथापि परभवेऽन्यजन्मनि तत्सूत्रमुपतिष्ठते, केवलज्ञानं चावहति प्रापयति तस्मात्कालादिशुद्धया पठितव्यं शास्त्रमिति ॥

ज्ञानाचारप्रबन्धमुपसंहरंश्चारित्राचारप्रबन्धं सूचयन्नाह—

णाणाचारो एसो णाणगुणसमण्णिदो मए वुत्तो।

एत्तो चरणाचारं चरणगुणसमण्णिदं वोच्छं ॥

ज्ञानाचारः एषः ज्ञानगुणसमान्वितो मया उक्तः ।

इतः चरणाचारं चरणगुणसमन्वितं वक्ष्ये ॥ ९० ॥

ज्ञानाचारो ज्ञानगुणसमन्वितो मयोक्तः । इत ऊर्ध्वं चरणाचारं चरणगुणसमन्वितं वक्ष्ये कथयिष्येऽनुवदिष्यामीति। तेनात्रात्मकर्तृत्वं परिहृतमाप्तकर्तृत्वं च ख्यापितं ॥९०॥

तथा प्रतिज्ञानिर्वहन्नाह—

पाणिवहमुसावादअदत्तमेहुणपरिग्गहा विरदी ।
एस चरित्ताचारो पंचविहो होदि णादव्वो ॥

प्राणिवधमृषावादादत्तमैथुनपरिग्रहाणां विरतयः ।

एष चारित्राचारः पंचविधो भवति ज्ञातव्यः ॥९१॥

प्राणिवधमृषावादादत्तमैथुनपरिग्रहाणां विरतयो निवृत्तय एष चारित्राचारः पंचप्रकारो भवति ज्ञातव्यः । येन प्राण्युपघातो जायते तत्सर्वं मनसा वचसा कायेन च परिहर्तव्यं येनानृतं, येन च स्तैन्यं, येन मैथुनेच्छा, येन च परिग्रहेच्छा तत्सर्वं त्याज्यमिति ॥ ९१ ॥

प्रथमव्रतप्रपंचनार्थमाह—

एइंदियादिपाणा पंचविधा वज्जभीरुणा सम्मं ।
ते खलु ण हिंसिदव्वा मणवचिकायेण सव्वत्थ ॥

एकेंद्रियादिप्राणाः पंचविधावद्यभीरुणा सम्यक् ।
ते खलु न हिंसितव्याः मनोवाक्कायैः सर्वत्र ॥ ९२ ॥

एकमिन्द्रियं येषां ते एकेन्द्रियाः, एकेन्द्रिया आदिर्येषां प्राणानां जीवानां त एकेन्द्रियादयः प्राणाः, ते कियन्तः पंचविधाः पंचप्रकारास्ते, खलु स्फुटं अवद्यभीरुणा सम्यग्विधानेन न हिंसितव्याः, मनसा वचसा कायेन च सर्वत्र पीडा न कर्तव्या न कारयितव्या नानुमन्तव्येति । सर्वस्मिन् काले, सर्वस्मिन् देशे सर्वस्मिन्वा भावे चेति ॥ ९२ ॥

द्वितीयव्रतस्वरूपनिरूपणार्थमाह—

हस्सभयकोहलोहा मणिवचिकायेण सव्वकालम्मि ।
मोसं ण य भासिज्जो पच्चयघादी हवदि एसो ॥
हास्यभयक्रोधलोभैः मनोवाक्कायैः सर्वकाले ।
मृषां न च भाषयेत् प्रत्ययघाती भवति एषः ॥ ९३ ॥

हास्यभयलोभक्रोधैर्मनोवाक्कायप्रयोगेण सर्वस्मिन् कालेऽतीतानागतवर्तमानकालेषु मृषावादं—परपीडाकरं वचनं नो वदेत् । यत एष मृषावादः प्रत्ययघाती भवतीति न कस्यापि विश्वासस्थानं जायते । अतो हास्यात्, क्रोधात्, भयाल्लोभाद्वा परपीडाकरं वस्तुयाथात्म्यविपरीतप्रतिपादकं वचनं मनसा न चिन्तयेत्, ताल्वादिव्यापारेण नोच्चारयेत्, कायेन नानुष्ठापयेदिति ॥ ९३ ॥

अस्तेयव्रतस्वरूपनिरूपणायाह—

गामे णगरे रण्णे थूलं सचित्त बहु सपडिवक्खं।
तिविहेण वज्जिदव्वं अदिण्णगहणं च तण्णिच्चं॥

ग्रामे नगरेऽरण्ये स्थूलं साचित्तं बहु सप्रतिपक्षं।
त्रिविधेन वर्जितव्यं अदत्तग्रहणं च तन्नित्यं॥ ९४॥

ग्रामो वृत्त्यावृतः। नगरं चतुर्गोपुरोद्भासि शालं। अरण्यं महाटवीगहनं। उपलक्षणमात्रमेतत्। तेन ग्रामे, नगरे, पत्तने, अरण्ये, पथि, खले, मटवे, खेटे, कर्वटे, संवाहने, द्रोणमुखे, सागरे, द्वीपे, पर्वते, नद्यां वेत्येवमाद्यन्येष्वपि प्रदेशेषु स्थूलं सूक्ष्मं, सचित्तमचित्तं, बहु स्तोकं वा सप्रतिपक्षं द्रव्यं सुवर्णादिकं धनधान्यं वा द्विपदचतुष्पादजातं वा कांस्यवस्त्राभरणादिकं वा पुस्तककपलिकाखरदनपिच्छिकादिकं वा, नष्टं वा विस्मृतं पतितं स्थापितं परसंगृहीतं त्रिविधेन मनोवाक्कायैः कृतकारितानुमतैरदत्तग्रहणं नित्यं तत्सर्वं वर्जितव्यं। अन्यदप्येवमादिधनादिकं विरोधकारणं नेहितव्यं। यतस्तत्सर्वमदत्तं स्तेयस्वरूपमिति॥ ९४॥

चतुर्थव्रतस्वरूपनिरूपणायाह—

अच्चित्तदेवमाणुसतिरिक्खजादं च मेहुणं चदुधा।
तिविहेण तं ण सेवदि णिच्चं पि मुणी हि पयदमणो

अचित्तदेवमानुषातिर्यग्जातं च मैथुनं चतुर्धा ।
त्रिविधेन तत् न सेवते नित्यं अपि मुनिर्हि प्रयतमनाः

अचित्तं; चित्रलेप-पुस्त-भांड-शैल—वंधादिकर्मनिर्वर्तित-स्त्रीरूपाणि, भवनवानव्यन्तरज्योतिष्ककल्पवासदेवस्त्रियः,ब्राह्मणक्षत्रियवैश्यशूद्रस्त्रियश्च, वडवागोमहिष्यादितिरश्च्यश्च, एताभ्यो जातमुत्पन्नं चतुर्धा मैथुनं रागोद्रेकात्कामाभिलाषं त्रिविधेन मनोवचनकायकर्मभिः कृतकारितानुमतैस्तन्न सेवते । नित्यमपि मुनिः प्रयत्नमनाः । हि स्फुटं । स्वाध्यायपरो लोकव्यापाररहितः सर्वाः स्त्रीप्रतिमाः मातृदुहितृभगिनीवत् चिंतेत् । नैकाकी ताभिः सहैकान्ते तिष्ठेत् । न वर्त्मनि गच्छेत् । न च रहसि मंत्रयेत् । नाप्येकाकी सन्नेकस्याः प्रतिक्रमणादिकं कुर्यात् । येन येन जुगुप्सा भवेत् तत्सर्वं त्याज्यमिति ॥ ९५ ॥

पंचमव्रतप्रपंचनार्थमाह—

गामं णगरं रण्णं थूलं सचित्त बहु सपडिवक्खं ।
अज्झत्थ बाहिरत्थं तिविहेण परिग्गहं वज्जे ॥

ग्रामं नगरं अरण्यं स्थूल सचित्तं बहु सप्रातिपक्षं ।
अध्यात्मबहिःस्थं त्रिविधेन परिग्रहं वर्जयेत् ॥ ९६ ॥

ग्रामं, नगरं, अरण्यं, पत्तनं, मटंबादिकं च । स्थूलं-क्षेत्रगृहादिकं । सचित्त दासीदासगोमहिष्यादिकं । बहुमनेकभे-

दभिन्नं । सप्रतिपक्षं सूक्ष्मं चित्रैकरूपं नेत्रचीनकौशेयद्रव्यमणिमुक्ताफलसुवर्णभाण्डादिकं । अध्यात्मं मिथ्यात्व-वेद-राग-हास्य-रत्यरति-शोक-भय-जुगुप्सा-क्रोध-मान-माया-लोभात्मकं बहिःस्थं क्षेत्रवास्त्वादिकं दशप्रकारं । मनोवाक्कायकर्मभिः कृतकारितानुमतैः परिग्रहं श्रामण्यायोग्यं वर्जयेत् । सर्वथा मूर्च्छा त्याज्येति नैःसंग्यमाचरेत् ॥ ९६ ॥

अथ महाव्रतानामन्वर्थव्युत्पत्तिं प्रतिपादयन्नाह—

साहंति जं महत्थं आचरिदाणी य जं महल्लेहिं ।
जं च महल्लाणि तदो महव्वयाइं भवे ताइं ॥

साधयंति यत् महार्थं आचरितानि च यत् महद्भिः ।
यच्च महांति ततः महाव्रतानि भवंति तानि ॥ ९७ ॥

यस्मान्महार्थं मोक्षं साधयन्ति, यस्माच्च महद्भिस्तीर्थकरादिभिराचरितानि सेवितानि, यतश्च स्वत एव महान्ति सर्वसावद्यत्यागात् ततस्तानि महाव्रतानि भवन्ति । न पुनः कपालादिग्रहणेनेति ॥ ९७ ॥

अथ रात्रिभोजननिवृत्त्यादिनिरूपणोत्तरप्रबन्धः किमर्थ इति पृष्टेऽत आह—

तेसिं चेव वदाणं रक्खट्ठं रादिभोयणणियत्ती[1] ।
अट्ठय पवयणमादा य भावणाओ य सव्वाओ ॥

---

१ ' विरती ' इत्यपि पाठः ।

तेषां चैव व्रतानां रक्षार्थं रात्रिभोजननिवृत्तिः ।
अष्टौ च प्रवचनमातरश्च भावनाश्च सर्वाः ॥ ९८ ॥

तेषामेव महाव्रतानां रक्षणार्थं रात्रिभोजननिवृत्तिः । रात्रौ भोजनं तस्य निवृत्ती रात्रिभोजननिवृत्तिः । बुभुक्षितोऽपि भोजनकालेऽतिक्रान्ते नैवाहारं चिन्तयति । नाप्युदकादिकं । अष्टौ प्रवचनमातृकाः पंच समितयस्त्रिगुप्तयः । भावनाश्च सर्वाः पंचविंशतयः महाव्रतानां पालनाय वक्ष्यन्त इति ॥ ९८ ॥

यते रात्रौ भोजनक्रियायां प्रविशतो दोषानाह—

तेसिं पंचण्हंपि यन्हयाणमावज्जणं च संका वा ।
आदविवत्ती अ हवे रादीभत्तप्पसंगेण ॥

तेषां पंचानामपि चान्हवानामावर्जनं च शंका वा ।
आत्मविपत्तिश्च भवेत् रात्रिभक्तप्रसंगेन ॥ ९९ ॥

तेषां पंचानामप्यन्हवानां व्रतानामासमन्ताच्चावर्जनं अंगम्लानता, आशङ्का वा लोकस्य किमितिकृत्वायं प्रव्रजितो रात्रौ प्रविष्टो दुरात्मेकः स्यात् । गृहस्थानामात्मविपत्तिश्च भवेत् । स्थाणुपशुचौरसारमेयनगररक्षकादिभ्यो रात्रिभक्तप्रसंगेन रात्रावाहारार्थं पर्यटतस्तस्माद्रात्रिभोजनं त्याज्यमिति ॥ ९९ ॥

पंचविधमाचारं व्याख्याय समित्यादिद्वारेणाष्टविधं व्याख्यातुकामः प्राह—

पणिधाणजोगजुत्तो पंचसु समिदीसु तीसु गुत्तीसु
एस चरित्ताचारो अट्ठविहो होइ णायव्वो ॥
प्रणिधानयोगयुक्तः पंचसु समितिषु त्रिषु गुप्तिषु ।
एष चरित्राचारः अष्टविधो भवति ज्ञातव्यः ॥ १००

प्रणिधानं परिणामस्तेन योगः सम्पर्कः प्रणिधानयोगः । युक्तो न्याय्यः शोभनमनोवाक्कायप्रवृत्तयः। पंचसमितिषु त्रिषु गुप्तिषु । एष चारित्राचारोऽष्टविधो भवति ज्ञातव्यः । महाव्रतभेदेन पंचप्रकारः आचारः । अथवा समितिगुप्तिविषयपरिणामभेदेनाष्टप्रकारो न्याय्य आचार इति ॥ १०० ॥

अथ युक्त इति विशेषणं किमर्थमुपात्तमित्याशंकायामाह—

पणिधाणंपि य दुविहं पसत्थ तह अप्पसत्थं च ।
समिदीसु य गुत्तीसु य पसत्थ सेसमप्पसत्थं तु१०१
प्रणिधानमपि च द्विविधं प्रशस्तं तथा अप्रशस्तं च।
समितिषु च गुप्तिषु च प्रशस्तं शेषमप्रशस्तं तु॥१०१॥

प्रणिधानमपि द्विप्रकारं । प्रशस्तं शुभं । तथाऽप्रशस्तमशुभमिति । समितिषु गुप्तिषु प्रशस्तं प्रणिधानं । तथाशेषमप्रशस्तमेव । सम्यगयनं जीवपरिहारेण मार्गोद्योते धर्मानुष्ठानाय गमनं प्रयत्नपरस्य यतेर्यत् सा समितिः । अशुभमनोवाक्कायानां गोपनं स्वाध्यायध्यानपरस्य मनोवाक्कायसंवृति-

र्गुप्तिः। एतासु यत्प्रणिधानं स युक्तोऽष्टप्रकारश्चारित्राचार इति। शेषं पुनर्यदप्रशस्तं प्रणिधानं तद्विविधमिन्द्रियनोइंद्रियभेदेन॥

इन्द्रियप्रणिधानस्वरूपप्रतिपादनार्थमाह—

सद्दरसरूवगंधे फासे य मणोहरे य इदरे य।
जं रागदोसगमणं पंचविहं होइ पणिधाणं १०२

शब्दरसरूपगंधे स्पर्शे च मनोहरे च इतरे च।
यत् रागद्वेषगमनं पंचविधं भवति प्रणिधानं॥१०२॥

शब्दरसरूपगन्धस्पर्शेषु मनोहरेषु, शोभनेषु, इतरेष्वशोभनेषु, यद्रागद्वेषयोर्गमनं प्रापणं तत्पंचप्रकारमिन्द्रियप्रणिधानं भवति। स्त्रीपुरुषादिप्रवृत्तेषु षड्जर्षभ-गान्धार-मध्यम-पंचम-धैवत-निषादभेदभिन्नेषु आरोह्यवरोहिस्थायिसंचारिचतुर्वर्णयुक्तेषु षडंलकारद्विविधकाकुभिन्नेषु मूर्च्छनास्थानादिप्रयुक्तेषु सुस्वरेषु यद्रागप्रापणं, तथा कोकिलमयूरभ्रमरादिशब्देषु वीणारावणहस्तवंशादिशब्देषु यद्रागकरणं, तथोष्ट्रखर-करभादिप्रयुक्तेषु दुःस्वरेषु उरःकण्ठशिरस्त्रिस्थानभेदभिन्नेष्वनिष्टेषु यद् द्वेषकरणं। तथा तिक्तकटुकषायाम्लमधुरभेदभिन्नेषु सुप्रयुक्तेषु मनोहरेष्वमनोहरेषु तीव्रतीव्रतरतीव्रतम मन्दमन्दतरमन्दतमेषु गुडखंडदधिघृतपयःपानादिगतेषु निंबकांजीरविषखलयवसकुष्ठादिगतेषु च रसेषु यद्रागद्वेषयोः करणं। तथा स्त्रीपुरुषादिगतेषु गौरश्यामादिवर्णेषु रूपेषु

हावभावहेलांगजभावप्रयुक्तेषु लीलाविलासविच्छित्तिविभ्रम-किलिकिंचित–मोट्टायितकुट्टिमितविव्वोकललितविहृतैर्दशभिः स्वाभाविकैर्भावैर्युक्तेषु शोभाकान्तिमाधुर्यधैर्यप्रागल्भ्यौदार्यैरयत्नजैः प्रयोजितेषु द्वात्रिंशत्करणयुक्तेषु कटाक्षनिरीक्षणपरेषु नृत्तगीतहास्यादिमनोहरेषु रूपेषु तद्विपरीतेष्वमनोहरेषु रागद्वेषप्रयुक्तेषु (क्तं)। द्विविधगन्धेषु शोभनाशोभनभेदभिन्नेषु आर्द्रमहिषीयक्षकर्दमकस्तूरीकर्पूरकालागुरुचन्दनकुंकुम जातिमल्लिकापाटलादिविभिन्नेषु तथा विभीतकाशुचिस्वेदव्रणादिप्रभवेष्वनिष्टेषु यद्रागद्वेषयोः करणं । तथाष्टप्रकारेषु स्पर्शेषु मृदुकर्कशशीतोष्णस्निग्धरूक्षगुरुलघुभेदभिन्नेषु स्त्रीवस्त्रसूलीकादिप्रभवेषु तथा भूमिशिलातृणशर्करादिप्रभवेषु यद्रागद्वेषकरणं तत्सर्वमिन्द्रियप्रणिधानमस्तीति ॥ १०२ ॥

इन्द्रियप्रणिधानमुक्तमीषदिन्द्रियप्रणिधानं किंस्वरूपमिति पृष्टेऽत आह—

णोइंदियपणिधाणं कोहे माणं तहेव मायाए ।
लोहे य णोकसाए मणपणिधाणं तु तं वज्जे १०३

नोइन्द्रियप्रणिधानं क्रोधे माने तथैव मायायां ।
लोभे च नोकषाये मनःप्रणिधानं तु तत् वर्जयेत्

क्रोधे माने मायायां तथैव लोभे चैकस्मिंश्चतुर्विधे एतद्विषये यदेतन्मनःप्रणिधयनं मनोव्यापारस्तन्नोइन्द्रियप्रणिधानं ।

तदेतदिन्द्रियप्रणिधानं नोइन्द्रियप्राणिधानं चाप्रशस्तमयुक्तं वर्जयेत् वर्जयितव्यमिति ॥ १०३ ॥

समितिगुप्तिविषयः प्रणिधानयोगोऽष्टविध आचारोक्त इति प्रतिपादितं ततः काः समितयो गुप्तयश्चेत्याशंक्याह—

णिक्खेवणं च गहणं इरियाभासेसणा य समिदीओ
पदिठावणियं च तहा उच्चारादीणि पंचविहा १०४

निक्षेपणं च ग्रहणं ईर्याभाषैषणाश्च समितयः।
प्रतिष्ठापनं च तथा उच्चारादीनां पंचविधा ॥ १०४ ॥

निक्षेपणं निक्षेपः पुस्तिकाकुण्डिकादिव्यवस्थापनं। तेषामेव ग्रहणमादानं समीक्ष्य, सैषादाननिक्षेपणसमितिः। धर्मार्थिनो यत्नपरस्य गमनमीर्यासमितिः। सावद्यरहितभाषणं भाषासमितिः। कृतकारितानुमतरहिताहारादानमशनसमितिः। समितिशब्दः प्रत्येकमभिसम्बध्यते। उच्चारादीनां मूत्रपुरीषादीनां प्रासुकप्रदेशे प्रतिष्ठापनं त्यागः प्रतिष्ठापनासमितिः। इत्येवं पंचविधा समितिरिति ॥ १०४ ॥

तत्र तावदीर्यासमितिस्वरूपप्रपंचार्थमाह—

मग्गुज्जोवुपओगालंबणसुद्धीहिं इरियदो मुणिणो
सुत्ताणुवीचि भणिया इरियासमिदी पवयणम्मि ॥

मार्गोद्योतोपयोगालंबनशुद्धिभिः ईर्यतो मुनेः।
सूत्रानुवीच्या भणिता ईर्यासमितिः प्रवचने ॥१०५

मग्ग—मार्गः पन्थाः। उज्जोव—उद्योतश्चक्षुरादित्यादिप्रकाशः। उवओग—उपयोगो ज्ञानदर्शनविषयो यत्नः। आलंबण—देवतानिर्ग्रन्थयतिधर्मादिकारणं। एतेषां शुद्धयस्ताभिर्मार्गोद्योतोपयोगालम्बनशुद्धिभिर्यतो गच्छतो मुनेः सूत्रानुवीच्या प्रायश्चित्तादिसूत्रानुसारेण प्रवचने ईर्यासमितिर्भणिता गणधरदेवादिभिर्भणितेति शेषः ॥ १०५ ॥

तावद्गमनं विचार्यत उत्तरगाथयेति—

इरियावहपडिवण्णेणवलोगंतेण होदि गंतव्वं।
पुरदो जुगप्पमाणं सयापमत्तेण संतेण ॥ १०६ ॥

ईर्यापथप्रतिपन्नेनावलोकयता भवति गंतव्यं।
पुरतः युगप्रमाणं सदा अप्रमत्तेन सता ॥ १०६ ॥

कैलाशोर्जयन्तचम्पापावादितीर्थयात्रासन्यासदेवधर्मादिकारणेन शास्त्रश्रवणादिकेन वा समतिक्रमणश्रवणादिप्रयोजनेन वोदिते सवितरि प्रकाशप्रकाशिताशेषदिगन्ते विशुद्धदृष्टिसंचारे विशुद्धसंस्तरप्रदेशे ईर्यापथमार्गं प्रतिपन्नेन समीहमानेन कृतस्वाध्यायप्रतिक्रमणदेववन्दनेन पुरतोऽग्रतो युगमात्रं हस्तचतुष्टयप्रमाणमवलोकयता सम्यक्पश्यता स्थूलास्थूलजीवानप्रमत्तेन यत्नपरेण श्रुतशास्त्रार्थं स्मरता परिशुद्धमनो-

वाक्कायक्रियेण स्वाध्यायध्यानोपयुक्तेन सता सदा भवति गन्तव्यमिति ॥ १०६ ॥

पुनरपि श्लोकत्रयेण मार्गशुद्धिस्वरूपप्रतिपादनायाह—

सयडं जाण जुग्गं वा रहो वा एवमादिया ।
बहुसो जेण गच्छंति सो मग्गो फासुओ भवे १०७

शकटं यानं युग्यं वा रथो वा एवमादिकाः ।
बहुशो येन गच्छंति स मार्गः प्रासुकः भवेत् ॥१०७॥

शकटं बलीवर्दादियुक्तं काष्ठमयं यंत्रं । यानं मत्तवारणयुक्तं पल्यङ्कजातं, हस्त्यश्वमनुष्यादिभिरूह्यमानं युग्यं पीठिकादिरूपं मनुष्यद्वयेनोह्यमानं । रथो विशिष्टचक्रादियुक्तो मुद्गरभुषुंढितोमरादिप्रहरणपूर्णो जात्यश्वादिभिरूह्यमानः इत्येवमादयोऽन्येऽपि बहुशोऽनेकवारं येन मार्गेण गच्छन्ति स मार्गः प्रासुको भवेदिति ॥ १०७ ॥

के ते एवमादिका इत्यत आह—

हत्थी अस्सो खरोढो वा गोमहिसगवेलया ।
बहुसो जेण गच्छंति सो मग्गो फासुओ भवे १०८

हस्ती अश्वः खर उष्ट्रो वा गोमहिषगवेलकाः ।
बहुशः येन गच्छंति स मार्गः प्रासुको भवेत् १०८ ॥

हस्तिनोऽश्वा गर्दभा उष्ट्रा गावो महिष्यः गवेलिका अजा

अविकादयो बहुशो येन मार्गेण गच्छन्ति स मार्गः प्रासुको भवेत् ॥ १०८ ॥

इत्थी पुंसा व गच्छंति आदवेण य जं हदं ।
सत्थपरिणदो चेव सो मग्गो फासुओ हवे ॥१०९

स्त्रियः पुरुषा वा गच्छंति आतापेन च यो हतः ।
शस्त्रपरिणतश्चैव स मार्गः प्रासुकः भवेत् ॥ १०९ ॥

स्त्रियः पुरुषाश्च येन वा गच्छन्ति । आतापेनादित्यदावानलतापेन यो हतः । शस्त्रपरिणतः कृषीकृतः स मार्गः प्रासुको भवेत् । तेन मार्गेण यत्नवता स्वकार्येणोद्योतेन गन्तव्यमिति ॥ १०९ ॥

भाषासमितिस्वरूपं प्रतिपादयन्नाह—

सच्चं असच्चमोसं अलियादीदोसवज्जमणवज्जं ।
वदमाणस्सणुवीची भासासमिदी हवे सुद्धा ११०

सत्यं असत्यमृषा अलीकादिदोषवर्ज्यमनवद्यं ।
वदतः अनुवीच्या भाषासमितिः भवेत् शुद्धा ११०

सच्चं—सत्यं स्वद्रव्यक्षेत्रकालभावापेक्षयास्ति, परद्रव्यक्षेत्रकालभावापेक्षया नास्ति, उभयापेक्षयास्ति च नास्ति च, अनुभयापेक्षावक्तव्यमित्येवमादि वदतोऽवितथं वचनं । तथा प्रमाणनयनिक्षेपैर्वदतः सत्यं वचनं । असच्चमोसं—असत्य-

मृषा यत्सत्यं न भवति, अनृतं च न भवति सामान्यवचनं । अलीको मृषावाद आदिर्येषां दोषाणां ते व्यलीकादिदोषास्तैर्वर्जितं व्यलीकादिदोषवर्जितं परपतारणादिदोषरहितं । अणवज्जं—अनवद्यं हिंसादिपापागमनवचनरहितं । इत्येवं सूत्रानुवीच्या प्रवचनानुसारेण वाचनापृच्छनानुप्रेक्षादिद्वारेणान्येनापि धर्मकार्येण वदतो भाषासमितिर्भवेच्छुद्धेति ॥ ११० ॥

सत्यस्वरूपं विवृण्वन्नाह—

जणवदसम्मदठवणा णामे रूवे पडुच्चसच्चे य ।
संभावणववहारे भावे ओपम्मसच्चे य ॥ १११ ॥

जनपदसम्मतस्थापनायां नाम्नि रूपे प्रतीत्यसत्ये च
संभावनाव्यवहारे भावे औपम्यसत्ये च ॥ १११ ॥

सत्यशब्दः प्रत्येकमभिसंबध्यते । जनपदसत्यं, बहुजनसम्मतसत्यं, स्थापनासत्यं, नामसत्यं, रूपसत्यं, प्रतीतिसत्यमन्यापेक्षसत्यमित्यर्थः, संभावनासत्यं, व्यवहारसत्यं, भावसत्यं उपमानसत्यं, इति दशधा सत्यं वाच्यमिति सम्बन्धः ॥ १११ ॥

एतानि दशसत्यानि विवृण्वन्नाह—

जणपदसच्चं जध ओदणादि य वुच्चदि यसव्वभासेण
बहुजणसम्मदमवि होदि जं तु लोए जहा देवी ११२

जनपदसत्यं यथा ओदनादिरुच्यते च सर्वभाषया ।

बहुजनसम्मतमपि भवति यत्तु लोके यथा देवी ११२

जनपदसत्यं देशसत्यं। यथौदनादिरुच्यते सर्वभाषाभिः द्रविडभाषया चौर इत्युच्यते। कर्णाटभाषया कूल इत्युच्यते। गौडभाषया भक्तमित्युच्यते। एवं नानादेशभाषाभिरुच्यमान ओदनो जनपदसत्यमिति जानीहि। बहुभिर्जनैर्यत्सम्मतं तदपि सत्यमिति भवति। यथा महादेवी, मानुष्यपि लोके महादेवीति। यथा देवो वर्षतीत्यादिकं वचनं लोकसम्मतं सत्यमिति वाच्यं। न प्रतिबन्धः कार्यः एवं न भवतीति कृत्वा। प्रतिबन्धे सत्यमसत्यं स्यादिति॥ ११२॥

ठवणा ठविदं जह देवदादि णामं च देवदत्तादि।
उक्कडदरोत्ति वण्णे रूवे सेओ जध बलाया ११३॥

स्थापना स्थापितं यथा देवतादि नाम च देवदत्तादि।
उत्कटतर इति वर्णेन रूपे श्वेता यथा बलाका॥११३॥

यद्यपि देवतादिप्रतिरूपं स्थापनया स्थापितं। तथा च देवदत्तादिनाम। न हि तत्र देवतादिस्वरूपं विद्यते। नापि तं (?) देवैर्दत्तोऽसौ। तथापि व्यवहारनयापेक्षया स्थापनासत्यं, नामसत्यं च सत्यमित्युच्यते सद्भिरिति। अर्हत्प्रतिमासिद्धप्रतिमादि तथा नागयक्षेन्द्रादिप्रतिमाश्च तत्सर्वं स्थापनासत्यं। तथा देवदत्त इन्द्रदत्तो यज्ञदत्तो विष्णुमित्र इत्येवमादिवचनं नामसत्यमिति। तथा वर्णेनोत्कटतरेति श्वेता बला-

का । यद्यपि तत्रान्यानि रक्तादीनि सम्भवन्ति रूपाणि, तथापि श्वेतेन वर्णेनोत्कृष्टतरा बलाका, अन्येषामविवक्षितत्वादिति रूपसत्यं द्रव्यार्थिकनयापेक्षया वाच्यमिति ॥११३॥

अण्णं अपेक्खसिद्धं पडुच्चसच्चं जहा हवदि दिग्घं।
ववहारेण य सच्चं रज्झदि कूरो जहा लोए ११४

अन्यदपेक्ष्यसिद्धं प्रतीत्यसत्यं यथा भवति दीर्घं ।
व्यवहारेण च सत्यं रध्यते क्रूरो यथा लोके ॥ ११४ ॥

अन्यद्वस्तुजातमपेक्ष्य किंचिदुच्यमानं प्रतीत्यसत्यं भवति । यथादीर्घोऽयमित्युच्यते । वितस्तिमात्राद्धस्तमात्रं दीर्घं तथा द्विहस्तमात्रात्पंचहस्तमात्रं । पंचहस्तमात्राद्दशहस्तमात्रं । एवं यावन्मेरुमात्रं । तथैवं (व) ह्रस्ववृत्तचतुरस्रादि, कुरूप-सुरूप-पंडित मूर्ख-पूर्वापरादिकमपेक्ष्यसिद्धं निष्पन्नमपेक्ष्यसत्यमित्युच्यते । न तत्र विवादः कार्यः । तथा, रध्यदे पच्यते क्रूर ओदनः मण्डकाः घृतपूराः इत्यादि लोके वचनं व्यवहारसत्यमिति वाच्यं । न तत्र विवादः कार्यः । यद्योदनः पच्यते भस्म भवति, मण्डका यदि पच्यन्ते भस्मीभवन्तीति कृत्वेति व्यवहारसत्यं वचनं सत्यमिति ॥ ११४ ॥

संभावणा य सच्चं जदि णामेच्छेज्ज एव कुज्जंति ।
जदि सक्को इच्छेज्जो जंबूदीवं हि पल्लत्थे ॥११५

संभावना च सत्यं यदि नाम इच्छेत् एवं कुर्यात् ।

यदि शक्रः इच्छेत् जंबूद्वीपं हि परिवर्तयेत् ॥११५॥

यदि नामैतदेवमिच्छेत्, एवं कुर्यात् यदेतत्संभावना सत्यं । संभाव्यत इति संभावना । सा द्विविधाभिनीतानभिनीतभेदेन । शक्रयानुष्ठानाभिनीता । अस्ति सामर्थ्यं यदुत नाम तथा न सम्पादयेदभिनीता । यथा यदि नाम शक्र इच्छेज्जम्बूद्वीपं परिवर्तयेत् । संभाव्यत एतत्सामर्थ्यमिन्द्रस्य यज्जम्बूद्वीपमन्यथा कुर्यात् । अपि शिरसा पर्वतं भिन्द्यात् । सर्वमेतदनभिनीता संभावना सत्यं । अपि भवान् प्रस्थं भक्षयेत् । बाहुभ्यां गंगां तरेदेतदभिनीतं सम्भावनासत्यमिति सम्पाद्यासम्पाद्यभेदेनेति ॥ ११५ ॥

हिंसादिदोसविजुदं सच्चमकप्पियवि भावदो भावं
ओवम्मेण दु सच्चं जाणसु पलिदोवमादीया ११६
हिंसादिदोषवियुतं सत्यमकल्पितमपि भावतो भावं ।
औपम्येन तु सत्यं जानीहि पल्योपमादिकं ॥११६॥

हिंसा आदिर्येषां दोषाणां ते हिंसादयस्तैर्वियुक्तं विरहितं हिंसादिदोषवियुक्तं । हिंसास्तैन्याब्रह्मपरिग्रहादिग्राहकवचनरहितं सत्यं । अकल्पितमपि भावतोऽयोग्यमपि भावयतः परमार्थतः सत्यं तत् । केनचित् पृष्टस्त्वया चौरो दृष्टो न मया दृष्ट एवं वक्तव्यं । यद्यपि वचनमेतदेवासत्यं तथापि परमार्थतः सत्यं हिंसादिदोषरहितत्वात् । यथा येन येन

परपीडोत्पद्यते परलोकं प्रतीहलोकं च प्रति, तत्तद्वचनं सत्यमपि त्याज्यं रागद्वेषसहितत्वात् । सत्यमपि हिंसादिदोषसहितं न वाच्यमिति भावसत्यं । औपम्येन च युक्तं यद्वचनं तदपि सत्यं जानीहि । यथा पल्योपमादिवचनं । उपमामात्रमेतत् । न हि कुशलो योजनमात्रः केनापि रोमच्छेदैः पूर्यते । एवं सागरो रज्जुः प्रतरांगुलं सूच्यंगुलं घनांगुलं श्रेणी लोकप्रतरो लोकश्चन्द्रमुखी कन्या इत्येवमादयः शब्दाः उपमानवचनानि उपमासत्यानीति वाच्यानि । न तत्र विवादः कार्यः । इत्येतदशप्रकारं सत्यं वाच्यं ।

तथा सन्धिनामतद्धितसमासाख्यातकृदौणादियुक्तं, पक्षहेतुदृष्टान्तोपनयनिगमनसहितं, छलजातिनिग्रहस्थानादिविवर्जितं, लोकसमयस्ववचनविरोधरहितं, प्रमाणोपपन्नं, नैगमादिनयपरिगृहीतं, जातियुक्तियुक्तं, मैत्रीप्रमोदकारुण्यमाध्यस्थवचनसहितं, अनिष्ठुरमकर्कशमनुद्धतमर्थवत्, श्रवणकान्तं, सुललिताक्षरपदवाक्यविरचितं, हेयोपादेयसंयुक्तं—इत्थंभूतं सत्यं वाच्यं । लिंगसंख्याकालकारकपुरुषोपग्रहसमेतं धातुनिपातबलाबलच्छन्दोऽलंकारादिसमन्वितं, वाच्यमिति सम्बन्धः ॥ ११६ ॥

एतद्व्यतिरिक्तमसत्यमिति प्रतिपादयन्नाह—

तव्विवरीदं मोसं तं उभयं जत्थ सच्चमोसं तं ।
तव्विवरीदा भासा असच्चमोसा हवदि दिट्ठा ११७

तद्विपरीतं मृषा तदुभयं यत्र सत्यमृषा तत् ।
तद्विपरीता भाषा असत्यमृषा भवति दृष्टा ॥११७॥

तदशपकारसत्यविपरीतं पूर्वोक्तस्य सर्वस्य प्रतिकूलमसत्यं मृषा । तयोः सत्यासत्ययोरुभयं यत्र पदे वाक्ये वा सत्यमृषावचनं तत् गुणदोषसहितत्वात् । तस्मात्सत्यमृषावादाद्विपरीता भाषा वचनोक्तिरसत्यमृषोक्तिः । सा भवति दृष्टा जिनैः । न सा सत्या न मृषेति सम्बन्धः ॥ ११७ ॥

असत्यमृषाभाषा विवृणवन्नाह—

आमंतणि आणवणी
जायणिसंपुच्छणी य पण्णवणी ।
पच्चक्खाणी भासा
छट्ठी इच्छाणुलोमा य ॥ ११८ ॥

आमंत्रणी आज्ञापनी याचनी संपृच्छनी च प्रज्ञापनी प्रत्याख्यानी भाषा षष्ठी इच्छानुलोमा च ॥ ११८॥

आमन्त्र्यतेऽनयामंत्रणी । गृहीतवाच्यवाचकसंबन्धो व्यापारान्तरं प्रत्यभिमुखी क्रियते यया सामंत्रणी भाषा । यथा हे देवदत्त इत्यादि । आज्ञाप्यतेऽनयेत्याज्ञापना । आज्ञां तवाहं दादामीत्येवमादि वचनमाज्ञापनी भाषा । याच्यतेऽनया याचना । यथा याचयाम्यहं त्वां किंचिदिति । पृच्छ्यते

नयेति पृच्छना । यथा पृच्छाम्यहं त्वामित्यादि । प्रज्ञाप्यतेऽनयेति प्रज्ञापना । यथाप्रज्ञापना (य) म्यहं त्वामित्यादि । प्रत्याख्यायतेऽनयेति प्रत्याख्याना यथा प्रत्याख्यानं मम दीयतामित्यादि भाषासमितिः सर्वत्र संबन्धः । इच्छया लोमानुकूलेच्छालोमा सर्वत्रानुकूला । यथा एवं करोमीत्यादि ११८

संसयवयणी य तहा असच्चमोसा य अट्ठमी भासा
णवमी अणक्खरगया असच्चमोसा हवदि दिट्ठा

संशयवचनी च तथा असत्यमृषा च अष्टमी भाषा ।
नवमी अनक्षरगता असत्यमृषा भवति दृष्टा ॥ ११९

संशयमभ्यक्तं वक्तीति संशयवचनी । संशयार्थप्रख्यापनानभिव्यक्तार्था यस्माद्वचनात्संदेहरूपादर्थो न प्रतीयते तद्वचनं संशयवचनी भाषेत्युच्यते । यथा दन्तरहितातिबालातिवृद्धावचनं, महिष्यादीनां च शब्दः । तथैवासत्यमृषा साष्टमी भाषा । नवमी पुनरनक्षरगता । यस्यां नाक्षराण्यभिव्यक्तानि ककारचकारमकारादीनामनभिव्यक्तिर्यत्र सा नवमी भाषानक्षरगता । सा च द्वीन्द्रियादीनां भवत्येव । नासत्यमृषा भाषा नव प्रकारा भवति । विशेषाप्रतिपत्तेरसत्या सामान्यस्य प्रतिपत्तेर्न मृषा । आमंत्रणरूपेणाभिमुखीकरणेन मृषा पश्चादन्यस्यार्थस्याप्रतिपत्तेरसत्या । तथाज्ञादानेन न मृषा पश्चात्किंदास्यतीति न ज्ञायते तेन न सत्या । तथा याच्चामात्रेण न

मृषा, उत्तरकालं किं याचयिष्यतीति न ज्ञायते ततो न सत्या। तथा प्रश्नमात्रेण न मृषा पश्चान्न ज्ञायते किं पृच्छ्यतेऽनेनेति न सत्या। तथा प्रत्याख्यानसामान्यरूपस्य याचनायाः प्रतीतेर्न मृषा पश्चात्तस्य प्रत्याख्यानं दास्यतीति न ज्ञायते तेन न सत्या। तथेच्छाया एवं करोमीति भणनेन न मृषा किंचित् पश्चात्किं करिष्यतीति न ज्ञायते तेन न सत्या। तथाक्षराणि संदिग्धानि प्रतीयन्ते तेन न मृषा, अर्थः सन्दिग्धो न प्रतीयते तेन न सत्या। तथा शब्दमात्रं प्रतीयते तेन न मृषा, अक्षराणामर्थस्य चाप्रतीतेर्न सत्येति। अनेन न्यायेन नवप्रकारा असत्यमृषाभाषा व्याख्यातेति॥ ११९॥

पुनरपि यद्वचनं सत्यमुच्यते तदर्थमाह—

सावज्जजोग्गवयणं वज्जंतोऽवज्जभीरु गुणकंखी।
सावज्जवज्जवयणं णिच्चं भासेज्ज भासंतो॥१२०॥

सावद्ययोग्यवचनं वर्जयन् अवद्यभीरुः गुणकांक्षी।
सावद्यवर्ज्यवचनं नित्यं भाषयेत् भाषयन्॥ १२०॥

यदि मौनं कर्तुं न शक्नोति तत एवं भाषेत—सावद्यं सपापमयोग्यं यकारभकारादियुक्तं वचनं वर्जयेत्। अवद्यभीरुः पापभीरुः। गुणाकांक्षी हिंसादिदोषवर्जनपरः। सावद्यवर्जं वचनं नित्यं सर्वकालं भाषयन् भाषेत। अन्वयव्यतिरेकेण वचनमेतत्। नैतस्य पौनरुक्त्यं द्रव्यार्थिकपर्यायार्थिकशि-

ष्यानुग्रहपरादिति ॥ २० ॥

अशनसमितिस्वरूपं प्रतिपादयन्नाह—

उग्गम उप्पादणएसणेहिं पिंडं च उवधि सेज्जं च।
सोधंतस्स य मुणिणो परिसुज्झइ एसणासमिदी

उद्गमोत्पादनैषणैः पिंडं च उपधिं शय्यां च।
शोधयतश्च मुनेः परिशुद्ध्यति एषणासमितिः १२१

उद्गच्छत्युत्पद्यत आहारो यैर्दोषैस्त उद्गमदोषाः। उत्पाद्यते निष्पाद्यत आहारो यैस्त उत्पादनादोषाः। अश्यते भुज्यते आहारो वसत्यादयो वा यैस्तेऽशनदोषास्तैः। पिण्ड आहारः। उपधिः पुस्तकपिच्छकादिः। शय्या वसत्यादीन् शोधयतः सुष्ठु सावद्यपरिहारेण निरूपयतो, मुनेः परिशुद्ध्यतेऽशनसमितिः। अशनस्य सम्यग्विधानेन दोषपरिहारेणेति वा चरणमशनसमितिः। उद्गमोत्पादनाशनदोषैः पिण्डं उपधिं शय्यां शोधयतो मुनेः परिशुद्ध्यतेऽशनसमितिरिति। एत उद्गमादयो दोषाः सप्रपंचेन पिण्डशुद्धौ वक्ष्यन्त इति नेह प्रतन्यन्ते, पुनरुक्तदोषभयात्।

कथमेतान् दोषान्परिहरति मुनिरित्याशंकायामाह चकारः(र)सूचितार्थं। सवितुरुदये देववन्दनां कृत्वा घटिकाद्वयेऽतिक्रान्ते श्रुतभक्तिगुरुभक्तिपूर्वकं स्वाध्यायं गृहीत्वा

१ पिंडमुवधिं च इत्यपि पाठः।

वाचनापृच्छनानुप्रेक्षापरिवर्तनादिकं सिद्धान्तादेर्विधाय घटिकाद्वयमप्राप्तमध्यान्हादरात् स्वाध्यायं श्रुतभक्तिपूर्वकमुपसंहृत्यावसथो दूरतो मूत्रपूरीषादीन् कृत्वा पूर्वापरकायविभागमवलोक्य हस्तपादादिप्रक्षालनं विधाय कुण्डिकां पिच्छिकां गृहीत्वा मध्यान्हदेववन्दनां कृत्वा पूर्णोदरबालकान् भिक्षाहारान् काकादिबलीनन्यानपि लिंगिनो भिक्षावेलायां ज्ञात्वा प्रशान्ते धूममुशलादिशब्दे गोचरं प्रविशेन्मुनिः। तत्र गच्छन्नातिद्रुतं, न मन्दं, न विलम्बितं गच्छेत्। ईश्वरदरिद्रादिकुलानि न विवेचयेत्। न वर्त्मनि जल्पेत्तिष्ठेत्। हास्यादिकान् विवर्जयेत्। नीचकुलेषु न प्रविशेत्। सूतकादिदोषदूषितेषु शुद्धेष्वपि कुलेषु न प्रविशेत्। द्वारपालादिभिर्निषिद्धो न प्रविशेत्। यावन्तं प्रदेशमन्ये भिक्षाहाराः प्रविशन्ति तावन्तं प्रदेशं प्रविशेत्। विरोधनिमित्तानि स्थानानि वर्जयेत्। दुष्टखरोष्ट्रमहिषगोहस्तिव्यालादीन् दूरतः परिवर्जयेत्। मत्तोन्मत्तमदाबलिप्तान् सुष्ठु वर्जयेत्। स्नानविलेपनमण्डनरतिक्रीडाप्रशक्ता योषितो नावलोकयेत्। विनयपूर्वकं विधृतस्तिष्ठेत्। सम्यग्विधानेन दीयमानमाहारं प्रासुकं सिद्धभक्तिं कृत्वा प्रतीच्छेत्। स(श)तनपतनगलनमकुर्वन् निश्छिद्रं पाणिपात्रं नाभिप्रदेशे कृत्वा शुरशुरशब्दादिवर्जितं भुञ्जीत। योषितां स्तनजघनोरुनाभिकटिनयनललाटमुखदन्तौष्ठबाहुकक्षान्तरजंघापादलीलागतिविलासगीतनृत्तहासस्निग्धदृष्टिकटाक्षनिरीक्षणादीन्नावलोकयेत्। एवं भुक्त्वा पूर्णोदरोऽन्त-

रात्रादपूर्णोदरो वा मुखहस्तपादान् प्रक्षाल्य शुद्धोदकपूर्णां कुण्डिकां गृहीत्वा निर्गच्छेत् । धर्मकार्यमन्तरेण न गृहान्तरं प्रविशेत् । एवं जिनालयादिप्रदेशं सम्प्राप्य प्रत्याख्यानं गृहीत्वा प्रतिक्रामेदिति ॥ १२१ ॥

आदाननिक्षेपणासमितिस्वरूपं प्रतिपादयन्नाह—

आदाणे णिक्खेवे पडिलेहिय चक्खुणा पमज्जेज्जो
दव्वं च दव्वठाणं संजमलद्धीय सो भिक्खू १२२

आदाने निक्षेपे प्रतिलेख्य चक्षुषा प्रमार्जयेत् ।
द्रव्यं च द्रव्यस्थानं संयमलब्ध्या स भिक्षुः ॥ १२२

आदाने ग्रहणे । निक्षेपे त्यागे । प्रतिलेख्य सुष्ठुनिरीक्षयित्वा चक्षुषा पश्चात्पिच्छिकया सम्मार्जयेत् प्रतिलेखयेत् । द्रव्यं द्रव्यस्थानं च । कवलिका कुण्डिकादि द्रव्यं, यत्र तद्द्रव्यवस्थितं तत्स्थानं । संयमलब्ध्या स भिक्षुर्यतिः । श्रामण्ययोग्यवस्तुनो ग्रहणकाले निक्षेपकाले वा चक्षुषा द्रव्यं द्रव्यस्थानं च प्रतिलेख्य पिच्छिकया सम्मार्जयेदिति १२२

येन प्रकारेणादाननिक्षेपसमितिः शुद्धा भवति तमाह—

सहसाणाभोइयदुप्पमज्जिद अप्पच्चुवेक्खणा दोसा
परिहरमाणस्स हवे समिदी आदाणणिक्खेवा ॥

सहसानाभोगितदुष्प्रमार्जिताप्रत्युपेक्षणान् दोषान् ।

परिहरतः भवेत् समितिः आदानानिक्षेपा ॥ १२३ ॥

सहसा शीघ्रं व्यापारान्तरं प्रत्युद्यतमनसा निक्षेपमादानं वा। अनाभोगितमनालोकनं स्वस्थचित्तवृत्त्याग्रहणमादानं वा अनालोक्य द्रव्यं द्रव्यस्थानं यत्क्रियते तदानाभोगितं दुष्टप्रमार्जितं दुष्प्रमार्जितं पिच्छिकयावष्टभ्य प्रतिलेखनं। अप्रत्युपेक्षणं किंचित् संस्थाप्य पुनः कालान्तरेणालोकनं। एतान् दोषान् परिहरतो भवेदादाननिक्षेपसमितिरिति। किमुक्तं भवति, स्वस्थवृत्त्या द्रव्यं द्रव्यस्थानं च चक्षुषावलोक्य मृदुप्रतिलेखनेन सम्माज्यादानं ग्रहणं वा कर्तव्यं। स्थापितस्य पुस्तकादेः पुनः कतिपयदिवसैरालोकनं कर्तव्यमिति १२३

उच्चारप्रस्रवणसमितिस्वरूपनिरूपणायाह—

वणदाहकिसिमासिकदे थंडिल्लेणुप्परोधविच्छिण्णे
अवगदजंतुविविच्चे उच्चारादी विसज्जेज्जो १२४

वनदाहकृषिमाषिकृते स्थंडिलेनुपरोधे विस्तीर्णे।
अपगतजंतौ विविक्ते उच्चारादीन् विसर्जयेत् ॥ १२४

वनदाहो दावानलः। कृषिः शीरेणाऽनेकवारभूमेर्विदारणं। मषी श्मशानांगारानलादिप्रदेशः। कृतशब्दः प्रत्येकमभिसम्बध्यते। वनदाहीकृते, कृषीकृते, मषीकृते, स्थंडिलीकृते, ऊषरीकृते। अनुपरोधे लोकोपरोधवर्जिते। विस्तीर्णे विशाले। अपगता अविद्यमाना जन्तवो द्वीन्द्रियादयो यत्र

सोऽपगतजन्तुस्तस्मिन्नपगतजन्तौ । विविक्तेऽशुच्याद्यपस्कररहिते जनरहिते वा उच्चारादीन् विसर्जयेत् परित्यज्येत् । अचित्तभूमिदेश इत्यनेन सह सम्बन्धः कर्तव्य इति १२४

अथ के ते उच्चारादय इत्याशंकायामाह—

उच्चारं पस्सवणं खेलं सिंघाणयादियं दव्वं ।
अचित्तभूमिदेसे पडिलेहित्ता विसज्जेज्जो १२५

उच्चारं प्रश्रवणं खेलं सिंघाणकादिकं द्रव्यं ।
आचित्तभूमिदेशे प्रतिलेख्य विसर्जयेत् ॥ १२५ ॥

उच्चार अशुचिः । प्रस्रवणं मूत्रं । खेलं श्लेष्माणं । सिंघाणकं नासिकापस्करं । आदिशब्देन केशोत्पाटबालान् मदप्रमादवातपित्तादिदोषान् सप्तमधातुं छर्द्यादिकं च पूर्वोक्तविशेषणविशिष्ट अचित्तभूमिदेशे हरिततृणादिरहिते प्रतिलेखयित्वा सुष्ठु निरूप्य विसर्जयेत् । पूर्वं सामान्यव्याख्यातमिदं तु सप्रपंचमिति कृत्वा न पौनरुक्त्यमिति ॥ १२५ ॥

अथ रात्रौ कथमिति चेदित्यत्र आह—

रादो दु पमज्जित्ता पण्णसमणपेक्खिदम्मि ओगासे
आसंकविसुद्धीए अपहत्थगफासणं कुज्जा १२६

रात्रौ तु प्रमार्जयित्वा प्रज्ञाश्रमणप्रेक्षिते अवकाशे ।
आशंकाविशुद्धये अपहस्तकस्पर्शनं कुर्यात् ॥ १२६ ॥

रात्रौ तु प्रज्ञाश्रवणेन वैयावृत्यादिकुशलेन साधुना विनयपरेण सर्वसंघप्रतिपालकेन वैराग्यपरेण जितेन्द्रियेण प्रेक्षिते सुष्ठुदृष्टेऽवकाशैकप्रदेशे पुनरपि सचक्षुषा प्रतिलेखनेन प्रमार्जयित्वोच्चारादीन् विसृजेत् । अथ यदि तत्र सूक्ष्मजीवाद्याशंका भवेत्तत आशंकाविशुद्धये आशंकाविशुद्ध्यर्थं अपहस्तकस्पर्शनं कुर्यात्-विपरीतकरतलेन मृदुना स्पर्शनं कर्तव्यमिति ॥

तेन प्रज्ञाश्रवणेन सति सवितरि चक्षुर्विषये च सति त्रीणि स्थानानि दृष्टव्यानि भवन्ति, किमर्थमित्याह—

जदि तं हवे असुद्धं
बिदियं तदियं अणुण्णए साहू ।
लहुए अणिच्छयारे
ण देज्ज साधम्मिए गुरुए ॥ १२७ ॥

यदि तत् भवेत् अशुद्धं
द्वितीयं तृतीयं अनुमन्येत साधुः ।
लघु अनिच्छाकारे
न देयं सधर्मिणि गुरु अयः ॥१२७॥

यदि तत्प्रथमस्थानं प्रेक्षितमशुद्धं भवेद् द्वितीयं स्थानमनुजानात्यनुमन्येत । तदपि यद्यशुद्धं तृतीयं स्थानमनुजानाति जानीत (ते) गच्छेद्वा साधुः संयतः । अथ कदाचित्तस्य

साधोर्व्याधितस्यान्यस्य वा लघुशीघ्रमशुद्धेऽपि प्रदेशे मलच्युतिरनिच्छया विनाभिप्रयेण भवेत् ततस्तस्मिन् सधर्मिणि धार्मिके साधौ अइ (ए) अयः प्रायश्चित्तं तद्गुरु न दातव्यं । अयः पुण्यं, अयनिमित्तत्वात् प्रयश्चित्तमप्ययमित्युच्यते । यत्नपरस्य न बहु प्रायश्चित्तं भवति यतः । अथवा लहुए—लघु शीघ्रं । अणिच्छयारे अनिच्छया कुर्वति मलच्युतिं सधर्मिणि महत्प्रायश्चित्तं न दातव्यं । यद्यपि प्रायश्चित्तं नात्रोपात्तं तथापि सामर्थ्यादुलभ्यतेऽन्यस्याश्रुतत्वात् । अथवा लघुकेन कुशलेनेच्छाकारेणानुकूलेन प्रज्ञाश्रवणेन यदि प्रथमस्थानं शुद्धं द्वितीयं तृतीयस्थानं वानुज्ञाप्य सम्बोध्य सधर्मिणि साधौ गुरौ वा प्रासुकं स्थानं दातव्यमिति॥ १२७ ॥

अनेन क्रमेण किंकृतं भवतीति चेदत आह—

पदिठवणासमिदीवि य
तेणेव कमेण वण्णिदा होदि ।
वोसरणिज्जं दव्वं
तु थंडिले वोसरंतस्स ॥ १२८

प्रतिष्ठापनासमितिरपि च तेनैव क्रमेण वर्णिता भवति व्युत्सर्जनीयं द्रव्यं तु स्थंडिले व्युत्सृजतः ॥१२८॥

तेनैवोक्तक्रमेण प्रतिष्ठापनासमितिरपि वर्णिता व्याख्याता भवति । तेनोक्तक्रमेण व्युत्सर्जनीयं त्यजनीयं । स्थंडिले

व्यावर्णितस्वरूपे व्यत्सृजतः परित्यजतः प्रतिष्ठापनासमितिः स्यादिति ॥ १२८ ॥

एताभिः समितिभिः सह विहरन् किंविशिष्टः स्यादित्याह—

एदाहिं सया जुत्तो समिदीहिं महिं विहरमाणो दु ।
हिंसादीहिं ण लिप्पइ जीवणिकाआउले साहू १२९

एताभिः सदा युक्तः समितिभिः मह्यां विहरमाणस्तु ।
हिंसादिभिर्न लिप्यते जीवनिकायाकुलायां साधुः

एताभिः समितिभिः सया—सदा सर्वकालं युक्तो महयां सर्वत्र विहरमाणः साधुर्हिंसादिभिर्न लिप्यते जीवनिकायाकुले लोके इति ॥ १२९ ॥

ननु जीवसमूहमध्ये कथं साधुर्हिंसादिभिर्न लिप्यते ? चेदित्थं न लिप्यते इति दृष्टान्तमाह—

पउमिणिपत्तं व जहा
उदएण ण लिप्पदि सिणेहगुणजुत्तं ।
तह समिदीहिं ण लिप्पदि
साहू काएसु इरियंतो॥ १३०॥

पद्मिनीपत्रं वा यथा उदकेन

न लिप्यते स्नेहगुणयुक्तं ।
तथा समितिभिः न लिप्यते
साधुः कायेषु ईर्यन् ॥ १३० ॥

पद्मिनीपत्रं जले वृद्धिगतमपि यथोदकेन न लिप्यते, स्नेहगुणयुक्तं यतः तथा समितिभिः सह विहरन साधुः पापेन न लिप्यते कायेषु जीवेषु तेषां वा मध्ये विहरन्नपि यत्नपरो यतः इति ॥ १३० ॥

पुनरपि दृष्टान्तेन पोषयन्नाह—

सरवासेहिं पडंते-
हिं जह दिढकवचो ण भिज्जदि सरेहिं ।
तह समिदीहिं ण लिप्पइ
साहू काएसु इरियंतो ॥ १३१ ॥

शरवर्षैः पतद्भिः यथा दृढकवचो न भिद्यते शरैः ।
तथा समितिभिः न लिप्यते साधुः कायेषु ईर्यन् ॥

शरवर्षैः पतद्भिः संग्रामे यथा दृढकवचो दृढवर्म न भिद्यते शरैस्तीक्ष्णनाराचतोमरादिभिस्तथा षड्जीवनिकायेषु समितिभिर्हेतुभूताभिः साधुः पापेन न लिप्यते पर्यटन्नपीति ॥ १३१ ॥

यत्नपरस्य गुणमाह—

जत्थेव चरदि बालो परिहारण्हू वि चरदि तत्थेव ।
वज्झदि पुण सो बालो परिहारण्हू विमुच्चदि सो ॥

यत्रैव चरति बालः परिहरमाणोपि चरति तत्रैव ।
बध्यते पुनः स बालः परिहरमाणो विमुच्यते सः ॥

यत्रैव चरति भ्रमत्याचरतीति वा बालोऽज्ञानी [त] जीवादिभेदातत्त्वज्ञः । परिहरमाणोऽपि चरन्यनुष्ठानं करोति भ्रमतीति वा तत्रैव लोके बध्यते कर्मणा लिप्यते पुनरसौ बाल अज्ञानः । परिहरमाणो यत्नपरः पुनः स विमुच्यते कर्मणा यस्मादेवंगुणा समितयः ॥ १३२ ॥

तम्हा चेट्ठिदुकामो जइया तइया भवाहि तं समिदो
समिदो हु अण्ण णादियदि खवेदि पोराणयं कम्मं

तस्मात् चेष्टितुकामो यदा तदा भव त्वं समितः ।
समितः खलु अन्यत् नाददाति क्षपयति पुराणं कर्म ॥

तस्माच्चेष्टितुकामः पर्यटितुमना यदा तदा यत्र तत्र यथा तथा भव त्वं समितः समितिपरिणतः । हि यस्मात् समितोऽन्यन्नवं कर्म नाददाति न गृह्णाति । पुराणकं सत्कर्म च क्षपयति निर्जरयतीति ॥ १३३ ॥

एवं समितिस्वरूपं व्याख्याय गुप्तीनां सामान्यविशेषभूतं च लक्षणमाह—

मणवचकायपउत्ती भिक्खू सावज्जकज्जसंजुत्ता
खिप्पं णिवारयंतो तीहिं दु गुत्तो हवदि एसो १३४

मनोवाक्कायप्रवृत्तिं भिक्षुः सावद्यकार्यसंयुक्तां ।
क्षिप्रं निवारयन् त्रिभिस्तु गुप्तो भवति एषः ॥ १३४॥

प्रवृत्तिशब्दः प्रत्येकमभिसम्बध्यते । मनःप्रवृत्तिं वाक्प्रवृत्तिं कायप्रवृत्तिं च । किंविशिष्टां, सावद्यकार्यसंयुक्तां हिंसादिपापविषयां । भिक्षुः साधुः शीघ्रं निवारयंस्त्रिगुप्तो भवत्येषः । गुप्तेः सामान्यलक्षणमेतत् ॥ १३४ ॥

विशेषलक्षणमाह—

जा रागादिणियत्ती मणस्स जाणाहि तं मणोगुत्ती
अलियादिणियत्ती वा मोणं वा होदि वचिगुत्ती ॥

या रागादिनिवृत्तिः मनसः जानीहि तां मनोगुप्तिं ।
अलीकादिनिवृत्तिः वा मौनं वा भवति वचोगुप्तिः १३५

रागद्वेषादिभ्यो मनसो या निवृत्तिश्चेतसा तेषां परिहारस्तां जानीहि मनोगुप्तिं मनःसंवृत्तिं । अलीकादिभ्यश्चासत्याभिप्रायेभ्यश्च वचसो या निवृत्तिः मौनं ध्यानाध्ययनचिंतनं च यत्तूष्णींभावेनासौ वा वाग्गुप्तिर्भवति ॥ १३५ ॥

कायगुप्त्यर्थमाह—

कायकिरियाणियत्ती काउस्सग्गो सरीरगे गुत्ती
हिंसादिणियत्ती वा सरीरगुत्ती हवदि एसा १२६

कायक्रियानिवृत्तिः कायोत्सर्गः शरीरके गुप्तिः।
हिंसादिनिवृत्तिर्वा शरीरगुप्तिर्भवति एषा ॥ १२६ ॥

कायक्रियानिवृत्तिः शरीरचेष्टाया अप्रवृत्तिः शरीरगुप्तिः कायोत्सर्गो वा कायगुप्तिः। हिंसादिभ्यो निवृत्तिर्वा शरीरगुप्तिर्भवत्येषा। सम्यग्दर्शनज्ञानचारित्राणि गुप्यन्ते रक्ष्यन्ते यकाभिस्ता गुप्तयः। अथवा मिथ्यात्वासंयमकषायेभ्यो गोप्यते रक्ष्यते आत्मा यकाभिस्ता गुप्तय इति ॥ १२६ ॥

दृष्टान्तद्वारेण तासां माहात्म्यमाह—

खेत्तस्स वई णयर—
स्स खाइया अहव होइ पायारो।
तह पावस्स णिरोहो
ताओ गुत्तीउ साहुस्स ॥ १२७ ॥

क्षेत्रस्य वृतिः नगरस्य खातिका अथवा भवति प्राकारः
तथा पापस्य निरोधः ताः गुप्तयः साधोः ॥ १२७ ॥

यथा क्षेत्रस्य शस्यस्य वृतिः रक्षा नगरस्य वा खातिकाथवा प्राकारो यथा गुप्तिस्तथा पापस्याशुभकर्मणो निरोधः संवृतिस्ता गुप्तयः साधोः संयतस्येति ॥ १२७ ॥

यस्मादेवंगुणा गुप्तयः—

तम्हा तिविहेण तुमं णिच्चं मणवयणकायजोगेहिं।
होहिसु समाहिदमई णिरंतरं झाण सज्झाए १३८
तस्मात् त्रिविधेन त्वं नित्यं मनोवचनकाययोगैः।
भव समाहितमतिः निरंतरं ध्याने स्वाध्याये ॥१३८॥

तस्मात्त्रिविधेन कृतकारितानुमतैस्त्वं साधो ! मनोवाक्काययोगैर्भव सुसमाहितमतिः सम्यक्स्थापितबुद्धिः। निरन्तरमभीक्ष्णं ध्याने स्वाध्याये चेति ॥ १३८ ॥

समितिगुप्तिस्वरूपं संक्षेपयन्नाह—

एताओ अट्ठपवयणमादाओ णाणदंसणचरित्तं।
रक्खंति सदा मुणिणो मादा पुत्तं व पयदाओ ॥
एता अष्टप्रवचनमातरः ज्ञानदर्शनचारित्रं।
रक्षंति सदा मुनेः माता पुत्रमिव पूयताः ॥ ३९ ॥

एता अष्टप्रवचनमातृकाः पंचसमितयस्त्रिगुप्तयः प्रवचनमातरो मुनेर्ज्ञानदर्शनचारित्राणि रक्षन्ति पालयन्ति। कथं ? यथा माता जननी पुत्रं पालयति तथेताः पालयन्तीति सम्बन्धः अत्रोकारस्य ह्रस्वत्वं प्राकृतबलाद् द्रष्टव्यं ॥ १३९ ॥

अष्टप्रवचनमातृकाः प्रतिपाद्य भावनास्वरूपं प्रतिपादयन्नाह—

एसणणिक्खेवादाणिरियासमिदी तहा मणोगुत्ती
आलोयभोयणंपि य अहिंसाए भावणा पंच ४०

एषणानिक्षेपादानेर्यासमितयः तथा मनोगुप्तिः ।
आलोक्यभोजनमपि च अहिंसाया भावनाः पंच ॥१४०

अशनसमितिर्निक्षेपादानसमितिरीर्यासमितिस्तथा मनोगुप्तिरालोक्यभोजनमपि चाहिंसाव्रतस्येता भावनाः पंच । एता भावयन् जीवदयां प्रतिपालयति । प्रथममहाव्रतं परिपूर्णं तिष्ठति । तस्य साधनत्वेन पंच भावना जानीहीति ॥ ४० ॥

द्वितीयस्य निरूपयन्नाह—

कोहभयलोहहासपइण्णा अणुवीचिभासणं चेव ।
बिदियस्स भावणाओ वदस्स पंचेव ता होंति ॥

क्रोधभयलोभहास्यप्रतिज्ञाः अनुवीचिभाषणं चैव ।
द्वितीयस्य भवनाः व्रतस्य पंचैव ता भवंति ॥

क्रोधभयलोभहास्यानां प्रतिज्ञा प्रत्याख्यानं । क्रोधस्य प्रत्याख्यानं भयस्य प्रत्याख्यानं लोभस्य प्रत्याख्यानं हास्यस्य प्रत्याख्यानं । अनुवीचिभाषणं चैव सूत्रानुसारेण भाषणं च द्वितीयस्य सत्यव्रतस्य भावनाः पंचैव भवन्ति । पंचैता भावना भावयतः सत्यव्रतं सम्पूर्णं स्यादिति ॥ १४१ ॥

तृतीयव्रतस्य भावनास्वरूपं विवृण्वन्नाह—

जायणसमणुण्णमणा-
अणण्णभावोवि चत्तपडिसेवी ।
साधम्मिओवकरण-
स्सणुवीचीसेवणं चावि ॥ १४२ ॥

याञ्चा समनुज्ञापना अनन्यभावोपि त्यक्तप्रतिसेवी
साधर्मिकोपकरणस्यानुवीचिसेवनं चापि ॥ १४२ ॥

याञ्चा प्रार्थना समनुज्ञापना यस्य सम्बन्धि किंचिद्वस्तु समनुमन्य ग्रहणं गृहीतस्य वा सम्बोधनं । अनन्यभावोऽदुष्टभावोऽनात्मभावः परवस्तुनः परिगृहीतस्यात्मभावो न कर्तव्यः । त्यक्तं श्रामण्ययोग्यं, अन्ये चार्थिनो न तस्य, सावद्यरहितं त्यक्तमित्युच्यते । अथवा वियत्त आचार्य इत्युच्यते । प्रतिसेवयतीति प्रतिसेवी । स प्रत्येकमभिसम्बध्यते । यांचया प्रतिसेवी समनुज्ञापनया प्रतिसेवी अनात्मभावप्रतिसेवी, निरवद्यस्य श्रावण्ययोग्यस्य त्यक्तस्याचार्यस्य वा प्रतिसेवी । समानो धर्मोऽनुष्ठानं यस्य सधर्मा तस्य यदुपकरणं पुस्तकपिच्छकादि तस्यानुवीच्यागमानुसारेण सेवनं सधर्मोपकरणस्य सूत्रानुकूलतया सेवनं चापि । एताः पंच भावनास्तृतीयव्रतस्य भवन्तीति । एताभिरस्तेयाख्यं व्रतं सम्पूर्णं भवतीति ॥ १४२ ॥

चतुर्थव्रतस्य भावनास्वरूपं विकल्पयन्नाह—

महिलालोयण पुव्वरदिसरणसंसत्तवसाधिविकहाहिं
पणिदरसेहिं य विरदी य भावणा पंच बह्मह्मि ॥

महिलालोकनं पूर्वरतस्मरणं संसक्तवसतिविकथाभ्यः
प्रणीतरसेभ्यश्च विरतिश्च भवनाः पंच ब्रह्माणि ॥

महिलानां योषितामवलोकनं दुष्टपरिणामेन निरीक्षणं महिलालोकनं । पूर्वस्य [स्या] रतेः गृहस्थावस्थायां चेष्टितस्य स्मरणं चिन्तनं पूर्वरतिस्मरणं । संसक्तवसतिः सद्रव्या सरागा वा । विकथा दुष्टकथाः । पणिदरस—प्रणीतरसा इष्टाहारसमदकराः । विरतिशब्दः प्रत्येकमभिसम्बध्यते । महिलालोकनाद्विरतिः पूर्वरतिस्मरणाद्विरतिः संसक्तवसतेर्विरतिः विकथाभ्यः स्त्रीचौरराज्यभक्तकथाभ्यो विरतिः समाहितरसेभ्यो विरतिः । एताः पंच भावनाः चतुर्थस्य ब्रह्मव्रतस्य भावना भवन्ति । एताभिश्चतुर्थव्रह्मव्रतं सम्पूर्णं तिष्ठतीति ॥

पंचमव्रतभावना विकल्पयन्नाह—

अपरिग्गहस्स मुणिणो सद्दप्फरिसरसरूवगंधेसु ।
रागद्दोसादीणं परिहारो भावणा पंच ॥

अपरिग्रहस्य मुनेः शब्दस्पर्शरसरूपगंधेषु ।
रागद्वेषादीनां परिहारः भावनाः पंच ॥ १४४ ॥

अपरिग्रहस्य मुनेः शब्दस्पर्शरसरूपगन्धेषु रागद्वेषादीनां

परिहारः भावनाः पंच भवन्ति । शब्दादिविषये रागद्वेषादीनामकरणानि यानि तैः सम्पूर्णं पंचमं महाव्रतं स्यादिति ॥

किमर्थमेता भावना भावयितव्या यस्मात्—

ण करेदि भावणाभाविदो हु पीलं वदाण सव्वेसिं ।
साधू पासुत्तो स मणागवि किं दाणि वेदंतो ॥

न करोति भावनाभावितो हि पीडां व्रतानां सर्वेषां ।
साधुः प्रसुप्तः स मनागपि किमिदानीं वेदयन् १४५

हु यस्मात् पंचविंशतिभावनाभावितः साधुः प्रसुप्तोऽपि निद्रांगतोऽपि समुदहोऽपि[1] मूर्छांगतोऽपि सर्वेषां व्रतानां मनागपि पीडां विराधनां न करोति किं पुनश्चेतयमानः । स्वप्नेऽपि ता एव भावनाः पश्यति, न व्रतविराधनाः पश्यतीति ॥१४५॥

एदाहि भावणाहिं दु तम्हा भावेहि अप्पमत्तो त्तं ।
अच्छिद्दाणि अखंडाणि ते भविस्संति हु वदाणि

एताभिः भवनाभिस्तु तस्मात् भावय अप्रमत्तस्त्वं ।
आच्छिद्राणि अखंडानि ते भविष्यंति खलु व्रतानि ॥

तस्मादेताभिर्भावनाभिः भावयात्मानमप्रमत्तः स त्वं । ततोऽच्छिद्राण्यखण्डानि सम्पूर्णानि भविष्यन्ति हि स्फुटं ते तव व्रतानीति ॥ १४६ ॥

---

१ 'समुदहो इत्यपि पाठः ।

चारित्राचारमुपसंहरंस्तप आचारं च सूचयन्नाह—

एसो चरणाचारो पंचविधो वण्णिदो समासेण ।
एत्तो य तवाचारं समासदो वण्णयिस्सामि ॥१४७॥

एष चरणाचारः पंचविधो वर्णितः समासेन ।
इतश्च तप आचारं समासतो वर्णयिष्यामि ॥१४७॥

एष चरणाचारः पंचविधोऽष्टविधश्च वर्णितो मया समासेन ।
इत ऊर्ध्वं तप आचारं समासतो वर्णयिष्यामीति ॥ १४७ ॥

दुविहा य तवाचारो बाहिर अब्भंतरो मुणेयव्वो
एक्कको विय छद्धा जधाकमं तं परूवेमो ॥१४८॥

द्विविधश्च तप आचारः बाह्य आभ्यंतरो ज्ञातव्यः ।
एकैकोपि च षोढा यथाक्रमं तं प्ररूपयामि ॥ १४८॥

द्विप्रकारस्तप आचारस्तपोऽनुष्ठानं । बाह्यो बाह्यजनप्रकटः । अभ्यन्तरोऽभ्यन्तरजनप्रकटः । एकैकोऽपि च बाह्याभ्यन्तरश्चैकैकः षोढा षड्प्रकारः । यथाक्रमं क्रममनुल्लंघ्य प्ररूपयायामि कथयिष्यामीति ॥ १४८ ॥

बाह्यं षड्भेदं नामोद्देशेन निरूपयन्नाह—

अणसण अवमोदरियं
रसपरिचाओ य वुत्तिपरिसखा ।

कायस्स वि परितावो
विवित्तसयणासणं छट्ठं ॥ १४९ ॥

अनशनं अवमौदर्यं रसपरित्यागश्च वृत्तिपरिसंख्या ।
कायस्य च परितापो विविक्तशयनासनं षष्ठं ॥ १४९ ॥

अनशनं चतुर्विधाहारपरित्यागः । अवमौदर्यमल्पभोजनं । रसानां परित्यागो रसपरित्यागः स्वाभिलषितस्निग्धमधुराम्ल-कटुकादिरसपरिहारः । वृत्तेः परिसंख्या वृत्तिपरिसंख्या गृह-दायकभाजनौदनकालादीनां परिसंख्यानपूर्वको ग्रहः । काय-स्य शरीरस्य परितापः कर्मक्षयाय बुद्धिपूर्वकं शोषणं आता-पनाभ्रावकाशवृक्षमूलादिभिः । विविक्तशयनासनं स्त्रीपशुष-ण्ढकविवर्जितं स्थानसेवनं षष्ठमिति ॥ १४९ ॥

अनशनस्य भेदं स्वरूपं च प्रतिपादयन्नाह--

इत्तिरियं जावजीवं
दुविहं पुण अणसणं मुणेयव्वं ।
इत्तिरियं साकंखं
णिरावकंखं हवे बिदियं ॥ १५० ॥

इत्तिरियं यावज्जीवं द्विविधं पुनः अनशनं ज्ञातव्यं ।
इत्तिरियं साकांक्षं निराकांक्षं भवेत् द्वितीयं ॥ १५० ॥

अनशनं पुनरित्तिरिययावज्जीवभेदाभ्यां द्विविधं ज्ञातव्यं इत्तिरियं साकांक्षं कालादिभिः सापेक्षं एतावन्तं कालमहमशनादिकं नानुतिष्ठामीति । निराकांक्षं भवेद् द्वितीयं यावज्जीवं आ मरणान्तादपि न सेवनम् ॥ १५० ॥

साकांक्षानशनस्य स्वरूपं निरूपयन्नाह—

छट्ठट्ठमदसमदुवा-
दसेहिं मासद्धमासखमणाणि ।
कणगेगावलिआदी
तवोविहाणाणि णाहारे ॥ १५१ ॥

षष्ठाष्टदशमद्वादशैः मासार्धमासक्षमणानि ।
कनकैकावल्यादीनि तपोविधानानि अनाहारे १५१

अहोरात्रस्य मध्ये द्वे भक्तवेले तत्रैकस्यां भक्तवेलायां भोजनमेकस्याः परित्याग एकभक्तः । चतसृणां भक्तवेलानां परित्यागे चतुर्थः । षण्णां भक्तवेलानां परित्यागे षष्ठो द्विदिनपरित्यागः । अष्टानां परित्यागेऽष्टमस्त्रय उपवासाः । दशानां त्यागे दशमश्चत्वार उपवासाः । द्वादशानां परित्यागे द्वादशः पंचोपवासाः । मासार्ध-पंचदशोपवासाः पंचदशदिनान्याहारपरित्यागः । मास—मासोपवासा—त्रिंशदहोरात्रमात्रा अशनत्यागः । क्षमणान्युपवासाः । आवलीशब्दः प्रत्येकमभि-

सम्बध्यते । कनकावली चैकावली च कनकावल्येकावल्यौ तौ विधी आदिर्येषां तपोविधानानां कनकैकावल्यादीनि । आदिशब्देन मुरजमध्य-विमानपंक्ति-सिंहनिष्क्रीडितादीनां ग्रहणं । कनकावल्यादीनां प्रपंचः टीकाराधनायां[1] द्रष्टव्यो विस्तरभयान्नेह प्रतन्यते । अनाहारोऽनशनं षष्ठाष्टमदशमद्वादशैर्मासार्धमासादिभिश्च यानि क्षमणानि कनकैकावल्यादीनि च यानि तपोविधानानि तानि सर्वाण्ययनाहारो यावदुत्कृष्टेन षण्मासास्तत्सर्वं साकांक्षमनशनमिति ॥ १५१ ॥

निराकांक्षस्यानशनस्य स्वरूपं निरूपयन्नाह—

भत्तपइण्णा इंगिणि
पाउवगमणाणि जाणि मरणाणि ।
अण्णेवि एवमादी
बोधव्वा णिरवकंखाणि ॥१५२ ॥

भक्तप्रतिज्ञा इंगिनी प्रायोपगमानि यानि मरणानि ।
अन्यान्यपि एवमादीनि बोद्धव्यानि निरवकांक्षाणि ॥

भक्तप्रत्याख्यानं व्याद्यष्टचत्वारिंशन्निर्यापकैः परिचर्यमाणस्यात्मपरोपकारसव्यपेक्षस्य यावज्जीवमाहारत्यागः । इङ्गिणीमरणं नामात्मोपकारसव्यपेक्षं परोपकारनिरपेक्षं । प्रायो-

---

१ संस्कृतहरिवंशपुराणे च द्रष्टव्यं ॥

पगमनमरणं नामात्मपरोपकारनिरपेक्षं । एतानि त्रीणि परगानि । एवमादीन्यन्यान्यपि प्रत्याख्याता (ना) नि निराकांक्षाणि यानि तानि सर्वाण्ययनिराकांक्षमशनं बोद्धव्यं ज्ञातव्यमिति ॥ १५२ ॥

अवमौदर्यस्वरूपं निरूपयन्नाह—

बत्तीसा किर कवला
पुरिसस्स दु होदि पयदि आहारो ।
एगकवलादिहिं तत्तो
ऊणियगहणं उमोदरियं ॥१५३॥

द्वात्रिंशत् किल कवलाः पुरुषस्य
तु भवति प्रकृत्या आहारः ।
एककवलादिभिस्तत
ऊनितग्रहणं अवमौदर्यम् ॥१५३॥

द्वात्रिंशत्कवलाः पुरुषस्य प्रकृत्याहारो भवति । ततो द्वात्रिंशत्कवलेभ्य एककवलेनोनं द्वाभ्यां त्रिभिः, इत्येवं यावदेककवलः शेषः एकसिक्थो वा । किलशब्द आगमार्थसूचकः आगमे पठितमिति । एककबलादिभिर्नित्यस्याहारस्य ग्रहणं यत् सावमौदर्यवृत्तिः । सहस्रतंदुलमात्रः कवल आगमे पठितः द्वात्रिंशत्कवलाः पुरुषस्य स्वाभाविक आहारस्तेभ्यो यन्यून-

ग्रहणं तदवमोदर्यं तप इति ॥ १५३ ॥

किमर्थमवमोदर्यवृत्तिरनुष्ठीयत इति पृष्टे उत्तरमाह—

धम्मावासयजोगे णाणादीये उवग्गहं कुणदि ।
ण य इंदियप्पदोसयरी उमोदरितवोवुत्ती १५४

धर्मावश्यकयोगेषु ज्ञानादिके उपग्रहं करोति ।
न च इंद्रियप्रद्वेषकरी अवमौदर्यतपोवृत्तिः ॥ १५४ ॥

धर्मे क्षमादिलक्षणे दशप्रकारे । आवश्यकक्रियासु समतादिषु षट्सु । योगेषु वृक्षमूलादिषु । ज्ञानादिके स्वाध्याये चारित्रे चोपग्रहमुपकारं करोतीत्यवमोदर्यतपोवृत्तिः । न चेन्द्रियप्रद्वेषकरी न चावमोदर्यवृत्त्येन्द्रियाणि प्रद्वेषं गच्छन्ति किन्तु वशे तिष्ठन्तीति । बह्वाशीर्धर्मं नानुतिष्ठति । आवश्यकक्रियाश्च न सम्पूर्णाः पालयति । त्रिकालयोगं च न क्षेमेण समानयति । स्वाध्यायध्यानादिकं च न कर्तुं शक्नोति । तस्येन्द्रियाणि च स्वेच्छाचारीणि भवन्तीति । मिताशिनः पुनर्धर्मादयः स्वेच्छया वर्तन्त इति ॥ १५४ ॥

रसपरित्यागस्वरूपं प्रतिपादयन्नाह—

खीरदहिसप्पितेल गुडलवणाणं च जं पारिच्चयणं
तित्तकडुकसायंविलमधुररसाणं च जं चयणं ॥

क्षीरदधिसर्पिस्तैलगुडलवणानां च यत् परित्यजनं ।

तिक्तकटुकषायाम्लमधुररसानां च यत् त्यजनं १५५

अथ को रसपरित्याग इति पृष्टेऽत आह-क्षीरदधिसर्पिस्तैलगुडलवणानां घृतपूरलड्डुकादीनां च यत् परित्यजनं-परित्यजनं एकैकशः सर्वेषां वा। तिक्तकटुकषायाम्लमधुररसानां च यत्त्यजनं स रसपरित्यागः। एतेषां प्रासुकानामपि तपोबुद्ध्या त्यजनम् ॥ १५५ ॥

याः पुनर्महाविकृतयस्ताः कथमिति प्रश्नेऽत आह—

चत्तारि महावियडी य होंति णवणीदमज्जमंसमधू
कंखापसंगदप्पासंजमकारीओ एदाओ ॥१५६॥

चतस्रो महाविकृतयश्च भवंति नवनीतमद्यमांसमधूनि कांक्षाप्रसंगदर्पासंयमकारिण्य एताः ॥ १५६ ॥

याः पुनश्चतस्रो महाविकृतयो महापापहेतवो भवन्तीति नवनीतमद्यमांसमधूनि, कांक्षाप्रसंगदर्पासंयमकारिण्य एताः। नवनीतं कांक्षां-महाविषयाभिलाषं करोति। मद्यं-सुराप्रसंगमगम्यगमनं करोति। मांसं-पिशितं दर्पं करोति। मधु असंयमं हिंसां करोति ॥ १५६ ॥

एताः किंकर्तव्या इति पृष्टेऽत आह—

आणाभिकंखिणावज्जभीरुणा तवसमाधिकामेण
ताओ जावज्जीवं णिव्वुड्ढाओ पुरा चेव १५७

आज्ञाभिकांक्षिणा अवद्यभीरुणा तपःसमाधिकामेन ।
ताः यावज्जीवं निर्व्यूढा पुरा चैव ॥ १५७ ॥

सर्वज्ञाज्ञाभिकांक्षिणा सर्वज्ञपतानुपालकेन । अवद्यभीरुणा पापभीरुणा, तपःकामेन तपोनुष्ठानपरेण, समाधिकामेन च ता नवनीतमद्यमांसमधूनि विकृतयो यावज्जीवं सर्वकालं निर्व्यूढाः निसृष्टाः त्यक्ताः पुरा चैव पूर्वस्मिन्नेव काले संयमग्रहणात्पूर्वमेव । आज्ञाभिकांक्षिणा नवनीतं सर्वथा त्याज्यं दुष्टकांक्षाकारित्वात् । अवद्यभीरुणा मांसं सर्वथा त्याज्यं दर्पकारित्वात् । ततः तपःकामेन मद्यं सर्वथा त्याज्यं प्रसंगकारित्वात् । समाधिकामेन मधु सर्वथा त्याज्यं, असंयमकारित्वात् । व्यस्तं समस्तं वा योज्यमिति ॥ १५७ ॥

वृत्तिपरिसंख्यानस्वरूपं प्रतिपादयन्नाह--

गोयरपमाण दायगभायणणाणाविधाण जं गहणं।
तह एसणस्स गहणं विविधस्स य वुत्तिपरिसंखा ॥

गोचरप्रमाणं दायकभाजननानाविधानं यद्ग्रहणं ।
तथा अशनस्य ग्रहणं विविधस्य च वृत्तिपरिसंख्या १५८

गोचरस्य प्रमाणं गोचरप्रमाणं गृहप्रमाणं, एतेषु गृहेषु प्रविशामि नान्येषु बहुष्विति । दायकाः दातारो भाजनानि पात्रवेष्यपात्राणि तेषां यन्नानाविधानं नानाकरणं तस्य ग्रहणं स्वीक-

रणं—दातृविशेषग्रहणं पात्रविशेषग्रहणं च । यदि वृद्धो मां विधरेत् तदानीं तिष्ठामि नान्यथा । अथवा बालो युवा स्त्री उपानत्करहितो वर्त्मनि स्थितोऽन्यथा वा विधरेत् तदानीं तिष्ठामीति । कांस्यभाजनेन रूप्यभाजनेन सुवर्णभाजनेन मृन्मयभाजनेन वा ददाति तदा गृहीष्यामीति यदेवमाद्यं । तथाशनस्य विविधस्य नानाप्रकारस्य यद्ग्रहणमवग्रहोपादानं, अद्य मकुष्टं भोक्ष्ये नान्यत् । अथवाद्य मंडकान् सक्तून् ओदनं वा ग्रहीष्यामीति यदेवमाद्यं ग्रहणं तत्सर्वं वृत्तिपरिसंख्यानमिति १५८

कायक्लेशस्वरूपं विवृण्वन्नाह—

ठाणसयणासणेहिं य
विविहेहिं य उग्गयेहिं बहुएहिं ।
अणुवीचीपरिताओ
कायकिलेसो हवदि एसो ॥ १५९ ॥

स्थानशयनासनैश्च विविधैश्चावग्रहैः बहुभिः ।
अनुवीचिपरितापः कायक्लेशः भवति एषः ॥ १५९ ॥

स्थानं-कायोत्सर्गं । शयनमेकपार्श्वमृतकदण्डादिशयनं । आसनं उत्कुटिका-पर्यंक—वीरासनमकरमुखाद्यासनं । स्थानशयनासनैर्विविधैश्चावग्रहैर्धर्मोपकारहेतुभिरभिप्रायैर्बहुभिरनुवीचीपरितापः सूत्रानुसारेण कायपरितापो वृक्षमूलाभ्रावका-

शातापनादिरेष कायक्लेशो भवति ॥ १५९ ॥

विविक्तशयनासनस्वरूपमाह—

तेरिक्खिय माणुस्सिय
सविगारियिदेविगेहि संसत्ते ।
वज्जेंति अप्पमत्ता
णिलए सयणासणट्ठाणे ॥ १६० ॥

तिरश्चीमानुषीसविकारणीदेविगेहिसंसक्तान् ।
वर्जयंति अप्रमत्ता निलयान् शयनासनस्थानेषु १६०

तिर्यंचो गोमहिष्यादयः । मानुष्यः स्त्रियो वेश्याः स्वेच्छाचारिण्यादयः । सविकारिण्यो देव्यो भवनवान्व्यन्तरादियोषितः । गेहिनो गृहस्थाः । एतैः संसक्तान्—सहितान्, निलयानावसान् वर्जयन्ति—परिहरन्त्यप्रमत्ता यत्नपराः सन्तः शयनासनस्थानेषु कर्तव्येषु एवमनुतिष्ठतो विविक्तशयनासनं नाम तप इति ॥ १६० ॥

बाह्यं तप उपसंहरन्नाह—

सो णाम बाहिरतवो जेण मणो दुक्कडं ण उट्ठेदि ।
जेण य सद्धा जायदि जेण य जोगा ण हीयंते ॥

तत् नाम बाह्यतपः येन मनः दुष्कृतं न उत्तिष्ठति ।

येन च श्रद्धा जायते येन च योगा न हीयंते ॥ १६१ ॥

तन्नाप बाह्यं तपो येन मनोदुष्कृतं-चित्तसंक्लेशो नोत्तिष्ठति नोत्पद्यते । येन च श्रद्धा शोभनानुरागो जायत उत्पद्यते येन च योगा मूलगुणा न हीयन्ते ॥ १६१ ॥

एसो दु बाहिरतवो बाहिरजणपायडो परम घोरो
अब्भंतरजणणादं बोच्छं अब्भंतरं वि तवं १६२

एतत्तु बाह्यं तपो बाह्यजनप्रकटं परमं घोरं ।
अभ्यंतरजनज्ञातं वक्ष्ये अभ्यंतरमपि तपः ॥ १६२ ॥

तद्बाह्यं तपः षड्विधं बाह्यजनानां मिथ्यादृष्टिजनानामपि प्रकटं प्रख्यातं परमघोरं सुष्ठु दुष्करं प्रतिपादितं । अभ्यन्तरजनज्ञातं आगमप्रविष्टजनैर्ज्ञातं वक्ष्ये कथयिष्याम्यभ्यन्तरमपि षड्विधं तपः ॥ १६२ ॥

के ते षट्प्रकारा इत्याशंकायामाह—

पायच्छित्तं विणयं वेज्जावच्चं तहेव सज्झायं ।
झाणं च विउस्सग्गो अब्भंतरओ तवो एसो १६३

प्रायश्चित्तं विनयो वैयावृत्यं तथैव स्वाध्यायः ।
ध्यानं च व्युत्सर्गः अभ्यंतरं तपः एतत् ॥ १६३ ॥

प्रायश्चित्तं—पूर्वापराधशोधनं । विनयमनुद्धतवृत्तिः । वैया-

वृत्यं स्वशक्त्योपकारः । तथैव स्वाध्यायः सिद्धान्ताद्यध्ययनं । ध्यानं चैकाग्रचिंतानिरोधः व्युत्सर्गः । अभ्यन्तरतप एतदिति ।

प्रायश्चित्तस्वरूपं निरूपयन्नाह—

पायच्छित्तं त्ति तवो जेण विसुज्झदि हु पुव्वकयपावं
पायच्छित्तं पत्तोत्ति तेण वुत्तं दसविहं तु ॥१६४॥

प्रायश्चित्तं इति तपो येन विशुद्ध्यति हि पूर्वकृतपापात् ।
प्रायश्चित्तं प्राप्त इति तेन उक्तं दशविधं तु ॥ १६४ ॥

प्रायश्चित्तमपराधं प्राप्तः सन् येन तपसा पूर्वकृतात्पापात् विशुद्धयते हु—स्फुटं पूर्वं व्रतैः सम्पूर्णो भवति तत्तपस्तेन कारणेन दशप्रकारं प्रायश्चित्तमिति ॥ १६४ ॥

के ते दशप्रकारा इत्याशंकायामाह—

आलोयणपडिकमणं उभयविवेगो तहा विउस्सग्गो
तव छेदो मूलं विय परिहारो चेव सद्दहणा १६५

आलोचना प्रतिक्रमणं उभयं विवेकः तथा व्युत्सर्गः ।
तपः छेदो मूलमपि च परिहारः चैव श्रद्धानं ॥ १६५ ॥

आलोचना—आचार्याय देवाय वा चारित्राचारपूर्वकमुत्पन्नापराधनिवेदनं । प्रतिक्रमणं—रात्रिभोजनत्यागव्रतसहितपंचमहाव्रतोच्चारणं संभावनं दिवसप्रतिक्रमणं पाक्षिकं वा । उभयं—आलोचनप्रतिक्रमणे । विवेको द्विप्रकारो गणविवेकः

स्थानविवेको वा । तथा व्युत्सर्गः—कायोत्सर्गः । तपोऽनशनादिकं । छेदो-दीक्षायाः पक्षमासादिभिर्हानिः । मूलं पुनरद्य प्रभृति व्रतारोपणं । अपि च परिहारो द्विप्रकारो गणप्रतिबद्धोऽप्रतिबद्धो वा । यत्र प्रश्रवणादिकं कुर्वन्ति मुनयस्तत्र तिष्ठन्ति पिच्छिकामग्रतः कृत्वा यतीनां वन्दनां करोति तस्य यतयो न कुर्वन्ति, एवं या गणे क्रिया गणप्रतिबद्धः परिहारः । यत्र देशे धर्मो न ज्ञायते तत्र गत्वा मौनेन तपश्चरणानुष्ठानकरणमगणप्रतिबद्धः परिहारः । तथा श्रद्धान तत्त्वरुचौ परिणामः क्रोधादिपरित्यागो वा । एतद्दशप्रकारं प्रायश्चित्तं दोषानुरूपं दातव्यमिति । कश्चिद्दोषः आलोचनमात्रेण निराक्रियते । कश्चित्प्रतिक्रमणेन कश्चिदालोचनप्रतिक्रमणाभ्यां कश्चिद्विवेकेन कश्चित्कायोत्सर्गेण कश्चित्तपसा कश्चिच्छेदेन कश्चिन्मूलेन कश्चित्परिहारेण कश्चिच्छ्रद्धानेनेति ॥ १६५ ॥

प्रायश्चित्तस्य नामानि प्राह—

पोराणकम्मखवणं खिवणं णिज्जरण सोधणं धुवणं
पुंच्छण मुछिवण छिदणं त्ति पायच्छित्तस्स णामाइं

पुराणकर्मक्षपणं क्षेपणं निर्जरणं शोधनं धावनं ।
पुंच्छनं उत्क्षेपणं छेदनमिति प्रायश्चित्तस्य नामानि ॥

पुराणस्य कर्मणः क्षपणं विनाशः क्षेपणं, निर्जरणं शोधनं, धावनं, पुंच्छणं, निराकरणं, उत्क्षेपणं, छेदनं द्वैधीक-

रणमिति प्रायश्चित्तस्यैतान्यष्टौ नामानि ज्ञातव्यानि भवन्तीति ॥ १६६ ॥

विनयस्य स्वरूपमाह—

दंसणणाणेविणओचरित्ततवओवचारिओविणओ
पंचविहो खलु विणओ पंचमगइणायगो भणिओ

दर्शनज्ञाने विनयः चारित्रतप औपचारिकः विनयः।
पंचविधः खलु विनयः पंचमगतिनायको भाणितः १६७

दर्शने विनयो ज्ञाने विनयश्चारित्रे विनयस्तपसि विनयः औपचारिको विनयः पंचविधः खलु विनयः पंचमीगतिनायकः प्रधानः भणितः प्रतिपादित इति ॥ १६७ ॥

दर्शनविनयं प्रतिपादयन्नाह—

उवगूहणादिआ पुव्वुत्ता
तह भत्तिआदिआ य गुणा ।
संकादिवज्जणं पि य
दंसणविणओ समासेण ॥ १६८ ॥

उपगूहनादिकाः पूर्वोक्ताः तथा भक्त्यादयश्च गुणाः शंकादिवर्जनमपि च दर्शनविनयः समासेन ॥१६८॥

उपगूहनस्थिरीकरणवात्सल्यप्रभावनाः पूर्वोक्ताः । तथा

भक्त्यादयो गुणाः पंचपरमेष्ठिभक्त्यानुरागस्तेषामेव पूजा तेषामेव गुणानुवर्णनं, नाशनमवर्णवादस्यासादनापरिहारो भक्त्यादयो गुणाः। शंकाकांक्षाविचिकित्सान्यदृष्टिप्रशंसानां वर्जनं परिहारो दर्शनविनयः समासेनेति ॥ १६८ ॥

जे अत्थपज्जया खलु
उवदिट्ठा जिणवरेहिं सुदणाणे ।
ते तह रोचेदि णरो
दंसणविणयो हवदि एसो ॥ १६९ ॥

ये अर्थपर्यायाः खलु उपदिष्टा जिनवरैः श्रुतज्ञाने ।
तान् तथा रोचयति नरः दर्शनविनयः भवति एषः ॥

येऽर्थपर्याया जीवाजीवादयः सूक्ष्मस्थूलभेदेनोपदिष्टाः स्फुटं जिनवरैः श्रुतज्ञाने द्वादशांगेषु चतुर्दशपूर्वेषु, तान् पदार्थांस्तथैव तेन प्रकारेण याथात्म्येन रोचयति नरो भव्यजीवो येन परिणामेन स एष दर्शनविनयो ज्ञातव्य इति ॥ १६९ ॥

ज्ञानविनयं प्रतिपादयन्नाह—

काले विणए उवहाणे बहुमाणे तहेव णिण्हवणे ।
वंजणअत्थतदुभयं विणओ णाणम्हि अट्ठविहो

काले विनयः उपधाने बहुमाने तथैव अनिह्नवे ।
व्यंजनार्थतदुभयं विनयो ज्ञाने अष्टविधः ॥ १७० ॥

द्वादशांगचतुर्दशपूर्वाणां कालशुद्ध्या पठनं व्याख्यानं परिवर्तनं वा । तथा हस्तपादौ प्रक्षाल्य पर्यंकेऽवस्थितस्याध्ययनं । अवग्रहविशेषेण पठनं । बहुमानं यत्पठति यस्माच्छृणोति तयोः पूजागुणास्तवनं । तथैवानिह्नवो यत्पठति यस्मात्पठति तयोः कीर्तनं । व्यञ्जनशुद्धं, अर्थशुद्धं व्यञ्जनार्थोभयशुद्धं च यत्पठनं । अनेन न्यायेनाष्टप्रकारो ज्ञाने विनय इति ॥

तथा—

णाणं सिक्खदि णाणं
गुणेदि णाणं परस्स उवदिसदि ।
णाणेण कुणदि णायं
णाणविणीदो हवदि एसो १७१

ज्ञानं शिक्षते ज्ञानं गुणयति ज्ञानं परस्य उपदिशति ।
ज्ञानेन करोति न्यायं ज्ञानविनीतो भवति एषः १७१

ज्ञानं शिक्षते विद्योपादानं करोति । ज्ञानं गुणयति परिवर्तनं करोति । ज्ञानं परस्मै उपदिशति प्रतिपादयति । ज्ञानेन करोति न्यायमनुष्ठानं । य एवं करोति ज्ञानविनीतो भवत्येष इति । अथ दर्शनाचारदर्शनविनययोः को भेदस्तथा ज्ञानाचारज्ञानविनययोः कश्चन भेद इत्याशंकायामाह—शंकादिपरिणामपरिहारे यत्नः उपगूहनादिपरिणामानुष्ठाने च यत्नो दर्शनविनयः । दर्शनाचारः पुनः शंकाद्यभावेन तत्त्वश्रद्धा-

नविषयो यत्न इति । तथा कालशुद्ध्यादिविषयेऽनुष्ठाने यत्नः कालादिविनयः, तथा द्रव्यक्षेत्रभावादिविषयश्च यत्नः । ज्ञानाचारः पुनः कालशुद्ध्यादिषु सत्सु श्रुतं पठनयत्नं । ज्ञानविनयः श्रुतोपकरणेषु च यत्नः श्रुतविनयः । तथापनयति तपसा तमोऽज्ञानं उपनयति च मोक्षमार्गे आत्मानं तपोविनयः नियमितमतिः सोऽपि तपोविनय इति ज्ञातव्य इति ॥

चारित्रविनयस्वरूपं प्रतिपादयन्नाह—

इंदियकसायपणिहाणंपि य गुत्तीओचेवसमिदीओ
एसो चरित्तविणओ समासदो होइ णायव्वो ॥

इन्द्रियकषायप्रणिधानमपि च गुप्तयः चैव समितयः
एष चारित्रविनयः समासतो भवति ज्ञातव्यः १७२

इन्द्रियाणि चक्षुरादीनि कषायाः क्रोधादयः तेषामिन्द्रियकषायाणां प्रणिधानं प्रसरहानिरिन्द्रियकषायप्रणिधानं इन्द्रियप्रसरनिवारणं कषायप्रसरनिवारणं । अथवेन्द्रियकषायाणां अपरिणामस्तद्व्यापारनिरोधनं । अपि च गुप्तयो मनोवचनकायशुभप्रवृत्तयः । समितय ईर्याभाषैषणादाननिक्षेपोच्चारप्रस्रवणप्रतिष्ठापनाः । एष चारित्रविनयः समासतः संक्षेपतो भवति ज्ञातव्यः । अत्रापि समितिगुप्तय आचारः । तद्रक्षणोपाये यत्नश्चारित्रविनय इति ॥ १७२ ॥

तपोविनयस्वरूपं प्रतिपादयन्नाह—

उत्तरगुणउज्जोगो सम्मं अहियासणा य सद्धा य
आवासयाणमुचिदाण अपरिहाणीयणुस्सेहो ॥

उत्तरगुणोद्योगः सम्यगध्यासनं च श्रद्धा च ।
आवश्यकानामुचितानां अपरिहाणिरनुत्सेधः ॥

आतापनादयुत्तरगुणेषूद्योग उत्साहः । सम्यगध्यासनं तत्कृतश्रमस्य निराकुलतया सहनं । उद्गतश्रद्धा—तानुत्तरगुणान् कुर्वतः शोभनपरिणामः । आवश्यकानां समतास्तववन्दनाप्रतिक्रमणप्रत्याख्यानकायोत्सर्गाणामुचितानां कर्मक्षयनिमित्तानां परिमितानामपरिहाणिरनुत्सेधः न हानिः कर्तव्या नापि वृद्धिः । षडेव भावाश्चत्वारः पंच वा न कर्तव्याः । तथा सप्ताष्टौ न कर्तव्याः । या यस्यावश्यकस्य वेला तस्यामेवासौ कर्तव्यो नान्यस्यां वेलायां हानिं वृद्धिं प्राप्नुयात् । तथा यस्यावश्यकस्य यावन्तः पठिताः कायोत्सर्गास्तावन्त एव कर्तव्या न तेषां हानिर्वृद्धिर्वा कार्या इति ॥ १७३ ॥

भत्ती तवोधियम्हि य तवम्हि अहीलणा य सेसाणं
एसो तवम्हि विणओ जहुत्तचारित्तसाहुस्स ॥

भक्तिः तपोधिके च तपसि अहेलना च शेषाणां ।
एष तपसि विनयः यथोक्तचारित्रसाधोः ॥

भक्तिः स्तुतिपरिणामः सेवा वा । तपसाधिकस्तपोऽधिकः

तस्मिंस्तपोधिके। आत्मनोऽधिकतपसि तपसि च द्वादशविधतपोऽनुष्ठाने च भक्तिरनुरागः। शेषाणामनुत्कृष्टतपसामहेलना अपरिभवः। एष तपसि विनयः सर्वसंयतेषु प्रणामप्रवृत्तिर्यथोक्तचारित्रस्य साधोर्भवति ज्ञातव्य इति ॥ १७४ ॥

पंचमौपचारिकविनयं प्रपंचयन्नाह--

काइयवाइयमाणसि--

ओत्ति अ तिविहो दु पंचमो विणओ।
सो पुण सव्वो दुविहो
पच्चक्खो तह परोक्खो य ॥ १७५ ॥

कायिकवाचिकमानसिक

इति च त्रिविधस्तु पञ्चमो विनयः।
स पुनः सर्वो द्विविधः
प्रत्यक्षस्तथा परोक्षश्च ॥ १७५ ॥

काये भवः कायिकः। वाचि भवो वाचिकः। मनसि भवो मानसिकः। त्रिविधस्त्रिप्रकारस्तु पंचमो विनयः। स्वर्गमोक्षादीन् विशेषेण नयतीति विनयः। कायाश्रयो वागश्रयो मानसाश्रयश्चेति। स पुनः सर्वोऽपि कायिको वाचिको मानसिकश्च द्विविधो द्विप्रकारः प्रत्यक्षश्चैव परोक्षश्च। गुरोः प्रत्यक्षश्चक्षुरादिविषयः। चक्षुरादिविषयादतिक्रान्तः परोक्ष इति ॥ १७५ ॥

कायिकविनयस्वरूपं दर्शयन्नाह—

अब्भुट्ठाणं किदिअम्मं णवण अंजलीय मुंडाणं।
पच्चूगच्छणमेत्ते पछिदस्सणुसाधणं चेव ॥१७६

अभ्युत्थानं कृतिकर्म नमनं अंजलिना मुंडानां।
प्रत्युद्गमनमायातस्य प्रस्थितस्यानुसाधनं चैव ॥

अभ्युत्थानमादरेणासनादुत्थानं। क्रियाकर्म सिद्धभक्ति-श्रुतभक्तिगुरुभक्तिपूर्वकं कायोत्सर्गादिकरणं। नमनं शिरसा प्रणामः। अञ्जलिना करकुंडलेनाञ्जलिकरणं वा मुण्डानामृषीणां। अथवा मुण्डा सामान्यवन्दना। पच्चूगच्छणमेत्ते—आगच्छतः प्रतिगमनमभिमुखयानं। प्रस्थितस्य प्रयाणके व्यवस्थितस्यानुसाधनं चानुव्रजनं च साधूनामादरः कार्यः। तथा तेषामेव क्रिया कर्म कर्तव्यं। तथा तेषामेव कृताञ्जलिपुटेन नमनं कर्तव्यं। तथा साधोरागतः प्रत्यभिमुखगमनं कर्तव्यं तथा तस्यैव प्रस्थितस्यानुव्रजनं कर्तव्यमिति ॥ तथा

णीचं ठाणं णीचं गमणं णीच च आसणं सयणं।
आसणदाणं उवगरणदाण ओगासदाणं च ॥

नीचं स्थानं नीचं गमनं नीचं च आसनं शयनं।
आसनदानं उपकरणदानं अवकाशदानं च ॥

देवगुरुभ्यः पुरतो नीचं स्थानं। नीचं च गमनं गुरो-

वामपार्श्वे पृष्ठतो वा गन्तव्यं। नीचं च न्यग्भूतं चासनं पीठादिवर्जनं गुरोरासनस्य पीठादिकस्य दानं निवेदनं। उपकरणस्य पुस्तिकाकुंडिकापिच्छिकादिकस्य दानमुपसंपादनं। अवकाशस्य वसतिकागिरिगुहादिकस्य प्रासुकस्यान्विष्य दानं निवेदनं। अथवा नीचं स्थानं करचरणसंकुचितवृत्तिर्गुरोः सधर्मणोऽन्यस्य वा व्याधितस्येति ॥ १७७ ॥ तथा—

पडिरूवकायसंफासणदायपडिरूपकालकिरिया य
पेसणकरणं संथरकरणं उवकरण पडिलिहणं ॥

प्रतिरूपकायसंस्पर्शनता प्रतिरूपकालक्रिया च।
प्रेष्यकरणं संस्तरकरणं उपकरणं प्रतिलेखनं ॥

प्रतिरूपं शरीरबलयोग्यं कायस्य शरीरस्य संस्पर्शनं मर्दनमभ्यंगनं वा। प्रतिरूपकालक्रिया चोष्णकाले शीतक्रिया शीतकाले उष्णक्रिया वर्षाकाले तद्योग्यक्रिया। प्रेष्यकरणमादेशकरणं। संस्तरकरणं दृष्टिकादिप्रस्तरणं। उपकरणानां पुस्तिकाकुण्डिकादीनां प्रतिलेखनं सम्यग्निरूपणम् ॥१७८॥

इच्चेवमादिओ जो उवयारो कीरदे सरीरेण।
एसो काइयविणओ जहारिहं साहुवग्गस्स ॥

इत्येवमादिको यः उपकारः क्रियते शरीरेण।
एषः कायिकविनयः यथार्हं साधुवर्गस्य ॥

इत्येवमादिरुपकारो गुरोरन्यस्य वा साधुवर्गस्य यः शरीरेण क्रियते यथायोग्यं स एष कायिको विनयः कायाश्रितत्वादिति ॥ १७९ ॥

वाचिकविनयस्वरूपं विवृण्वन्नाह—

पूयावयणं हिदभासणं च मिदभासणं च मधुरं च।
सुत्ताणुवीचिवयणं अणिट्ठुरमकक्कसं वयणं ॥

पूजावचनं हितभाषणं च मितभाषणं च मधुरं च ।
सूत्रानुवीचिवचनं अनिष्ठुरमकर्कशं वचनं ॥

पूजावचनं बहुवचनोच्चारणं यूयं भट्टारका इत्येवमादि । हितस्य पथ्यस्य भाषणं इहलोकपरलोकधर्मकारणं वचनं । मितस्य परिमितस्य भाषणं चाल्पाक्षरबह्वर्थं । मधुरं च मनोहरं श्रुतिसुखदं । सूत्रानुवीचिवचनमागमदृष्ट्या भाषणं यथा पापं न भवति । अनिष्ठुरं दग्धमृतप्रलीनेत्यादिशब्दैरहितं । अकर्कशं वचनं च वर्जयित्वा वाच्यमिति ॥ १८० ॥

उवसंतवयणमगिहत्थवयणमकिरियमहीलणं वयणं
एसो वाइयविणओ जहारिहं होदि कादव्वो ॥

उपशांतवचनं अगृहस्थवचनं अक्रियमहीलनं वचनं
एष वाचिकविनयः यथार्हं भवति कर्तव्यः ॥

उपशान्तवचनं क्रोधमानादिरहितं । अगृहस्थवचनं गृह-

स्थानां मकारवकारादि यद्वचनं तेन रहितं बन्धनत्रासनताडनादिवचनरहितं। अकिरियं असिमसिकृष्यादिक्रिया (दि) रहितं अथवा सक्रियमिति पाठः। सक्रियं क्रियायुक्तमन्यच्चिन्तान्यदोषयोरिति न वाच्यं, तदुच्यते यन्निष्पाद्यते। अहीलं-अपरिभवचनं। इत्येवमादिवचनं यत्र स एष वाचिको विनयो यथायोग्यं भवति कर्तव्य इति ॥ १८१ ॥

मानसिकविनयस्वरूपमाह—

पापविसोत्तिअपरिणा-
मवज्जणं पियहिदेय परिणामो।
णादव्वो संखेवे--
णेसो माणसिओ विणओ ॥ १८२ ॥

पापविश्रुतिपरिणामवर्जनं प्रियहिते च परिणामः।
ज्ञातव्यः संक्षेपेणैषः मानसिको विनयः ॥ १८२ ॥

पापविश्रुतिपरिणामवर्जनं पापं हिंसादिकं विश्रुतिः सम्यग्विराधना तयोः परिणामस्तस्य वर्जनं परिहारः। प्रिये धर्मोपकारे हिते च सम्यग्ज्ञानादिके च परिणामो ज्ञातव्यः। संक्षेपेण स एष मानसिकश्चित्तोद्भवो विनय इति ॥१८२॥

इय एसो पच्चक्खो
विणओ पारोक्खिओवि जं गुरुणो।

विरहम्मिवि वट्टिज्जादि
आणाणिद्देसचारेयाए ॥

इति एषः प्रत्यक्षः विनयः पारोक्षिकोपि यत् गुरोः।
विरहेपि वर्तते आज्ञानिर्देशचर्यायाः ॥ १८३ ॥

इत्येष प्रत्यक्षविनयः कायिकादिः, गुर्वादिषु सत्सु वर्तते यतः, पारोक्षिकोऽपि विनयो यद्गुरोर्विरहेऽपि गुर्वादिषु परोक्षीभूतेषु यद्वर्तते। आज्ञानिर्देशेन चर्यायां वार्हद्भट्टारकोपदिष्टेषु जीवादिपदार्थेषु श्रद्धानं कर्तव्यं तथा तैर्या चर्योद्दिष्टा व्रतसमित्यादिका तया च वर्तनं परोक्षा विनयः। तेषां प्रत्यक्षतो यः क्रियते स प्रत्यक्षमिति ॥ १८३ ॥

पुनरपि त्रिविधं विनयमन्येन प्रकारेणाह—

अह ओपचारिओ खलु
विणओ तिविहो समासदो भणिओ।
सत्त चउव्विह दुविहो
बोधव्वो आणुपुव्वीए ॥

अथ औपचारिकः खलु विनयः
त्रिविधः समासतो भणितः।
सप्त चतुर्विधः द्विविधः
बोधव्यः आनुपूर्व्या ॥

अथौपचारिको विनय उपकारे धर्मादिकपरचित्तानुग्रहे भव औपचारिकः खलु स्फुटं त्रिविधस्त्रिप्रकारः कायिकवाचिकमानसिकभेदेन समासतः संक्षेपतो भणितः कथितः। सप्तविधश्चतुर्विधो द्विविधो बोद्धव्यः। आनुपूर्व्यानुक्रमेण कायिकः सप्तप्रकारो वाचिकश्चतुर्विधः मानसिको द्विविध इति॥

कायिकविनयं सप्तप्रकारमाह—

अब्भुट्ठाणं सण्णदि आसणदाणं अणुप्पदाणं च
किदिकम्मं पडिरूवं आसणचाओ य अणुव्वजणं

अभ्युत्थानं सन्नतिः आसनदानं अनुप्रदानं च।
कृतिकर्म प्रतिरूपं आसनत्यागश्च अनुव्रजनं॥

अभ्युत्थानमादरेणोत्थानं। सन्नतिः शिरसा प्रणामः। आसनदानं पीठाद्युपनयनं। अनुप्रदानं च पुस्तकपिच्छिकाद्युपकरणदानं। क्रियाकर्म श्रुतभक्त्यादिपूर्वककायोत्सर्गः प्रतिरूपं यथायोग्यं, अथवा शरीरप्रतिरूपं कालप्रतिरूपं भावप्रतिरूपं च क्रियाकर्म शीतोष्णमूत्रपुरीषाद्यपनयनं। आसनपरित्यागो गुरोः पुरत उच्चस्थाने न स्थातव्यं। अनुव्रजनं प्रस्थितेन सह किंचिद्गमनमिति। अभ्युत्थानमेकः सन्नतिर्द्वितीय आसनदानं तृतीयप (अ) नुप्रदानं चतुर्थः प्रतिरूपक्रियाकर्म पंचमः आसनत्यागः षष्ठोऽनुव्रजनं सप्तमः प्रकारः कायिकविनयस्येति॥ १८५॥

वाचिकमानसिकविनयभेदानाह—

हिदमिदपरिमिदभासा
अणुवीचीभाषणं च बोधव्वं ।
अकुसलमणस्स रोधो
कुसलमणपवत्तओ चेव ॥

हितमितपरिमितभाषा अनुवीचिभाषणं च बोद्धव्यं ।
अकुशलमनसो रोधः कुशलमनःप्रवर्तकश्चैव ॥

हितभाषणं मितभाषणं परिमितभाषणमनुवीचिभाषणं च । हितं धर्मसंयुक्तं । मितमल्पाक्षरं बह्वर्थं । परिमितं कारणसहितं । अनुवीचीभाषणमागमाविरुद्धवचनं चेति चतुर्विधो वचनविनयो ज्ञातव्यः । तथाऽकुशलमनसो रोधः पापादानकारकचित्तनिरोधः । कुशलमनसो धर्मप्रवृत्तचित्तस्य प्रवर्तकश्चेति द्विविधो मनोविनय इति ॥ १८६ ॥

स एवं द्विविधो विनयः साधुवर्गेण कस्य कर्तव्य इत्याशंक्यायाह—

रादिणिए ऊणरादिणिएसु अ
अज्जासु चेव गिहिवग्गे ।
विणओ जहारिओ सो
कायव्वो अप्पमत्तेण ॥

रात्र्यधिके ऊनरात्र्यधिकेषु च आर्यासु चैव गृहिवर्गे।
विनयः यथार्हः स कर्तव्यः अप्रमत्तेन ॥

रादिणिए-रात्र्यधिके दीक्षागुरौ श्रुतगुरौ तपोधिके च। ऊणरादिणिएसु य-ऊनरात्रिकेषु च तपसा कनिष्ठेषु गुणकनिष्ठेषु वयसा कनिष्ठेषु च साधुषु। अज्जासु-आर्यिकासु। गिहिवग्गे-गृहिवर्गे श्रावकलोके च। विनयो यथार्हो यथायोग्यः कर्तव्यः। अप्रमत्तेन प्रमादरहितेन। साधूनां यो योग्यः आर्यिकाणां यो योग्यः, श्रावकाणां यो योग्यः, अन्येषामपि यो योग्यः स तथा कर्तव्यः, केन? साधुवर्गेणाप्रमत्तेनात्मतपोऽनुरूपेण प्रासुकद्रव्यादिभिः स्वशक्त्या चेति ॥ १८७ ॥

किमर्थं विनयः क्रियते इत्याशंकायामाह—

विणएण विप्पहीणस्स
हवदि सिक्खा णिरत्थिया सव्वा।
विणओ सिक्खाए
फलं विणयफलं सव्वकल्लाणं ॥१८८॥

विनयेन विप्रहीणस्य भवति शिक्षा निरार्थिका सर्वा।
विनयः शिक्षायाः फलं विनयफलं सर्वकल्याणं ॥

विनयेन विप्रहीणस्य विनयरहितस्य भवति शिक्षा श्रुताध्ययनं निरर्थिका निष्फला सर्वा सकला विनयः पुनः शिक्षा-

या विद्याध्ययनस्य फलं, विनयफलं सर्वकल्याणान्यभ्युदयनिःश्रेयससुखानि । अथवा स्वर्गावतरणजन्मनिष्क्रमणकेवलज्ञानोत्पत्तिपरिनिर्वाणादीनि कल्याणादीनीति ॥ १८८ ॥

विनयस्तवमाह—

विणओ मोक्खद्दारं विणयादो संजमो तवो णाणं
विणएणाराहिज्जदि आइरिओ सव्वसंघो य ॥

विनयः मोक्षद्वारं विनयात् संयमस्तपो ज्ञानं ।
विनयेनाराध्यते आचार्यश्च सर्वसंघश्च ॥

विनयो मोक्षस्य द्वारं प्रवेशकः । विनयात्संयमः । विनयात्तपः । विनयाच्च ज्ञानं । भवतीति सम्बन्धः । विनयेनाराध्यते आचार्यः सर्वसंघश्चापि ॥ १८९ ॥

आयारजीदकप्पगुणदीवणा अत्तसोधि णिज्जंजा
अज्जवमद्दवलाहवभत्तीपल्हादकरणं च ॥

आचारजीदकल्पगुणदीपनां आत्मशुद्धिः निर्द्वंद्वः ।
आर्जवमार्दवलाघवभक्तिप्रह्लादकरणानि च ॥

आचारस्य गुणा जीदप्रायश्चित्तस्य कल्पप्रायश्चित्तस्य गुणास्तदनुष्ठानानि तेषां दीपनं प्रकटनं । आत्मशुद्धिश्चात्मकर्मनिर्मुक्तिः । निर्द्वंद्वः कलहाद्यभावः । ऋजोर्भाव आर्जवं स्वस्थता, मृदोर्भावो मार्दवं मायामानयोर्निरासः । लघोर्भावो

लाघवं निःसंगता लोभनिरासः । भक्तिर्गुरुसेवा । प्रल्हादकरणं च सर्वेषां सुखोत्पादनं । यो विनयं करोति तेनाचरजीदकल्पविषया ये गुणास्ते दीपिता उद्योतिता भवंति । आर्जवमार्दवलाघवभक्तिप्रल्हादकरणानि च भवंति विनयकर्तुरिति ॥

कित्ती मित्ती माणस्स भंजणं गुरुजणे य बहुमाणं
तित्थयराणं आणा गुणाणुमोदो य विणयगुणा

कीर्तिः मैत्री मानस्य भंजनं गुरुजने च बहुमानं ।
तीर्थकराणां आज्ञा गुणानुमोदश्च विनयगुणाः ॥

कीर्तिः सर्वव्यापी प्रतापः ख्यातिश्च । मैत्री सर्वैः सह मित्रभावः । मानस्य गर्वस्य भंजनमामर्दनं । गुरुजने च बहुमानं पूजाविधानं । तीर्थकराणामाज्ञा पालिता भवति । गुणानुमोदश्च कृतो भवति । एते विनयगुणा भवन्तीति । विनयस्य कर्ता कीर्तिं लभते । तथा मैत्रीं लभते । तथात्मनो मानं निरस्यति । गुरुजनेभ्यो बहुमानं लभते । तीर्थकराणामाज्ञां च पालयति । गुणानुरागं च करोतीति ॥ १९१ ॥

वैयावृत्यस्वरूपं निरूपयन्नाह—

आइरियादिसु पंचसु सबालवुड्ढाउलेसु गच्छेसु ।
वेज्जावच्चं वुत्तं कादव्वं सव्वसत्तीए ॥

आचार्यादिषु पंचसु सबालवृद्धाकुलेषु गच्छेषु ।

वैयावृत्त्यं उक्तं कर्तव्यं सर्वशक्त्या ॥

आचार्योपाध्यायस्थविरप्रवर्तकगणधरेषु पंचसु । बाला नवकप्रव्रजिताः । वृद्धा वयोवृद्धास्तपोवृद्धा गुणवृद्धास्तैराकुलो गच्छस्तथैव बालवृद्धाकुले गच्छे सप्तपुरुषसन्ताने । वैयावृत्त्यमुक्तं यथोक्तं कर्तव्यं सर्वशक्त्या सर्वसामर्थ्येन उपकरणाहारभैषजपुस्तकादिभिरुपग्रहः कर्तव्य इति ॥ १९२ ॥

पुनरपि विशेषार्थं श्लोकेनाह—

गुणाधिए उवज्झाए तवस्सि सिस्से य दुव्वले ।
साहुगणे कुले संघे समणुण्णे य चापदि ॥

गुणाधिके उपाध्याये तपस्विनि शिष्ये च दुर्बले ।
साधुगणे कुले संघे समनोज्ञे च चापदि ॥

गुणैरधिको गुणाधिकस्तस्मिन् गुणाधिके । उपाध्याये श्रुतगुरौ । तपस्विनि कायक्लेशपरे । शिक्षके शास्त्रशिक्षणतत्परे दुःशीले वा दुर्बले व्याध्याक्रान्ते वा । साधुगणे ऋषियतिमुन्यनगारेषु । कुले शुक्रकुले स्त्रीपुरुषसन्ताने । संघे चातुर्वर्ण्ये श्रवणसंघे । समनोज्ञे सुखासीने सर्वोपद्रवरहिते । आपदि चोपद्रवे संजाते वैयावृत्त्यं कर्तव्यमिति ॥ १९३ ॥

कैः कृत्वा वैयावृत्त्यं कर्तव्यमित्याह—

सेज्जोग्गासणिसेज्जो
तहोवहिपडिलेहणाहि उवग्गहिदे ।

आहारोसहवायण—
विकिंचणं वंदणादीहिं ॥
शय्यावकाशनिषद्या तथा
उपधिप्रातिलेखनाभिः उपग्रहः ।
आहारौषधवाचना—
विकिंचनवंदनादिभिः ॥

शय्यावकाशो वसतिकावकाशदानं निषद्याऽऽसनादिकं । उपधिः कुण्डिकादि । प्रतिलेखनं पिच्छिकादिः । इत्येतैरुपग्रह उपकारः । अथवैतैरुपगृहीते स्वीकृते । तथाहारौषधवाचनाव्याख्यानविकिंचनमूत्रपुरीषादिव्युत्सर्गवन्दनादिभिः । आहारेण भिक्षाचर्यया । औषधेन शुंठिपिप्पल्यादिकेन । वाचनाव्याख्यानेन । च्युतमलनिर्हरणेन । वन्दनया च । शय्यावकाशेन निषद्ययोपधिना प्रतिलेखनेन च पूर्वोक्तानामुपकारः कर्तव्यः । एतैस्ते प्रतिगृहीता आत्मीकृता भवंतीति ॥

ते (के) षु स्थानेषूपकारः क्रियतेऽत आह—

अद्धाणतेणसावदरायणदीरोधणासिवे ओमे ।
वेज्जावच्चं वुत्तं संगहसारक्खणोवेदं ॥
अध्वस्तेनश्वापदराजनदीरोधनासिव ओमे ।
वैयावृत्त्यं उक्तं संग्रहसारक्षणोपेतम् ॥

अध्वनि श्रान्तस्य । स्तेनैश्चौरैरुपद्रुतस्य । श्वापदैः सिंहव्याघ्रादिभिः परिभूतस्य । राजभिः खंचितस्य । नदीरोधेन पीडितस्य । अशिवेन मारिरोगादिव्यथितस्य । ओमे-दुर्भिक्षपीडितस्य । वैयावृत्त्यमुक्तं संग्रहसारक्षणोपेतं । तेषामागतानां संग्रहः कर्तव्यः । संगृहीतस्य रक्षणं कर्तव्यं । अथवैवं सम्बन्धः कर्तव्यः । एतेषु प्रदेशेषु संग्रहोपेतं सारक्षणोपेतं च वैयावृत्यं कर्तव्यमिति । अथवा रोधशब्दाः प्रत्येकमभिसम्बध्यते । पथिरोधश्चौररोधः श्वापदरोधः राजरोधो नदीरोध एतेषु रोधेषु तथा अशिवे दुर्भिक्षे च वैयावृत्त्यं कर्तव्यमिति ॥ १९५ ॥

स्वाध्यायस्वरूपमाह—

परियट्टणाय वायण
पडिच्छणाणुपेहणा य धम्मकहा ।
थुदिमंगलसंयुक्तः
पंचविहो होइ सज्झाओ ॥ १९६ ॥

परिवर्तनं वाचनं पृच्छना अनुप्रेक्षा च धर्मकथा ।
स्तुतिमंगलसंयुक्तः पंचविधो भवति स्वाध्यायः ॥

परिवर्तनं पठितस्य ग्रन्थस्यानुवेदनं । वाचना शास्त्रस्य व्याख्यानं । पृच्छना शास्त्रश्रवणं । अनुप्रेक्षा द्वादशानुप्रेक्षाऽनित्यत्वादि । धर्मकथा त्रिषष्टिशलाकापुरुषचरितानि । स्तु-

तिर्मुनिदेववन्दना मंगल इत्येवं संयुक्तः पंचप्रकारो भवति स्वाध्यायः । परिवर्तनमेको वाचना द्वितीयः पृच्छना तृतीयोऽनुप्रेक्षा चतुर्थो धर्मकथास्तुतिमंगलानि समुदितानि पंचमः प्रकारः । एवं पंचविधः स्वाध्यायः सम्यग्युक्तोऽनुष्ठेय इति १९६

ध्यानस्वरूपं विवृण्वन्नाह—

अट्टं च रुद्दसहियं दोण्णि विझाणाणि अप्पसत्थाणि
धम्मं सुक्कं च दुवे पसत्थझाणाणि णेयाणि ॥

आर्तं च रौद्रसहितं द्वे अपि ध्याने अप्रशस्ते ।
धर्मं शुक्लं च द्वे प्रशस्तध्याने ज्ञातव्यानि ॥ १९७ ॥

आर्तध्यानं रौद्रध्यानेन सहितं । एते द्वे ध्याने अप्रशस्ते नरकतिर्यग्गतिप्रापके । धर्मध्यानं शुक्लध्यानं चैते द्वे प्रशस्ते देवगतिमुक्तिगतिप्रापके । इत्येवंविधानि ज्ञातव्यानि । एकाग्रचिन्तानिरोधो ध्यानमिति ॥ १९७ ॥

आर्तध्यानस्य भेदानाह—

अमणुण्णजोगइट्ठविओगपरीसहाणिदाणकरणेसु
अट्टं कसायसहियं झाणं भणिदं समासेण ॥ १९८

अमनोज्ञयोगइष्टवियोगपरीषहनिदानकरणेषु ।
आर्तं कषायसहितं ध्यानं भणितं समासेन ॥ १९८ ॥

अमनोज्ञेन ज्वरशूलशत्रुरोगादिना योगः सम्पर्कः । इष्टस्य पुत्रदुहितृमातृपितृबन्धुशिष्यादिकस्य वियोगोऽभावः । परीषहाः क्षुत्तृट्शीतोष्णादयः । निदानकरणं इहलोकपरलोकभोगविषयोऽभिलाषः । इत्येतेषु प्रदेशेष्वार्तं मनःसंक्लेशः कषायसहितं ध्यानं भणितं समासेन संक्षेपतः। कदा ममानेनामनोज्ञेन वियोगो भविष्यतीत्येवं चिन्तनमार्तध्यानं प्रथमं । इष्टैः सह सर्वदा यदि मम संयोगो भवति वियोगो न कदाचिदपि स्याद्यद्येवं चिन्तनमार्तध्यानं द्वितीयं। क्षुत्तृटशीतोष्णादिभिरहं व्यथितः कदैतेषां ममाभावः स्यात् । कथं मयौदनादयो लभ्या येन मम क्षुधादयो न स्युः । कदा मम वेलायाः प्राप्तिः स्याद्येनाहं भुंजे पिबामि वा । हाकारं पूत्कारं जलसेकं च कुर्वतोऽपि तेन मम प्रतीकार इति चिन्तनमार्तध्यानं तृतीयमिति । इहलोके यदि मम पुत्राः स्युः परलोके यद्यहं देवो भवामि स्त्रीवस्त्रादिकं मम स्यादित्येवं चिन्तनं चतुर्थमार्तध्यानमिति ॥ १९८ ॥

रौद्रध्यानस्वरूपं प्रतिपादयन्नाह—

तेणिक्कमोससारक्खणेसु तध चेव छव्विहारंभे ।
रुद्दं कसायसहिदं झाणं भणियं समासेण ॥ १९९

स्तैन्यमृषासारक्षणेषु तथा चैव षड्विधारंभे ।
रौद्रं कषायसहितं ध्यानं भणितं समासेन ॥ १९९ ॥

स्तैन्यं परद्रव्यापहरणाभिप्रायः । मृषाऽनृते तत्परता । सारक्षणं यदि मदीयं द्रव्यं चोरयति तमहं निहन्मि, एवमायुधव्यग्रहस्तमारणाभिप्रायः । स्तैन्यमृषावादसारक्षणेषु । तथा चैव षड्विधारम्भे पृथिव्यप्तेजोवायुवनस्पतित्रसकायिकविराधने च्छेदनभेदनबन्धनबधताडनदहनेषूद्यमः रौद्रं कषायसहितं ध्यानं भणितं । समासेन संक्षेपेण । परद्रव्यहरणे तत्परता प्रथमं रौद्रं । परपीड़ाकरे मृषावादे यत्नः द्वितीयं रौद्रं । द्रव्यपशुपुत्रादिरक्षणविषये चौरदायादिमारणोद्यमे यत्नस्तृतीयं रौद्रं । तथा षड्विधे जीवमारणारम्भे कृताभिप्रायश्चतुर्थं रौद्रमिति ॥ १९९ ॥ ततः—

अवहदटु अट्टरुद्दे महाभए सुग्गदीयपच्चूहे ।
धम्मे वा सुक्के वा होहि समण्णागदमदीओ ॥

अपहृत्य आर्तरौद्रे महाभये सुगतिप्रत्यूहे ।
धर्मे वा शुक्ले वा भव समन्वागतमतिः ॥ २०० ॥

यत एवंभूते आर्तरौद्रे । किंविशिष्टे महाभये महासंसारभीतिदायिनि (नी) सुगतिप्रत्यूहे-देवगतिमोक्षगतिप्रतिकूले । अपहृत्य निराकृत्य । धर्मध्याने शुक्लध्याने वा भव सम्यग्विधानेन गतमतिः । धर्मध्याने शुक्लध्याने च सादरो सुष्ठु विशुद्धं मनो विधेहि समाहितमतिर्भव (वे) ति ॥२००॥

धर्मध्यानभेदान् प्रतिपादयन्नाह—

एयग्गेण मणं णिरुंभिऊण धम्मं चउव्विहं झाहि
आणापायविवायविचओ य संठाणविचयं च ॥

एकाग्रेण मनो निरुध्य धर्मं चतुर्विधं ध्याय ।
आज्ञापायविपाकविचयः संस्थानविचयश्च ॥ २०१ ॥

एकाग्रेण पंचेन्द्रियव्यापारपरित्यागेन कायिकवाचिकव्यापारविरहेण च । मनो मानसव्यापारं । निरुध्यात्मवशं कृत्वा । धर्मं चतुर्विधं चतुर्भेदं । ध्याय चिन्तय । के ते चत्वारो विकल्पा इत्याशंकायामाह—आज्ञाविचयोऽपायविचयो विपाकविचयः संस्थानविचयश्चेति ॥ २०१ ॥

तत्राज्ञाविचयं विवृण्वन्नाह—

पंचत्थिकायछज्जीवणिकाये कालदव्वमण्णे य ।
आणागेज्झे भावे आणाविचयेण विचिणादि ॥

पंचास्तिकायषट्जीवानिकायान् कालद्रव्यमन्यत् च
आज्ञाग्राह्यान् भावान् आज्ञाविचयेन विचिनोति ॥

पंचास्तिकायाः जीवास्तिकायोऽजीवास्तिकायो धर्मास्तिकायोऽधर्मास्तिकायो वियदास्तिकाय इति तेषां प्रदेशबन्धोऽस्तीति कृत्वा काया इत्युच्यन्ते । षड्जीवनिकायश्च पृथिव्यप्तेजोवायुवनस्पतित्रसाः । कालद्रव्यमन्यत् । अस्य प्रदेशबन्धाभावादस्तिकायत्वं नास्ति । एतानाज्ञाग्राह्यान् भावान् पदार्थान् ।

आज्ञाविचयेनाज्ञास्वरूपेण । विचिनोति विवेचयति ध्यायतीति यावत् । एते पदार्थाः सर्वज्ञनाथेन वीतरागेण प्रत्यक्षेण दृष्टा न कदाचिद् व्यभिचरन्तीत्यास्तिक्यबुद्ध्या तेषां पृथक्पृथग्विवेचनेनाज्ञाविचयः । यद्यप्यात्मनः प्रत्यक्षबलेन हेतुबलेन वा न-स्पष्टा तथापि सर्वज्ञाज्ञानिर्देशेन गृह्णाति नान्यथावादिनो जिना यत इति ॥ २०२ ॥

अपायविचयं विवृण्वन्नाह--

कल्लाणपावगाओ
पाए विचिणादि जिणमदमुविच्च ।
विचिणादि वा अपाये
जीवाण सुहे य असुहे य ॥ २०३ ॥

कल्याणप्रापकान् उपायान् विचिनोति जिनमतमुपेत्य विचिनोति वा अपायान् जीवानां शुभान् च अशुभान् च

कल्याणप्रापकान् पंचकल्याणानि यैः प्राप्यन्ते तान् प्राप्यान् सम्यग्दर्शनज्ञानचारित्राणि । विचिनोति ध्यायति । जिनमतमुपेत्य जैनागममाश्रित्य । विचिनोति वा ध्यायति वा । अपायान् कर्मापगमान् स्थितिखण्डाननुभागखण्डानुत्कर्षापकर्षभेदान् । जीवानां सुखानि जीवप्रदेशसंतर्पणानि । असुखानि दुःखानि चात्मनस्तु विचिनोति भावयतीति । एतैः कर्तव्यैर्जीवा दूरतो भवन्ति शासनात्, एतैस्तु शासनमुपढौ-

कते, एतैः परिणामैः संसारे भ्रमन्ति जीवाः, एतैश्च संसारादिमुच्यन्तीति चिन्तनमपायचिन्तनं नाम द्वितीयं धर्मध्यानमिति ॥ २०३ ॥

विपाकविचयस्वरूपमाह—

एआणेयभवगयं
जीवाणं पुणपावकम्मफलं ।
उदओदीरणसंकम-
बंधं मोक्खं च विचिणादि ॥ २०४ ॥

एकानेकभवगतं जीवानां पुण्यपापकर्मफलं ।
उदयोदीरणसंक्रमबंधं मोक्षं च विचिनोति ॥ २०४ ॥

एकभवगतमनेकभवगतं च जीवानां पुण्यकर्मफलं पापकर्मफलं च विचिनोति । उदयं स्थितिक्षयेण गलनं विचिनोति ये कर्मस्कन्धा उत्कर्षापकर्षादिप्रयोगेण स्थितिक्षयं प्राप्यात्मनः फलं ददते तेषां कर्मस्कन्धानामुदय इति संज्ञा तं ध्यायति । तथा चोदीरणमपक्वपाचनं । ये कर्मस्कन्धाः सत्सु स्थित्यनुभागेषु अवस्थिताः सन्त आकृष्याकाले फलदाः क्रियन्ते तेषां कर्मस्कन्धानामुदीरणमिति संज्ञा तद् ध्यायति । संक्रमणं परप्रकृतिस्वरूपेण गमनं विचिनोति । तथा बन्धं जीवकर्मप्रदेशान्योन्यसंश्लेषं ध्यायति । मोक्षं जीवकर्मप्रदेशविश्लेषमनन्तज्ञानदर्शनसुखवीर्यस्वरूपं विचिनोतीति सम्बन्धः । तथा

शुभप्रकृतीनां गुडखण्डशर्करामृतस्वरूपेणानुभागचिन्तनं । अशुभप्रकृतीनां निम्बकांजीरविषहालाहलस्वरूपेणानुभागचिन्तनं । तथा घातिकर्मणां लतादार्वस्थिशिलासमानानुचिंतनं । नरकतिर्यग्मनुष्यदेवगतिप्रापककर्मफलचिन्तनं । इत्येवमादिचिन्तनं विपाकविचयधर्म्यध्यानं नामेति । ॥२०४॥

संस्थानविचयस्वरूपं विवृणवन्नाह—

उड्ढमहातिरियलोए विचिणादि सपज्जए ससंठाणे
एत्थेव अणुगदाओ अणुपेक्खाओ य विचिणादि

ऊर्ध्वाधस्तिर्यग्लोकान्विचिनोतिसपर्यायान्ससंस्थानान्
अत्रैवानुगता अनुप्रेक्षाश्च विचिनोति ॥ २०५ ॥

ऊर्ध्वलोकं सपर्ययं सभेदं ससंस्थानं त्र्यस्रचतुरस्रवृत्तदीर्घायतमृदंगसंस्थानं पटलेन्द्रकश्रेणीबद्धप्रकीर्णकविमानभेदभिन्नं विचिनोति ध्यायति । तथाधोलोकं सपर्ययं ससंस्थानं वेत्रासनाद्याकृतिं त्र्यस्रचतुरस्रवृत्तदीर्घायतादिसंस्थानभेदभिन्नं सप्तपृथवीन्द्रकश्रेणिविश्रेणिबद्धप्रकीर्णकप्रस्तरस्वरूपेण स्थितं शीतोष्णनारकसंहितं महावेदनारूपं च विचिनोति। तथा तिर्यग्लोकं सपर्ययं सभेदं ससंस्थानं झल्लर्याकारं मेरुकुलपर्वतादि ग्रामनगरपत्तनभेदभिन्नं पूर्वविदेहापरविदेहभरतैरावतभोगभूमिद्वीपसमुद्रवननदीवेदिकायतनकूटादिभेदभिन्नं दीर्घह्रस्ववृत्तायतत्र्यस्रचतुरस्रसंस्थानसहितं

विचिनोति ध्यायतीति सम्बन्धः । अत्रैवानुगता अनुप्रेक्षा द्वादशानुप्रेक्षा विचिनोति ॥ २०५ ॥

कस्ता अनुप्रेक्षा इति नामानीति दर्शयन्नाह—

अद्धुवमसरणमेग-
त्तमण्ण संसारलोगमसुचित्तं ।
आसवसंवरणिज्जर
धम्मं बोधिं च चिंतिज्जो ॥ २०६ ॥

अध्रुवमशरणमेकत्वमन्यत्वसंसारलोकमशुचित्वं ।
आस्रवसंवरनिर्जराधर्मो बोधिश्च चिंत्यः ॥ २०६ ॥

अध्रुवमनित्यता । अशरणमनाश्रयः । एकत्वमेकोऽहं । अन्यत्वं शरीरादन्योऽहं । संसारश्चतुर्गतिसंक्रमणं । लोक ऊर्ध्वाधोमध्यवेत्रासनझल्लरीमृदंगरूपश्चतुर्दशरज्ज्वायतः । अशुचित्वं । आस्रवः कर्मास्रवः । संवरो महाव्रतादिकं । निर्जरा कर्मसातनं । धर्मोऽपि दशप्रकारः क्षमादिलक्षणः । बोधिं च सम्यक्त्वसहिता भावना एता द्वादशानुपेक्षाश्चिन्तय । तत् एतच्चतुर्विधं धर्मध्यानं नामेति । ॥ २०६ ॥

शुक्लध्यानस्य स्वरूपं भेदांश्च विवेचयन्नाह—

उवसंतो दु पुहुत्तं-
झायदि झाणं विदक्कवीचारं ।

खीणकसाओ झायदि
एयत्तविदक्कवीचारं ॥ २०७ ॥

उपशांतस्तु पृथक्त्वं
ध्यायति ध्यानं वितर्कवीचारं ।
क्षीणकषायो ध्यायति
एकत्ववितर्कवीचारं ॥ २०७ ॥

उपशान्तकषायस्तु पृथक्त्वं ध्यायति ध्यानं । द्रव्याण्यनेकभेदभिन्नानि त्रिभिर्योगैर्यतो ध्यायति ततः पृथक्त्वमित्युच्यते । वितर्कः श्रुतं यस्माद्वितर्केण श्रुतेन सह वर्तते यस्माच्च नवदशचतुर्दशपूर्वधरैरारभ्यते तस्मात्सवितर्कं तत् । विचारोऽर्थव्यंजनयोगः (ग) संक्रमणः । एकमर्थं त्यक्त्वार्थान्तरं ध्यायति मनसा संचिंत्य वचसा प्रवर्तते कायेन प्रवर्तते एवं परंपरेण संक्रमो योगानां द्रव्याणां व्यंजनानां च स्थूलपर्यायाणामर्थानां सूक्ष्मपर्यायाणां वचनगोचरातीतानां संक्रमः सवीचारं ध्यानमिति । अस्य त्रिप्रकारस्य ध्यानस्योपशान्तकषायः स्वामी । तथा क्षीणकषायो ध्यायत्येकत्ववितर्कं (अ) वीचारं । एकं द्रव्यमेकार्थपर्यायमेकं व्यंजनपर्यायं च योगनैकेन ध्यायति तद्ध्यानमेकत्वं, वितर्कः श्रुतं पूर्वोक्तमेव, अवीचारव्यंजनयोगसंक्रान्तिरहितं । अस्य त्रिप्रकारस्यैकत्ववितर्कवीचारभेदभिन्नस्य क्षीणकषायः स्वामी ॥ २०७ ॥

तृतीयचतुर्थशुक्लध्यानस्वरूपप्रतिपादनार्थमाह—

सुहुमकिरियं सजोगी झायदिझाणं च तदियसुक्कंतु
जं केवली अजोगी झायदि झाणं समुच्छिण्णं

सूक्ष्मक्रियं सयोगी ध्यायति ध्यानं च तृतीयशुक्लं तु
यत् केवली अयोगी ध्यायति ध्यानं समुच्छिन्नं ॥

सूक्ष्मक्रियामवितर्कमवीचारं श्रुतावष्टम्भरहितमर्थव्यञ्जनयोगसंक्रान्तिवियुक्तं सूक्ष्मकायक्रियाव्यवस्थितं तृतीयं शुक्लं सयोगी ध्यायति ध्यानमिति। यत्केवल्ययोगी ध्यायति ध्यानं तत्समुच्छिन्नमवितर्कमविचारमनिवृत्तिनिरुद्धयोगमपश्चिमं शुक्लमविचलं मणिशिखावत् । तस्य चतुर्थध्यानस्य योगी स्वामी। यद्यप्यत्र मानसो व्यापारो नास्ति तथाप्युपचारक्रिया ध्यानमित्युपचर्यते। पूर्वप्रवृत्तिमपेक्ष्य घृतघटवत् पुंवेदवद्वेति ॥ २०८ ॥

दुविहो य विउस्सगो अब्भंतर बाहिरो मुणेयव्वो।
अब्भंतर कोहादी बाहिर खेत्तादियं दव्वं॥२०९॥

द्विविधश्च व्युत्सर्गः आभ्यंतरो बाह्यः ज्ञातव्यः।
अभ्यंतरः क्रोधादिः बाह्यः क्षेत्रादिकं द्रव्यं ॥

द्विविधो द्विप्रकारो व्युत्सर्गः परिग्रहपरित्यागोऽभ्यन्तरबाहिरो ज्ञातव्यः। क्रोधादीनां व्युत्सर्गोऽभ्यन्तरः। क्षेत्रादिद्रव्यस्य त्यागो बाह्यो व्युत्सर्ग इति ॥ २०९ ॥

मिच्छत्तवेदरागा तहेव हस्सादिया य छद्दोसा ।
चत्तारि तह कसाया चोद्दस अब्भंतरा गंथा२१०

मिथ्यात्ववेदरागा तथैव हास्यादिकाश्च षट्दोषाः ।
चत्वारस्तथा कषायाः चतुर्दश अभ्यंतरा ग्रंथाः॥२१०॥

मिथ्यात्वं । स्त्रीपुंनपुंसकवेदास्त्रयः । रागा हास्यादयः षट् दोषा हास्यरत्यरतिशोकभयजुगुप्साः । चत्वारस्तथा कषाया क्रोधमानमायालोभाः । एते चतुर्दशाभ्यन्तरा ग्रन्थाः । एतेषां परित्यागोऽभ्यन्तरो व्युत्सर्ग इति ॥२१०॥

व्युत्सर्गनिरूपणायाह—

खेत्तं वत्थु धणधण्णगदं दुपदचदुप्पदगदं च ।
जाणसयणासणाणि य कुप्पे भंडेसु दस होंति॥

क्षेत्रं वास्तु धनधान्यगतं द्विपदचतुष्पदगतं च ।
यानशयनासनानि च कुप्ये भांडेषु दश भवंति ।

क्षेत्रं सस्यादिनिष्पत्तिस्थानं । वास्तु गृहप्रासादादिकं । धनगतं सुवर्णरूप्यद्रव्यादि । धान्यगतं शालियवगोधूमादिकं द्विपदा दासीदासादयः । चतुष्पदगतं गोमहिष्याजादिगतं । यानं शयनमासनं । कुप्यं कार्पासादिकं । भण्डं हिंगुमरीचादिकं । एव बाह्यपरिग्रहो दशप्रकारस्तस्य त्यागो बाह्यो व्युत्सर्ग इति ॥ २११ ॥

अभ्यन्तरस्य व्युत्सर्गस्य भेदप्रतिपादनार्थमाह—

बारसविधह्मि वि तवे सब्भंतरबाहिरे कुसलदिट्ठे।
णवि अत्थि णवि य होही सज्झायसमो तवोकम्मं॥

द्वादशविधेपि तपसि साभ्यंतरबाह्ये कुशलदृष्टे।
नाप्यस्ति नापि च भविष्यति स्वाध्यायसमं तपःकर्म

द्वादशविधस्यापि तपसः सबाह्याभ्यन्तरे कुशलदृष्टे सर्वज्ञगणधरादिप्रतिपादिते नाप्यस्ति नापि च भविष्यति स्वाध्यायसमानं तपःकर्म। द्वादशविधेऽपि तपसि मध्ये स्वाध्यायसमानं तपोनुष्ठानं न भवति न भविष्यति ॥ २१२ ॥

बाह्यव्युत्सर्गभेदप्रतिपादनार्थमाह—

सज्झायं कुव्वंतो पंचेंदियसंवुडो तिगुत्तो य।
हवदि य एअग्गमणो विणएण समाहिओ भिक्खू

स्वाध्यायं कुर्वन् पंचेंद्रियसंवृतः त्रिगुप्तश्च।
भवति च एकाग्रमनाः विनयेन समाहितो भिक्षुः ॥

स्वाध्यायं कुर्वन् पंचेन्द्रियसंवृतः त्रिगुप्तश्चेन्द्रियव्यापाररहितो मनोवाक्कायगुप्तश्च, भवत्येकाग्रमनाः शास्त्रार्थतत्पिष्टो विनयेन समाहितो विनययुक्तो भिक्षुः साधुः। स्वाध्यायस्य माहात्म्यं दर्शितमाभ्यां गाथाभ्यामिति ॥ २१३ ॥

द्वादशविधस्यापि तपसः स्वाध्यायोऽधिक इति निरूपयन्नाह—

सिद्धिप्पासादवदंसयस्स
करणं चदुव्विहो होदि।
दव्वे खेत्ते काले
भावे वि य आणुपुव्वीए ॥ २१४ ॥

सिद्धिप्रासादावतंसकस्य करणं चतुर्विधं भवति।
द्रव्यं क्षेत्रं कालं भावमपि च आनुपूर्व्या ॥

तस्य द्वादशविधस्यापि तपसः किंविशिष्टस्य, सिद्धिप्रासादावतंसकस्य मोक्षगृहकर्णपूरस्य मण्डनस्यार्थवा सिद्धिप्रासादप्रवेशकस्य करणमनुष्ठानं चतुर्विधं भवति। द्रव्यमाहारशरीरादिकं। क्षेत्रमनूपरुजांगलादिकं स्निग्धरूक्षवातपित्तश्लेष्मप्रकोपकं। कालः शीतोष्णवर्षादिरूपः। भावः (व) परिणामश्चित्तसंक्लेशः। द्रव्यक्षेत्रकालभावानाश्रित्य तपः कुर्यात्। यथा वातपित्तश्लेष्मविकारो न भवति। आनुपूर्व्यानुक्रमेण क्रमं त्यक्त्वा यदि तपः करोति चित्तसंक्लेशो भवति संक्लेशाच्च कर्मबन्धः स्यादिति ॥ २१४ ॥

तपोविधानक्रममाह—

अब्भंतरसोहणओ
एसो अब्भंतरो तओ भणिओ।

एत्तो विरियाचारं ।
समासओ वण्णइस्सामि ॥ २१५ ॥

अभ्यंतरशोधनकं एतत् अभ्यंतरं तपो भणितं ।
इतो वीर्याचारं समासतः वर्णयिष्यामि ॥

अभ्यन्तरशोधनकमेतदभ्यन्तरतपो भणितं भावशोधनार्थमेतत्तपः तथा बाह्यमप्युक्तं । इत ऊर्ध्वं वीर्याचारं वर्णयिष्यामि संक्षेपत इति ॥ २१५ ॥

तपोऽधिकारमुपसंहरन् वीर्याचारं च सूचयन्नाह—

अणुगूहियबलविरिओ
परक्कमदि जो जहुत्तमाउत्तो ।
जुंजदि य जहाथाणं
विरियाचारोत्ति णादव्वो ॥ २१६ ॥

अनिगूहितबलवीर्यः पराक्रमते यः यथोक्तमात्मनः ।
युनक्ति च यथास्थानं वीर्याचार इति ज्ञातव्यः ॥

अनुगूहितबलवीर्यं अनिगूहितमसंवृतमप्रच्छन्नं, बलमाहारौषधादिकृतसामर्थ्यं, वीर्यं वीर्यान्तरायक्षयोपशमजनितं संहननापेक्षं स्थामशरीरावयवकरणचरणजंघोरुकटिस्कन्धादिघनघटितबन्धापेक्षं । अनिगूहिते बलवीर्ये येनासावनिगूहितबल-

लवीर्यः । पराक्रमते चेष्टते समुत्सहते यो यथोक्तं तपश्चारित्रं त्रिविधानुमतिरहितं सप्तदशप्रकारसंयमविधानं प्राणसंयमं तथेन्द्रियसंयमं चैतद्यथोक्तं । अनिगूहितबलवीर्यो यः कुरुते युनक्ति चात्मानं यथास्थानं यथाशरीरावयवावष्टंभं यः स वीर्याचार इति ज्ञातव्यो भेदात् । अथवा तस्य वीर्याचारो ज्ञातव्यः इति ॥ २१६ ॥

त्रिविधानुमतिपरिहारो यथोक्तमित्युक्तस्तथा सप्तदशप्रकारं प्राणसंयमनमिन्द्रियसंयमनं च यथोक्तमित्युक्तं । तत्र का त्रिविधानुमतिः कश्च सप्तदशप्रकारः प्राणसंयमः को वेन्द्रियसंयम इति पृष्टे उत्तरमाह—

पडिसेवा पडिसुणणं
संवासो चेव अणुमदी तिविहा ।
उद्दिट्ठं जदि भुंजदि
भोगादि य होदि पडिसेवा ॥ २१७ ॥

प्रतिसेवा प्रतिश्रवणं संवासः चैव अनुमतिः त्रिविधा ।
उद्दिष्टं यदि भुंक्ते भोगयति च भवति प्रतिसेवा ॥

प्रतिसेवा प्रतिश्रवणं संवासश्चैवानुमतिस्त्रिविधा । अथ किं प्रतिसेवाया लक्षणं ? आह—उद्दिष्टं दात्रा पात्रमुद्दिश्य पात्राभिप्रायेणाहारादिकमुपकरणादिकं चोपनीतं तदानीतमा-

हारादिकं यदि भुंक्तेऽनुभवति । उपकरणादिकं च प्रासुकपानीतं दृष्ट्वा भोजयति सेवते यदि तदा तस्य पात्रस्य प्रतिसेवानामानुमतिभेदः स्यात् ॥ २१७ ॥ तथा—

उद्दिट्ठं जदि विचरदि
पुव्वं पच्छा व होदि पडिसुणणा ।
सावज्जसंकिलिट्ठो
ममात्तिभावो दु संवासो ॥ २१८ ॥

उद्दिष्टं यदि विचरति पूर्वं पश्चात् वा भवति प्रतिश्रवणा ।
सावद्यसंक्लिष्टो ममत्वभावस्तु संवासः ॥ २१८ ॥

पूर्वमेवोपदिष्टं यावत्तद्वस्तु न गृह्णाति साधुस्तावदेव पूर्वं प्रतिपादयति दाता, भवतो निमित्तं मया संस्कृतमाहारादिकं प्रासुकमुपकरणं वा तद्भवान् गृह्णातु । एवं पूर्वमेव श्रुत्वा यदि विचरति गृह्णाति । अथवा दत्वाहारादिकमुपकरणं पश्चान्निवेदयति युष्मन्निमित्तं मया संस्कृतं तद्भवद्भिर्गृहीतं अद्य मे संतोषः संजातः इति श्रुत्वा तूष्णींभावेन सन्तोषेण वा तिष्ठति तदा तस्य प्रतिश्रवणानामानुमतिभेदो द्वितीयः स्यादिति । तथा सावद्यसंक्लिष्टो योऽयं ममत्वभावः स संवासः । गृहस्थैः सह संवसति ममेदमिति भावं च करोत्याहाराद्युपकरणनिमित्तं सर्वदा संक्लिष्टः सन् संवासनामानुमतिभेदस्तृतीयः । एवंप्रकारामनुमतिं कुर्वता यथोक्तं नाचरितं

बलवीर्यं चावगूहितं तेन वीर्याचारो नानुष्ठितः स्यात्तस्मात् सानुमतिस्त्रिप्रकारापि त्याज्या वीर्याचारमनुष्ठतेति ॥ २१८ ॥

सप्तदशप्रकारसंयमं प्रतिपादयन्नाह—

पुढविदगतेउवाऊवणप्फदीसंजमो य बोधव्वो ।
विगतिगचदुपंचेंदिय अजीवकायेसु संजमणं ॥

पृथिव्युदकतेजोवायुवनस्पतिसंयमश्च बोद्धव्यः ।
द्वित्रिचतुःपंचेंद्रियाजीवकायेषु संयमनं ॥

पृथव्युदकतेजोवायुवनस्पतिकायिकानां संयमनं रक्षणं संयमो ज्ञातव्यः । तथा द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियपंचेन्द्रियाणां संयमनं रक्षणं संयमः । अजीवकायानां शुष्कतृणादीनामच्छेदनं । कायभेदेन पंचप्रकारः संयमस्वरूपभेदेन चतुर्विधोऽजीवरक्षणेन चैकविध इति दशप्रकारः संयमः ॥ २१९ ॥ तथा

अप्पडिलेहं दुप्पडिलेहमुवेखुअवहट्टु संजमो चेव
मणवयणकायसंजम सत्तरसविधो दु णादव्वो ॥

अप्रतिलेखं दुष्प्रतिलेखं उपेक्षा अपहरणस्तु संयमश्चैव मनोवचनकायसंयमः सप्तदशविधस्तु ज्ञातव्यः ॥

अप्रतिलेखश्चक्षुषा पिच्छिकया वा द्रव्यस्य द्रव्यस्थानस्याप्रतिलेखनमदर्शनं तस्य संयमनं दर्शनं प्रतिलेखनं वा प्रतिलेखसंयमः । दुःप्रतिलेखो दुष्टुप्रमार्जनं जीवघातमर्दना-

दिकारकं तस्य संयमनं यत्नेन प्रतिलेखनं जीवप्रमादमंतरेण दुष्प्रतिलेखसंयमः । उपेक्षोपेक्षणं—उपकरणादिकं क्वचित्स्थाप्य पुनः कालान्तरेणाप्यदर्शनं जीवसम्मूर्छनादिकं दृष्ट्वा उपेक्षणं तस्या उपेक्षायाः संयमनं दिनं प्रति निरीक्षणमुपेक्षासंयमः । अपहृत्तु—अपहरणमपनयनं पंचेन्द्रियद्वीन्द्रियादीनामपनयनमुपकरणेभ्योऽन्यत्र संक्षेपणमुपवर्तनं तस्य संयम (मः) निराकरणं उदरकृम्यादिकस्य वा निराकरणमपहृत्तु संयमः । एवं चतुर्विधः संयमः । तथा मनसः संयमनं वचनस्य संयमनं कायस्य संयमनं मनोवचनकायसंयमस्त्रिप्रकारः । एवं पूर्वान् दशभेदानिमांश्च सप्तभेदान् गृहीत्वा सप्तप्रकारः संयमः प्राणसंयमः । अस्य रक्षणेन यथोक्तमाचरितं भवति ॥

तथेन्द्रियसंयमं प्रतिपादयन्नाह—

पंचरसपंचवण्ण
दो गंधे अट्ठ फास सत्त सरा ।
मणसा चोद्दसजीवा
इन्दियपाणा य संजमो णेओ ॥

पंचरसाः पंचवर्णा द्वौ गंधौ अष्ट स्पर्शाः सप्त स्वराः । मानसः चतुर्दश जीवाः इन्द्रियप्राणाश्च संयमः ज्ञेयः

पंच रसास्तिक्तकषायाम्लकटुकमधुरा रसनेन्द्रियविषयाः । पंचवर्णाः कृष्णनीलरक्तपीतशुक्लाश्चक्षुरिन्द्रियविषयाः ।

द्वौ गंधौ सुगंधदुर्गंधौ घ्राणेंद्रियविषयौ । अष्टौ स्पर्शाः स्निग्धरूक्षकर्कशमृदुशीतोष्णलघुगुरुकाः स्पर्शनेन्द्रियविषयाः । सप्तस्वराः षड्जर्षभगान्धारमध्यमपंचमधैवतनिषादाः श्रोत्रेन्द्रियविषयाः । एतेषां मन (सा) सहाष्टाविंशतिभेदभिन्नानां संयमनमात्मविषयनिरोधनं संयमः । मनसो नोइं द्रियस्य संयमः । तथा चतुर्दशजीवसमासानां रक्षणं प्राणसंयमः । एवमिन्द्रियसंयमः प्राणसंयमश्च ज्ञातव्यो यथोक्तमनुष्ठेय इति २२१

पंचाचारमुपसंहरन्नाह—

दंसणणाणचरित्ते
तव विरियाचाराणिग्गहसमत्थो ।
अत्ताणं जो समणो
गच्छदि सिद्धिं धुदकिलेसो ॥

दर्शनज्ञानचारित्रतपो वीर्याचारनिग्रहसमर्थः ।
आत्मानं यः श्रमणो गच्छति सिद्धिं धुतक्लेशः ॥

एवं दर्शनज्ञानचारित्रतपोवीर्याचारैरात्मानं निग्रहयितुं नियंत्रितुं यः समर्थः श्रमणः साधुः स गच्छति सिद्धिं धुतक्लेशो विधूताष्टकर्मा । एवं पंचाचारो व्याख्यातः ॥२२२॥

इति वसुनन्दिविरचितायामाचारवृत्तौ पंचाचारविवर्णनं नाम पंचमः प्रस्तावः समाप्तः ॥ ५ ॥

पिण्डशुद्धि-अधिकारः ॥ ६ ॥

पिण्डशुद्धयाख्यं षष्ठमाचारं विवर्तुकामस्तावन्नमस्कारमाह—

तिरदणपुरुगुणसहिदे
अरहंते विदिदमयलसब्भावे ।
पणमिय सिरिसा वोच्छं
समासदो पिण्डसुद्धी दु ॥१ ॥

त्रिरत्नपुरुगुणसहितान् अर्हतः विदितसकलसद्भावान्
प्रणम्य शिरसा वक्ष्ये समासतः पिण्डशुद्धिस्तु ॥ १ ॥

त्रिरत्नानि सम्यग्दर्शनज्ञानचारित्राणि तानि च तानि पुरुगुणाश्च ते महागुणाश्च ते त्रिरत्नपुरुगुणाः । अथवा त्रिरत्नानि सम्यक्त्वादीनि पुरुगुणा अनन्तसुखादयस्तैः सहितास्तान् । अर्हते अर्हतः सर्वज्ञान् विदितसकलसद्भावान् विदितो विज्ञातः सकलः समस्तः सद्भावः स्वरूपं यैस्तान् परिज्ञातसर्वपदार्थस्वरूपान् प्रणम्य शिरसा, वक्ष्ये समासतः पिण्डशुद्धिमाहारशुद्धिमिति । ॥ १ ॥

यथाप्रतिज्ञं निर्वहन्नाह—

उग्गम उप्पादण एसणं च संजोजणं पमाणं च ।

इंगाल धूम कारण अट्ठविहा पिण्डसुद्धी दु ॥२॥

उद्गमः उत्पादनं एषणं च संयोजनं प्रमाणं च ।
अंगारं धूमः कारणं अष्टविधा पिण्डशुद्धिस्तु ॥ २ ॥

उद्गच्छत्युत्पद्यते यैरभिप्रायैर्दातृपात्रगतैराहारादिस्ते उद्गमोत्पादनदोषाः आहारार्थानुष्ठानविशेषाः । अश्यते भुज्यते येभ्यः पारिवेषकेभ्यस्तेषामशुद्धयोऽशनदोषाः । संयोज्यते संयोजनमात्रं वा संयोजनदोषः । प्रमाणातिरेकः प्रमाणदोषः । अङ्गारमिवाङ्गारदोषः । धूम इव धूमदोषः । कारणानिमित्तं कारणदोषः । एवं एतैरष्टाभिर्दोषै रहिताष्टप्रकारा पिण्डशुद्धिरिति संग्रहसूत्रमेतत् ॥ २ ॥

उद्गमदोषाणां नामनिर्देशायाह—

आधाकम्मुद्देसिय
अज्झोवज्झेय पूदिमिस्से य ।
ठविदे बलि पाहुडिदे
पादुक्कारे य कीदे य ॥ ३ ॥

अधःकर्म औद्देशिक अध्यधि पूतिमिश्रश्च ।
स्थापितं बलिः प्रावर्तितं प्राविष्करणं च क्रीतं च ॥ ३

गृहस्थाश्रितं पंचशूनासमेतं तावत्सामान्यभूतमष्टविधा

(घ) पिण्डशुद्धिं वक्ष्ये महादोषरूपमधःकर्म कथ्यते । आधा कम्म—अधःकर्म निकृष्टव्यापारः षड्जीवनिकायवधकरः । उद्दिश्यते इत्युद्देशः उद्देशे भव औद्देशिकः । अज्झोवज्झेय अध्यधिसंयतं दृष्ट्वा पाकारम्भः । पूदि—पूतिरप्रासुकप्रासुक मिश्रणं सहेतुकं । मिस्सेय—मिश्रश्चासंयतमिश्रणं । ठविदे—स्थापितं स्वगृहेऽन्यगृहे वा । बलिर्निवेद्य देवार्चना वा । पाहुडियं—प्रावर्तितं कालस्य हानिवृद्धिरूपं । पादक्कारेय—प्राविष्करणं मण्डपादेः प्रकाशनं । कीदेय—क्रीतं वाणिज्यरूपमिति । तथा—

पामिच्छे परियट्टे
अभिहडमुब्भिण्ण मालआरोहे ।
अच्छिज्जे आणिसट्टे
उग्गमदोसा दु सोलसिमे ॥ ४ ॥

प्रामृष्यं परिवर्तकं अभिघटं उद्भिन्नं मालारोहं ।
अच्छेद्यं अनिसृष्टं उद्गमदोषारतु षोडश इमे ॥ ४ ॥

पामिच्छे-प्रामृष्यं सूक्ष्मर्णमुद्धारकं । परियट्टे-परिवर्तकं दत्वा ग्रहणं । अभिहड—अभिघटं देशान्तरादागतः । उब्भिण्णं—उद्भिन्नं बन्धनापनयनं । मालारोहे—मालारोहणं गृहोर्ध्वमाक्रमणं । अच्छिज्जे—अच्छेद्यं त्रासहेतुः । अणिसट्टे—अनीशार्थेऽप्रधानदाता । उद्गमदोषाः षोडशेमे ज्ञातव्याः ।

गृहस्थाश्रितस्याधःकर्मणः स्वरूपं विवृण्वन्नाह-

छज्जीवणिकायाणं
विराहणोद्दावणादिणिप्पण्णं ।
आधाकम्मं णेयं
सयपरकदमादसंपण्णं ॥ ५ ॥

षट्जीवनिकायानां विराधनोद्दावनादिनिष्पन्नं ।
अधःकर्म ज्ञेयं स्वपरकृत्यमात्मसम्पन्नं ॥ ५ ॥

षड्जीवनिकायानां पृथिव्यप्तेजोवायुवनस्पतित्रसकायिकानां विराधनं दुःखोत्पादनं। उद्दावणं-उद्रवणं मारणं। विराधनोद्दवनाभ्यां निष्पन्नं सजातं विराधनोद्दावननिष्पन्नं यदोदनादिकं वस्तु तदधःकर्म ज्ञातव्यं । स्वकृतं परकृतानुमतं कारितमात्मनः संप्राप्तः । आत्मनः समुपस्थितं । विराधनोद्दवने अधःकर्मणी पापक्रिये ताभ्यां यन्निष्पन्नं तदधःकर्मेत्युच्यते । कार्ये कारणोपचारात् । स्वेनात्मना कृतं परेण वा कारितं वा परेण वा कृतं, आत्मनानुमतं । विराधनोद्दावननिष्पन्नमात्मने संप्राप्तं यद्वैयावृत्त्यादिविरहितं तदधःकर्म दूरतः संयतेन परिहरणीयं गार्हस्थ्यमेतत् । वैयावृत्त्यादिविमुक्तमात्मभोजननिमित्तं पचनं षड्जीवनिकायवधकरं न कर्तव्यं न कारयितव्यमिति । एतत् षट्चत्वारिंशद्दोषबहिर्भूतं सर्वपाणिसामान्यजातं गृह-

स्यानुष्ठेयं सर्वथा वर्जनीयं। यद्येतत् कुर्यात् श्रवणो गृहस्थः स्यात। किमर्थमेतदुच्यत इति चेन्नैष दोषः, अन्येषु पाखण्डिस्वध्यासकर्मणो दर्शनाद्यथा तेषां तदनुष्ठेयं तथा साधूनां तदनुष्ठानमयोग्यं। तेन गृहस्थाः। साधवः पुनरनागारनिसंगा यतो अतो नानुष्ठेयमधःकर्मेति ज्ञापनार्थमेतदिति ॥५॥

उद्गमदोषाणां स्वरूपं प्रतिपादयन् विस्तरसूत्रायाह—

देवदपासंडट्ठं
किविणट्ठं चावि जं तु उद्दिसियं।
कदमण्णसमुद्देसं
चदुव्विहं वा समासेण ॥ ६ ॥

देवतापाखंडार्थं कृपणार्थं चापि यत्तु औद्देशिकं।
कृतमन्नं स्मुद्देशं चतुर्विधं वा समासेन ॥ ६ ॥

अधःकर्मणः पार्श्वात् उ (औ) देशिकं सूक्ष्मदोषमपि परिहर्तुकामः प्राह-देवता नागयक्षादयः, पाषण्डा जैनदर्शनबहिर्भूतानुष्ठानालिंगिनः कृपणका दीनजनाः। देवतार्थं पाखंडार्थं कृपणार्थं चोद्दिश्य यत्कृतमन्नं तन्निमित्तं निष्पन्नं भोजनं तदौद्देशिकं भवति चतुर्विधं सम्यगौद्देशिकं समासेन जानीहि वक्ष्यमाणेन न्यायेन ॥ ६ ॥

तमेव चतुर्विधं प्रतिपादयन्नाह—

जावदियं उद्देसो
पासंडोत्ति य हवे समुद्देसो।
समणोत्ति य आदेसो
णिग्गंथोत्ति य हवे समादेसो ॥ ७ ॥

यावान् उद्देशः पाषंड इति च भवेत् समुद्देशः।
श्रमण इति च आदेशो निर्ग्रंथ इति च भवेत् समादेशः ॥

यावान् कश्चिदागच्छति तस्मै सर्वस्मै दास्यामीत्युद्दिश्य यत्कृतमन्नं स यावानुद्देश इत्युच्यते। ये केचन पाखण्डिन आगच्छन्ति भोजनाय तेभ्यः सर्वेभ्यो दास्यामीत्युद्दिश्य कृतमन्नं स पाखण्डिन इति च भवेत्समुद्देशः। ये केचन श्रमणा आजीवकतापसरक्तपटारिव्राजकाश्छत्रा वागच्छन्ति भोजनाय तेभ्यः सर्वेभ्योऽहमाहारं दास्यामीत्युद्दिश्य कृतमन्नं स श्रवण इति कृत्वादेशो भवेत्। ये केचन निर्ग्रन्थाः साधव आगच्छन्ति तेभ्यः सर्वेभ्यो दास्यामीत्युद्दिश्य कृतमन्नं निर्ग्रन्था इति च भवेत्समादेशः। सामान्यमुद्दिश्य पाषण्डानुद्दिश्य श्रमणानुद्दिश्य निर्ग्रन्थानुद्दिश्य यत्कृतमन्नं तच्चतुर्विधमौद्देशिकं भवेदन्नमिति। उद्देशेन निर्वर्तितमौद्देशिकमिति ॥

अध्यधिदोषस्वरूपं प्रतिपादयन्नाह—

जलतंदुलपक्खेवो

दाणट्ठं संजदाण सयपयणे ।
अज्झोवज्झं णेयं
अहवा पागं तु जाव रोहो वा ॥ ८ ॥

जलतंदुलप्रक्षेपो दानार्थं संयतानां स्वपचने ।
अध्यधि ज्ञेयं अथवा पाकं तु यावत् रोधो वा ॥ ८ ॥

जलतंदुलानां प्रक्षेपः दानार्थं, संयतं दृष्ट्वा स्वकीयपचने संयतानां दानार्थं स्वस्य निमित्तं यज्जलं पिठरे निक्षिप्तं तंदुलाश्च स्वस्य निमित्तं ये स्थापितास्तस्मिन जलेऽन्यस्य जलप्रक्षेपः तेषु च तंदुलेष्वन्येषां तंदुलानां प्रक्षेपणं यदेवंविधं तदध्यधि दोषरूपं ज्ञेयं । अथवा पाको यावता कालेन निष्पद्यते तस्य कालस्य रोधस्तावन्तं कालमासीन उदीक्षत एतदध्यधि दोषजातमिति ॥ ८ ॥

पूतिदोषस्वरूपं निगदन्नाह—

अप्पासुएण मिस्सं
पासुयदव्वं तु पूदिकम्मं तं ।
चुल्ली उक्खलि दव्वी
भायणगंधत्ति पंचविहं ॥ ९ ॥

अप्रासुकेन मिश्रं प्रासुकद्रव्यं तु पूतिकर्म तत् ।

चुल्ली उदूखलः दर्वी भाजनं गंध इति पञ्चविधं ॥९॥

प्रासुकमप्यप्रासुकेन सचित्तादिना मिश्रं यदाहारादिकं स पूतिदोषः । प्रासुकद्रव्यं तु पूतिकर्म यत्तदपि पूतिकर्म, पंचप्रकारं चुल्ली रन्धनी । उदूखलं उदूखलः । दर्व्वी-दर्वी । भाजणं-भाजनं । गन्धत्ति-गन्ध इति । अनेन प्रकारेण रन्धन्युदूखलदर्वीभाजनगन्धभेदेन पंचविधं । रन्धनीं कृत्वैव महानस्यां रन्धन्यामोदनादिकं निष्पाद्य साधुभ्यस्तावदास्यामि पश्चादन्येभ्य इति प्रासुकमपि द्रव्यं पूतिकर्मणा निष्पन्नमिति पूतीत्युच्यते । तथोदूखलं कृत्वैवमस्मिन्नुदूखले चूर्णयित्वा यावदृषिभ्यो न दास्यामि तावदात्मनोऽन्येभ्यश्च न ददामीति निष्पन्नं प्रासुकमपि तत् तथाऽनया दर्व्या यावदृषिभ्यो न दास्यामि तावदात्मनोऽन्येषां न देयोग्यमेतदपि पूति । तथा भाजनमप्येतद्यावदृषिभ्यो न ददामि तावदात्मनोऽन्येषां च न तद्योग्यमिति पूति । तथायं गन्धो यावदृषिभ्यो न दीयते भोजनपूर्वकस्तावदात्मनोऽन्येषां च न कल्पते इत्येवं हेतुना निष्पन्नमोदनादिकं पूतिकर्म । तत्पंचप्रकारं दोषजातं प्रथमारम्भकरणादिति ॥ ९ ॥

मिश्रदोषस्वरूपं निरूपयन्नाह—

पासंडेहि य सद्धं
सागारेहिं य जदण्णमुद्दिसियं ।

दादुमिदि संजदाणं
सिद्धं मिस्सं वियाणाहि ॥ १० ॥

पाखण्डैः सार्धं सागारैश्च यदन्नं उद्दिष्टं ।
दातुमिति संयतानां सिद्धं मिश्रं विजानीहि ॥ १० ॥

प्रासुकं सिद्धं निष्पन्नमपि यदन्नमोदनादिकं पाषण्डैः सार्धं सागारैः सह गृहस्थैश्च सह संयतेभ्यो दातुमुद्दिष्टं तं मिश्रदोषं विजानीहि । स्पर्शनादिनाऽऽदरादिदोषदर्शनादिति ॥ १० ॥

स्थापितदोषस्वरूपमाह—

पागादु भायणाओ
अण्णम्हि य भायणम्हि पक्खविय ।
सघरे व परघरे वा
णिहिदं ठविदं वियाणाहि ॥ ११ ॥

पाकात् भाजनात् अन्यस्मिन् च भाजनं प्राक्षिप्य ।
स्वगृहे वा परगृहे वा निहितं स्थापितं विजानीहि ११

पाकाद्भाजनात् पाकनिमित्तं यद्भाजनं यस्मिन् भाजने पाको व्यवस्थितस्तस्माद्भाजनात् पिठरादोदनादिकमन्यस्मिन् भाजने पिठरादौ प्रक्षिप्य व्यवस्थाप्य स्वगृहे परगृहे वा नीत्वा

निहितं स्थापितं यत् स्थापितमिति दोषं जानीहि । सभयेन दात्रा दीयमानत्वाद्विरोधादिदोषदर्शनाद्वेति ॥ ११ ॥

बलिदोषस्वरूपं निरूपयन्नाह—

जक्खणयणागादीणं
बलिसेसं स बलित्ति पण्णत्तं ।
संजदआगमणट्ठं
बलियम्मं वा बलिं जाणे ॥ १२ ॥

यक्षनागादीनां बलिशेषः स बलिरिति प्रज्ञप्तः ।
संयतागमनार्थं बलिकर्म वा बलिं जानीहि ॥ १२॥

यक्षनागादीनां निमित्तं यो बलिस्तस्य बलि (लेः) शेषः स बलिशेषो बलिरिति प्रज्ञप्तः । सर्वत्र कारणे कार्योपचारात् । संयतानामागमनार्थं वा बलिकर्म तं बलिं विजानीहि । संयतान् धृत्वार्चनादिकमुद्दिश्य क्षेत्रं पत्रकादिखण्डनं यत् यक्षादेर्बलिशेषश्च यस्तं बलिदोषं विजानीहि सावद्यदोषदर्शनादिति ॥ १२ ॥

प्राभृतदोषस्वरूपं विवृणवन्नाह—

पाहुडिदं पुण दुविहं
बादर सुहुमं च दुविहमेक्केकं ।

ओकस्सणमुक्कस्सण-
महकालोवट्टणावड्ढी ॥ १३ ॥

प्राभृतकं पुनार्द्विविधं बादरसूक्ष्मं च द्विविधमेकैकं ।
अपकर्षणमुत्कर्षणमथ कालापवर्तनवृद्धी ॥ १३ ॥

पाहुडियं–प्राभृतं । पुण–पुनः । दुविहं–द्विविधं । बादरं–स्थूलं । सुहुमं–सूक्ष्मं । पुनरप्येकैकं द्विविधं । उक्कस्सक्कणं अपकर्षणं । उस्सक्कणं–उत्कर्षणं । अथवा कालस्य हानिर्वृद्धिर्वा । अपकर्षणं कालहानिः । उत्कर्षणं कालवृद्धिरिति । स्थूलं प्राभृतं कालहानिवृद्धिभ्यां द्विप्रकारं सूक्ष्मप्राभृतं तदपि द्विप्रकार कालवृद्धिहानिभ्यामिति । ॥ १३ ॥

बादरं च द्विविधं सूक्ष्मं च द्विविधं निरूपयन्नाह–

दिवसे पक्खे मासे वास परत्तीय बादरं दुविहं ।
पुव्वपरमज्झवेलं पारियत्तं दुविह सुहुमं च ॥१४॥

दिवसं पक्षं मासं वर्षं परावृत्य बादरं द्विविधं ।
पूर्वापरमध्यवेलं प्रावर्तितं द्विविधं सूक्ष्मं च ॥ १४ ॥

परावृत्यशब्दः प्रत्येकमभिसम्बध्यते, दिवसं परावर्त्य, पक्षं परावृत्य, मासं परावृत्य, वर्षं परावृत्य यदानं दीयते तद्बादरं प्राभृतं द्विविधं भवति । शुक्लपञ्चम्यां दातव्यमिति स्थितं तदपकृष्य शुक्लपंचम्यां यदीयते शुक्लपंचम्यां वा दास्यामीति स्थि-

तं उत्कृष्टा (उत्कर्ष्या) दृष्ट्यां दादात्येतद्दिवसं परावृत्य जातं प्राभृतं तथा चैत्रशुक्लपक्षे देयं यत्तच्चैत्रांधकारपक्षे ददाति । अन्धकारपक्षे वा देयं शुक्लपक्षे ददाति पक्षपरावृत्तिजातं प्राभृतं । तथा चैत्रमासे देयं फाल्गुने ददाति फाल्गुने देयं वा चैत्रे ददाति तन्मासपरिवृत्तिजातं प्राभृतं । तथा परुत्तने वर्षे देयं यत्तदधुनातने वर्षे ददाति । अधुनातने वर्षे यदिष्टं परुत्तने ददाति तद्वर्षपरावृत्तिजातं प्राभृतं । तथा सूक्ष्मं च प्रावर्तितं द्विविधं पूर्वाह्णवेलायामपराह्णवेलायां मध्यवेलायामिति । अपराह्णवेलायां दातव्यमिति स्थितं प्रकरणं मंगलं संयतागमनादिकारणेनापकृष्य पूर्वाह्णवेलायां ददाति तथा मध्यान्हे दातव्यमिति स्थितं पूर्वाह्णे ऽपराह्णे वा ददाति एनं प्रावर्तितदोषं कालहानिवृद्धिपरिवृत्त्या बादरसूक्ष्मभेदभिन्नं जानीहि क्लेशबहुविघातारंभदोषदर्शनादिति ॥ १४ ॥

प्रादुष्कारदोषमाह—

पादुक्कारो दुविहो
संकमण पयासणा य बोधव्वो ।
भायणभोयणदीणं
मंडवविरलादियं कमसो ॥ १५ ॥

प्रादुष्कारो द्विविधः संक्रमणं प्रकाशनं च बोधव्यं ।
भाजनभोजनादीनां मंडपविरलनादिकं क्रमशः ॥

प्रादुष्कारो द्विविधो बोधव्यो ज्ञातव्यः । भाजनभोजनादीनां संक्रमणमेकः । तथा भाजनभोजनादीनां प्रकाशनं द्वितीयः । संक्रमणमन्यस्मात्प्रदेशादन्यत्र नयनं प्रकाशनं भाजनादीनां भस्मादिनोदकादिना वा निर्मार्जनं भाजनादेर्वा विस्तरणमिति । अथवा मण्डपस्य विरलनमुद्योतनं मण्डपादिविरलनं । आदिशब्देन कुड्यादिकस्य ज्वलनं प्रदीपद्योतनमिति संक्रमः सर्वः प्रादुष्कारो दोषोऽयं । ईर्यापथदोषदर्शनादिति ॥ १५ ॥

क्रीततरदोषमाह —

कीदयडं पुण दुविहं
दव्वं भावं च सगपरं दुविहं ।
सच्चित्तादी दव्वं
विज्जामंताादि भावं च ॥१६ ॥

क्रीततरं पुनः द्विविधं द्रव्यं भावश्च स्वपरं द्विविधं ।
सचित्तादि द्रव्यं विद्यामंत्रादि भावश्च ॥ १६ ॥

क्रीततरं पुनर्द्विविधं द्रव्यं भावश्च । द्रव्यमपि द्विविधं स्वपरभेदेन स्वद्रव्यं परद्रव्यं स्वभावः परभावश्च । सचित्तादिकं गोमहिष्यादिकं द्रव्यं । विद्यामंत्रादिकं भावः । संयते भिक्षायां प्रविष्टे स्वकीयं परकीयं वा सचित्तादिद्रव्यं दत्त्वाहारं प्रयुङ्क्ते ददाति तथा स्वमंत्रं परमंत्रं वा स्वविद्यां परविद्यां वा

दत्त्वाहारं प्रगृह्य ददाति यत् स क्रीतदोषः । कारुण्यदोष-दर्शनादिति । प्रज्ञप्त्यादिविद्या । चेटकादिर्मंत्र इति ॥ १६ ॥

ऋणदोषस्वरूपमाह-

डहरिय रिणं तु भणियं
पामिच्छं ओदणादिअण्णदरं ।
तं पुण दुविहं भाणिदं
सवड्ढियमवड्ढियं चावि ॥ १७ ॥

लघु ऋणं तु भणितं प्रामृष्यं ओदनादि अन्यतरं ।
तत् पुनः द्विविधं भणितं सवृद्धिकमवृद्धिकं चापि ॥

डहरियरिणं तु—लघुऋणं स्तोकऋणं भणितं । पामिच्छं प्रामृष्यं ओदनादिकं भक्तं मण्डकादिमन्यतरत् । तत्पुनर्द्विविधं सवृद्धिकमवृद्धिकं चापि । भिक्षौ चर्यायां प्रविष्टे दातान्यदीयं गृहं गत्वा भक्त्या भक्तादिकं याचते वृद्धिं समिष्यं वृद्ध्याविना वा साधुहेतोः । तवौदनादिकं वृद्धिसहितमन्यथा वा दास्यामि मम भक्तं पानं खाद्यं मण्डकाश्च प्रयच्छ । एवं भणित्वा मण्डकादीन् गृहीत्वा संयतेभ्यो ददाति तद्ऋणसहितं प्रामृष्यं दोषं जानीहि । दातुः क्लेशायासकरणादिदर्शनादिति ॥ १७ ॥

परावर्तदोषमाह-

वीहीकूरादीहिं य सालीकूरादियं तु जं गहिदं ।
दातुमिति संजदाणं परियट्टं होदि णायव्वं ॥ १८

व्रीहिक्रूरादिभिः शालिक्रूरादिकं तु यत् गृहीतं ।
दातुमिति संयतेभ्यः परिवर्तं भवति ज्ञातव्यम् ॥

संयतेभ्यो दातुं व्रीहिक्रूरादिभिरुच्छालिक्रूरादिकं संगृहीतं तत्परिवर्तं भवति ज्ञातव्यं । मदीयव्रीहिभक्तं गृहीत्वा मम शाल्योदनं प्रयच्छ साधुभ्योऽहं दास्यामीति गृहीत्वा दत्वा व्रीहिभक्तादिकं गृह्णाति साधुनिमित्तं यत् परिवर्तनं नाम दोषं जानीहि । दातुः क्लेशकारणादिति ।

अभिघटदोषस्वरूपं विवृणोत्याह—

देसत्ति य सव्वत्ति य
दुविहं पुण अभिहडं वियाणाहि ।
आचिण्णमणाचेण्णं
देसाविहडं हवे दुविहं ॥ १९ ॥

देशइति च सर्वइति च द्विविधंपुनःअभिघटंविजानीहि ।
आचिन्नमनाचिन्नं देशाभिघटं भवेत् द्विविधं ॥

देश इति सर्व इति द्विविधं पुनरभिघटं विजानीहि । एकदेशादागतमोदनादिकं देशाभिघटं । सर्वस्मादागतमोदना-

दिकं सर्वाभिघटं । देशाभिघटं पुनर्द्विविधं । आचिन्नानाचिन्नभेदात् । आचिन्नं योग्यं । अनाचिन्नमयोग्यमिति ॥ १९ ॥

आचिन्नानाचिन्नस्वरूपमाह—

उज्जु तिहिं सत्तहिं वा
घरेहिं जदि आगदं दु आचिण्णं ।
परदो वा तेहिं भवे
तव्विवरीदं अणाचिण्णं ॥ २० ॥

ऋजु त्रिभ्यःसप्तभ्यो वा गृहेभ्योयदि आगतं तु आचिन्नं परतो वा तेभ्यो भवत् ताद्विपरीतं अनाचिन्नं ॥२०॥

ऋजुतया पंक्तिस्वरूपेण यानि त्रीणि सप्त गृहाणि वा व्यवस्थितानि । तेभ्यस्त्रिभ्यः सप्तभ्यो वा गृहेभ्यो यद्यागतमोदनादिकं वाचिन्नं ग्रहणयोग्यं दोषाभावात् । परतस्त्रिभ्यः सप्तगृहेभ्य ऊर्ध्वं यद्यागतमोदनादिकमनाचिन्नं ग्रहणायोग्यं तद्विपरीतं वा ऋजुतया विपरीतेभ्यः सप्तभ्यो यद्यागतं तद्व्यनाचिन्नपादातुमयोग्यं । यत्र तत्र स्थितेभ्यो गृहेभ्योऽप्यागत न ग्राह्य दोषदर्शनादिति ॥ २० ॥

सर्वाभिघटभेद प्रतिपादयन्नाह—

सव्वाभिघडं चदुधा
सयपरगामे सदेसपरदेसे ।

पुव्वापरपाडणयडं
पढमं सेसंपि णादव्वं ॥ २१ ॥

सर्वाभिघटं चतुर्धा स्वपरग्रामे स्वदेशपरदेशे ।
पूर्वापरपाटनयनं प्रथमं शेषमपि ज्ञातव्यं ॥

सर्वाभिघटं चतुर्विधं जानीहि । स्वग्रामपरग्रामस्वदेशपरदेशभेदात् । स्वग्रामादागतं परग्रामादागतं स्वदेशादागतं परदेशादागतमोदनादिकं यत् तच्चतुर्विधं सर्वाभिघटं । यस्मिन् ग्रामे आस्यते स स्वग्राम इत्युच्यते । तस्मादन्यः स परग्राम इत्युच्यते । एवं स्वदेशः परदेशोऽपि ज्ञातव्यः । ननु स्वग्रामात्कथमागच्छतीत्येतस्यामाशंकायामाह—पूर्वपाटकात् परस्मिन् पाटके नयनं परपाटकाद्वा परस्मिन नयनमोदनादिकस्य यत्तत्स्वग्रामाभिघटं प्रथमं जानीहि । तथाशेषमपि जानीहि परग्रामात्स्वग्राम आनयनं स्वदेशात् स्वग्राम आनयनं परदेशात्स्वग्रामे स्वदेशे वानयनमिति सर्वाभिघटदोषं चतुर्विधं जानीहि । प्रचुरेर्यायथदर्शनादिति ॥ २१ ॥

उद्भिन्नदोषमाह—

पिहिदं लंछिदयं वा
ओसहविदसक्करादि जं दव्वं ।
उब्भिण्णऊण देयं
उब्भिण्णं होदि णादव्वं ॥ २२ ॥

पिहितं लांछितं वा औषधघृतशर्करादि यत् द्रव्यं।
उद्भिद्य देयं उद्भिन्नं भवति ज्ञातव्यम् ॥

पिहितं पिधानादिकेनावृतं कर्दमजंतुना वा संवृतं। लांछितं मुद्रितं नामविशादिना च यदौषधं घृतशर्करादिकं गुडखंडलड्डुकादिकं द्रव्यमुद्भिद्योद्घाट्य देयं स उद्भिन्नदोषो भवति ज्ञातव्यः। पिपीलिकादिपरिहारदर्शनादिति।

मालारोहणं दोषं निरूपयन्नाह—

णिस्सेणीकट्ठादिहि
णिहिदं पूयादियं तु घेत्तूणं।
मालारोहं किच्चा
देयं मालारोहणं णाम ॥ २३ ॥

निःश्रेणीकाष्ठादिभिः निहितं पूपादिकं तु गृहीत्वा।
मालारोहं कृत्वा देयं मालारोहणं नाम ॥

निःश्रेण्या काष्ठादिभिर्हेतुभूतैर्मालारोहणं कृत्वा मालं द्वितीयगृहभूमिमारुह्य गृहोर्ध्वभागं चारुह्य निहितं स्थापितमपूपादिकं मंडकलड्डुकशर्करादिकं गृहीत्वा यद्देयं स मालारोहो नाम दोषः। दातुरपायदर्शनादिति ॥ २३ ॥

अच्छेद्यदोषस्वरूपमाह—

रायाचोरादीहिं य संजदभिक्खासमं तु दट्ठूणं ।
बीहेदूण णिजुज्जं अच्छिज्जं होदि णादव्वं ॥

राजचौरादिभिश्च संयतभिक्षाश्रमं तु दृष्ट्वा ।
भीषयित्वा नियुक्तं आछेद्यं भवति ज्ञातव्यम् ॥

संयतानां भिक्षाश्रमं दृष्ट्वा राजा चौरादय एवमाहुः कुटुम्बिकान् यदि संयतानामागतानां भिक्षादानं न कुरु (र्व) ते तदानीं युष्माकं द्रव्यमपहरामो ग्रामाद्वा निर्वासयाम इति । एवं राज्ञा चौरादिभिर्वा कुटुम्बिकान् भाययित्वा नियुक्तं नियोजितं यद्दानं तदाच्छेद्यं नाम दोषो भवति ज्ञातव्यः । कुटुंबिनां भयकरणादिति ॥ २४ ॥

अनीशार्थदोषस्वरूपं विवरणमाह—

अणिसट्ठं पुण दुविहं
इस्सरमह णिस्सरं च दुवियप्पं ।
पढमिस्सर सारक्खं
वत्तावत्तं च संघाडं ॥

अनीशार्थः पुनर्द्विविधः ईश्वरोथानीश्वरः चतुर्विकल्पः प्रथम ईश्वरः सारक्षः व्यक्तोऽव्यक्तश्च संघाटः ॥

अनीशार्थोऽप्रधानहेतुः । स पुनर्द्विविध ईश्वरो अनी-

श्वरश्च । अथवाऽधनेश्वर इति पाठः । अनीशोऽप्रधानोऽर्थः कारणं यस्यौदनादिकस्य तदौदनादिकमनीशार्थं तद्ग्रहणे यो दोषः सोऽप्यनीशार्थः कारणे कार्योपचारादिति । स चानीशार्थो द्विविधः ईश्वरानीश्वरभेदेन । द्विविधोऽपि चतुर्विधः । प्रथम ईश्वरः दानस्य सारक्तः सहारक्षैर्वर्तते इति सारक्षः यद्यपि दातुमिच्छति तथापि दातु न लभतेऽन्ये विघातं कुर्वन्ति तत्तस्य ददतः स ईश्वरो ददाति अन्ये चामात्यपुरोहितादयो विघातं कुर्वन्ति, एवं यदि तदान्नं गृह्णाति प्रथम ईश्वरो नामैकमेदोऽनीशार्थो दोष इति । तथानीश्वरोऽप्रधानहेतुर्यस्य दानस्य तद्दानमनीशार्थं दोषोऽप्यनीशार्थः इत्युच्यते कार्ये कारणोपचारात् । स चानीशार्थस्त्रिप्रकारो व्यक्तोऽव्यक्तः संघाटकः । दानादिकस्यानीश्वरः स्वामी न भवति किन्तु व्यक्तः प्रेक्षापूर्वकारी तेन दीयमानं यदि गृह्णाति तदा व्यक्तोऽनीश्वरो नामानीशार्थो दोष इति । तथा दानस्यानीश्वरस्तथा (दा) व्यक्तोऽप्रेक्षापूर्वकारी भवति तेन दीयमानं यदि गृह्णाति तदाव्यक्तानीश्वरो नामानीशार्थ इति । तथा संघाटकेन व्यक्ताव्यक्तानीश्वरेण दीयमानं यदि गृह्णाति तदाव्यक्ताव्यक्तसंघाटकानीश्वरो नामानीशार्थो दोषाऽपायदर्शनादिति । अथवैवं ग्राह्यं, ईश्वरेण प्रभुणा व्यक्तेनाव्यक्तेन वा यत्सारक्षं यत्प्रतिषिद्धं तद्दानं यदि साधु गृह्णाति तदा व्यक्ताव्यक्तेश्वरो नामानीशार्थो दोषः । तथानीश्वरेण प्रभुणा व्यक्तेनाव्यक्तेन वा यत्प्रतिषिद्धं सारक्षं दानं तद्यदि गृह्णाति

साधुस्तदा व्यक्ताव्यक्तानीश्वरो नामानीशार्थो दोषः । तथा संघटकः सपत्नाय एकां ददात्यपरो निषेधयति दानं तत्तथाभूतं यदि गृह्णाति साधुस्तदा संघाटको नामानीशार्थो दोष इति । ईश्वरो व्यक्ताव्यक्तसंघाटभेदेन द्विविधः । अनीश्वरो व्यक्ताव्यक्तसंघाटभेदेन द्विविध इति । अत्र चशब्दः समुच्चयार्थो द्रष्टव्यः । ईश्वरो द्विविधः । अनीश्वरो द्विविधः । प्रथम ईश्वरेण व्यक्ताव्यक्तसंघाटकेन वा सारक्षोऽनीशार्थः । द्वितीयोऽनीश्वरेण व्यक्ताव्यक्तसंघटकेन वा संरक्ष्योऽनीशार्थ इति अथवा व्यक्तेनाव्यक्तेन चेश्वरेण सारक्ष्यं प्रथम ईश्वरानीशार्थो द्विविधः । तथा व्यक्तेनाव्यक्तेन चानीश्वरेण सारक्ष्यं, द्वितीयोऽनीश्वरोऽनीशार्थो द्विविध इति । तथा संघाटकेन च सारक्ष्यं पृथग्भूतोऽयं दोषोऽनीशार्थो द्रष्टव्यः सर्वत्र विरोधदर्शनादिति । अथवा निसृष्टो मुक्तो न निसृष्टोऽनिसृष्टो निवारितः स च द्विविधः ईश्वरोऽनीश्वरश्च । ईश्वरेण निसृष्टोऽनीश्वरेणऽनिसृष्टः ईश्वरश्चतुर्दोऽनीश्वर इति । प्रथमः ईश्वरः सारक्षो व्यक्तोऽव्यक्तः संघटकः । तथानीश्वरोऽपि सारक्षो व्यक्तोऽव्यक्तः संघाटकः । मन्त्रदियुक्तः सारक्षः बालो व्यक्तः द्वयोः स्वामित्वं संघाटकः । एवमनीश्वरोऽपि द्रष्टव्यः इति । एतैरनिसृष्टं निषिद्धं दत्तं वा दानं यदि गृह्यते तदा निसृष्टो नाम दोषो भवति विरोधदर्शनादिति ॥ २५ ॥

उत्पादनदोषान् प्रतिपादयन्नाह—

धादीदूदणिमित्ते आजीवे वणिवगे य तेगिंछे ।

कोधी माणी मायी लोही य हवंति दस एदे ॥

धात्रीदूतनिमित्तानि आजीव: वनीपकश्च चिकित्सा क्रोधी मानी मायी लोभी च भवंति दश एते ॥

धादी–धात्री माता । दूद–दूतो लेखधारकः । णिमित्ते–निमित्तं ज्योतिषं । आजीवे–आजीवनमाजीविका । वणिवगेय–वनीपकवचनं दातुरनुकूलवचनं । तेगिछे–चिकित्सा वैद्यशास्त्रं । कोधी–क्रोधी । माणी-मानी । माई मायी । लोही –लोभी । हवंति दस एदे–भवन्ति दशैत उत्पादनदोषाः । ॥ २६ ॥ तथा–

पुव्वी पच्छा संथुदि विज्जामंते य चुण्णजोगे य उप्पादणा य दोसो सोलसमो मूलकम्मे य ॥

पूर्वं पश्चात् संस्तुतिः विद्यामंत्रश्च चूर्णयोगश्च । उत्पादनश्च दोषः षोडश मूलकर्म च ॥

स्तुतिशब्दः प्रत्येकमभिसम्बध्यते । पुव्वं पच्छा संथुदि पूर्वं संस्तुतिः । दानग्रहणात्प्राग्दातुः संस्तवः, (पश्चात्स्तुतिः) दानं गृहीत्वा पश्चाद्दातुः संस्तवनं । विज्जा विद्या कामगामिनीरूपपरिवर्तिनीशस्त्रस्तम्भन्यादिका । मंते य–मंत्रश्च सर्पदृश्चिकविषापहरणाक्षराणि । चुण्णजोगे य–चूर्णयोगश्च गात्रभूषणादिनिमित्तं द्रव्यधूलिः । उप्पादणा य दोसो–उत्पादना-

योत्पादननिमित्तं दोष उत्पादनदोषः । स प्रत्येकमभिसम्बध्यते । षोलसमो षोडशानां पूरणा षोडशः । मूलकर्मेत्यत्र मूलकर्मावशानां वशीकरणं । धात्रीकर्मणा सहचरितो दोषोऽपि धात्रीत्युच्यते ॥ २७ ॥

तं धात्रीदोषं विवृणवन्नाह—

मज्जणमंडणधादी खेल्लावणखीरअंबधादी य ।
पंचविधधादिकम्मेणुप्पादो धादिदोसो दु ॥
मार्जनमंडनधात्री क्रीडनक्षीरांबधात्री च ।
पंचविधधात्रीकर्मणा उत्पादो धात्रीदोषस्तु ॥

धापयति दधातीति वा धात्री । मार्जनधात्री बालं स्नपयति या सा मार्जनधात्री । मण्डयति विभूषयति तिलकादिभिर्या सा मण्डनधात्री मण्डननिमित्तं माता । बालं क्रीडयति रमयति क्रीडनधात्री क्रीडानिमित्तं माता । क्षीरं धारयति दधाति या सा क्षीरधात्री स्तनपायिनी । अम्बधात्री जननी, स्वपयति या साप्यम्बधात्री । एतासां पंचविधानां धात्रीणां क्रियया कर्मणा य आहारादिरुत्पाद्यते स धात्रीनामोत्पादनदोषः । बालं स्नापयतीत्यनेन प्रकारेण बालः स्नाप्यते येन सुखी नीरोगी च भवतीत्येवं मार्जननिमित्तं वा कर्म गृहस्थायोपदिशति, तेन च कर्मणा गृहीतो दानाय प्रवर्तते तदानं यदि गृह्णाति साधुस्तस्य धात्रीनामोत्पादनदोषः । तथा

बालं स्वयं मण्डयति मण्डननिमित्तं वा कर्मोपदिशति यस्मै दात्रे स तेन भक्तः सन् दानाय प्रवर्तते तद्दानं गृह्णाति साधुस्तस्य मण्डनधात्रीनामोत्पादनदोषः। तथा बालं स्वयं क्रीडयति क्रीडानिमित्तं च क्रियोपदिशति यस्मै दात्रे स दाता दानाय प्रवर्तते तद्दानं गृण्हाति साधुस्तस्य क्रीडनधात्री नामोत्पादनदोषः। तथा येन क्षीरं भवति येन च विधानेन बालाय क्षीरं दीयते तदुपदिशति यस्मै दात्रे स भक्तः सन् दाता दानाय प्रवर्तते तद्दानं यदि गृह्णाति तदा तस्य क्षीरधात्रीनामोत्पादनदोषः तथा स्वयं स्वापयति स्वापनिमित्तं विधानं चोपदिशति यस्मै दात्रे स दाता दानाय प्रवर्तते तद्दानं यदि गृह्णाति तदा तस्याम्बधात्री नामोत्पादनदोषः। कथमयं दोष इति चेत् स्वाध्यायविनाशमार्गदूषणादिदर्शनादिति ॥२८॥

दूतनामोत्पादनदोषं विवृणवन्नाह—

जलथलआयासगदं सयपरगामे सदेसपरदेसे।
संबंधिवयणणयणं दूदीदोषो हवदि एसो॥

जलस्थलाकाशगतं स्वपरग्रामे स्वदेशपरदेशे।
संबंधिवचननयनं दूतदोषः भवति एषः॥

स्वग्रामात्परग्रामं गच्छति जले नावा तथा स्वदेशात्परदेशं गच्छति जले नावा तत्र तस्य गच्छतः कश्चिद् गृहस्थ एवमाह—भट्टारक! मदीयं संदेशं गृहीत्वा गच्छ स साधुस्तत्स-

म्बन्धिनो वचनं नीत्वा निवेदयति यस्मै प्रहितं स परग्राम-स्थः परदेशस्थश्च तद्वचनं श्रुत्वा तुष्टः सन् दानादिकं ददाति तद्दानादिकं यदि साधुर्गृह्णाति तदा तस्य दूतकर्मणोत्पादन-दोषः। तथा स्थले गच्छत आकाशे च गच्छतः साधोर्यत्सम्बं-धिवचननयनं स्वग्रामात्परग्रामे स्वदेशात्परदेशे, यस्मिन् ग्रामे तिष्ठति स स्वग्राम इत्युच्यते, तथा यस्मिन् देशे तिष्ठति बहू-नि दिनानि स्वदेश इत्युच्यते। इत्येवं जलगतं स्थलगतमा-काशगतं च तद्दूतेन नीयते इति तद्दूतमित्युच्यते। यदेतत्सम्ब-न्धिनो वचनस्य नयनं स एष दूतदोषो भवति। दूतकर्म शा-सनदोषायेति दोषदर्शनादिति ॥ २९ ॥

निमित्तस्वरूपमाह—

वंजणमंगं च सरं छिण्णं भूमं च अंतरिक्खं च।
लक्खण सुविणं च तहा अट्ठविहं होइ णेमित्तं ॥

व्यंजनमंगं च स्वरः छिन्नः भूमिश्च अंतरिक्षं च।
लक्षणं स्वप्नः च तथा अष्टविधं भवति निमित्तं ॥

व्यञ्जनं मशकतिलकादिकं। अङ्गं च शरीरावयवः। स्वरः शब्दः। छिन्नः छेदः, खड्गादिप्रहारो वस्त्रादिच्छेदो वा। भूमि भूमिविभागः। अन्तरिक्षमादित्यग्रहाद्युदयास्तमनं। लक्षणं नन्दिकावर्तपद्मचक्रादिकं। स्वप्नश्च सुप्तस्य हस्ति-विमानमहिषरोहणादिदर्शनं च तथाष्टप्रकारं भवति निमि-

त्त । व्यञ्जनं दृष्ट्वा यच्छुभाशुभं ज्ञायते पुरुषस्य तद्व्यञ्जनं निमित्तमित्युच्यते । तथाङ्गं शिरोग्रीवादिकं दृष्ट्वा पुरुषस्य यच्छुभाशुभं ज्ञायते तदङ्गं निमित्तमिति । तथा यं स्वरं शब्दविशेषं श्रुत्वा पुरुषस्यान्यस्य वा शुभाशुभं ज्ञायते तत्स्वरनिमित्तमिति । यं प्रहार छेदं वा दृष्ट्वा पुरुषस्यान्यस्य वा शुभाशुभं ज्ञायते तच्छिन्ननिमित्तं नाम । तथा यं भूमिविभागं दृष्ट्वा पुरुषस्यान्यस्य वा शुभाशुभं ज्ञायते तद्भौमनिमित्तं नाम । यदन्तरिक्षस्य व्यवस्थितं ग्रहयुद्धं ग्रहास्तमनं ग्रहनिर्घातादिकं समीक्ष्य प्रजायाः शुभाशुभं विबुध्यते तदन्तरिक्षं नाम । यल्लक्षणं दृष्ट्वा पुरुषस्यान्यस्य वा शुभाशुभं ज्ञायते तल्लक्षणनिमित्तं नाम । यं स्वप्नं दृष्ट्वा पुरुषस्यान्यस्य वा शुभाशुभं परिच्छिद्यते तत्स्वप्ननिमित्तं नाम । तथा चशब्देन भूमिगर्जनदिग्दाहादिकं परिगृह्यते । एतेन निमित्तेन भिक्षामुत्पाद्य यदि भुंक्ते तदा तस्य निमित्तनामोत्पादनदोषः । रसास्वादनदैन्यादिदोषदर्शनादिति ॥ ३० ॥

आजीवं दोषं निरूपयन्नाह-

जादी कुलं च सिप्पं तवकम्मं ईसरत्त आजीवं ।
तेहिं पुण उप्पादो आजीव दोसो हवदि एसो ॥

जातिः कुलं च शिल्पं तपःकर्म ईश्वरत्वं आजीवं ।
तैः पुनः उत्पादः आजीवदोषो भवति एषः ॥

जातिर्मातृसन्ततिः । कुलं पितृसन्ततिः । मातृशुद्धिः पितृशुद्धिर्वा । शिल्पकर्म लेपचित्रपुस्तकादिकर्म हस्तविज्ञानं । तपःकर्म तपोऽनुष्ठानं । ईश्वरत्वं च । आजीव्यतेऽनेनाजीवः । आत्मनो जातिं कुलं च निर्दिश्य शिल्पकर्म तपःकर्मेश्वरत्वं च निर्दिश्याजीवनं करोति यतोऽत आजीववचनान्येतानि तेभ्यो जातिकथनादिभ्यः पुनरुत्पाद आहारस्य योऽयं स आजीवदोषो भवत्येषः । वीर्यगूहनदीनत्वादिदोषदर्शनादिति ॥३१॥

वनीपकवचनं निरूपयन्नाह—

साणकिविणतिधिमांहण-
पासंडियसवणकागदाणादी ।
पुण्णं णवेति पुट्ठे
पुण्णेत्ति वणीवयं वयणं ॥

श्वाकृपणातिथिब्राह्मणपाखंडिश्रमणकाकदानादिः ।
पुण्यं नवा इति पृष्टे पुण्यमिति वनीपकं वचनं ॥

शुनां, कृपणादीनां कुष्ठव्याध्याद्यार्तादीनां अतिथीनां मध्यान्हकालागतानां भिक्षुकाणां, ब्राम्हणानां मांसादिभक्षिणां पाखंडिनां दीक्षोपजीविनां, श्रवणानामाजीवकानां छात्राणां वा काकादीनां च यद्दानादिकं दीयते तेन पुण्यं भवति किं

वा न भवतीत्येवं पृष्टे दानपतिना, 'भवति पुण्यमिति' यद्येवं ब्रूयात्तद्वनीपकं वचनं दानपत्युनुकूलवचनं प्रतिपाद्य यदि भुञ्जीत तदा तस्य वनीपकनामोत्पादनदोषः। दीनत्वादिदोषदर्शनादिति ॥ ३२ ॥

चिकित्सां प्रतिपादयन्नाह—

कोमारतणुतिगिंछारसायणविसभूदखारतंतं च।
सालंकियं च सल्लं तिगिंछदोसो दु अट्ठविहो ॥

कोमारतनुचिकित्सारसायनविषभूतक्षारतंत्रं च।
शालकिकं च शल्यं चिकित्सादोषस्तु अष्टविधः ॥

कौमारं बालवैद्यं मासिकसांवत्सरिकादिग्रहत्रासनहेतुः शास्त्रं तनुचिकित्साज्वरादिनिराकरणं कण्ठोदरशोधनकारणं च। रसायनं वलिपलितादिनिराकरणं बहुकालजीवित्वं च। विषं स्थावरजंगमं सकृत्रिमभेदभिन्नं। तस्य विषस्य चिकित्सा विषापहारः। भूत (तः) पिशाचादि तस्य चिकित्सा भूतापनयनशास्त्रं। क्षारतंत्रं क्षारद्रव्यं दुष्टव्रणादिशोधनकरं। शलाकया निर्वृत्तं शालाकिकं अक्षिपटलाद्युद्भवानं। शल्यं भूमिशल्यं शरीरशल्यं च तोमरादिकं शरीरशल्यं, अस्थ्यादिकं भूमिशल्यं तस्यापनयनकारकं शास्त्रं शल्यमित्युच्यते। तथा विषापनयनशास्त्रं विषमिति। भूतापनयननिमित्तं शास्त्रं भूतमिति, कार्ये कारणोपचारादिति। अथवा चिकित्साशब्दः

प्रत्येकमभिसम्बध्यते काकाक्षितारकवदिति । एवमष्टप्रकारेण चिकित्साशास्त्रेणोपकारं कृत्वाहारादिकं गृह्णाति तदानीं तस्याष्टप्रकारश्चिकित्सादोषो भवत्येव सावद्यादिदोषदर्शनादिति ॥ ३३ ॥

क्रोधमानमायालोभदोषान् प्रतिपादयन्नाह—

कोधेण य माणेण य मायालोभेण चावि उप्पादो
उप्पादणा य दोसो चदुव्विहो होदि णायव्वो ॥

क्रोधेन च मानेन च मायालोभेन चापि उत्पादः ।
उत्पादनश्च दोषः चतुर्विधो भवति ज्ञातव्यः ॥

क्रोधमानमायालोभेन च योऽयं भिक्षाया उत्पादः स उत्पादनदोषश्चतुष्प्रकारस्तैर्ज्ञातव्य इति । क्रोधं कृत्वा भिक्षामुत्पादयति आत्मनो यदि तदा क्रोधो नामोत्पादनदोषः तथा मानं गर्वं कृत्वा यद्यात्मनो भिक्षादिकमुत्पादयति तदा मानदोषः । मायां कुटिलभावं कृत्वा यद्यात्मनो भिक्षादिकमुत्पादयति तदा मायानामोत्पादनदोषः । तथा लोभं कांक्षां प्रदर्श्य भिक्षां यद्यात्मन उत्पादयति तदा लोभोत्पादनदोषो भावदोषादिदर्शनादिति ॥ ३४ ॥

पुनरपि तान् दृष्टान्तेन पोषयन्नाह—

कोधो य हत्थिकप्पे माणो वेणायडम्मि णयरम्मि ।

माया वाणारसिए लोहो पुण रासियाणम्मि ॥

क्रोधश्च हस्तिकल्पे मानो वेणातटे नगरे ।
माया वाराणस्यां लोभो राशियाने ॥३५॥

हस्तिकल्पपत्तने कश्चित्साधुः क्रोधेन भिक्षामुत्पादितवान् । तथा वेन्नातटनगरे कश्चित्संयतो मानेन भिक्षामुत्पादितवान् । तथा वाणारस्यां कश्चित्साधुः मायां कृत्वा भिक्षामुत्पादितवान् । तथान्यः संयतो लोभं प्रदर्श्य राशियाने भिक्षामुत्पादितवानिति । तेन क्रोधो हस्तिकल्पे, मानो वेन्नातटनगरे माया वाणारस्यां लोभो राशियाने इत्युच्यते । अत्र कथा उत्प्रेक्ष्य वाच्या इति ॥ ३५ ॥

पूर्वसंस्तुतिदोषमाह—

दायगपुरदो कित्ती तं दाणवदी जसोधरो वेत्ति ।
पुव्वीसंथुदि दोसा विस्सरिदे बोधणं चावि ॥

दायकपुरतःकीर्तिस्त्वं दानपतिः यशोधरो वा इति ।
पूर्वसंस्तुतिदोषो विस्मृते बोधनं चापि ॥

ददातीति दायको दानपतिः तस्य पुरतः कीर्तिं ख्यातं (र्ति) ब्रूते । कथं, त्वं दानपतिर्यशोधरः त्वदीया कीर्तिर्विश्रुता लोके । यद्दातुरग्रतो दानग्रहणात्प्रागेव ब्रूते तस्य पूर्वसंस्तुतिदोषो नाम जायते । विस्मृतस्य च दानसम्बोधनं

त्वं पूर्वं महादानपतिरिदानीं किमिति कृत्वा विस्मृत इति सम्बोधनं करोति यस्तस्यापि पूर्वसंस्तुतिदोषो भवतीति । यां कीर्तिं ब्रूते, यच्च स्मरणं करोति तत्सर्वं पूर्वसंस्तुतिदोषो नग्नाचार्यकर्तव्यदोषदर्शनादिति ॥ ३६ ॥

पश्चात्संस्तुतिदोषमाह—

पच्छा संथुदिदोसो दाणं गहिदूण तं पुणो कित्तिं
विक्खादो दाणवदी तुज्झ जसो विस्सुदो वेंति ।

पश्चात् संस्तुतिदोषः दानं गृहीत्वा तत् पुनःकीर्तिं ।
विख्यातः दानपतिः तव यशः विश्रुतं ब्रूते ॥

पश्चात्संस्तुतिदोषो दानमाहारादिकं गृहीत्वा ततः पुनः पश्चादेवं कीर्तिं ब्रूते विख्यातस्त्वं दानपतिस्त्वं, तव यशोविश्रुतमिति ब्रूते यस्तस्य पश्चात् संस्तुतिदोषः, कार्पण्यादिदोषदर्शनादिति ॥ ३७ ॥

विद्यानामोत्पादनदोषमाह—

विज्जा साधितासिद्धा तिस्से आसापदाणकरणेहिं
तस्से माहप्पेण य विज्जादोसो दु उप्पादो ॥

विद्या साधितासिद्धा तस्याः आशाप्रदानकरणैः ।
तस्या माहात्म्येन च विद्यादोषस्तु उत्पादः ॥

विद्या नाम साधितसिद्धा साधिता सती सिद्धा भवति तस्या विद्याया आशाप्रदानकरणेन तुभ्यमहं विद्यामिमां दास्यामि तस्याश्च माहात्म्येन यो जीवति तस्य विद्योत्पादनो नाम दोषः आहाराद्याकांक्षाया दर्शनादिति ॥ ३८ ॥

मंत्रोत्पादनदोषमाह—

सिद्धे पढिदे मंते तस्स य आसापदाणकरणेण।
तस्स य माहप्पेण य उप्पादो मंतदोसो दु ॥

सिद्धे पठिते मंत्रे तस्य च आशाप्रदानकरणेन ।
तस्य च माहात्म्येन च उत्पादो मंत्रदोषस्तु ॥

सिद्धे पठिते मंत्रे पठितमात्रेण यो मंत्रः सिद्धिमुपयाति स पठितसिद्धो मंत्रस्तस्य मंत्रस्याशाप्रदानकरणेन तवेमं मंत्रं दास्यामीत्याशाकरणयुक्तया तस्या माहात्म्येन च यो जीवत्याहारादिकं च गृह्णाति तस्य मंत्रोत्पादनदोषः । लोकमतारंजिहागृद्ध्यादिदोषदर्शनादिति ॥ ३९ ॥

अथवा विद्योत्पादनदोषो मंत्रोत्पादनदोषश्चैवं ग्राह्यः इत्याशंक्याह—

आहारदायगाणं विज्जामंतेहिं देवदाणं तु।
आहूय साधिदव्वा विज्जामंतो हवे दोसो॥४०॥

आहारदायकानां विद्यामंत्रः देवतानां तु ।

आहूय साधितव्या विद्यामंत्रः भवेत् दोषः ॥ ४० ॥

आहारदात्री भोजनदानशीला देवता व्यंतरदेवान् विद्यया मंत्रेण चाहूयानीय साधितव्यास्तासां साधनं क्रियते यद्दानार्थं स विद्यादोषो मंत्रदोषश्च भवति। अथवाऽऽहारदायकानां निमित्तं विद्यया मंत्रेण बाहूय देवतानां साधितव्यं साधनं क्रियते यत् स विद्यामंत्रदोषः। अस्य च पूर्वयोर्विद्यामंत्रदोषयोर्मध्ये निपातः इति कृत्वा नायं पृथग्दोषः पठितस्तयोरन्तर्भावादिति ॥ ४० ॥

चूर्णदोषमाह—

णेत्तस्संजणचुण्णं
भूसणचुण्णं च गत्तसोभयरं।
चुण्णं तेणुप्पादो
चुण्णयदोसो हवदि एसो ॥ ४१ ॥

नेत्रयोरंजनचूर्णं भूषणचूर्णं च गात्रशोभाकरं।
चूर्णं तेनोत्पादः चूर्णदोषो भवति एषः ॥ ४१ ॥

नेत्रयोरञ्जनं चूर्णं चक्षुषोर्निर्मलीकरणनिमित्तमञ्जनं द्रव्यरजः। तथा भूषणनिमित्तं चूर्णं येन चूर्णेन तिलकपत्रस्थल्यादयः क्रियन्ते तद्भूषणद्रव्यरजः। गात्रस्य शरीरस्य शोभाकरं च चूर्णं येन चूर्णेन शरीरस्य दीप्त्यादयो भवन्ति

तच्छरीरशोभानिमित्तं चूर्णमिति । तेन चूर्णेन योयमुत्पादो भोजनस्य क्रियते स चूर्णोत्पादनामदोषो भवत्येष जीविकादिक्रियया जीवनादिति ॥ ४१ ॥

मूलकर्मदोषं प्रतिपादयन्नाह——

अवसाणं वसियरणं
संजोजयणं च विप्पजुत्ताणं ।
भणिदं तु मूलकम्मं
एदे उप्पादणा दोसा ॥ ४२ ॥

अवशानां वशीकरणं संयोजनं च विप्रयुक्तानां ।
भणितं तु मूलकर्म एते उत्पादना दोषाः ॥ ४२ ॥

अवशानां वशीकरणं यद्विप्रयुक्तानां च संयोजनं यत्क्रियते तद्भणितं मूलकर्म । अनेन मूलकर्मणोत्पादो यो भक्तादिकस्य स मूलकर्मदोषः । सुष्ठु लज्जाद्याभोगस्य करणादिति । एते उत्पादनदोषास्तथोद्गमदोषाश्च सर्वे एते परित्याज्या अधःकर्माशदर्शनात् । एतेष्वधःकर्माशस्य सद्भावोऽस्ति यतः । तथान्ये च दोषाः जुगुप्सादयो दर्शनदूषणादयः सम्भवन्ति येभ्यस्तेऽपि परित्याज्या इति ॥ ४२ ॥

अशनदोषान् प्रतिपादयन्नाह—

संकिदमक्खिदपिहिदं

संववहरणदायगुम्मिस्से ।
अपरिणदलित्तछोडिद
एषणदोसाइं दस एदे ॥४३ ॥

शंकितम्रक्षितनिक्षिप्तपिहितसंव्यवहरणदायकोन्मिश्राः
अपरिणतलिप्तत्यक्ताः अशनदोषा दश एते ॥

शंकयोत्पन्नः शंकितः, किमयमाहारोऽधःकर्मणा निष्पन्न उत नेति शंकां कृत्वा भुंक्ते यस्तस्य शंकितनामाशनदोषः। तथा म्रक्षितस्तैलाद्यभ्यक्तस्तेन भाजनादिना दीयमानमाहारं यदि गृह्णाति म्रक्षितदोषो भवति। तथा निक्षिप्तः स्थापितः, सचित्तादिषु परिनिक्षिप्तमाहारं यदि गृह्णाति साधुस्तदा तस्य निक्षिप्तदोषः । तथा विहितश्छादितः अप्रासुकेन प्रासुकेन च महता यदवष्टब्धमाहारादिकं तदावरणमुत्क्षिप्य दीयमानं यदि गृह्णाति तदा तस्य पिहितनामाशनदोषः। तथा संव्यवहरणं दानार्थं संव्यवहारं कृत्वा यदि ददाति तद्दानं यदि साधुर्गृह्णाति तदा तस्य संव्यवहरणनामाशनदोषः तथा दायकः परिवेषकः, तेनाशुद्धेन दीयमानमाहारं यदि गृह्णाति साधुस्तदा तस्य दायकनामाशनदोषः । तथोन्मिश्रोऽप्रासुकेन द्रव्येण पृथिव्यादिसचित्तेन मिश्र उन्मिश्र इत्युच्यते तं यद्यादत्ते उन्मिश्रनामाशनदोषः । तथाऽपरिणतोऽविध्वस्तोऽन्यादिकेनापक्वस्तमाहारं पानादिकं वा यद्यादत्तेऽ

परिणतनामाशनदोषः । तथा लिप्तोऽप्रासुकवर्णादिसंसक्तस्तेन भाजनादिना दीयमानमाहारादिकं यदि गृह्णाति तदा तस्य लिप्तनामाशनदोषः । तथा छोडिदं परित्यजनं भुंजानस्यास्थिरपाणिपात्रेणाहारस्य परिशतनं गलनं परित्यजनं यत्क्रियते तत्परित्यजननामाशनदोषः । एतेऽशनदोषा दशैव भवंति ज्ञातव्या इति ॥ ४३ ॥

शंकितदोषं विवृण्वन्नाह—

असणं च पाणयं वा
खादीयमध सादियं च अज्झप्पे ।
कप्पियमकप्पियत्ति य
संदिद्धं संकियं जाणे ॥ ४४ ॥

अशनं च पानकं वा खाद्यं अथ स्वाद्यं च अध्यात्मनि कल्पितमकल्पितमिति च सदिग्धं शंकितं जानीहि

अशनं भक्तादिकं, पानकं दधिक्षीरादिकं खाद्यं लड्डुकशोकवर्त्यादिकं, अथ स्वाद्यं एलाकस्तूरीलवंगकक्कोलादिकं । वाशब्दैरत्र स्वगतभेदा ग्राह्याः । अध्यात्मे आगमे चेतसि वा कल्पितं योग्यमकल्पितमयोग्यमिति सन्दिग्धं संशयस्थं शंकितं जानीहि, आगमे किमेतन्मम कल्प्यमुत नेति यश्चेवं संदिग्धमाहारं भुंक्ते तदा शंकितनामाशनदोषं जानीहि ।

अथवाध्यात्मे चेतसि किमधःकर्मसहितमुत नेति सन्दिग्धमाहारं यदि गृह्णीयाच्छंकितं जानीहि ॥ ४४ ॥

द्वितीयं म्रक्षितदोषमाह—

ससिणिद्धेण य देयं
हत्थेण य भायणेण दव्वीए ।
एसो म्रक्खिददोसो
परिहरदव्वो सदा मुणिणा ॥४५॥

सस्निग्धेन च देयं हस्तेन च भाजनेन दर्व्या ।
एषः म्रक्षितदोषः परिहर्तव्यः सदा मुनिना ॥ ४५ ॥

सस्निग्धेन हस्तेन भाजनेन दर्व्या कटच्छुकेन यद्देयं भक्तादिकं च यदि गृह्यते तदा म्रक्षितदोषो भवति । तस्मादेष म्रक्षितदोषः परिहर्तव्यो मुनिना सम्मूर्च्छनादिसूक्ष्मदोषदर्शनादिति ॥ ४५ ॥

निक्षिप्तदोषमाह—

सचित्त पुढविआऊ
तेऊहरिदं च वीयतसजीवा ।
जं तेसिमुवरि ठविदं
णिक्खित्तं होदि छब्भेयं ॥ ४६ ॥

सचित्ताः पृथिव्यसेजोहरितानि च वीजत्रसजीवाः ।
यत्तेषामुपरि स्थापितं निक्षिप्तं भवति षड्भेदं ॥४६॥

सचित्तपृथिव्यां सचित्ताप्सु सचित्ततेजसि हरितकायेषु वीजकायेषु त्रसजीवेषु तेषूपरि यत्स्थापितमाहारादिकं तन्निक्षिप्तं भवति षड्भेदं । अथवा सह चित्तेनाप्रासुकेन वर्तते इति सचित्तं । सचित्तं च पृथिवीकायाश्चाप्कायाश्च तेजःकायाश्च हरितकायाश्च वीजकायाश्च त्रसजीवाश्च तेषामुपरि यन्निक्षिप्तं सचित्तं तत् षड्भेदं भवति ज्ञातव्यं ॥ ४६ ॥

पिहितदोषमाह—

सचित्तेण व पिहिदं
अथवा अचित्तगुरुगापिहिदं च ।
तं छंडिय जं देयं
पिहिदं तं होदि बोधव्वो ॥

सचित्तेन वा पिहितं अथवा अचित्तगुरुकपिहितं च ।
तं त्यक्त्वा यद्देयं पिहितं तत् भवति बोद्धव्यं ॥ ४७ ॥

सचित्तेन पिहितमप्रासुकेन पिहितं । अथवाऽचित्तगुरुकपिहितं वा प्रासुकेण (न) गुरुकेण यद्दातृतं तत्त्यक्त्वा यद्देयमाहारादिकं यदि गृह्यते पिहितं नाम दोषं भवति बोद्धव्यं ज्ञातव्यमिति ॥ ४७ ॥

संव्यवहारदोषमाह—

संववहरणं किच्चा
पदादुमिदि चेल भायणादीणं।
असमिक्खय जं देयं
संववहरणो हवदि दोसो ॥ ४८ ॥

संव्यवहरणं कृत्वा प्रदातुमिति चेत् भाजनादीनां ।
असमीक्ष्य यद्देयं संव्यवहरणो भवति दोषः ॥ ४८ ॥

संव्यवहरणं संझटिति व्यवहारं कृत्वा, प्रदातुमिति चेलभाजनादीनां संभ्रमेणाहरणं वा कृत्वा, प्रकर्षेण दाननिमित्तं वसुभाजनादीनां झटिति संव्यवहरणं कृत्वाऽसमीक्ष्य यद्देयं पानभोजनादिकं तद्यदि संगृह्यते संव्यवहरणं दोषो भवत्येष इति ॥ ४८ ॥

दायकदोषमाह—

सूदी सुंडी रोगी
मदयणपुंसय पिसायणग्गो य ।
उच्चारपाडिदवंतरु-
हिरवेसी समणी अंगमक्खीया ॥४९॥

सूतिः शौंडी रोगी मृतकनपुंसकपिशाचनग्नश्च ।

उच्चारपतितवांतरुधिरवेश्या श्रमणिका अंगमृक्षिका॥

सूतिः या बालं प्रसाधयति । सुंडी-मद्यपानलम्पटः । रोगी व्याधिग्रस्तः । मृतकं, मृतकं श्मशाने परिक्षिप्यागतो यः स मृतक इत्युच्यते । मृतकसूतकेन यो जुष्टः सोऽपि मृतक इत्युच्यते । नऊंसय-न स्त्री न पुमान् नपुंसकमिति जानीहि । पिशाचो वातादूयुपहतः । नग्नः पटाद्यावरणरहितो गृहस्थः । उच्चारं मूत्रादीन् कृत्वा य आगतः स उच्चार इत्युच्यते। पतितो मूर्च्छागतः । वान्तश्छर्दिं कृत्वा य आगतः । रुधिरं रुधिरसहितः । वेश्या दासी । श्रमणिकाऽऽर्यिका । अथवा पंचश्रमणिका रक्तपटिकादयः । अंगम्रक्षिका अंगाभ्यंगनकारिणी । ॥ ४९ ॥ तथा—

अतिबाला अतिवुड्ढा
घासत्ती गब्भिणी य अंधलिया ।
अंतारिदा व णिसण्णा
उच्चत्था अहव णीचत्था ॥ ५० ॥

अतिबाला अतिवृद्धा ग्रासयंती च गर्भिणी च अंधलिका अंतरिता वा निषण्णा उच्चस्था अथवा नीचस्था ॥ ५०

अतिबाला अतिमुग्धा, अतिवृद्धा अतीवजराग्रस्ता । ग्रासयन्ती भक्षयन्ती उच्छिष्टा । गर्भिणी गुरुभारा पंचमा-

सिका। अंधलिका चक्षूरहिता। अन्तरिता कुड्यादिभिर्व्यवहिता। आसीनोपविष्टा। उच्चःस्था उन्नतप्रदेशस्थिता। नीचस्था निम्नप्रदेशस्थिता। एवं पुरुषो वा वनिता च यदि ददाति तदा न ग्राह्यं भोजनादिकमिति ॥ ५० ॥ तथा—

पूयण पज्जलणं वा
सारण पच्छादणं च विज्झवणं।
किच्चा तहाग्गिकज्जं
णिव्वादं घट्टणं चावि ॥ ५१

फूत्करणं प्रज्वालनं वा सारणं प्रच्छादनं च विध्यापनं कृत्वा तथाग्निकार्यं निर्वातं घट्टनं चापि ॥ ५१ ॥

पूयण—संधुक्षणं मुखवातेनान्येन वा अग्निना काष्ठादीनां प्रज्वालनं प्रद्योतनं वा सारणं काष्ठादीनामुत्कर्षणं, प्रच्छादनं भस्मादिना विध्यापनं जलादिना कृत्वा तथान्यदपि अग्निकार्यं, निर्वातं निर्वाणं काष्ठादिपरित्यागः, घट्टनं चापि कुड्यादिनावरणं ॥ ५१ ॥ तथा—

लेवणमज्जणकम्मं
पियमाणं दारयं च णिक्खिविय।
एवंविहादिया पुण

दाणं जदि दिंति दायगा दोसा ॥

लेपनमार्जनकर्म पिबंतं दारकं च निक्षिप्य ।
एवंविधादिकाःपुनः दानं यदि ददाति दायका दोषाः॥

लेपं गोमयकर्दमादिना कुड्यादेर्मार्जनं स्नानादिकं कर्म कृत्वेति सम्बंधः । पिबन्तं दारकं च स्तनमाददानं बालं निक्षिप्य त्यक्त्वा, अन्यांश्चैवंविधादिकान् कृत्वा पुनर्दानं यदि दत्ते दायकदोषा भवन्तीति ॥ ५२ ॥

उन्मिश्रदोषमाह ।

पुढवी आऊ य तहा हरिदा बीया तसा य सज्जीवा।
पंचेहिं तेहिं मिस्सं आहारं होदि उम्मिस्सं॥ ५३॥

पृथिव्यापश्च तथा हरिता बीजानि त्रसाश्च सजीवाः।
पंचभिस्तैः मिश्र आहारः भवति उन्मिश्रः ॥

पृथिवी मृत्तिका, आपश्चाप्कायिकाः, तथा हरितकाया पत्रपुष्पफलादयः । बीयाणि-बीजानि यवगोधूमादयः । त्रसाश्च सजीवा निर्जीवाः पुनर्मलपक्वे भविष्यन्ति दोषा इति । तैः पंचभिर्मिश्र आहारो भवत्युन्मिश्रः सर्वथा वर्जनीयो महादोषइति कृत्वेति ॥ ५३ ॥

अपरिणतदोषमाह-

तिलतंडुलउसणोदय
चणोदय तुसोदयं अविद्धत्थं ।
अण्णं तहाविहं वा
अपरिणदं णेव गेण्हिज्जो ॥ ५४ ॥

तिलतंडुलोष्णोदकं चणोदकं तुषोदकं अविध्वस्तं ।
अन्यं तथाविधं वा अपरिणतं नैव गृह्णीयात् ॥ ५४ ॥

तिलोदकं तिलप्रक्षालनं । तंदुलोदकं तंदुलप्रक्षालनं । उष्णोदकं तप्तं भूत्वा शीतं च चणोदकं चणप्रक्षालनं । तुषोदकं तुषप्रक्षालनं । अविध्वस्तमपरिणतं आत्मीयवर्णगन्धरसापरित्यक्तं । अन्यदपि तथाविधमपरिणतं हरीतकीचूर्णादिना अविध्वस्तं । नैव गृण्हीयात् नैव ग्राह्यमिति । एतानि परिणतानि ग्राह्याणीति ॥ ५४ ॥

लिप्तदोषं दिदृक्षयन्नाह—

गेरुय हरिदालेण व
सेडीय मणोसिलामपिट्ठेण ।
सपवालोदणलेवे
ण व देयं करभायणे लित्तं ॥ ५५ ॥

गैरिकया हरितालेन वा

सेटिकया मनःशिलया आमापिष्टेन।
सप्रवालोदनलेपेन वा
देयं करभाजने लिप्तं ॥ ५५ ॥

गैरिकया रक्तद्रवेण, हरितालेन सेढिकया षटिकया पांडुमृत्तिकया, मनःशिलया आमपिष्टेन वा तंदुलादिचूर्णेन सप्रवालेन अपक्वशाकेन अप्रासुकोदकेन वा आर्द्रेणैव हस्तेन भाजनेन वा यद्देयं तल्लिप्तं नाम दोषं विजानीहि ॥ ५५ ॥

परिजनदोषमाह—

बहु परिसाडणमुज्झिअ
आहारो परिगलंत दिज्जंतं।
छंडिय भुंजणमहवा
छांडियदोसो हवे णेओ ॥ ५६ ॥

बहु पारिसातनमुज्झित्वा आहारं पारिगलंतं दीयमानं।
त्यक्त्वा भुंजनमथवा त्यक्तदोषो भवेत् ज्ञेयः ॥५६॥

बहुपरिसातनमुज्झित्वा बहुप्रसातनं कृत्वा भोज्यं स्तोकं त्याज्यं बहुपात्रद्वारेण सोऽपि बहुपरिसातनमित्युच्यते। आहारं परिगलंतं दीयमानं तक्रघृतोदकादिभिः परिस्रवंतं छिद्रहस्तैश्च बहुपरिसातनं च कृत्वाहारं यदि गृण्हाति त्यक्त्वा चै-

कमाहारमपरं भुंक्ते यस्तस्य त्यक्तदोषो भवति। एते अशनदोषाः दश परिहरणीयाः । सावद्यकारणाज्जीवदयाहेतोर्लोकजुगुप्सा ततश्चेति ॥ ५६ ॥

संयोजनाप्रमाणदोषानाह—

संजोयणा य दोसो
जो संजोएदि भत्तपाणं तु ।
अदिमत्तो आहारो
पमाणदोसो हवदि एसो ॥ ५७ ॥

संयोजनं च दोषः यः संयोजयति भक्तपानं तु ।
अतिमात्र आहारः प्रमाणदोषो भवति एषः ॥ ५७ ॥

संयोजनं च दोषो भवति। यः संयोजयति भक्तं पानं तु। शीतं भक्तं पानेनोष्णेन संयोजयति । शीतं वा पानं उष्णेन भक्तादिना संयोजयति । अन्यदपि विरुद्धं परस्परं यत्तद्यदि संयोजयति तस्य संयोजननाम दोषो भवति । अतिमात्र आहारः—अशनस्य सव्यंजनस्य तृतीयभागमुदकस्योदरस्य यः पूरयति, चतुर्थभागं चावशेषयति यस्तस्य प्रमाणभूत आहारो भवति, अस्मादन्यथा यः कुर्यात्तस्यातिमात्रो नामाहारदोषो भवति । प्रमाणातिरिक्ते आहारे गृहीते स्वाध्यायो न प्रवर्तते, षडावश्यकक्रियाः कर्तुं न शक्यंते, ज्वरादयश्च संतापयन्ति, निद्रालस्यादयश्च दोषा जायंते इति ॥ ५७ ॥

अंगारधूमदोषानाह-

तं होदि सयंगालं
जं आहारेदि मुच्छिदो संतो।
तं पुण होदि सधूमं
जं आहारेदि णिंदिदो ॥ ५८ ॥

तद् भवति सांगारं यत् आहरति मूर्च्छितः सन्।
तत् पुनः भवति सधूमं यत् आहरति निंदितः॥ ५८ ॥

यदि मूर्च्छितः सन् गृद्धया मुक्तः आहारमभ्यवहरति भुंक्ते तदा तस्य पूर्वोक्तोऽङ्गारादिदोषो भवति, सुष्ठु गृद्धिदर्शनादिति। तत्पुनर्भवति स पूर्वोक्तो धूमो नाम दोषः, यस्मादाहरति निंदन जुगुप्समानो विरूपकमेतदनिष्टं मम, एवं कृत्वा यदि भुंक्ते तदानीं धूमो नाम दोषो भवत्येव, अन्तःसंक्लेशदर्शनादिति ॥ ५८ ॥

कारणमाह—

छहिं कारणेहिं असणं
आहारंतो वि आयरदि धम्मं।
छहिं चेव कारणेहिं दु
णिज्जुहवंतो वि आचरदि॥ ५९॥

षड्भिः कारणैः अशनं आहरन्नपि आचरति धर्मं ।
षड्भिः चैव कारणैः तु उज्झन्नपि आचरति ॥ ५९ ॥

षड्भिः कारणैः प्रयोजनैस्तु निरवशेषमशनमाहारं भोज्यखाद्यलेह्यपेयात्मकमभ्यवहरन्नपि भुंजानोऽप्याचरति चेष्टयति-अनुष्ठानं करोति धर्मं चारित्रं । तथैव षड्भिः कारणैः प्रयोजनैस्तु निरवशेषं जुगुप्सन्नपि परित्यजन्नप्याचरति प्रतिपालयति धर्ममिति संबधः । निष्कारणं यदि भुंक्ते भोज्यादिकं तदा दोषः, कारणैः पुनर्भुंजानोऽपि धर्ममाचरति साधुरिति सम्बन्धः । तथापरैः प्रयोजनैः परित्यजन्नपि भोज्यादिकं धर्ममेवाचरति नाशनपरित्यागे दोषः सकारणत्वात्परित्यागस्येति ॥ ५९ ॥

कानि तानि कारणानि यैर्भुंक्तेऽशनमित्याशंकायामाह—

वेणयवेज्जावच्चे किरियाठाणे य संजमट्ठाए ।
तध पाणधम्मचिंता कुज्जा एदेहिं आहारं ॥६०॥

वेदनावैयावृत्त्ये क्रियार्थं च संयमार्थं ।
तथा प्राणधर्मचिंता कुर्यात् एतैः आहारं ॥ ६० ॥

वेदनां क्षुद्वेदनामुपशमयामीति भुंक्ते । वैयावृत्यमात्मनोऽन्येषां च करोमीति वैयावृत्यार्थं भुंक्ते । क्रियार्थं षडावश्यकक्रिया मम भोजनमन्तरेण न प्रवर्तते इति ताः प्रतिपालयामी-

ति भुंक्ते । संयमार्थं त्रयोदशविधं संयमं पालयामीति भुंक्ते, अथवाहारमन्तरेणेन्द्रियाणि मम विकलानि भवन्ति तथा सति नीवदयां कर्तुं न शक्नोमीति प्राणसंयमार्थं इन्द्रियसंयमार्थं च भुंक्ते, तथा प्राणचिन्तया भुंक्ते, प्राणा दशप्रकारास्तिष्ठन्ति ममाहारमन्तरेण, विशेषेणायुर्न तिष्ठतीत्येवं प्राणार्थं भुंक्ते । तथा धर्मचिन्तया भुंक्ते धर्मो दशप्रकारः उत्तमक्षमादिलक्षणो मम वशे न तिष्ठति भोजनमंतरेण, क्षमां मार्दवमार्जवं चेत्यादिकं कर्तुं न शक्नोत्ययं जीवोऽशनमन्तरेणेति भुंक्ते । नातिमात्रं धर्मसंयमयोः पुनरैक्यं क्षमादिभेददर्शनादिति । एभिः षड्भिः कारणैराहारं कुर्यात्यतिरिति सम्बन्धः ॥ ६० ॥

अथ यैः कारणैस्त्यजत्याहारं कानि तानीत्याशंकायामाह—

आदंके उवसग्गे तिरक्खणे बंभचेरगुत्तीओ ।
पाणिदयातवहेऊ सरीरपरिहार वेच्छेदो ॥ ६१ ॥

आतंके उपसर्गे तितिक्षायां ब्रह्मचर्यगुप्तेः ।
प्राणिदयातपोहेतौ शरीरिपरिहारे व्युच्छेदः ॥ ६१ ॥

आतंके आकस्मिकोत्थितव्याधौ मारणान्तिकपीडायां सहितायां बाह्यजातायामाहारव्युच्छेदः परित्यागः । तथोपसर्गे दीक्षाविनाशहेतौ देवमानुषतिर्यग्चेतनकृते समुपस्थिते भोजनपरित्यागः । तितिक्षणायां ब्रह्मचर्यगुप्तेः सुष्ठु निर्मलीकरणे सप्तधातुक्षयायाहारव्युच्छेदः । तथा प्राणिदयाहेतौ

यद्याहारं गृह्णामि बहुप्राणिनां घातो भवति तस्माद्यद्याहारं न गृह्णामीति जीवदयानिमित्तमाहारव्युच्छेदः । तथा तपोहेतौ द्वादशविधे तपस्यनशनं नाम तपस्तदद्य करोमीति तपो निमित्तमाहारव्युच्छेदः । तथा शरीरपरिहारे संन्यासकाले जरा मम श्रामण्यहानिकरी, रोगेण च दुःसाध्यतमेन जुष्टः, करणविकलत्वं च मम संजातं स्वाध्यायक्षतिश्च दृश्यते, जीवितव्यस्य च ममोपायो नास्तीत्येवं कारणे शरीरपरित्यागस्तन्निमित्तो भक्तादिव्युच्छेदः । एतैः षड्भिः कारणैराहारपरित्यागः कार्यः । न पूर्वैः सह विरोधो विषयविभागदर्शनादिति, क्षुद्वेदनादिषु सत्स्वपि आतंकः स्यात्, यदि प्रचुरजीवहत्या वा दृश्यते ततो भोजनादिपरित्यागं, शरीर पीडारहितस्य तपोविधानमिति न विरोधो विषयभेददर्शनादिति । आहारोऽत्रानुवर्तते तेन सह संबंधो व्युच्छेदस्येति ॥

एतदर्थं पुनराहारं न कदाचिदपि कुर्यादिति प्रपंचयन्नाह—

ण बलाउसाउअट्ठं ण सरीरस्सुवचयट्ठ तेजट्ठं ।
णाणट्ठ संजमट्ठं झाणट्ठं चेव भुंजेज्जो ॥ ६२ ॥

न बलायुःस्वादार्थं न शरीरस्योपचयार्थं तेजोर्थं ।
ज्ञानार्थं संयमार्थं ध्यानार्थं चैव भुंजीत ॥ ६२ ॥

न बलार्थं-मम बलं युद्धादिक्षमं भूयादित्येवमर्थं न भुंक्ते नायुषोर्थं-ममायुर्वृद्धिं यात्विति न भुंक्ते । न स्वादार्थं, शोभ-

नोऽस्य स्वादो भोजनस्येत्येवमर्थं न भुंक्ते । न शरीरस्योपचयार्थं, शरीरं मम पुष्टं मांसवृद्धं वा भवत्विति न भुंक्ते । नापि तेजोऽर्थं, शरीरस्य मम दीप्तिः स्यादर्पो वेति न भुंजीताहारमिति । यद्येवमर्थं न भुंक्ते किमर्थं तर्हि भुंक्तेऽत आह-ज्ञानार्थं, ज्ञानं स्वाध्यायो मम प्रवर्ततामिति भुंक्ते । संयमार्थं, संयमो मम स्यादिति भुंक्ते । ध्यानार्थं चैव, आहारमन्तरेण न ध्यानं प्रवर्तते यतो भुंक्ते यतिरिति । तथापि भुंक्ते इत्यत आह ॥ ६२ ॥

णवकोडीपरिसुद्धं असणं बादालदोसपरिहीणं।
संजोजणाय हीणं पमाणसहियं विहिसुदिण्णं ॥

नवकोटिपरिशुद्धं अशनं द्वाचत्वारिंशद्दोषपरिहीनं ।
संयोजनया हीनं प्रमाणसहितं विधिसुदत्तं ॥ ६३ ॥

नवकोटिपरिशुद्धं । कास्ताः कोट्यो मनसा कृतकारितानुमतानि तिस्रः कोट्यः, तथा वचसा कृतकारितानुमतानि तिस्रः कोट्यः, तथा कायेन कृतकारितानुमतानि तिस्रः कोट्य एताभिः कोटिभिः परिशुद्धमशनं, द्विचत्वारिंशद्दोषपरिहीणं उद्गमोत्पादैषणादोषरहितं, संयोजनयारहितं, प्रमाणसहितं, विधिना दत्तं प्रतिग्रहोच्चस्थानपादोदकार्चनाप्रणमनमनोवचनकायशुद्धयशनशुद्धिभिर्दत्तमुपनीतं, श्रद्धाभक्तितुष्टिविज्ञानालुब्धताक्षमाशक्तियुक्तेन दात्रेति ॥ ६३ ॥ तथा—

विगदिंगालधूमं छक्कारणसंजुदं कमविसुद्धं ।
जत्तासाधणमेत्तं चोद्दसमलवज्जिदं भुंजे ॥६४॥

विगतांगारं विधूमं षट्कारणसंयुक्तं क्रमविशुद्धं ।
यात्रासाधनमात्रं चतुर्दशमलवर्जितं भुंक्ते ॥ ६४ ॥

विगतांगारं, विगतधूमं, षट्कारणसंयुक्तं क्रमविशुद्धभुक्तमहीनं, यात्रासाधनमात्रं प्राणसंधारणार्थं अथवा मोक्षयात्रासाधननिमित्तं, चतुर्दशमलवर्जितं भुंक्ते साधुरिति संबन्धः ॥

अथ कानि चतुर्दशमलानीत्याह—

णहरोमजंतुअट्ठी—
कणकुंडयपूयिचम्मरुहिरमंसाणि
बीयफलकंदमूला
छिण्णाणि मला चउद्दसा होंति ॥

नखरोमजंत्वस्थिकणकुंडपूतिचर्मरुधिरमांसानि ।
बीजफलकंदमूलानि छिन्नानि मलानि चतुर्दश भवंति

नखो, हस्तपादाङ्गुल्याग्रप्रभा (भ)वो मनुष्यजातिप्रतिबद्धतिर्यग्जातिप्रतिबद्धो वा रोमवालः सोपि मनुष्यतिर्यग्जातः । जन्तुर्जीवः प्राणिरहितशरीरं । अस्थि कंकालं कणः यवगोधूमादीनां बहिरवयवः । कुंडयादिशाल्यादीना-

मभ्यन्तरसूक्ष्मावयवाः । पूयं, पक्करुधिरं व्रणक्लेदः चर्मशरीरत्वक्प्रथमधातुः । रुधिरं द्वितीयो धातुः । मांसं रुधिराधारं तृतीयो धातुः । बीजानि प्रा(प्र)रोहयोग्यावयवगोधूमादयः । फलानि जम्बाम्राम्बाडकफलानि । कंदः कंदलयधःप्ररोहकारणं । मूलं (लं) पिप्पलाद्यधःप्ररोहनिमित्तं । छिन्नानि पृथग्भूतानि मलानि चतुर्दश भवन्ति । कानिचिदत्र महामलानि, कानिचिदल्पानि, कानिचिन्महादोषाणि, कानिचिदल्पदोषाणि । रुधिरमांसास्थिचर्मपूयानि महादोषाणि सर्वाहारपरित्यागेऽपि प्रायश्चित्तकारणानि द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियशरीराणि बालाश्चाहारत्यागकारणनिमित्तानि । नखेनाहारः परित्यज्यते । किंचित्प्रायश्चित्तं क्रियते । कणकुंडबीजकंदफलमूलानि परिहारयोग्यानि यदि परिहर्तुं न शक्यन्ते भोजनपरित्यागः क्रियते । तथा स्वशरीरे सिद्धभक्तौ कृतायां यदि रुधिरं पूयं च गलति पारिवेशकशरीराद्वा तदाहारस्य त्यागः । तद्दिवसेऽस्य मांसस्य पुनर्दर्शनेनाष्टप्रकारायां पिंडशुद्धौ न पठितानीति पृथगुच्यन्ते इति ॥ ६५ ॥

दोषरहितं भुंक्ते यतिरित्युक्ते किं तद्भुंक्ते इत्याशंकायामाह-

पगदा असओ जह्मा तह्मादो दव्वदोत्ति तं दव्वं ।
फासुगमिदि सिद्धेवि य
अप्पट्ठकदं असुद्धं तु ॥ ६६ ॥

प्रगता असवो यस्मात् द्रव्यत इति तत् द्रव्यं ।
प्रासुकमिति सिद्धेपि च आत्मार्थकृतं अशुद्धं तु॥६६

द्रव्यभावतः प्रासुकं द्रव्यं भुंक्ते । द्रव्यगतप्रासुकमाह— प्रगता असवः प्राणिनो यस्मात्तस्माद्द्रव्यतः शुद्धमिति तद्द्रव्यं यत्रैकेन्द्रिया जीवा न सन्ति न विद्यन्ते स आहारस्तद्द्रव्यतः शुद्धः, द्वीन्द्रियादयः पुनर्यत्र सजीवा निर्जीवा वा सन्ति स आहारो दूरतः परिवर्जनीयो द्रव्यतोऽशुद्धत्वादिति । प्रासुकमिति अनेन प्रकारेण प्रासुकं सिद्धं निष्पन्नमपि द्रव्यं यद्यात्मार्थं कृतमात्मनिमित्तं कृतं चिन्तयति तदा द्रव्यतः शुद्धमप्यशुद्धमेव ॥ ६६ ॥

कथं परार्थकृतं शुद्धमित्याशंकायां दृष्टान्तेनार्थमाह—

जह मच्छयाण पयदे मदणुदये मच्छया हि मज्जंति
ण हि मंडूगा एवं परमट्ठकदे जदि विसुद्धो॥६७

यथा मत्स्यानां प्रकृते मदनोदके मत्स्या हि मज्जंति ।
न हि मंडूका एवं परमार्थकृते यतिः विशुद्धः ॥६७॥

यथा मत्स्यानां प्रकृते मदनोदके यथा मत्स्यानां निमित्ते कृते मदनकारणे जले मत्स्या हि स्फुटं माद्यन्ति विह्वलीभवन्ति न हि मण्डूका भेका नैव माद्यन्ति । यस्मिन्जले

मत्स्यास्तस्मिन्नेव मण्डूका अपि तथापि ते न विपद्यन्ते तद्धेतोरभावात् । एवं परार्थे कृते भक्षादिके प्रवर्तमानोऽपि यतिर्विशुद्धस्तद्भवेन दोषेण न लिप्यते । कुटुम्बिनोऽधःकर्मादिदोषेण गृह्यन्ते न साधवः । तेन कुटुम्बिनः साधुदानफलेन तं दोषमपास्य स्वर्गगामिनो मोक्षगामिनश्च भवन्ति सम्यग्दृष्टयः, मिथ्यादृष्टयः पुनर्भोगभुवमवाप्नुवंति न दोष इति ॥ ६७ ॥

भावतः शुद्धमाह—

आधाकम्मपरिणदो
फासुगदव्वेवि बंधओ भणिओ ।
सुद्धं गवेसमाणो
आधाकम्मेवि सो सुद्धो ॥ ६८ ॥

अधःकर्मपरिणतः प्रासुकद्रव्येपि बंधको भणितः ।
शुद्धं गवेषयमाणः अधःकर्मण्यपि स शुद्धः ॥ ६८ ॥

प्रासुके द्रव्ये सति यद्यधःकर्मपरिणतो भवति साधुर्यद्यात्मार्थं कृतं मन्यते गौरवेण तदासौ बन्धको भणितः कर्म बध्नाति शुद्धं पुनर्गवेषयमाणोऽधःकर्मविशुद्धं कृतकारितानुमतिरहितं यत्नेन पश्यन्नधःकर्मणि सत्यपि शुद्धोऽसौ यद्यप्यधःकर्मणा निष्पन्नोऽसावाहारस्तथापि साधोर्न बंधहेतुः कृतादिदोषाभावादिति ॥ ६८ ॥

सव्वोवि पिंडदोसो
दव्वे भावे समासदो दुविहो ।
दव्वगदो पुण दव्वे
भावगदो अप्पपरिणामो ॥ ६९ ॥

सर्वः अपि पिंडदोषः द्रव्ये भावे समासतो द्विविधः द्रव्यगतो पुनः द्रव्ये भावगतो आत्मपरिणामः ६९

सर्वोऽपि पिण्डदोषो द्रव्यगतो भावगतश्च समासतो द्विप्रकारः । द्रव्यमुद्गमादिदोषसहितमप्यधःकर्मणा युक्तं द्रव्यगतमित्युच्यते तस्माद्द्रव्यगतः पुनर्द्रव्यमिति । भावतः पुनरात्मपरिणामः शुद्धमपि द्रव्यं परिणामानामशुद्धयाऽशुद्धमिति तस्माद्भावशुद्धिर्यत्नेन कार्या । भावशुद्धया सर्वं तपश्चरणं ज्ञानदर्शनादिकं च व्यवस्थितमिति ॥ ६९ ॥

द्रव्यस्य भेदमाह—

सव्वेसणं च वि-
हेसणं च सुद्धासणं च ते कमसो ।
एसणसामिदिविसुद्धं
णिव्वियडमवंजणं जाणं ॥ ७० ॥

सर्वैषणं च विद्वैषणं च शुद्धाशनं च ते क्रमशः ।

एषणासमितिविशुद्धं निर्विकृतमव्यंजनं जानीहि ७०

सुवैषणं चशब्देनासुवैषणं, विद्धैषणं चशब्देनाविद्धैषणं शुद्धाशनं चशब्देनाशुद्धाशनं च ग्राह्यं । एषणासमितिविशुद्धं सुवैषणमित्युच्यते । तथा विकृतेः पंचरसेभ्यो निष्क्रान्तं निर्विकृतं गुडतैलघृतदधिदुग्धशाकादिरहितं सौवीरशुष्कतक्रादिसमन्वितं विद्धैषणमित्युच्यते । तथा सौवीरशुष्कतक्रादिभिर्वर्जितमव्यञ्जनं पाकादवर्तार्णरूपं मनागप्यन्यथा न कृतं शुद्धाशनमिति क्रमशो यथानुक्रमेण जानीहि । एतत्त्रिविधं द्रव्यमशनयोग्यं । अमर्वाशिनं सर्वरससमन्वितं सर्वव्यञ्जनैश्च सहितं कादाचित्कयोग्यं कादाचित्कयोग्यमिति । एवमनेन न्यायेनैषणासमितिर्व्याख्याता भवति ॥ ७० ॥

तां कथं कुर्यादित्याशंकायामाह—

दव्वं खेत्तं कालं
भावं बलवीरियं च णाऊण ।
कुज्जा एषणसमिदिं
जहोवदिट्ठं जिणमदम्मि ॥ ७१ ॥

द्रव्यं क्षेत्रं कालं भावं बलवीर्यं च ज्ञात्वा ।
कुर्यात् एषणासमितिं यथोपदिष्टां जिनमते ॥ ७१ ॥

द्रव्यमाहारादिकं ज्ञात्वा, तथक्षेत्रं जांगलानूपरूक्ष-

स्निग्धादिकं ज्ञात्वा, तथा कालं शीतोष्णवर्षादिकं ज्ञात्वा तथा भावमात्मपरिणामं श्रद्धामुत्साहं ज्ञात्वा, तथा शरीरबलमात्मनो ज्ञात्वा, तथात्मनो वीर्यं संहननं ज्ञात्वा कुर्यादशनसमितिं जिनागमे यथोपदिष्टामिति। अन्यथा यदि कुर्याद्वातपित्तश्लेष्मादिसमुद्भवः स्यादिति ॥ ७२ ॥

भोजनविभागपरिणामाह—

अद्धमसणस्स सव्विं-
जणस्स उदरस्स तदियमुदयेण ।
वाऊ संचरणट्ठं
चउत्थमवसेसये भिक्खू ॥ ७२ ॥

अर्धं अशनेन सव्यंजनेन उदरस्य तृतीयं उदकेन ।
वायोः संचरणार्थं चतुर्थमवशेषयेत् भिक्षुः ॥ ७२ ॥

उदरस्यार्धं सव्यञ्जनेनाशनेन पूरयेत्तृतीयभागं चोदरस्योदकेन पूरयेद्वायोः संचरणार्थं चतुर्थभागमुदरस्यावशेषयेदित्यर्थः। चतुर्थभागमुदरस्य तुच्छं कुर्याद्येन षडावश्यकक्रियाः सुखेन प्रवर्तन्ते, ध्यानाध्ययनादिकं च न हीयते, अजीर्णादिकं च न भवेदिति ॥ ७२ ॥

भोजनयोग्यकालमाह—

सूरुदयत्थमणादो

णालीतिय वज्जिदे असणकाले।
तिगदुगएगमुहुत्ते
जहण्णमज्झिम्ममुक्कस्से ॥ ७३ ॥

सूर्योदयास्तमनयोर्नाडीत्रिकवर्जितयोः अशनकाले त्रिकद्विकैकमुहूर्ताः जघन्यमध्यमोत्कृष्टाः ॥ ७३ ॥

सूर्योदयास्तमनयोर्नाडीत्रिकवर्जितयोर्मध्येऽशनकालः। तस्मिन्नशनकाले त्रिषु मुहूर्तेषु भोजनं जघन्याचरणं द्वयोर्मुहूर्तयोरशनं मध्यमाचरणं एकस्मिन् मुहूर्तेऽशनमुत्कृष्टाचरणमिति सिद्धिभक्तौ कृतायां परिणाममेतन्न भिक्षामलभमानस्य पर्यटत इति ॥ ७३ ॥

भिक्षार्थं प्रविष्टो मुनिः किं कुर्वन्नाचरतीत्याह—

भिक्खा चरियाए पुण गुत्तीगुणसीलसंजमादीणं
रक्खंतो चरदि मुणी णिव्वेदतिगं च पेच्छंतो ७४

भिक्षाचर्यायां पुनः गुप्तिगुणशीलसंयमादीनां।
रक्षन् चरति मुनिर्निर्वेदत्रिकं च प्रेक्ष्यमाणः ॥ ७४॥

भिक्षाचर्यायां प्रविष्टो मुनिर्मनोगुप्तिं वचनगुप्तिं कायगुप्तिं रक्षंश्चरति। गुणान् मूलगुणान् रक्षंश्चरति। तथा शीलसंयमादींश्च रक्षंश्चरति। निर्वेदत्रिकं चापेक्ष्यमाणः शरीरवैराग्यं संसारवैराग्यं चापेक्ष्यमाण इत्यर्थः। तथा—

आणा अणवत्थावि य मिच्छत्ताराहणादणासो य
संजमविराधणावि य चरियाए परिहरेदव्वा ७५

आज्ञा अनवस्थापि च मिथ्यात्वाराधनात्मनाशश्च ।
संयमविराधनापि च चर्यायां परिहर्तव्याः ॥ ७५ ॥

आणा--आज्ञा वीतरागशासनं रक्षयन् पालयंश्चरतीति सम्बन्धः । एतांश्च परिहरंश्चरति अनवस्था स्वेच्छाप्रवृत्तिरपि च, मिथ्यात्वाराधनं सम्यक्त्वप्रतिकूलाचरणं, आत्मनाशः स्वप्रतिघातः, संयमविराधना चापि चर्यायां परिहर्तव्याः । भिक्षाचर्यायां प्रविष्टो मुनिरनवस्था यथा भवति तथा चरति मिथ्यात्वाराधनात्मनाशः संयमविराधनाश्च यथा न भवन्तीति तथान्तरायांश्च परिहरंश्चरति ॥ ७५ ॥

केतेऽन्तराया इत्याशंक्याह—

कागा मेज्झा छद्दी रोहण रुहिरं च अस्सुवादं च ।
जण्हूहिट्ठामरिसं जण्हुवरि वदिक्कमो चेव ॥ ७६ ॥

काकोऽमेध्यं छर्दिः रोधनं रुधिरं चाश्रुपातश्च ।
जान्वधः आमर्शः जानूपरि व्यतिक्रमश्चैव ॥ ७६ ॥

काक उपलक्षणार्थो गृहीतस्तेन काकवकश्येनादयः परिगृह्यन्ते । गच्छतः स्थितस्य वा काकादयो यदुपरि व्युत्सर्गं कुर्वन्ति तदपि काक इत्युच्यते साहचर्यात् काको नाम भोज-

नस्यान्तरायः । तथाऽमेध्यमशुचि तेन पादादिकं यल्लिप्तं तदप्यमेध्यमिति साहचर्यात्, अमेध्य नामान्तरायः । तथा छर्दिर्वमनमात्मनो यदि भवति । तथा रोधनं यदि कश्चिद्धरणादिकं करोति । तथा रुधिरमात्मनोऽन्यस्य वा यदि पश्यति । चशब्देन पूयादिकं च ग्राह्यं । तथाऽश्रुपातो दुःखेनात्मनो यद्यश्रूण्यागच्छन्ति परेषामपि सन्निकृष्टानां यद्ययं दोषो भवेत् । तथा जान्वधः आमर्शो जान्वधः परामर्शः । तथा जानूपरि व्यतिक्रमश्चैव । सर्वत्रान्तरायेण सम्बन्ध इति । तथा-

णाभिअधोणिग्गमणं पच्चक्खियसेवणा य जंतुवहो
कागादिपिंडहरणं पाणीदो पिंडपडणं च ॥ ७७॥

नाभ्यधोनिर्गमनं प्रत्याख्यातसेवना च जंतुवधः ।
काकादिपिंडहरणं पाणितः पिंडपतनं च ॥ ७७ ॥

नाभ्यधो निर्गमनं नाभेरधो मस्तकं कृत्वा यदि निर्गमनं भवेत् । तथा प्रत्याख्यातस्य सेवना च, अवग्रहो यस्य वस्तुनस्तस्य यदि भक्षणं स्यात् । तथा जन्तुवधः आत्मनोऽन्येन वा पुरतो जीववधो यदि क्रियते । तथा काकादिभिः पिंडहरणं यदि काकादयः पिण्डमपहरन्ति । तथा पाणिपात्रात्पिण्डपतनं भुंजानस्य पाणिपुटाद्यदि पिण्डो ग्रासमात्रं वा पतति ॥ ७७ ॥ तथा-

पाणीए जंतुवहो मंसादीदंसणे य उवसग्गो ।

पादंतरम्मि जीवो संपादो भायणाणं च॥ ७८ ॥
पाणौ जंतुवधः मांसादिदर्शनं च उपसर्गः ।
पादांतरे जीवसंपातो भाजनानां च ॥ ७८ ॥

पणिपात्रे जन्तुवधो जन्तुरात्मनागत्य पाणौ भुंजानस्य यदि म्रियते । तथा मांसादिदर्शनं मांसं मृतपंचेन्द्रियशरीरं इत्येवमादीनां दर्शनं यदि स्यात् । तथोपसर्गो देविकादुपसर्गो यदि स्यात् । तथा पादान्तरे पंचेन्द्रियजीवो यदि गच्छेत् । तथा सम्पातो भाजनस्य परिवेषकहस्तादू भाजनं यदि पतेत् ॥ ७८ ॥ तथा—

उच्चारं पस्सवणं अभोजगिहपवेसणं तहा पडण ।
उववेसणं सदंसं भूमीसंफास णिट्ठुवणं ॥ ७९ ॥
उच्चारः प्रस्रवणं अभोज्यगृहप्रवेशनं तथा पतनं ।
उपवेशनं सदंशः भूमिसंस्पर्शः निष्ठीवनं ॥ ७९ ॥

उच्चार आत्मनो यद्युदरमलव्युत्सर्गः स्यात् । तथात्मनः प्रस्रवणं मूत्रादिकं यदि स्यात् । तथा पर्यटतोऽभोजनगृहप्रवेशो यदि भवेत् चंडालादिगृहप्रवेशो यदि स्यात् । तथा पतनमात्मनो मूर्च्छादिना यदि पतनं भवेत् । तथोपवेशनं यद्युपविष्टो भवेत् । तथा सदंशः सह दंशेन वर्तते इति सदंशः श्वादिभिर्यदि दष्टः स्यात् । तथा भूमिसंस्पर्शः सि द्धभक्तौ

कृतायां हस्तेन भूमिं यदि स्पृशेत्। तथा निष्ठीवनं स्वेन यदि श्लेष्मादिकं क्षिपेत् ॥ ७९ ॥ तथा—

उदरा किमिणिग्गमणं अदत्तगहणं पहारगामडाहो
पादेण किंचि गहणं करेण वा जं च भूमीए ८०

उदरकृमिनिर्गमनं अदत्तग्रहणं प्रहारो ग्रामदाहश्च।
पादेन किंचिद्ग्रहणं करेण वा यच्च भूमौ ॥ ८० ॥

उदराद्यदि कृमिनिर्गमनं भवेत्। तथा अदत्तग्रहणमदत्तं यदि किंचिद् गृह्णीयात्। तथा प्रहार आत्मनोऽन्यस्य वा खड्गादिभिर्यदि प्रहारः स्यात्। तथा ग्रामदाहो यदि स्यात्। तथा पादेन यदि किंचिद् गृह्यते। तथा करेण वा यदि किंचिद्गृह्यते भूमेरिति सर्वत्राशनस्यान्तरायो भवतीति सम्बन्धः। ॥ ८० ॥ तथा—

एदे अण्णे बहुगा कारणभूदा अभोयणस्सेह।
बीहणलोगदुगुंछणसंजमणिव्वेदणट्ठं च ॥ ८१ ॥

एतेऽन्ये बहवः कारणभूता अभोजनस्येह।
भयलोकजुगुप्सासंयमनिर्वेदनार्थं च ॥ ८१ ॥

एते पूर्वोक्ताः काकादयोऽन्तरायाः कारणभूता भोजनपरित्यागस्य द्वात्रिंशत्। तथान्ये च बहवश्चंडालादिस्पर्शकलहेष्टमरणसाधर्मिकसन्यासपतनप्रधानमरणादयोऽशनपरित्याग-

हेतवः । भयलोकजुगुप्सायां संयमनिर्वेदनार्थं च यदि किंचित्स्यात् भयं राज्ञः स्यात्, तथा लोकजुगुप्सा च यदि स्यात् तथाप्याहारत्यागः । संयमार्थं चाहारत्यागो निर्वेदनार्थं चेति ॥ ८१ ॥

पिण्डशुद्धिमुपसंहरन्नाह—

जेणेह पिंडसुद्धी उवदिट्ठा जेहि धारिदा सम्मं ।
ते वीरसाधुवग्गा तिरदणसुद्धिं मम दिसंतु ॥ ८२

यैरिह पिंडशुद्धिः उपदिष्टा यैः धारिता सम्यक् ।
ते वीरसाधुवर्गाः त्रिरत्नशुद्धिं मम दिशंतु ॥ ८२

सूत्रकारः फलार्थी प्राह—यैरिह पिण्डशुद्धिरुपदिष्टा यैश्च धारिता सेविता सम्यग्विधानेन ते वीरसाधुवर्गास्त्ररत्नशुद्धिं मम दिशन्तु प्रयच्छन्तु ॥ ८२ ॥

इत्याचारवृत्तौ वसुनन्दिविरचितायां पिण्डशुद्धिर्नाम षष्ठः प्रस्तावः ॥ ६ ॥

षडावश्यकाधिकारः ॥ ७ ॥



प्रायेण जायते पुंसां वीतरागस्य दर्शनम् ।
तद्दर्शनविरक्तानां भवेज्जन्मापि निष्फलम् ॥ १ ॥

षडावश्यकक्रियं मूलगुणान्तर्गतमधिकारं प्रपंचेन विवृण्वन् प्रथमतरं तावन्नमस्कारमाह—

काऊण णमोक्कारं अरहंताणं तहेव सिद्धाणं ।
आइरियउवज्झाए लोगम्मि य सव्वसाहूणं ॥
कृत्वा नमस्कारं अर्हतां तथैव सिद्धानां ।
आचार्योपाध्यायानां लोके च सर्वसाधूनाम् ॥ १ ॥

कृत्वा नमस्कारं, केषामर्हतां तथैव सिद्धानां, आचार्योपाध्यायानां च. लोके च सर्वसाधूनां । लोकशब्दः प्रत्येकमभिसम्बध्यते । कारशब्दो येन तेन षष्ठी संजाताऽन्यथा पुनश्चतुर्थी भवति । अर्हत्सिद्धाचार्योपाध्यायसाधुभ्यो लोकेऽस्मन्नमस्कृत्वा आवश्यकनिर्युक्तिं वक्ष्ये इति सम्बन्धः सापेक्षत्वात् क्त्वान्तप्रयोगस्येति ॥ १ ॥

नमस्कारपूर्वकं प्रयोजनमाह—

आवासयाणिज्जुत्तिं वोच्छामि जहाकमं समासेण

आयरिपरंपराए जहागदा आणुपुव्वीए ॥२॥

आवश्यकनिर्युक्तिं वक्ष्ये यथाक्रमं समासेन ।
आचार्यपरंपरया यथागतानुपूर्व्या ॥

आवश्यकनिर्युक्तिं वक्ष्ये । यथाक्रमं क्रममनतिलंघ्य परिपाट्या । समासेन संक्षेपतः । आचार्यपरंपरया यथागतानुपूर्व्या । येन क्रमेणागता पूर्वाचार्यप्रवाहेण संक्षेपतोऽहमपि तेनैव क्रमेण पूर्वागमक्रमं चापरित्यज्य वक्ष्ये कथयिष्यामीति ॥ २ ॥

तावत्पंचनमस्कारनिर्युक्तिमाह—

रागद्दोसकसाए य इंदियाणि य पंच य ।
परिसहे उवसग्गे णासयंतो णमोरिहा ॥ ३ ॥

रागद्वेषकषायांश्च इंद्रियाणि च पंच च ।
परीषहान् उपसर्गान् नाशयद्भ्यो नमः अर्हद्भ्यः ॥३

रागः स्नेहो रतिरूपः । द्वेषोऽप्रीतिररतिरूपः । कषायाः क्रोधादयः । इन्द्रियाणि चक्षुरादीनि पंच । परीषहाः क्षुदादयो द्वाविंशतिः । उपसर्गा देवादिकृतसंक्लेशाः । तान् रागद्वेषकषायेन्द्रियपरीषहोपसर्गान् स्वतः कृतकृत्यत्वाद्भव्यप्राणिनां नाशयद्भ्यो विनाशयद्भ्योऽर्हद्भ्यो नम इति ॥ ३ ॥

अथार्हन्तः कया निरुक्त्या उच्यन्त इत्याह—

अरिहंति णमोक्कारं
अरिहा पूजा सुरुत्तमा लोए।
रजहंता अरिहंति य
अरहंतो तेण उच्चंदे ॥ ४ ॥

अर्हंति नमस्कारं अर्हाः पूजायाः सुरोत्तमा लोके।
रजोहंतारः अरिहंतारश्च अर्हंतस्तेन उच्यंते ॥ ४ ॥

नमस्कारमर्हन्ति नमस्कारयोग्याः । पूजाया अर्हा योग्याः । लोके सुराणामुत्तमाः प्रधानाः । रजसा ज्ञानदर्शनावरणयोर्हन्तारः । अरेर्मोहस्यान्तरायस्य च हन्तारोऽपनेतारो यस्मात्तस्मादर्हन्त इत्युच्यन्ते । येनेह कारणेनेत्थम्भूतास्तेनार्हन्तः सर्वज्ञाः सर्वलोकनाथा लोकेस्मिन्नुच्यन्ते ॥ ४ ॥

ततः किं ?

अरहंतणमोक्कारं
भावेण य जो करेदि पयदमदी।
सो सव्वदुक्खमोक्खं
पावदि अचिरेण कालेण ॥ ५ ॥

अर्हन्नमस्कारं भावेन च यः करोति प्रयत्नमतिः ।
स सर्वदुःखमोक्षं प्राप्नोति अचिरेण कालेन ॥ ५ ॥

इत्थंभूतानामर्हतां नमस्कारं यः करोति भावेन प्रयत्नमतिः स सर्वदुःखमोक्षं प्राप्नोत्यचिरेण कालेनेति ॥ ५ ॥

दीहकालमयं जंतू उसिदो अट्ठकम्महिं ।
सिदे धत्ते णिधत्ते य सिद्धेत्तमुवगच्छइ ॥ ६ ॥
दीर्घकालमयं जंतुः उषितः अष्टकर्मसु ।
सिते ध्वस्ते निधत्ते च सिद्धत्वमुपगच्छति ॥ ६ ॥

श्लोकोऽयं । दीर्घकालमनादिसंसारं । अयं जन्तुर्जीवः । उषितः स्थितः अष्टसु कर्मसु ज्ञानावरणादिभिः कर्मभिः परिवेष्टितोयं जीवः परिणतः स्थितः । सिते कर्मबन्धे निष्टप्ते । निर्धत्ते परप्रकृतिसंक्रमोदयोदीरणोत्कर्षापकर्षणरहिते ध्वस्ते प्रणाशमुपगते । सिद्धत्वमुपगच्छति । निर्धते बन्धे ध्वस्ते सत्ययं जन्तुर्यद्यपि दीर्घकालं कर्मसु व्यवस्थितस्तथापि सिद्धो भवति सम्यग्ज्ञानाद्यनुष्ठानेनेति ॥ ६ ॥

तथोपायमाह—

आवेसणी सरीरे
इंदियभंडो मणो व आगरिओ ।

धमिदव्व जीवलोहे
वावीसपरीसहग्गीहिं ॥ ७ ॥

आवेशनी शरीरं इंद्रियभांडानि मनो वा आकरी ।
ध्मातव्यं जीवलोहं द्वाविंशतिपरीषहाग्निभिः ॥ ७ ॥

आवेसनी चुल्ली यत्रांगारणि क्रियंते । शरीरे किंविशिष्टे, आवेशनीभूते । इन्द्रियाण्येव भाण्डमुपस्कारभूतं सदंशकाभीरणी हस्तकूर्चनादिकं । मनस्त्वाकरी चेता उपाध्यायो लोहकारः । धमातव्यं दाह्य निर्मलीकर्तव्यं । जीवलोहं जीवधातुः । द्वाविंशतिपरीषहाग्निना । एवं द्वाविंशतिपरीषहाग्निना कर्मबन्धे ध्वस्ते चुल्लीकृतं शरीरं त्यक्त्वेन्द्रियाणि चोपस्करणभूतानि परित्यज्य निर्मलीभूतं जीवसुवर्णं गृहीत्वा मनः केवलज्ञानमाकरी सिद्धत्वमुपगच्छति सिद्धो भवतीति सम्बन्धः । तस्मात् सिद्धत्वयुक्तानां सिद्धानां नमस्कारं भावेन यः करोति प्रयत्नमतिः (स) सर्वदुःखमोक्षं प्राप्नात्यचिरेण कालेनेति ॥ ७ ॥

आचार्यस्य निरुक्तिमाह—

सदा आयारविद्दण्हू सदा आयरियं चरे ।
आयारमायारवंतो आयरिओ तेण उच्चदे ॥८॥

सदा आचारवित् सदा आचरितं चरः ।

आचारमाचारयन् आचार्यः तेन उच्यते ॥ ८ ॥

श्लोकोऽयं । सदा सर्वकालं आचारं वेत्तीति सदाचारवित् रात्रौ दिने वाचरस्य परमार्थसंवेदनं यत्नेन युक्तोऽथवा सदाचारः शोभनाचारः सम्यग्ज्ञानवांश्च सदा सर्वकालमाचरितं चर आचरितं गणधरादिरभिप्रेतं चेष्टितं चरतीति वा चरितं चरोऽथवा चरणीयं श्रामण्ययोग्यं दीक्षाकालं च शिक्षाकालं च चरितवानिति कृतकृत्य इत्यर्थः । आचारमन्यान् साधूनाचारयन् हि यस्मात् प्रभासते तस्मादाचार्य इत्युच्यते ॥ ८ ॥ तथा

जम्हा पंचविहाचारं आचरंतो पभासदि ।
आयरियाणि देसंतो आयरिओ तेण वुच्चदे ॥९॥

यस्मात् पंचविधाचारं आचरन् प्रभासते ।
आचरितानि दर्शयन् आचार्यः तेन उच्यते ॥ ९ ॥

श्लोकोऽयं । पंचविधमाचारं दर्शनाचारादिपंचप्रकारमाचारं चेष्टयन् । प्रभासते शोभते । आचरितानि स्वानुष्ठानानि दर्शयन् प्रभासते आचार्यस्तेन कारणेनोच्यते इति । एवं विशिष्टाचार्यस्य यो नमस्कारं करोति स सर्वदुःखमोक्षं प्राप्नोत्यचिरेण कालेनेति ॥ ९ ॥

उपाध्यायनिरुक्तिमाह—

बारसंगे जिणक्खादं सज्झायं कथितं बुधे ।
उवदेसइ सज्झायं तेणुवज्झाउ उच्चदि ॥ १० ॥
द्वादशांगानि जिनाख्यातानि स्वाध्यायः कथितो बुधैः
उपदिशति स्वाध्यायं तेनोपाध्याय उच्यते ॥ १० ॥

द्वादशांगानि जिनाख्यातानि जिनैः प्रतिपादितानि स्वाध्याय इति कथितो बुधैः पंडितैस्तं स्वाध्यायं द्वादशाङ्गचतुर्दशपूर्वरूपं यस्मादुपदिशति प्रतिपादयति तेनोपाध्याय इत्युच्यते । तस्योपाध्यायस्य नमस्कारं यः करोति प्रयत्नमतिः स सर्वदुखमोक्षं प्राप्नोत्यचिरेण कालेनेति ॥ १० ॥

साधूनां निरुक्तितो नमस्कारमाह—

णिव्वाणसाधए जोगे सदा जुंजंति साधवो ।
समा सव्वेसु भुदेसु तह्मा ते सव्वसाधवो ॥ ११ ॥
निर्वाणसाधकान् योगान् सदा युंजंति साधवः ।
समाः सर्वेषु भूतेषु तस्मात् ते सर्वसाधवः ॥ ११ ॥

यस्मान्निर्वाणसाधकान् योगान मोक्षप्रापकान मूलगुणादितपोऽनुष्ठानानि सदा सर्वकालं रात्रिदिवं युंजन्ति तैरात्मानं योजयन्ति साधवः साधुचरितानि । यस्माच्च समाः समत्वमापन्नाः सर्वभूतेषु सकलजीवेषु तस्मात्कारणात्ते सर्वसाधव इत्युच्यन्ते । तेषां सर्वसाधूनां नमस्कारं भावेन यः करो-

ति प्रयत्नमतिः स सर्वदुःखमोक्षं करोत्यचिरेण कालेनेति ॥

पंचनमस्कारमुपसंहरन्नाह—

एवंगुणजुत्ताणं पंचगुरूणं विसुद्धकरणेहिं ।
जो कुणदि णमोक्कारं सो पावदि णिव्वुदिं सिग्घं

एवं गुणयुक्तानां पंचगुरूणां विशुद्धकरणैः ।
यः करोति नमस्कारं स प्राप्नोति निर्वृतिं शीघ्रं ॥१२॥

एवं गुणयुक्तानां पंचगुरूणां पंचपरमेष्ठिनां सुनिर्मलमनोवाक्कायैर्यः करोति नमस्कारं स प्राप्नोति निर्वृतिं सिद्धिसुखं शीघ्रं । न पौनरुक्त्यं, द्रव्यार्थिकपर्यायार्थिकयोरुभयोरपि संग्रहार्थत्वादिति ॥ १२ ॥

किमर्थं पंचनमस्कारः क्रियत इति चेदित्याह—

एसो पंच णमोयारो सव्वपावप्पणासणो ।
मंगलेसु य सव्वेसु पढमं हवदि मंगलं ॥ १३ ॥

एषः पंचनमस्कारः सर्वपापप्रणाशकः ।
मंगलेषु च सर्वेषु प्रथमं भवति मंगलं ॥ १३ ॥

एष पंचनमस्कारः सर्वपापप्रणाशकः सर्वविघ्नविनाशकः मलं पापं गालयन्तीति विनाशयन्ति, मंगं सुखं लान्त्यादद-तीति वा मंगलानीति तेषु मंगलेषु द्रव्यमंगलेषु भावमंगलेषु

सर्वेषु प्रथमं भवति मंगलं यस्माच्चस्मात् सर्वशास्त्रादौ मंगलं क्रियत इति ॥ १३ ॥

पंचनमस्कारनिरुक्तिमाख्यायावश्यकनियुक्तेर्निरुक्तिमाह—

ण वसो अवसो अवस-
स्सकम्ममावासयंति बोधव्वा ।
जुत्तित्ति उवायत्ति य
णिरवयवा होदि णिज्जुत्ती ॥१४॥

न वशः अवशः अवशस्य कर्म आवश्यकमिति बोद्धव्यं युक्तिरिति उपाय इति च निरवयवा भवात निर्युक्तिः

न वश्यः पापादेरवश्यो यदेन्द्रियकषायेषत्कषायरागद्वेषादिभिरनात्मीयकृतस्तस्यावश्यकस्य यत्कर्मानुष्ठानं तदावश्यकमिति बोद्धव्यं ज्ञातव्यं । युक्तिरिति उपाय इति चैकार्थः । निरवयवा सम्पूर्णाऽखण्डिता भवति निर्युक्तिः । आवश्यकानां निर्युक्तिरावश्यकनियुक्तिरावश्यकसपूर्णोपायः अहोरात्रमध्ये साधूनां यदाचरणं तस्यावबोधकं पृथक्पृथक् स्तुतिस्वरूपेण "जयति भगवानित्यादि" प्रतिपादकं यत्पूर्वापराविरुद्धं शास्त्रं न्याय आवश्यकनिर्युक्तिरित्युच्यते । सा च षट्प्रकारा भवति ॥ १४ ॥

तस्य (स्या) भेदान् प्रतिपादयन्नाह—

सामाइय चउवीसत्थव वंदणयं पडिक्कमणं ।
पच्चक्खाणं च तहा काओसग्गो हवदि छट्ठो १५

सामायिकं चतुर्विंशस्तवः वंदना प्रतिक्रमणं ।
प्रत्याख्यानं च तथा कायोत्सर्गो भवति षष्ठः ॥१५॥

समः सर्वेषां समानो यो सर्गः पुण्यं वा समायस्तस्मिन् भवं, तदेव प्रयोजनं पुण्यं तेन दीव्यतीति वा सामायिकं समये भवं वा सामायिकं । चतुर्विंशतिस्तवः चतुर्विंशतितीर्थंकराणां स्तवः स्तुतिः । वन्दना सामान्यरूपेण स्तुतिर्जयति भगवानित्यादि, पंचगुरुभक्तिपर्यन्ता पंचपरमेष्ठिविषयनमस्कारकरणं वा शुद्धभावेन । प्रतिक्रमणं व्यतिक्रान्तदोषनिर्हरणं व्रतादुद्धरणं च । प्रत्याख्यानं भविष्यत्कालविषयवस्तुपरित्यागश्च । तथा कायोत्सर्गो भवति षष्ठः । सामायिकावश्यकनिर्युक्तिः, चतुर्विंशतिस्तवावश्यकनिर्युक्तिः, वन्दनानिर्युक्तिः, प्रतिक्रमणनिर्युक्तिः, प्रत्याख्यानावश्यकनिर्युक्तिः, कायोत्सर्गावश्यकनिर्युक्तरिति ॥ १५ ॥

तत्र सामायिकनामावश्यकनिर्युक्तिं वक्तुकामः प्राह—

सामाइयणिज्जुत्तिं वोच्छामि जहाकमं समासेण
आयरियपरंपराए जहागदं आणुपुव्वीए ॥१६॥

सामायिकनिर्युक्तिं वक्ष्ये यथाक्रमं समासेन ।
आचार्यपरंपरया यथागतं आनुपूर्व्या ॥ १६ ॥

सामायिकनिर्युक्तिं सामायिकनिरवयवोपायं वक्ष्ये यथाक्रमं समासेनाचार्यपरंपरया यथागतमानुपूर्व्या । अधिकारक्रमेण पूर्वं यथानुक्रमं सामायिककथनविशेषणं पश्चात्यानुपूर्वीग्रहणं, यथागतविशेषणमिति कृत्वा न पुनरुक्तदोषः ।

सामायिकनिर्युक्तिरपि षट्प्रकारा तामाह—

णामट्ठवणा दव्वे खेत्ते काले तहेव भावे य ।
सामाइयम्हि एसो णिक्खेओ छव्विओ णेओ १७

नाम स्थापना द्रव्यं क्षेत्रं कालस्तथैव भावश्च ।
सामायिके एषः निक्षेपः षड्विधो ज्ञेयः ॥ १७ ॥

अथवा निक्षेपविरहितं शास्त्रं व्याख्यायमानं वक्तुः श्रोतुश्चोत्पथोत्थानं कुर्यादिति सामायिकनिर्युक्तिनिक्षेपो वर्ण्यते—नामसामायिकनिर्युक्तिः, स्थापनासामायिकनिर्युक्तिः, द्रव्यसामायिकनिर्युक्तिः, क्षेत्रसामायिकनिर्युक्तिः, कालसामायिकनिर्युक्तिः, भावसामायिकनिर्युक्तिः, । नामस्थापनाद्रव्यक्षेत्रकालभावभेदेन सामायिक एष निक्षेप उपायः षट्प्रकारो भवति ज्ञातव्यः । शुभनामान्यशुभनामानि च श्रुत्वा रागद्वेषादिवर्जनं नामसामायिकं नाम । काश्चन स्थाप-

नाः सुस्थिताः सुप्रमाणाः सर्वावयवसम्पूर्णाः सद्भावरूपा मन आल्हादकारिण्यः काश्चन पुनः स्थापना दुस्थिताः प्रमाणरहिताः सर्वावयवैरसम्पूर्णाः सद्भावरहितास्तास्ता (स्तू) उपरि रागद्वेषयोरभावः स्थापनासामायिकं नाम । सुवर्णरजतमुक्ताफलमणिकट्यादिमृत्तिकाकाष्ठलोष्ठकंटकादिषु समदर्शनं रागद्वेषयोरभावो द्रव्यसामायिकं नाम । कानिचित् क्षेत्राणि रम्याणि आरामनगरनदीकूपवापीतडागजनपदोपचितानि, कानिचिच्च क्षेत्राणि रूक्षकंटकविषमविरसास्थिपाषाणसहितानि जीर्णाटवीशुष्कनदीमरुसिकतापुंजादिबाहुल्यानि तेषूपरि रागद्वेषयोरभावः क्षेत्रसामायिकं नाम । प्रावृड्वर्षाहैमन्तशिशिरवसन्तनिदाघाः षड्ऋतवो रात्रिदिवसशुक्लपक्षकृष्णपक्षाः कालस्तेषूपरि रागद्वेषवर्जनं कालसामायिकं नाम । सर्वजीवेषूपरि मैत्रीभावोऽशुभपरिणामवर्जनं भावसामायिकं नाम । अथवा जातिद्रव्यगुणक्रियानिरपेक्षं संज्ञाकरणं सामायिकशब्दमात्रं नामसामायिकं नाम । सामायिकावश्यकेन परिणतस्याकृतिमत्यनाकृतिमति च वस्तुनि गुणारोपणं स्थापनासामायिकं नाम । द्रव्यसामायिकं द्विविधं आगमद्रव्यसामायिकं नोआगमद्रव्यसामायिकं चेति । सामायिकवर्णनप्राभृतज्ञायी अनुपयुक्त आगमद्रव्यसामायिकं नाम । नोआगमद्रव्यसामायिकं त्रिविधं सामायिकवर्णनप्राभृतज्ञायकशरीरसामायिकप्राभृतभविष्यज्ज्ञायकजीवतद्व्यतिरिक्तभेदेन । ज्ञायकशरीरमिति त्रिविधं

भूतवर्तमानभविष्यद्भेदेन । भूतमपि त्रिविधं च्युतच्यावितत्यक्तभेदेन । सामायिकपरिणतजीवाधिष्ठितं क्षेत्रं क्षेत्रसामायिकं नाम । यस्मिन् काले सामायिकं करोति स कालः पूर्वाह्णादिभेदभिन्नः कालसामायिकं। भावसामायिकं द्विविधं, आगमभावसामायिकं, नोआगमभावसामायिकं चेति । सामायिकवर्णनप्राभृतज्ञाय्युपयुक्तो जीव आगमभावसामायिकं नाम, सामायिकपरिणतपरिणामादि नोआगमभावसामायिकं नाम । तथैषां मध्ये आगमभावसामायिकेन नोआगमभावसामायिकेन च प्रयोजनमिति ॥ १७ ॥

निरुक्तिपूर्वकं भावसामायिकं प्रतिपादयन्नाह—

सम्मत्तणाणसंजमतवेहिं जं तं पसत्थसमगमणं ।
समयंतु तं तु भणिदं तमेव सामाइयं जाणं॥१८॥

सम्यक्त्वज्ञानसंयमतपोभिः यत्तत् प्रशस्तसमागमनं समयस्तु स तु भणितस्तमेव सामायिकं जानीहि १८

सम्यक्त्वज्ञानसंयमतपोभिर्यत्तत् प्रशस्तं समागमनं प्रापणं तैः सहैक्यं च जीवस्य यत् समयस्तु समय एव भणितस्तमेव सामायिकं जानीहि ॥ १८॥ तथा यः—

जिदउवसग्गपरीसह
उवजुत्तो भावणासु समिदीसु ।

जमणियमउज्जदमदी
सामाइयपरिणदो जीवो ॥ १९॥

जितोपसर्गपरीषह उपयुक्तः भावनासु समितिषु ।
यमनियमोद्यतमतिः सामायिकपरिणतो जीवः १९

जिताः सोढा उपसर्गाः परीषहाश्च येन स जितोपसर्गपरीषहः समितिषु भावनासु चोपयुक्तो यः यमनियमोद्यतमतिश्च यः, स सामायिकपरिणतो जीव इति ॥१९॥ तथा—

जं च समो अप्पाणं परे य मादूय सव्वमहिलासु ।
अप्पियपियमाणादिसु तो समणो तो य सामइयं ॥

यस्माच्च सम आत्मनि परे च मातरि सर्वमाहिलासु ।
अप्रियप्रियमानादिषु तस्मात् श्रमणस्ततश्च सामयिकं

यस्माच्च समो रागद्वेषरहित आत्मनि परे च, यस्माच्च मातरि सर्वमहिलासु च शुद्धभावेन समानः, सर्वा योषितो मातृसदृशः पश्यति, यस्माच्च प्रियाप्रियेषु समानः, यस्माच्च मानापमानादिषु समानस्तस्मात् स श्रवणस्ततश्च तं सामायिकं जानीहीति ॥ २० ॥

जो जाणइ समवायं दव्वाण गुणाण पज्जयाणं च ।
सब्भावं तं सिद्धं सामाइयमुत्तमं जाणे ॥ २१ ॥

यः जानाति समवायं द्रव्याणां गुणानां पर्यायाणां च।
सद्भावं तं सिद्धं सामायिकमुत्तमं जानीहि ॥ २१ ॥

पूर्वगाथाभ्यां सम्यक्त्वसंयमयोः समागमनं व्याख्यातं अनया पुनर्गाथया ज्ञानसमागमनमाचष्टे। यो जनाति समवायं सादृश्यं स्वरूपं वा द्रव्याणां, द्रव्यसमवायं क्षेत्रसमवायं कालसमवायं भावसमवायं च जानाति। तत्र द्रव्यसमवायो नाम धर्माधर्मलोकाकाशैकजीवप्रदेशाः समाः। क्षेत्रसमवायो नाम सीमन्तनरकमनुष्यक्षेत्रर्जुविमानसिद्धालयाः समाः। कालसमवायो नाम समयः समयेन समः, अवसर्पिण्युत्सर्पिण्या समेत्यादि। भावसमवायो नाम केवलज्ञानं केवलदर्शनेन समेति। गुणा रूपरसगन्धस्पर्शज्ञातृत्वष्टृत्वादयस्तेषां समानतां जानाति। अथवौदयिकौपशमिकक्षायोपशमिकपारिणामिकगुणास्तेषां समानतां जानाति। पर्याया नारकत्वमनुष्यत्वतिर्यक्त्वदेवत्वादयस्तेषां समानतां जानाति। द्रव्याधारत्वेनापृथग्वर्तित्वेन च गुणानां समवायः। पर्यायाणां उत्पादविनाशध्रौव्यत्वेन समवायो भावसमवायो गुणेष्वन्तर्भवति। क्षेत्रसमवायः पर्यायेष्वन्तर्भवति। कालसमवायो द्रव्यसमवायेऽन्तर्भवतीति। द्रव्यसमवायं गुणसमवायं पर्यायसमवायं च यो जानाति तेषां सिद्धिं सद्भावं निष्पन्नं परमार्थरूपं च यो जानाति तं संयतं सामायिकमुत्तमं जानीहि। अथवा द्रव्याणां समवायं सिद्धिं, गुणपर्यायाणां च सद्भावं यो जा-

नाति तां सामायिकं जानीहि । अथवा समवृत्ति समवायं, द्रव्यगुणपर्यायाणां समवृत्ति, द्रव्यं गुणविरहितं नास्ति गुणाश्च द्रव्यविरहिता न सन्ति पर्यायाश्च द्रव्यगुणरहिता न सन्ति । एवंभूतं समवृत्ति समवायं सद्भावरूपं न संवृत्तिरूपं, न कल्पनारूपं, नाप्यविद्यारूपं, स्वतः सिद्धं न समवायद्रव्यबलेन यो जानाति तं सामायिकं जानीहीति सम्बन्धः ॥

सम्यक्त्वचारित्रपूर्वकं सामायिकमाह—

रागदोसो णिरोहित्ता समदा सव्वकम्मसु ।
सुत्तेसु अ परिणामो सामाइयमुत्तमं जाणे ॥ २२ ॥

रागद्वेषौ निरुद्ध्य समता सर्वकर्मसु ।
सूत्रेषु च परिणामः सामायिकमुत्तमं जानीहि ॥ २२ ॥

रागद्वेषौ निरुध्य सर्वकर्मसु सर्वकर्तव्येषु या समता, सूत्रेषु च द्वादशांगचतुर्दशपूर्वेषु च यः परिणामः श्रद्धानं सामायिकमुत्तमं प्रकृष्टं जानीहि ॥ २२ ॥

तपःपूर्वकं सामायिकमाह—

विरदो सव्वसावज्जं तिगुत्तो पिहिदिंदिओ ।
जीवो सामाइयं णाम संजमट्ठाणमुत्तमं ॥ २३ ॥

विरतः सर्वसावद्यं त्रिगुप्तः पिहितेंद्रियः ।
जीवः सामायिकं नाम संयमस्थानमुत्तमं ॥ २३ ॥

सर्वसावद्याद्यो विरतस्त्रिगुप्तः, पिहितेन्द्रियो निरुद्धरूपादिविषयः, एवंभूतो जीवः सामायिकं संयमस्थानमुत्तमं जानीहि जीवसामायिकसंयमयोरभेदादिति ॥ २३ ॥

भेदं च प्राह—

जस्स सण्णिहिदो अप्पा संजमे णियमे तवे ।
तस्स सामायियं ठादि इदि केवलिसासणे ॥ २४॥

यस्य संनिहितः आत्मा संयमे नियमे तपसि ।
तस्य सामायिकं तिष्ठति इति केवलिशासने ॥ २४ ॥

यस्य संनिहितः स्थितः आत्मा । क्व, संयमे नियमे तपसि च तस्य सामायिकं तिष्ठति । इत्येवं केवलिनां शासनं एवं केवलिनामाज्ञा शिक्षा वा । अथवास्मिन् केवलिशासने जिनागमे तस्य सामायिकं तिष्ठतीति ॥ २४ ॥

समत्वभावपूर्वकं भेदेन सामायिकमाह—

जो समो सव्वभूदेसु तसेसु थावरेसु य ।
तस्स सामायियं ठादि इदि केवलिसासणे ॥ २५॥

यः समः सर्वभूतेषु त्रसेषु स्थावरेषु च ।

---

१ अस्याः गाथायाः उत्तरार्धं द्वात्रिंशत्तमगाथापर्यन्तं संयोज्य संयोज्य पठनीयं ।

तस्य सामायिकं नाम इति केवलिशासने ॥

यः समः सर्वभूतेषु—त्रसेषु स्थावरेषु च समस्तेषामपीडाकरस्तस्य सामायिकमिति ॥ २५ ॥

रागद्वेषविकाराभावभेदेन सामायिकमाह—

जस्स रागो य दोसो य वियडिं ण जणेंति दु ।
यस्य रागश्च दोषश्च विकृतिं न जनयतस्तु ॥ २६ ॥

यस्य रागद्वेषौ विकृतिं विकारं न जनयतस्तस्य सामायिकमिति ॥ २६ ॥

कषायजयेन सामायिकमाह—

जेण कोधो य माणो य माया लोभो य णिज्जिदो ।
येन क्रोधश्च मानश्च माया लोभश्च निर्जिताः ।

येन क्रोधमानमायालोभाः सभेदाः सनोकषाया निर्जिता दलितास्तस्य सामायिकमिति ॥ २७ ॥

संज्ञालेश्याविकाराभावभेदेन सामायिकमाह—

जस्स सण्णा य लेस्सा य वियडिं ण जणंति दु ॥
यस्य संज्ञाश्च लेश्याश्च विकृतिं न जनयंति तु ॥

यस्य संज्ञा आहारभयमैथुनपरिग्रहाभिलाषा विकृतिं वि-

कारं न जनयन्ति । तथा यस्य लेश्याः कृष्णनीलकापोतपीतपद्मलेश्याः कषायानुरञ्जितयोगवृत्तयो विकृतिं विकारं न जनयन्ति तस्य सामायिकमिति ॥ २८ ॥

कामेन्द्रियविषयवर्जनद्वारेण सामायिकमाह—

जो दु रसे य फासे य कामे वज्जदि णिच्चसा ॥२९॥
यस्तु रसं च स्पर्शं च कामे वर्जयति नित्यशः ।

रसः कटुकषायादिभेदभिन्नः, स्पर्शो मृद्वादिभेदभिन्नः रसस्पर्शौ काम इत्युच्यते । रसनेन्द्रियं स्पर्शनेन्द्रियं च कामेन्द्रिये । यो रसस्पर्शौ कामौ वर्जयति नित्यं । कामेन्द्रियं च निरुणद्धि तस्य सामायिकमिति ॥ २९ ॥

भोगेन्द्रियविषयवर्जनद्वारेण सामायिकमाह—

जो रूवगंधसद्दे य भोगे वज्जदि णिच्चसा ॥ ३०
यः रूपगंधशब्दांश्च भोगं वर्जयति नित्यशः ॥ ३०

यः रूपं कृष्णनीलादिभेदभिन्नं, गन्धो द्विविधः सुरभ्यसुरभिभेदेन च, शब्दो वीणावंशादिसमुद्भवः, रूपगन्धशब्दा भोगा इत्युच्यन्ते, चक्षुर्घ्राणश्रोत्राणि भोगेन्द्रियाणि, यो रूपगन्धशब्दान् वर्जयति, भोगेन्द्रियाणि च नित्यं सर्वकालं निवारयति तस्य सामायिकमिति ॥ ३० ॥

दुष्टध्यानपरिहारेण सामायिकमाह—

जो दु अट्टं रुद्दं च झाणं वज्जदि णिच्चसा ॥ ३१ ॥
यस्तु आर्तं च रौद्रं च ध्यानं वर्जयति नित्यशः ।

चकारावनयोः स्वभेदग्राहकावति कृत्वैवमुच्यते यस्त्वार्तं चतुष्प्रकारं रौद्रं च चतुष्प्रकारं ध्यानं वर्जयति सर्वकालं तस्य सामायिकमिति ॥ ३१ ॥

शुभध्यानद्वारेण सामायिकस्थानमाह—

जो दु धम्मं च सुक्कं च झाणे झायदि णिच्चसा ॥
यस्तु धर्मं च शुक्लं च ध्यानं ध्यायति नित्यशः ॥ ३२

अत्रापि चकारावनयोः स्वभेदप्रतिपादकादिति कृत्वैवमाह—यस्तु धर्मं चतुष्प्रकारं शुक्लं च चतुष्प्रकारं ध्यानं ध्यायति युनक्ति तस्य सर्वकालं सामायिकं तिष्ठतीति । केवलिशासनमिति सर्वत्र सम्बन्धो द्रष्टव्य इति ॥ ३२ ॥

किमर्थं सामायिकं प्रज्ञप्तमित्याशंकायामाह—

सावज्जजोगपरिवज्जणट्ठं
सामाइयं केवलिहिं पसत्थं ।
गिहत्थधम्मोऽपरमत्ति णिच्चा
कुज्जा बुधो अप्पहियं पसत्थं

सावद्ययोगपरिवर्जनार्थं

सामायिकं केवलिभिः प्रशस्तं ।
गृहस्थधर्मोऽपरम इति ज्ञात्वा
कुर्यात् बुधः आत्महितं प्रशस्तं ॥ ३३

वृत्तमेतत् । सावद्ययोगपरिवर्जनार्थं पापास्रवनिवर्जनाय सामायिकं केवलिभिः प्रशस्तं प्रतिपादितं स्तुतमिति । यस्मात्तस्माद् गृहस्थधर्मः सारम्भारम्भादिप्रवृत्तिविशेषोऽपरमो जघन्यः संसारहेतुरिति ज्ञात्वा बुधः संयतः प्रशस्तं शोभनमात्महितं सामायिकं कुर्यादिति ॥ ३३ ॥

पुनरपि सामायिकमाहात्म्यमाह--

सामाइयम्मि दु कदे
समणो इव सावओ हवदि जह्मा ।
एदेण कारणेण दु
बहुसो सामाइयं कुज्जा ॥ ३४ ॥

सामायिके तु कृते
श्रमणः किल श्रावको भवति यस्मात् ।
एतेन कारणेन तु बहुशः
सामायिकं कुर्यात् ॥ ३४ ॥

सामायिके तु कृते सति श्रावकोऽपि किल श्रमणः सं-

यतो भवति। यस्मात्कस्मिंश्चित् पर्वणि कश्चित् श्रावकः सामायिकसंयमं समत्वं गृहीत्वा श्मशाने स्थि (तः) तस्य पुत्रनप्तृबन्ध्वादिमरणपीडादिमहोपसर्गः संजातस्तथाप्यसौ न सामायिकव्रतान्निर्गतः। भावश्रवणः संवृत्तस्तर्हि श्रावकत्वं कथं? प्रत्याख्यानमन्दतरत्वात्। अत्र कथा वाच्या। तस्मादनेन कारणेन बहुशो बाहुल्येन सामायिकं कुर्यादिति।

पुनरपि सामायिकमाहात्म्यमाह—

सामाइए कदे सावएण विद्धो मओ अरण्णम्हि।
सो य मओ उद्धादो ण य सो सामाइयं फिडिओ

सामायिके कृते श्रावकेण विद्धो मृगः अरण्ये।
स च मृगः उद्धतः न च स सामायिकं स्फोटितवान्॥

सामाइए—सामायिके। कदे—कृते। सावएण—श्रावकेन। विद्धो—व्यथितः केनापि। मओ—मृगो हरिणपोतः। अरण्णम्हि—अरण्येऽटव्यां। सो य मओ—सोऽपि मृगः। उद्धादो—मृतः प्राणैर्विपन्नः। ण य सो—न चासौ। सामाइयं—सामायिकात्। फिडिओ—निर्गतः परिणतः। केनचिच्छ्रावकेणाटव्यां सामायिके कृते शल्येन विद्धो मृगः पादान्तरे आगत्य व्यवस्थितो वेदनार्त्तः सन् स्तोकवारं स्थित्वा मृतो मृगो नासौ श्रावकः सामायिकात् संयमान्निर्गतः संसारदोषदर्शनादिति, तेन कारणेन सामायिकं क्रियत इति सम्बन्धः॥

केन सामायिकमुद्दिष्टमित्याशंकायामाह—

बावीसं तित्थयरा सामायियसंजमं उवदिसंति ।
छेदुवठावणियं पुण भयवं उसहो य वीरो य ॥३६

द्वाविंशतितीर्थकराः सामायिकसंयमं उपदिशंति ।
छेदोपस्थापनं पुनः भगवान् ऋषभश्च वीरश्च ॥

द्वाविंशतितीर्थकरा अजितादिपार्श्वनाथपर्यन्ताः सामायिकसंयममुपदिशन्ति प्रतिपादयन्ति । छेदोपस्थापनं पुनः संयमं वृषभो वीरश्च प्रतिपादयति ॥ ३६ ॥ किमर्थं वृषभमहावीरौ छेदोपस्थापनं प्रतिपादयतो यस्मात्—

आचक्खिदुं विभाजिदुं
विण्णादुं चावि सुहदरं होदि ।
एदेण कारणण दु
महव्वदा पंच पण्णत्ता ॥ ३७ ॥

आख्यातुं विभक्तुं विज्ञातुं चापि सुखतरं भवति ।
एतेन कारणेन तु महाव्रतानि पंच प्रज्ञप्तानि ३७

आचक्खिदुं—आख्यातुं कथयितुं आस्वादयितुं वा । विभयिदुं—विभक्तुं पृथक्पृथक्भावयितुं । विण्णादुं—विज्ञातुमवबोद्धुं चापि । सुहदरं सुखतरं सुखग्रहणं । होदि—भ-

वति एदेण–एतेन । कारणेन । महव्वदा–महाव्रतानि । पंच पण्णत्ता–पंच प्रज्ञप्तानि । यस्मादन्यस्मै प्रतिपादयितुं स्वेच्छानुष्ठातुं विभक्तुं, विज्ञातुं चापि भवति सुखतरं सामायिकं, तेन कारणेन महाव्रतानि पंच प्रज्ञप्तानीति ॥ ३७ ॥

किमर्थमादितीर्थेऽन्ततीर्थे च च्छेदोपस्थापनसंयममिस्याशंकायामाह—

आदीए दुव्विसोधण
णिहणे तह सुट्ठु दुरणुपाले य ।
पुरिमा य पच्छिमा वि हु
कप्पाकप्पं ण जाणंते ॥

आदौ दुर्विशोधने निधने तथा सुष्ठु दुरनुपाले च ।
पूर्वाश्च पश्चिमा अपि हि कल्प्याकल्प्यं न जानंति ॥

आदितीर्थे शिष्याः दुःखेन शोध्यन्ते सुष्ठु ऋजुस्वभावा यतः । तथा पश्चिमतीर्थे शिष्याः दुःखेन प्रतिपाल्यन्ते सुष्ठु वक्रस्वभावा यतः । पूर्वकालशिष्याः पश्चिमकालशिष्याश्च अपि स्फुटं कल्प्यं–योग्यं, अकल्प्यं–अयोग्यं च न जानन्ति यतस्ततः आदौ निधने च छेदोपस्थानमुपदिशत इति ॥

सामायिकस्वरूपक्रममाह—

पाडिलिहियअंजलिकरो

उवलुत्तो उट्ठिऊण एयमणो ।
अव्वाखित्तो वुत्तो
करेदि सामाइयं भिक्खू ॥ ३९ ॥

प्रतिलेखितांजलिकरः उपयुक्तः उत्थाय एकमनाः ।
अव्याक्षिप्तः उक्तः करोति सामायिकं भिक्षुः ३९

प्रतिलेखिताव्यञ्जलिकरौ येनासौ प्रतिलेखिताञ्जलिकरः उपयुक्तः समाहितमतिः, उत्थाय—स्थित्वा, एकाग्रमना अव्याक्षिप्तः, आगमोक्तक्रमेण करोति सामायिकं भिक्षुः । अथवा प्रतिलेख्य शुद्धो भूत्वा द्रव्यक्षेत्रकालभावशुद्धिं कृत्वा, प्रकृष्टाञ्जलिकरमुकुलितकरः प्रतिलेखनेन सहिताञ्जलिकरो वा सामायिकं करोतीति ॥ ३९ ॥

सामायिकनिर्युक्तमुपसंहर्तुं चतुर्विंशतिस्तवं सूचयितुं प्राह—

सामाइयणिज्जुत्ती एसा कहिया मए समासेण ।
चउवीसयणिज्जुत्ती एतो उड्ढं पवक्खामि ॥४०॥

सामायिकनिर्युक्तिः एषा कथिता मया समासेन ।
चतुर्विंशतिनिर्युक्तिं इत ऊर्ध्वं प्रवक्ष्यामि ॥ ४० ॥

सामायिकनिर्युक्तिरेषा कथिता समासेन । इत ऊर्ध्वं चतुर्विंशतिस्तवनिर्युक्तिं, प्रवक्ष्यामीति ॥ ४० ॥

तदवबोधनार्थं निक्षेपमाह—

णामट्ठवणा दव्वे खेत्ते काले य होदि भावे य।
एसो थवह्मि णेओ णिक्खेवो छव्विहो होइ ४१

नाम स्थापना द्रव्यं क्षेत्रं कालश्च भवति भावश्च।
एष स्तवे ज्ञेयो निक्षेपः षड्विधो भवति ॥ ४१ ॥

नामस्तवः स्थापनास्तवो द्रव्यस्तवः क्षेत्रस्तवः कालस्तवो भावस्तव एष स्तवे निक्षेपः षड्विधो भवति ज्ञातव्यः। चतुर्विंशतितीर्थकराणां यथार्थानुगतैरष्टोत्तरसहस्रसंख्यैर्नामभिः स्तवनं चतुर्विंशतिनामस्तवः, चतुर्विंशतितीर्थकराणामपरिमितानां कृत्रिमाकृत्रिमस्थापनानां स्तवनं चतुर्विंशतिस्थापनास्तवः। तीर्थकरशरीराणां परमौदारिकस्वरूपाणां वर्णभेदेन स्तवनं द्रव्यस्तवः। कैलाशसम्मेदोर्जयन्तपावाचम्पानगरादिनिर्वाणक्षेत्राणां समवसृतिक्षेत्राणां च स्तवनं क्षेत्रस्तवः। स्वर्गावतरणजन्मनिष्क्रमणकेवलोत्पत्तिनिर्वाणकालानां स्तवनं कालस्तवः। केवलज्ञानकेवलदर्शनादिगुणानां स्तवनं भावस्तवः। अथवा जातिद्रव्यगुणक्रियानिरपेक्षं संज्ञाकर्म चतुर्विंशतिमात्रं नामस्तवः। चतुर्विंशतितीर्थकराणां साकृत्यनाकृतिवस्तुनि गुणानारोप्य स्तवनं स्थापनास्तवः। द्रव्यस्तवो द्विविधः आगमनोआगमभेदेन। चतुर्विंशतिस्तवव्यावर्णनप्राभृतज्ञायनुपयुक्त आगमद्रव्यस्तवः।

चतुर्विंशतिस्तवव्यावर्णनप्राभृतज्ञायक (ज्ञानम्) शरीरभा विजीवतद्व्यतिरिक्तभेदेन नोआगमद्रव्यस्तवस्त्रिविधः, पूर्ववत्सर्वमन्यत् । चतुर्विंशतिस्तवसहितं क्षेत्रं कालश्च क्षेत्रस्तवः कालस्तवश्च । भावस्तव आगमनोआगमभेदेन द्विविधः । चतुर्विंशतिस्तवव्यावर्णनप्राभृतज्ञायी उपयुक्त आगमभावचतुर्विंशतिस्तवः । चतुर्विंशतिस्तवपरिणतपरिणामो नोआगमभावस्तव इति । भरतैरावतापेक्षश्चतुर्विंशतिस्तव उक्तः । पूर्वविदेहापरविदेहापेक्षस्तु सामान्यतीर्थकरस्तव इति कृत्वा न दोष इति ॥ ४१ ॥

अत्र नामस्तवेन भावस्तवेन प्रयोजनं सर्वैर्वा प्रयोजनं। तदर्थमाह-

लोगुज्जोए धम्मतित्थयरे जिणवरे य अरहंते ।
।कित्तण केवलिमेव य उत्तमबोहिं मम दिसंतु ४२

लोकोद्योतकरा धर्मतीर्थकरा जिनवराश्च अर्हंतः ।
कीर्तनीयाः केवलिन एवं च उत्तमबोधिं मह्यं दिशंतु

लोको जगत् । उद्योतः प्रकाशः । धर्म उत्तमक्षमादिः । तीर्थं संसारतारणोपायं । धर्ममेव तीर्थं कुर्वन्तीति धर्मतीर्थकराः । कर्मारातीन् जयन्तीति जिनास्तेषां वरा प्रधाना जिनवराः । अर्हन्तः सर्वज्ञाः । कीर्तनं प्रशंसनं कीर्तनीया वा । केवलिनः सर्वप्रत्यक्षावबोधाः । एवं च । उत्तमाः प्रकृष्टाः सर्वपूज्याः । मे बोधिं संसारनिस्तरणोपायं । दिशन्तु ददतु ।

एवं स्तवः क्रियते। अर्हन्तो लोकोद्योतकरा धर्मतीर्थकरा जिनवराः केवलिन उत्तमाश्च ये तेषां कीर्तनं प्रशंसनं बोधिं महयं दिशतु प्रयच्छतु। अथवा एते अर्हतो धर्मतीर्थकरा लोकोद्योतकराः जिनवराः कीर्तनीया उत्तमाः केवलिनो मम बोधिं दिशन्तु। अथवा अर्हन्तः सर्वविशेषेण (षणेन) विशिष्टाः केवलिनां च कीर्तनं मह्यं बोधिं प्रयच्छन्त्विति सम्बन्धः ॥ ४२ ॥

एतैर्दशभिरधिकारैश्चतुर्विंशतिस्तवो व्याख्यायत इति कृत्वादौ तावल्लोकनिरुक्तिमाह—

लोयदि आलोयदि प-
लो यदि सलोयदित्ति एगत्थो।
जह्मा जिणेहिं कसिणं
तेणेसो वुच्चदे लोओ॥ ४३ ॥

लोक्यते आलोक्यते प्रलोक्यते संलोक्यते इति एकार्थः
यस्माज्जिनैः कृत्स्नं तेन एष उच्यते लोकः ॥ ४३ ॥

लोक्यते आलोक्यते प्रलोक्यते संलोक्यते दृश्यते इत्येकार्थः। कैर्जिनैरिति तस्माल्लोक इत्युच्यते ? कथं छद्मस्थावस्थायां—मतिज्ञानश्रुतज्ञानाभ्यां लोक्यते दृश्यते यस्मात्तस्माल्लोकः। अथवावधिज्ञानेनालोक्यते पुद्गलमर्यादारूपेण

दृश्यते यस्मात्तस्माल्लोकः । अथवा मनःपर्ययज्ञानेन प्रलोक्यते विशेषेण रूपेण दृश्यते यस्मात्तस्माल्लोकः । अथवा केवलज्ञानेन जिनैः कृत्स्नं यथा भवतीति तथा संलोक्यते सर्वद्रव्यपर्यायैः सम्यगुपलभ्यते यस्मात्तस्माल्लोकः । तेन कारणेन लोकः स इत्युच्यत इति ॥ ४३ ॥

नवप्रकारंनिक्षेपैर्लोकस्वरूपमाह—

णाम ट्ठवणं दव्वं खेत्तं चिण्हं कसायलोओ य ।
भवलोगो भावलोगो पज्जयलोगो य णादव्वो ॥

नाम स्थापना द्रव्यं क्षेत्रं चिन्हं कषायलोकश्च ।
भवलोको भावलोकः पर्यायलोकश्च ज्ञातव्यः ॥ ४४ ॥

नात्र विभक्तिर्निर्देशस्य प्राधान्यं प्राकृतेऽन्यथापि वृत्तेः । लोकशब्दः प्रत्येकमभिसम्बध्यते । नामलोकः स्थापनालोको द्रव्यलोकः क्षेत्रलोकश्चिन्हलोकः कषायलोको भवलोको भावलोकः पर्यायलोकश्च ज्ञातव्य इति ॥ ४४ ॥

तत्र नामलोकं विवृणवन्नाह—

णामाणि जाणि काणिचि सुहासुहाणि लोगह्मि ।
णामलोगं वियाणाहि अणंतजिणदेसिदं ॥ ४५

नामानि यानि कानिचित् शुभाशुभानि लोके ।
नामलोकं विजानीहि अनंतजिनदर्शितं ॥

नामानि संज्ञारूपाणि, यानि कानिचिच्छुभान्यशुभानि च शोभनान्यशोभनानि च सन्ति विद्यंते जीवलोकेस्मिन् तन्नामलोकमनन्तजिनदर्शितं विजानीहि । न विद्यतेऽन्तो विनाशोऽवसानं वा येषां तेऽनन्तास्ते च ते जिनाश्चानन्तजिनास्तैर्दृष्टो यतः इति ॥ ४५ ॥

स्थापनालोकमाह—

ठविदं ठाविदं चावि जं किंचि अत्थि लोगह्मि ।
ठवणालोगं वियाणाहि अणंतजिणदेसिदं ॥ ४६॥

स्थितं स्थापितं चापि यत् किंचिदस्ति लोके ।
स्थापनालोकं विजानीहि अनंतजिनदर्शितं ॥

ठविदं-स्वतःस्थितमकृत्रिमं स्थापितं कृत्रिमं चापि यत्किंचिदस्ति विद्यतेऽस्मिन लोके तत्सर्वं स्थापनालोकमिति जानीहि, अनन्तजिनदर्शितत्वादिति ॥ ४६ ॥

द्रव्यलोकस्वरूपमाह—

जीवाजीवं रूवारूवं सपदेसमपदेसं च ।
दव्वलोगं वियाणाहि अणंतजिणदेसिदं ॥४७

जीवाजीवं रूप्यरूपि सप्रदेशमप्रदेशं च ।
द्रव्यलोकं विजानीहि अनंतजिनदर्शितं ॥ ४६ ॥

जीवाश्चेतनावन्तः । अजीवाः कालाकाशधर्माधर्माः पुद्गलाः । रूपिणो रूपरसगन्धस्पर्शशब्दवन्तः पुद्गलाः । अरूपिणः कालाकाशधर्माधर्मा जीवाश्च । सप्रदेशाः सर्वे जीवादयः । अप्रदेशौ कालाणुपरमाणू च । एनं सर्वलोकं द्रव्यलोकं विजानीहि, अक्षयसर्वज्ञदृष्टो यत इति ॥ ४७ ॥

तथेममपि द्रव्यलोकं विजानीहीत्याह—

परिणाम जीव मुत्तं सपदेसं एकखेत्त किरिओ य।
णिच्चं कारण कत्ता सव्वगदिदरा हि अपवेसो ॥४८

परिणामि जीवो मूर्तं सप्रदेशं एकक्षेत्रं क्रियावत् च।
नित्यः कारणं कर्ता सर्वगत इतरस्मिन् अप्रवेशः ४८

परिणामोऽन्यथाभावो विद्यते येषां ते परिणामिनः । के ते जीवपुद्गलाः । शेषाणि धर्माधर्मकालाकाशान्यपरिणामीनि कुतो द्रव्यार्थिकनयापेक्षया व्यञ्जनपर्यायं चाश्रित्यैतदुक्तं । पर्यायार्थिकनयापेक्षयान्वर्थपर्यायमाश्रित्य सर्वेऽपि परिणामापरिणामात्मका यत इति । जीवो जीवद्रव्यं चेतनालक्षणो यतः । अजीवाः पुनः सर्वे पुद्गलादयो ज्ञातृत्वदृष्टृत्वाद्यभावादिति । मूर्तं पुद्गलद्रव्यं रूपादिमत्वात् । शेषाणि जीवधर्माधर्मकालाकाशान्यमूर्तानि रूपादिविरहितत्वात् । सप्रदेशानि सांशानि जीवधर्माधर्मपुद्गलाकाशानि प्रदेशबन्धदर्शनात् । अप्रदेशाः कालाणवः परमाणुश्च प्रचयाभावाद् बं-

न्धाभावाच्च । धर्माधर्माकाशान्येकरूपाणि सर्वदा प्रदेशविघातभावात् । शेषाः संसारिजीवपुद्गलकाला अनेकरूपाः प्रदेशानां भेददर्शनात् । आकाशं क्षेत्रं सर्वपदार्थानामाधारत्वात् । शेषा जीवपुद्गलधर्माधर्मकाला अक्षेत्राणि अवगाहनलक्षणाभावात् । जीवपुद्गलाः क्रियावन्तो गतेर्दर्शनात् शेषा धर्माधर्माकाशकाला अक्रियावन्तो गतिक्रियाया अभावदर्शनात् । नित्या धर्माधर्माकाशपरमार्थकाला व्यवहारनयापेक्षया व्यञ्जनपर्यायाभावमपेक्ष्य विनाशाभावात् । जीवपुद्गला अनित्या व्यञ्जनपर्यायदर्शनात् । कारणानि पुद्गलधर्माधर्मकालाकाशानि जीवोपकारकत्वेन वृत्तत्वात् । जीवोऽकारणं स्वतंत्रत्वात् । जीवः कर्ता शुभाशुभभोक्तृत्वात् । शेषा धर्माधर्मपुद्गलाकाशकाला अकर्तारः शुभाशुभभोक्तृत्वाभावात् आकाशं सर्वगतं सर्वत्रोपलभ्यमानत्वात् । शेषाण्यसर्वगतानि जीवपुद्गलधर्माधर्मकालद्रव्याणि सर्वत्रोपलंभाभावात् । तस्मात्परिणामजीवमूर्तसप्रदेशैकक्षेत्रक्रियावन्नित्यकारणकर्तृसर्वगतिस्वरूपेण द्रव्यलोकं जानीहि, इतरैश्चापरिणामादिभिः प्रदेशैः द्रव्यलोकं जानीहीति सम्बन्धः ॥ ४८ ॥

क्षेत्रलोकस्वरूपं विवृणवन्नाह—

आयासं सपदेसं उड्ढमहो तिरियलोगं च ।
खेत्तलोगं वियाणाहि अणंतजिणदेसिदं ॥ ४९ ॥

आकाशं सप्रदेशं ऊर्ध्वमधः तिर्यग्लोकं च ।

क्षेत्रलोकं विजानीहि अनंतजिनदर्शितं ॥ ४९ ॥

आकाशं सप्रदेशं प्रदेशैः सह । ऊर्ध्वलोकं मध्यलोकमधोलोकं च । एतत्सर्वं क्षेत्रलोकमनन्तजिनदृष्टं विजानीहीति ॥ ४९ ॥

चिन्हलोकमाह—

जं दिट्ठं संठाणं दव्वाण गुणाण पज्जयाणं च ।
चिण्हलोगं वियाणाहि अणंतजिणदेसिदं ॥५०॥

यत् दृष्टं संस्थानं द्रव्याणां गुणानां पर्यायाणां च ।
चिह्नलोकं विजानीहि अनंतजिनदर्शितं ॥ ५० ॥

द्रव्यसंस्थानं धर्माधर्मयोर्लोकाकारेण संस्थानं । कालद्रव्यस्याकाशप्रदेशस्वरूपेण संस्थानं । आकाशस्य केवलज्ञानस्वरूपेण संस्थानं । लोकाकाशस्य गृहगुहादिस्वरूपेण संस्थानं । पुद्गलद्रव्यस्य लोकस्वरूपेण संस्थानं द्वीपनदीसागरपर्वतपृथिव्यादिरूपेण संस्थानं । जीवद्रव्यस्य समचतुरस्रन्यग्रोधादिस्वरूपेण संस्थानं । गुणानां द्रव्याकारेण कृष्णनीलशुक्लादिस्वरूपेण वा संस्थानं । पर्यायाणां दीर्घह्रस्ववृत्तत्र्यस्रचतुरस्रादिनारकत्वतिर्यक्त्वमनुष्यत्वदेवत्वादिस्वरूपेण संस्थानं । यद्दृष्टं संस्थानं द्रव्याणां गुणानां पर्यायाणां च चिन्हलोकं विजानीहीति ॥ ५० ॥

कषायलोकमाह—

कोधो माणो माया लोभो उदिण्णा जस्स जंतुणो
कसायलोगं वियाणाहि अणंताजिणदेसिदं ५१॥

क्रोधो मानो माया लोभः उदीर्णाः यस्य जंतोः ।
कषायलोकं विजानीहि अनंतजिनदर्शितं ॥ ५१ ॥

यस्य जन्तोर्जीवस्य क्रोधमानमायालोभा उदीर्णा उदयमागताः । तं कषायलोकं विजानीहीति ॥ ५१ ॥

भवलोकमाह—

णेरइयदेवमाणुसतिरिक्खजोणिं गदा य जे सत्ता
णिययभवे वट्टंता भवलोगं तं विजाणाहि ॥५२॥

नारकदेवमनुष्यतिर्यग्योनिगताश्च ये सत्त्वाः ।
निजभवे वर्तमाना भवलोकं तं विजानीहि ॥ ५२ ॥

नारकदेवमनुष्यतिर्यग्योनिषु गताश्च ये जीवा निजभवे निजायुःप्रमाणे वर्तमानास्तं भवलोकं विजानीहीति ॥ ५२ ॥

भावलोकमाह—

तिव्वो रागो य दोसो य उदिण्णा जस्स जंतुणो
भावलोगं वियाणाहि अणंताजिणदेसिदं ॥५३॥

तीव्रो रागश्च द्वेषश्च उदीर्णो यस्य जंतोः ।
भावलोकं विजानीहि अनंतजिनदर्शितं ॥ ५३ ॥

यस्य जन्तोस्तीव्रौ रागद्वेषौ प्रीतिविप्रीती उदीर्णौ उदयमागतौ तं भावलोकं विजानीहीति ॥ ५३ ॥

पर्यायलोकमाह—

दव्वगुणखेत्तपज्जय
भावाणुभावो य भावपरिणामो ।
जाण चउव्विहमेयं
पज्जयलोगं समासेण ॥ ५४ ॥

द्रव्यगुणक्षेत्रपर्यायाः भावानुभावश्च भावपरिणामः ।
जानीहि चतुर्विधमेवं पर्यायलोकं समासेन ॥ ५४ ॥

द्रव्याणां गुणा ज्ञानदर्शनसुखवीर्यकर्तृत्वभोक्तृत्वकृष्णनीलशुक्लरक्तपीतगतिकारकत्वस्थितिकारकत्वावगाहनागुरुलघुवर्तमानादयः । क्षेत्रपर्यायाः सप्तनरकपृथ्वीप्रदेशपूर्वविदेहापरविदेहभरतैरावतद्वीपसमुद्रत्रिषष्टिस्वर्गभूमिभेदादयः । भावानामनुभवः । आयुषो जघन्यमध्यमोत्कृष्टविकल्पः । भावो नाम परिणामोऽसंख्यातलोकप्रदेशमात्रः शुभाशुभरूपः कर्मादाने परित्यागे वा समर्थः । द्रव्यस्य गुणाः पर्यायलोकः, क्षेत्रस्य पर्यायाः पर्यायलोकः भवस्यानुभवः पर्यायलोकः

भावो नाम परिणामः पर्यायलोकः एवं चतुर्विधं पर्यायलोकं समासेन जानीहीति ॥ ५४ ॥

उद्योतस्य स्वरूपमाह—

उज्जोवो खलु दुविहो णादव्वो दव्वभावसंजुत्तो ।
दव्वुज्जोवो अग्गी चंदो सूरो मणी चेव ॥५५॥

उद्योतः खलु द्विविधः ज्ञातव्यः द्रव्यभावसंयुक्तः ।
द्रव्योद्योतः अग्निः चंद्रः सूर्यो माणिश्चैव ॥ ५५ ॥

उद्योतः प्रकाशः खलु द्विविधः स्फुटं ज्ञातव्यो द्रव्यभावभेदेन । द्रव्यसंयुक्तो भावसंयुक्तश्च । तत्र द्रव्योद्योतोऽग्निश्चन्द्रः सूर्यो मणिश्च । एवकारः प्रकारार्थः । एवंविधोऽन्योऽपि द्रव्योद्योतो ज्ञात्वा वक्तव्य इति ॥ ५५ ॥

भावोद्योतं निरूपयन्नाह—

भावुज्जोवो णाणं
जह भणियं सव्वभावदरिसीहिं ।
तस्स दुपयोगकरणे
भावुज्जोवोत्ति णादव्वो ॥ ५६ ॥

भावोद्योतो ज्ञानं यथा भणितं सर्वभावदर्शिभिः ।
तस्य तु उपयोगकरणे भावोद्योत इति ज्ञातव्यः ॥

भावोद्योतो नाम ज्ञानं यथा भणितं सर्वभावदर्शिभिः-येन प्रकारेण सर्वपदार्थदर्शिभिज्ञानमुक्तं तद्भावोद्योत (तः) परमार्थद्योतस्तथा ज्ञानस्योपयोगकरणात् स्वपरप्रकाशकत्वाद्भावोद्योत इति ज्ञातव्यः ॥ ५६ ॥

पुनरपि भावोद्योतस्य भेदमाह—

पंचविहो खलु भणिओ
भावुज्जोवो य जिणवरिंदेहिं ।
आभिणिओहियसुदओ-
हि णाणमणकेवलं णेयं ॥५७॥

पंचविधः खलु भाणितः भावोद्योतश्च जिनवरेंद्रैः ।
आभिनिबोधिकश्रुतावधिज्ञानमनःकेवलं ज्ञेयं ॥५७॥

स भावोद्योतो जिनवरेन्द्रैः पंचविधः पंचप्रकारः खलु-स्फुटं, भणितः प्रतिपादितः । आभिनिबोधिकश्रुतावधिज्ञानमनःपर्ययकेवलमयो मतिश्रुतावधिमनःपर्ययकेवलज्ञानभेदेन पंचप्रकार इति ॥ ५७ ॥

द्रव्यभावोद्योतयोः स्वरूपमाह—

दव्वुज्जोवोज्जोवो
पडिहण्णदि परिमिदम्हि खेत्तम्हि ।

भावुज्जोवोज्जोवो
लोगालोगं पयासेदि ॥ ५८ ॥

द्रव्योद्योतः उद्योतः प्रतिहन्यते परिमिते क्षेत्रे ।
भावोद्योत उद्योतः लोकालोकं प्रकाशयति ॥ ५८ ॥

द्रव्योद्योतो य उद्योतः स प्रतिहन्यतेऽन्येन द्रव्येण परिमिते च क्षेत्रे वर्तते । भावोद्योतः पुनरुद्योतो लोकमलोकं च प्रकाशयति न प्रतिहन्यते नापि परिमिते क्षेत्रे वर्ततेऽप्रतिघातिसर्वगतत्वादिति ॥ ५८ ॥ तस्मात्—

लोगस्सुज्जोवयरा
दव्वुज्जोएण ण हु जिणा होंति ।
भावुज्जोवयरा पुण
होंति जिणवरा चउव्वीसा ॥ ५९ ॥

लोकस्योद्योतकरा द्रव्योद्योतेन न खलु जिना भवंति
भावोद्योतकराः पुनः भवंति जिनवराः चतुर्विंशतिः ५९

लोकस्योद्योतकरा द्रव्योद्योतेन नैव भवन्ति जिनाः । भावोद्योतकराः पुनर्भवन्ति जिनवराश्चतुर्विंशतिः । अतो भावोद्योतेनैव लोकस्योद्योतकरा जिना इति स्थितमिति । लोकोद्योतकरा इति व्याख्यातं ॥ ५९ ॥

धर्मतीर्थकरा इति पदं व्याख्यातुकामः प्राह—

तिविहो य होदि धम्मो
सुदधम्मो अत्थिकायधम्मो य ।
तदिओ चरित्तधम्मो
सुदधम्मो एत्थ पुण तित्थं ॥ ६० ॥

त्रिविधश्च भवति धर्मः श्रुतधर्मः आस्तिकायधर्मश्च।
तृतीयः चारित्रधर्मः श्रुतधर्मः अत्र पुनः तीर्थं ६०

धर्मस्तावत्त्रिप्रकारो भवति । श्रुतधर्मोऽस्तिकायधर्मस्तृतीयश्चारित्रधर्मः । अत्र पुनः श्रुतधर्मस्तीर्थान्तरं संसारसागरं तरन्ति येन तत्तीर्थमिति ॥ ६० ॥

तीर्थस्य स्वरूपमाह—

दुविहं च होइ तित्थं णादव्वं दव्वभावसंजुत्तं ।
एदेसिं दोण्हंपि य पत्तेय परूवणा होदि ॥ ६१ ॥

द्विविधं च भवति तीर्थं ज्ञातव्यं द्रव्यभावसंयुक्तं ।
एतयोः द्वयोरपि प्रत्येकं प्ररूपणा भवति ॥ ६१ ॥

द्विविधं च भवति तीर्थं द्रव्यसंयुक्तं भावसंयुक्तं चेति। द्रव्यतीर्थमपरमार्थरूपं। भावतीर्थं पुनः परमार्थभूतमन्यापेक्षाभावात्। एतयोर्द्वयोरपि तीर्थयोः प्रत्येकं प्ररूपणा भवति ॥ ६१ ॥

द्रव्यतीर्थस्य स्वरूपमाह—

दाहोपसमण तण्हा छेदो मलपंकपवहणं चेव ।
तिहिं कारणेहिं जुत्तो तह्मा तं दव्वदो तित्थं ६२

दाहोपशमनं तृष्णाछेदः मलपंकप्रवहणं चैव ।
त्रिभिः कारणैःयुक्तं तस्मात् तद्द्रव्यतःतीर्थम् ॥६२॥

द्रव्यतीर्थेन दाहस्य संतापस्योपशमनं भवति तृष्णाया- श्छेदो विनाशो भवति स्तोककालं पंकस्य च प्रवहणं शोधनमेव भवति न धर्मादिको गुणस्तस्मात्त्रिभिः कारणैर्युक्तं द्रव्यउस्तीर्थं भवतीति ॥ ६२ ॥

भावतीर्थस्वरूपमाह—

दंसणणाणचरित्ते णिज्जुत्ता जिणवरा दु सव्वेपि।
तिहिं कारणेहिं जुत्ता तह्मा ते भावदो तित्थं ॥

दर्शनज्ञानचारित्रैः निर्युक्ता जिनवरास्तु सर्वेपि ।
त्रिभिः कारणैः युक्ताः तस्मात् ते भावतस्तीर्थम् ॥

दर्शनज्ञानचारित्रैर्युक्ताः संयुक्ता जिनवराः सर्वेऽपि ते तीर्थं भवंति तस्मात्त्रिभिः कारणैरपि भावतस्तीर्थमिति भावोद्योतेन लोकोद्योतकरा भावतीर्थकर्तृत्वेन धर्मतीर्थकरा इति । अथवा दर्शनज्ञानचारित्राणि जिनवरैः सर्वैरपि निर्युक्तानि सेवितानि तस्मात्तानि भावतस्तीर्थमिति ॥ ६३ ॥

जिनवरा अर्हन्ति पदं व्याख्यातुकामः प्राह—

जिदकोहमाणमाया
जिदलोहा तेण ते जिणा होंति।
हंता अरिं च जम्मं
अरहंता तेण वुच्चंति ॥ ६४ ॥

जितक्रोधमानमाया जितलोभाः तेन ते जिना भवंति हंतारः अरीणां च जन्मनः अर्हंतस्तेन उच्यंते ॥६४॥

यस्माज्जितक्रोधमानमायालोभास्तस्मात्तेन कारणेन ते जिना इति भवंति येनारीणां हन्तारो जन्मनः संसारस्य च हन्तारस्तेनार्हन्त इत्युच्यन्ते ॥ ६४ ॥

येन च,—

अरिहंति वंदणणमंसणाणि अरिहंति पूयसक्कारं
अरिहंति सिद्धिगमणं अरहंता तेण उच्चंति ॥ ६५ ॥

अर्हंति बंदनानमस्कारयोः अर्हंति पूजासत्कारं।
अर्हंति सिद्धिगमनं अर्हंतः तेन उच्यंते ॥ ६५ ॥

वंदनाया नमस्कारस्य च योग्या वंदनां नमस्कारमर्हंति, पूजायाः सत्कारस्य च योग्याः पूजासत्कारमर्हन्ति च यतः सिद्धिगमनस्य च योग्याः सिद्धिगमनमर्हन्ति, यस्मात्तेनाऽर्हन्त इत्युच्यन्ते ॥ ६५ ॥

किमर्थमेते कीर्त्यन्त इत्याशंकायामाह,—

किह ते ण कित्तणिज्जा
सदेवमणुयासुरेहिं लोगेहिं ।
दंसणणाणचरित्ते
तव विणओ जेहिं पण्णत्तो ॥ ६६ ॥

कथं ते न कीर्तनीयाः सदेवमनुजासुरैः लोकैः ।
दर्शनज्ञानचरित्राणां तपसः विनयो यैः प्रज्ञप्तः ॥ ६६

कथं ते न कीर्तनीयाः व्यावर्णनीयाः सदेवमनुष्यासुरैर्लोकैर्दर्शनज्ञानचारित्रतपसां विनयो यैः प्रज्ञप्तः प्रतिपादितः ते चतुर्विंशतितीर्थकराः कथं न कीर्त्तनीयाः ॥ ६६ ॥

इति कीर्तनमधिकारं व्याख्याय केवलिनां स्वरूपमाह—

सव्वं केवलकप्पं लोगं जाणंति तह य पस्संति ।
केवलणाणचरित्ता तह्मा ते केवली होंति ॥ ६७

सर्वं केवलकल्पं लोकं जानंति तथा च पश्यंति ।
केवलज्ञानचरित्राः तस्मात् ते कवलिनो भवंति ॥

किमर्थं केवलिन इत्युच्यन्त इत्याशंकायामाह—यस्मात्सर्वं निरवशेषं केवलिकल्पं केवलज्ञानविषयं लोकमलोकं च जानन्ति तथा च पश्यंति केवलज्ञानमेव चरित्रं येषां ते केव-

लज्ञानचरित्राः परित्यक्ताशेषव्यापारास्तस्मात्ते केवलिनो भवंतीति ॥ ६७ ॥

अथोत्तमाः कथमित्याशंकायामाह—

मिच्छत्तवेदणीयं णाणावरणं चरित्तमोहं च ।
तिविहा तमाहु मुक्का तह्मा ते उत्तमा होंति ॥६८॥

मिथ्यात्ववेदनीयं ज्ञानावरणं चारित्रमोहं च ।
त्रिविधात् तमसो मुक्ताः तस्मात् ते उत्तमा भवंति ॥

मिथ्यात्ववेदनीयमश्रद्धानरूपं ज्ञानावरणं ज्ञानदर्शनयोरावरणं चरित्रमोहश्चैतत्त्रिविधं तमस्तस्मान्मुक्ता यतस्तस्मात्ते उत्तमाः प्रकृष्टा भवंतीति ॥ ६८ ॥

त एवं विशिष्टा मम—

आरोग्ग बोहिलाहं दिंतु समाहिं च मे जिणवरिंदा
किं ण हु णिदाणमेयं णवरि विभासेत्थ कायव्वा

आरोग्यबोधिलाभं ददतु समाधिं च मे जिनवरेंद्राः
किं न खलु निदानमेतत् केवलविभाषात्र कर्तव्या ॥

एवं विशिष्टास्ते जिनवरेन्द्रा मह्यमारोग्यं जातिमरणाभावं बोधिलाभं च जिनसूत्रश्रद्धानं दीक्षाभिमुखीकरणं वा समाधिं च मरणकाले सम्यक्परिणामं ददतु प्रयच्छन्तु, किं

पुनरिदं निदानं न भवति न भवत्येव कस्माद्विभाषाऽत्र विकल्पोऽत्र कर्तव्यो यस्मादिति ॥ ६९ ॥

एतस्माच्चेदं निदानं न भवति यतः—

भासा असच्चमोसा
णवरि हु भत्तीय भासिदा एसा।
ण हु खीणरागदोसा
दिंति समाहिं च बोहिं च॥ ७० ॥

भाषा असत्यमृषा केवलं हि भक्त्या भाषिता एषा।
न हि क्षीणरागद्वेषा ददति समाधिं च बोधिं च॥ ७०॥

असत्यमृषा भाषेयं किंतु भक्त्या भाषितैषा यस्मान्नहि क्षीणरागद्वेषा जिना ददते समाधिं बोधिं च यदि दाने प्रवर्त्तेरन् सरागद्वेषाः स्युरिति ॥ ७० ॥

अन्यच्च——

जं तेहिं दु दादव्वं तं दिण्णं जिणवरेहिं सव्वेहिं।
दंसणणाणचरित्तस्स एस तिविहस्स उवदेसो॥

यत् तैस्तु दातव्यं तदत्तं जिनवरैः सर्वैः।
दर्शनज्ञानचारित्राणां एष त्रिविधानामुपदेशः॥ ७१॥

यत्तैस्तु दातव्यं तदत्तमेवं जिनवरैः सर्वैः किं तद्दर्शनज्ञा-

नचारित्राणां त्रिप्रकाराणां एष उपदेशोऽस्मार्त्किमधिकं यत्प्रा-
र्थ्यते। इति एषा च सामाधिबोधिप्रार्थना भक्तिर्भवति यतः ॥

अत आह;—

भत्तीए जिणवराणं खीयदि जं पुव्वसंचियं कम्मं ।
आयरियपसाएण य विज्जा मंता य सिज्झंति ॥

भक्त्या जिनवराणां क्षीयते यत् पूर्वसंचितं कर्म ।
आचार्यप्रसादेन च विद्या मंत्राश्च सिद्ध्यंति ॥ ७२ ॥

जिनवराणां भक्त्या पूर्वसंचितं कर्म क्षीयते विनश्यते य-
स्माद् आचार्याणां च भक्तिः किमर्थं ? आचार्याणां च
प्रसादेन विद्या मंत्राश्च सिद्धिमुपगच्छंति यस्मादिति त-
स्माज्जिनानामाचार्याणां च भक्तिरियं न निदानमिति ॥ ७२ ॥

अन्यच्च;—

अरहंतेसु य राओ ववगदरागेसु दोसरहिएसु ।
धम्मम्हि य जो राओ सुदे य जो बारसविधम्हि ॥

अर्हत्सु च रागः व्यपगतरागेषु दोषरहितेषु ।
धर्मे च यः रागः श्रुते च यो द्वादशविधे ॥ ७४ ॥

व्यपगतरागेष्वष्टादशदोषरहितेषु अर्हत्सु यः रागः या
भक्तिस्तथा धर्मे यो रागस्तथा श्रुते द्वादशविधे यः रागः
॥ ७३ ॥ तथा—

आयरियेसु य राओ
समणेसु य बहुसुदे चरित्तड्ढे।
एसो पसत्थराओ
हवदि सरागेसु सव्वेसु ॥ ७४ ॥

आचार्येषु च रागः श्रमणेषु च बहुश्रुते चारित्राढ्ये।
एष प्रशस्तरागो भवति सरागेषु सर्वेषु ॥ ७४ ॥

आचार्येषु रागः श्रमणेषु बहुश्रुतेषु च यो रागश्चरित्राढ्येषु च रागः स एष रागः प्रशस्तः शोभनो भवति सरागेषु सर्वेष्विति ॥ ७४ ॥

अन्यच्च;—

तेसिं अहिमुहदाए अत्था सिज्झंति तह य भत्तीए
तो भत्ति रागपुव्वं वुच्चइ एदं ण हु णिदाणं ॥
तेषां अभिमुखतया अर्थाः सिद्ध्यंति तथा च भक्त्या।
तस्मात् भक्तिः रागपूर्वमुच्यते एतन्न खलु निदानं ॥

तेषां जिनवरादीनामभिमुखतया भक्त्या चार्था वांछितेष्टसिद्धयः सिध्यन्ति हस्तग्राह्या भवन्ति यस्मात्तस्माद्भक्तीरागपूर्वकमेददुच्यते न हि निदानं, संसारकारणाभावादिति ॥७५॥

चतुर्विंशतिस्तवविधानमाह—

चउरंगुलंतरपादो पडिलेहिय अंजलीकयपसत्थो।
अव्वाखित्तो वुत्तो कुणदियचउवीसत्थयं भिक्खू

चतुरंगुलांतरपादः प्रतिलिख्य अंजलीकृतप्रशस्तः।
अव्याक्षिप्त उक्तः करोति च चतुर्विंशतिस्तोत्रं भिक्षुः

चतुरंगुलानन्तरपादः स्थितांगः परित्यक्तशरीरावयवचालनश्चकारादेतल्लब्धं प्रतिलिख्य शरीरभूमिचित्तादिकं प्रशोध्य प्रांजलिः सविंडः कृतांजलिपुटेन प्रशस्तः सौम्यभावोऽव्याक्षिप्तः सर्वव्यापाररहितः करोति चतुर्विंशतिस्तवं भिक्षुः संयतश्चतुरंगुलमंतरं ययोः पादयोस्तौ चतुरंगुलान्तरौ तौ पादौ यस्य स चतुरंगुलान्तरपादः स्थितं निश्चलमंगं यस्य सः स्थितांगः शोभनकायिकवाचिकमानसिकक्रिय इत्यर्थः ॥७६॥

चतुर्विंशतिस्तवनिर्युक्तिमुपसंहर्तुं वंदनानिर्युक्तिं च प्रतिपादयितुं प्राह;—

चउवीसयणिज्जुत्ती एसा कहिया मए समासेण
वंदणणिज्जुत्ती पुण एत्तो उड्ढं पवक्खामि ॥ ७७

चतुर्विंशतिनिर्युक्तिः एषा कथिता मया समासेन।
वंदनानिर्युक्तिं पुनः इत ऊर्ध्वं प्रवक्ष्यामि ॥ ७७ ॥

चतुर्विंशतिनिर्युक्तिरेषा कथिता मया समासेन वंदनानिर्युक्तिं पुनरित ऊर्ध्वं प्रवक्ष्यामि प्रतिपादयिष्यामीति ७७

तथैतां नामादिनिक्षेपैः प्रतिपादयन्नाह—

णामट्ठवणा दव्वे खेत्ते काले य होदि भावे य ।
एसो खलु वंदणगे णिक्खेवो छव्विहो भणिदो ॥

नाम स्थापना द्रव्यं क्षेत्रं कालश्च भवति भावश्च ।
एष खलु वंदनाया निक्षेपः षड्विधो भणितः ॥७८॥

एकतीर्थकरनामोच्चारणं सिद्धाचार्यादिनामोच्चारणं च नामावश्यकवंदनानिर्युक्तिरेकतीर्थकरप्रतिबिंबस्य सिद्धाचार्यादिप्रतिबिंबानां च स्तवनं स्थापनावंदनानिर्युक्तिस्तेषामेव शरीराणां स्तवनं द्रव्यवंदनानिर्युक्तिस्तैरेव यत्क्षेत्रमधिष्ठितं कालश्च योऽधिष्ठितस्तयोः स्तवनं क्षेत्रवन्दना कालवंदना च, एकतीर्थकरस्य सिद्धाचार्यादीनां च शुद्धपरिणामेन यद्गुणस्तवनं तद्भावावश्यकवंदनानिर्युक्तिः । नामाथ वा जातिद्रव्यक्रियानिरपेक्षं संज्ञाकर्म वंदनाशब्दमात्रं नामवंदनापरिणतस्य प्रतिकृतं प्रतिवंदनास्थापनावंदनाव्यावर्णनप्राभृतज्ञोऽनुपयुक्त आगमद्रव्यवंदना शेषः पूर्ववदिति । एष वंदनाया निक्षेपः षड्विधो भवति ज्ञातव्यो नामादिभेदेनेति ॥ ७८ ॥

नामवंदनां प्रतिपादयन्नाह—

किदियम्मं त्रिदियम्मं
पूयाकम्मं च विणयकम्मं च ।

कादव्वं केण कस्स व
कधे व कहिं व कदिखुत्तो ॥ ७९ ॥

कृतिकर्म चितिकर्म पूजाकर्म च विनयकर्म च ।
कर्तव्यं केन कस्य वा कथं वा कस्मिन् वा कृतकृत्यः

पूर्वगाथार्धेन वंदनाया एकार्थः कथ्यतेऽपरार्द्धेन तद्विकल्पा इति । कृत्यते छिद्यते अष्टविधं कर्म येनाक्षरकदंबकेन परिणामेन क्रियया वा तत्कृतिकर्म पापविनाशनोपायः । चीयते समेकीक्रियते संचीयते पुण्यकर्म तीर्थकरत्वादि येन तच्चितिकर्म पुण्यसंचयकारणं पूज्यंतेऽर्च्यन्तेऽर्हदादयो येन तत्पूजाकर्म बहुवचनोच्चारणस्रक्चंदनादिकं । विनीयंते निराक्रियन्ते संक्रमणोदयोदीरणादिभावेन प्राप्यंते येन कर्माणि तद्विनयकर्म शुश्रूषणं तत्क्रिया कर्म कर्तव्यं केन कस्य कर्तव्यं कथमिव केन विधानेन कर्त्तव्यं कस्मिन्नवस्थाविशेषे कर्त्तव्यं कतिवारान् ॥ ७९ ॥

तथा;—

कदि ओणदं कदि सिरं
कदिए आवत्तगेहिं परिसुद्धं ।
कदिदोसविप्पमुक्कं
किदियम्मं होदि कादव्वं ॥ ८० ॥

कियंत्यवनतानि कति शिरांसि
कतिभिः आवर्तकैः परिशुद्धं ।
कतिदोषविप्रमुक्तं
कृतिकर्म भवति कर्तव्यं ॥ ८० ॥

कदि ओणदं कियन्त्यवनतानि कति करमुकुलांकितेन शिरसा भूमिस्पर्शनानि कर्त्तव्यानि कदि सिरं कियन्ति शिरांसि कतिवारान् शिरसि करकुड्मलं कर्त्तव्यं कदि आवत्तगेहिं परिसुद्धं कियद्भिरावर्त्तकैः परिशुद्धं कतिवारान्मनोवचनकाया आवर्त्तनीयाः । कदि दोसविप्पमुक्कं कति दोषैर्विप्रमुक्तं कृतिकर्म भवति कर्त्तव्यमिति ॥ ८० ॥

इति प्रश्नमालायां कृतायां तावत्कृतिकर्मविनयकर्मणोरेकार्थ इति कृत्वा विनयकर्मणः सप्रयोजनां निरुक्तिमाहः——

जह्मा विणेदि कम्मं अट्ठविहं चाउरंगमोक्खो य ।
तह्मा वदंति विदुसो विणओत्ति विलीणसंसारा

यस्मात् विनयति कर्म अष्टविधं चातुरंगमोक्षश्च ।
तस्मात् वदंति विद्वांसो विनय इति विलीनसंसाराः

यस्माद्विनयति विनाशयति कर्माष्टविधं चातुरंगात्संसारान्मोक्षश्च यस्माद्विनयात्तस्माद्विद्वांसो विलीनसंसारा विनय इति वदंति ॥ ८१ ॥

यस्माच्च-

पुव्वं चेव य विणओ परूविदो जिणवरेहिं सव्वेहिं
सव्वासु कम्मभूमिसु णिच्चं सो मोक्खमग्गम्मि ८२

पूर्वस्मिन् चैव विनयः प्ररूपितो जिनवरैः सर्वैः ।
सर्वासु कर्मभूमिषु नित्यं स मोक्षमार्गे ॥

यतश्च पूर्वस्मिन्नेव काले विनयः प्ररूपितो जिनवरैः सर्वैः सर्वासु कर्मभूमिषु सप्तत्यधिकक्षेत्रेषु नित्यं सर्वकालं मोक्षमार्गे मोक्षमार्गहेतोस्तस्मान्नावार्वाक्कालिको रथ्यापुरुषप्रणीतो वा शंकाऽत्र न कर्त्तव्या निश्चयेनात्र प्रवर्त्तितव्यमिति ॥

कतिप्रकारोऽसौ विनय इत्याशंकायामाह-

लोगाणुवित्तिविणओ
अत्थणिमित्ते य कामतंते य ।
भयविणओ य चउत्थो
पंचमओ मोक्खविणओ य ॥ ८३

लोकानुवृत्तिविनयः अर्थनिमित्तं च कामतंत्रं च ।
भयविनयश्च चतुर्थः पंचमः मोक्षविनयश्च ॥ ८३ ॥

लोकस्यानुवृत्तिरनुवर्त्तनं लोकानुवृत्तिर्नाम प्रथमो विनयः, अर्थस्य निमित्तमर्थनिमित्तं कार्यहेतुर्विनयो द्वितीयः, कामतंत्रे

कामतंत्रहेतुः कामानुष्ठाननिमित्तं तृतीयो विनयः, भयविनयश्चतुर्थः भयकारणेन यः क्रियते विनयः स चतुर्थः, पंचमो मोक्षविनयः; एवं कारणेन पंचप्रकारो विनय इति ॥ ८३ ॥

तत्रादौ तावल्लोकानुवृत्तिविनयस्वरूपमाह—

अब्भुट्ठाणं अंजलिआसणदाणं च अतिहिपूजा य
लोगाणुवित्तिविणओ देवदपूया सविहवेण ॥ ८४

अभ्युत्थानं अंजलिः आसनदानं च अतिथिपूजा च ।
लोकानुवृत्तिविनयः देवतापूजा स्वविभवेन ॥ ८४ ॥

अभ्युत्थानं कस्मिंश्चिदागते आसनादुत्थानं प्रांजलिरंजलिकरणं स्वावासमागतस्यासनदानं तथाऽतिथिपूजा च मध्याह्नकाले आगतस्य साधोरन्यस्य वा धार्मिकस्य बहुमानं देवतापूजा च स्वविभवेन स्ववित्तानुसारेण देवपूजा च तदेतत्सर्वं लोकानुवृत्तिर्नाम विनयः ॥ ८४ ॥

तथा—

भासाणुवत्ति छंदाणुवत्तणं देसकालदाणं च ।
लोकाणुवत्तिविणओ अंजलिकरणं च अत्थकदे

भाषानुवृत्तिः छंदानुवर्तनं देशकालदानं च ।
लोकानुवृत्तिविनयः अंजलिकरणं च अर्थकृते ॥ ८५ ॥

भाषाया वचनस्यानुवृत्तेरनुवर्त्तनं यथासौ वदति तथा सोऽपि भणति भाषानुवृत्तिः, छंदानुवर्त्तनं तदभिप्रायानुकूलाचरणं, देशयोग्यं कालयोग्यं च यद्दानं स्वद्रव्योत्सर्गस्तदेतत्सर्वं लोकानुवृत्तिविनयो लोकात्मीकरणार्थो यथार्थविनयोंजलिकरणादिकः प्रयुज्यते तथांऽजलिकरणादिको योऽर्थनिमित्तं क्रियते सोऽर्थहेतुः ॥ ८५ ॥

तथा—

एमेव कामतंते भयविणओ चेव आणुपुव्वीए ।
पंचमओ खलु विणओ परूवणा तस्सिमा होदि

एवमेव कामतंत्रे भयविनयः चैव आनुपूर्व्या ।
पंचमः खलु विनयः प्ररूपणा तस्येयं भवति ॥ ८६ ॥

यथा लोकानुवृत्तिविनयो व्याख्यातस्तथैवं कामतंत्रोभयार्थश्च भवति आनुपूर्व्या विशेषाभावात्, यः पुनः पंचमो विनयस्तस्येयं प्ररूपणा भवतीति ॥ ८६ ॥

दंसणणाणचरित्ते तवविणओ ओवचारिओ चेव
मोक्खह्मि एस विणओ पंचविहो होदि णायव्वो

दर्शनज्ञानचारित्रे तपसि विनयः औपचारिकश्चैव ।
मोक्ष एष विनयः पंचविधो भवति ज्ञातव्यः ॥ ८७ ॥

दर्शनज्ञानचारित्रतप औपचारिकभेदेन मोक्षविनय एषः पंचप्रकारो भवति ॥ ८७ ॥

स पंचाचारे यद्यपि विस्तरेणोक्तस्तथाऽपि विस्मरणशील-शिष्यानुग्रहार्थं संक्षेपतः पुनरुच्यत इति—

जे दव्वपज्जया खलु
उवदिट्ठा जिणवरेहिं सुदणाणे ।
ते तह सद्दहदि णरो
दंसणविणओत्ति णादव्वो ॥ ८८ ॥

ये द्रव्यपर्यायाः खलु उपदिष्टा जिनवरैः श्रुतज्ञाने ।
तान्तथा श्रद्दधाति नरः दर्शनविनय इति ज्ञातव्यः ॥

ये द्रव्यपर्यायाः खलूपदिष्टा जिनवरैः श्रुतज्ञाने तांस्तथैव श्रद्दधाति यो नरः स दर्शनविनय इति ज्ञातव्यो भेदोपचारादिति ॥ ८८ ॥

अथ ज्ञाने किमर्थं विनयः क्रियते इत्याशंकायामाह—

णाणी गच्छदि णाणी
वंचदि णाणी णवं च णादियदि ।
णाणेण कुणदि चरणं
तह्मा णाणे हवे विणओ ॥ ८९ ॥

ज्ञानी गच्छति ज्ञानी वंचति ज्ञानी नवं च नाददाति
ज्ञानेन करोति चरणं तस्मात् ज्ञानं भवेत् विनयः ॥

यस्माज्ज्ञानी गच्छति मोक्षं जानाति वा गतेर्ज्ञानगमनप्राप्त्यर्थकत्वात्, यस्माच्च ज्ञानी वंचति परिहरति पापं यस्माच्च ज्ञानी नवं कर्म नाददाति न बध्यते कर्मभिरिति यस्माच्च ज्ञानेन करोति चरणं चारित्रं तस्माच्च ज्ञाने भवति विनयः कर्त्तव्य इति ॥ ८९ ॥

अथ चारित्रे विनयः किमर्थं क्रियत इत्याशंकायामाह—

पोराणय कम्मरयं चरिया रित्तं करेदि जदमाणो।
णवकम्मं ण य बंधदि चरित्तविणओत्ति णादव्वो ॥

पौराणं कर्मरजः चर्यया रिक्तं करोति यतमानः।
नवकर्म न च बध्नाति चारित्रविनय इति ज्ञातव्यः ॥

चिरंतनकर्मरजश्चर्यया चारित्रेण रिक्तं तुच्छं करोति यतमानश्चेष्टमानो नवं कर्म च न बध्नाति यस्मात्, तस्माच्चारित्रे विनयो भवति कर्त्तव्य इति ज्ञातव्यः ॥ ९० ॥

तथा तपोविनयप्रयोजनमाह—

अवणयदि तवेण तमं
उवणयदि मोक्खमग्गमप्पाणं।

तवविणयणियमिदमदी
सो तवविणओ त्ति णादव्वो ॥

अपनयति तपसा तमः उपनयति मोक्षमार्गमात्मानं।
तपोविनयनियमितमतिः स तपोविनय इति ज्ञातव्यः

इत्येवमादिगाथानां 'आयारजीदा' दिगाथापर्यन्तानां तप आचारेर्थः प्रतिपादित इति कृत्वा नेह प्रतन्यते पुनरुक्तदोषभयादिति ॥ ९१ ॥

यतो विनयः शासनमूलं यतश्च विनयः शिक्षाफलम्—

तह्मा सव्वपयत्ते विणयत्तं मा कदाइ छंडिज्जो।
अप्पसुदो वि य पुरिसो खवेदि कम्माणि विणएण ॥

तस्मात् सर्वप्रयत्नेन विनयत्वं मा कदापि त्यजेत्।
अल्पश्रुतोपि च पुरुषः क्षपयति कर्माणि विनयेन ॥

यस्मात्सर्वप्रयत्नेन विनयत्वं नो कदाचित्परिहरेत् भवान् यस्मादल्पश्रुतोऽपि पुरुषः क्षपयति कर्माणि विनयेन तस्माद्विनयो न त्याज्य इति ॥ ९२ ॥

कृतिकर्मणः प्रयोजनं तं दत्वा प्रस्तुतायाः प्रश्नमालायाः स्मारवदसौ केन कर्तव्यं तत्कृतिकर्म यत्पृष्टं तस्योत्तरमाह—

पंचमहव्वयगुत्तो संविग्गोऽणालसो अमाणी य।

किदियम्म णिज्जरट्ठी कुणइ सदा ऊणरादिणिओ॥

पंचमहाव्रतगुप्तः संविग्नः अनालसः अमानी च।
कृतिकर्म निर्जरार्थी करोति सदा ऊनरात्रिकः॥९३॥

पंचमहाव्रतैर्गुप्तः पंचमहाव्रतानुष्ठानपरः संदिग्धो धर्मफलयोर्विषये हर्षोत्कंठितदेहो नालसः उद्योगवान् अमाणीय अमानी च परित्यक्तमानकषायो निर्जरार्थी ऊनरात्रिको दीक्षायां लघुर्यः एवं स कृतिकर्म करोति सदा सर्वकालं, पंचमहाव्रतयुक्तेन परलोकार्थिना विनयकर्म कर्त्तव्यं भवतीति संबंधः॥

कस्य तत्कृतिकर्म कर्त्तव्यं यत्पृष्टं तस्योत्तरमाह—

आइरियउवज्झायाणं पवत्तयत्थेरगणधरादीणं।
एदेसिं किदियम्मं कादव्वं णिज्जरट्ठाए॥ ९४॥

आचार्योपाध्यायानां प्रवर्तकस्थविरगणधरादीनां।
एतेषां कृतिकर्म कर्तव्यं निर्जरार्थं॥ ९४॥

तेषामाचार्योपाध्यायप्रवर्त्तकस्थविरगणधरादीनां कृतिकर्म कर्त्तव्यं निर्जरार्थं न मंत्रतंत्रोपकरणायेति॥ ९४॥

एते पुनः क्रियाकर्मायोग्या इति प्रतिपादयन्नाह—

णो वंदेज्ज अविरदं
मादा पिदु गुरु णरिंद अण्णतित्थं व।

देसवरिद देवं वा
विरदो पासत्थपणगं वा ॥ ९५ ॥

नो बंदेत अविरतं मातरं पितरं गुरुं नरेंद्रं अन्यतीर्थंवा।
देशविरतं देवं वा विरतः पार्श्वस्थपंचकं वा ॥ ९५ ॥

णो वंदेज्ज न वंदेत न स्तुयात् कं अविरदमविरतमसंयतं मातरं जननीं पितरं जनकं गुरुं दीक्षागुरुं श्रुतगुरुमप्यसंयतं चरणादिशिथिलं नरेन्द्रं राजानं अन्यतीर्थिकं पाखंडिनं वा देशविरतं श्रावकं शास्त्रादिप्रौढमपि देवं वा नागयक्षचन्द्रसूर्येन्द्रादिकं वा विरतः संयतः सन् पार्श्वस्थपणकं वा ज्ञानदर्शनचारित्रशिथिलान्पंचजनान्निर्ग्रन्थानपि संयतः स्नेहादिना पार्श्वस्थपणकं न वंदेत मातरमसंयतां पितरमसंयतं अन्यं च मोहादिना न स्तुयात् भयेन लोभादिना वा नरेन्द्रं न स्तुयात् ग्रहादिपीडाभयादेवं सूर्यादिकं न पूजयेत् शास्त्रादिलोभेनान्यतीर्थिकं न स्तुयादाहारादिनिमित्तं श्रावकं न स्तुयात्। आत्मगुरुमपि विनष्टं न वंदेत तथा वाशब्दसूचितानज्ञानपि स्वोपकारिणोऽसंयतान्न स्तुयादिति ॥ ९५ ॥

इति के ते पंच पार्श्वस्था इत्याशंकायामाह—

पासत्थो य कुसीलो संसत्तोसण्ण मिगचरित्तो य।
दंसणणाणचरित्ते अणिउत्ता मंदसंवेगा॥ ९६ ॥

पार्श्वस्थश्च कुशीलः संसक्तोऽपसंज्ञो मृगचरित्रश्च ।
दर्शनज्ञानचारित्रे अनियुक्ता मंदसंवेगाः ॥ ९६ ॥

संयतगुणेभ्यः पार्श्वे अभ्यासे तिष्ठतीति पार्श्वस्थः वसतिकादिप्रतिबद्धो मोहबहुलो रात्रिंदिवमुपकरणानां कारकोऽसंयतजनसेवी संयतजनेभ्यो दूरीभूतः, कुत्सितं शीलं आचरणं स्वभावो वा यस्यासौ कुशीलः क्रोधादिकलुषितात्मा व्रतगुणशीलैश्च परिहीनः संघस्यायशःकरणकुशलः, सम्यगसंयतगुणेष्वाशक्तः संशक्तः आहारादिगृद्ध्या वैद्यमंत्रज्योतिषादिकुशलत्वेन प्रतिबद्धो राजादिसेवातत्परः, ओसण्णोऽपगतसंज्ञोऽपगता विनष्टा संज्ञा सम्यग्ज्ञानादिकं यस्यासौ अपगतसंज्ञश्चारित्राद्यपहीनो जिनवचनमजानन्चारित्रादिभ्रष्टः करणालसः सांसारिकसुखप्रियः, मृगस्येव पशोरिव चरित्रमाचरणं यस्यासौ मृगचरित्रः परित्यक्ताचार्योपदेशः स्वच्छन्दगतिरेकाकी जिनसूत्रदूषणस्तपःसूत्राद्यविनीतो धृतिरहितश्चेत्येते पंच पार्श्वस्था दर्शनज्ञानचारित्रेषु अनियुक्ताश्चारित्राद्यनुष्ठानपरा मंदसंवेगास्तीर्थधर्माद्यकृतहर्षाः सर्वदा न वंदनीया इति ॥ ९६ ॥

पुनरपि स्पष्टमवन्दनायाः कारणमाह—

दंसणणाणचरित्तेतवविणए णिच्चकाल पासत्था ।
एदे अवंदणिज्जा छिद्दप्पेही गुणधराणं ॥ ९७ ॥

दर्शनज्ञानचारित्रतपोविनयेभ्यः नित्यकालं पार्श्वस्थाः एते अवंदनीयाः छिद्रप्रेक्षिणो गुणधराणाम् ॥ ९७ ॥

दर्शनज्ञानचारित्रतपोविनयेभ्यो नित्यकालं पार्श्वस्था दूरीभूता यतो त एते न वंदनीयाश्छिद्रप्रेक्षिणः सर्वकालं गुणधराणां च छिद्रान्वेषिणः संयतजनस्य दोषोद्भाविनो यतो न वंदनीया एतेऽन्ये चेति ॥ ९७ ॥

के तर्हि वंद्यंतेऽत आह—

समणं वंदेज्ज मेधावी संजतं सुसमाहिदं ।
पंचमहव्वदकलिदं असंजमजुगुंछयं धीरं ॥ ९८ ॥

श्रमणं वंदेत मेधाविन् संयतं सुसमाहितं ।
पंचमहाव्रतकलितं असंयमजुगुप्सकं धीरं ॥ ९८ ॥

हे मेधाविन् ! चारित्राद्यनुष्ठानतत्पर ! श्रमणं निर्ग्रन्थरूपं वंदेत पूजयेत् किंविशिष्टं संयतं चारित्राद्यनुष्ठानतन्निष्ठं पुनरपि किंविशिष्टं सुसमाहितं ध्यानाध्ययनतत्परं क्षमादिसहितं पंचमहाव्रतकलितं असंयमजुगुप्सकं प्राणेन्द्रियसंयमपरं धीरं धैर्योपेतं चागमप्रभावनाशीलं सर्वगुणोपेतमेवं विशिष्टं स्तुयादिति

तथा—

दंसणणाणचरित्ते तवविणए णिच्चकालमुवजुत्ता

एदे खु बंदणिज्जा जे गुणवादी गुणधराणं ॥ ९९ ॥

दर्शनज्ञानचारित्रे तपोविनयेषु नित्यकालमुपयुक्ताः।
एते खलु बंदनीया ये गुणवादिनः गुणधराणाम् ९९

दर्शनज्ञानचारित्रतपोविनयेषु नित्यकालमभीक्ष्णमुपयुक्ताः सुष्ठु निरता ये ते एते बंदनीया गुणधराणां शीलधराणां च गुणवादिनो ये च ते बंदनीया इति ॥ ९९ ॥

संयतमप्येवं स्थितमेतेषु स्थानेषु न बंदेतेत्याह—

वाखित्तपराहुतं तु पमत्तं मा कदाइ बंदिज्जो ।
आहारं च करंतो णीहारं वा जदि करेदि १००॥

व्याक्षिप्तपरावृत्तं तु प्रमत्तं मा कदाचित् बंदेत ।
आहारं च कुर्वंतं नीहारं वा यदि करोति ॥ १०० ॥

व्याक्षिप्तं ध्यानादिनाकुलचित्तं परावृत्तं पराङ्मुखं पृष्ठदेशतः स्थितं प्रमत्तं निद्राविकथादिरतं मा कदाचिद् बन्देज्ज नो बंदेत संयतमिति संबंधस्तथाऽहारं च कुर्वन्तं भोजनक्रियां कुर्वाणं नीहारं वा मूत्रपुरीषादिकं यदि करोति तदाऽपि नो कुर्वीत बंदनां साधुरिति ॥ १०० ॥

केन विधानेन स्थितो बंद्यत इत्याशंकायामाह—

आसणे आसणत्थं च उवसंतं च उवट्ठिदं ।

अणुविण्णय मेधावी किदियम्मं पउंजदे ॥१०१॥

आसने आसनस्थं च उपशांतं च उपस्थितं।
अनुविज्ञाप्य मेधावी कृतिकर्म प्रयुंक्ते ॥ १०१ ॥

आसने विविक्तभूप्रदेशे आसनस्थं पर्यंकादिना व्यवस्थितं अथवा आसने आसनस्थमव्याक्षिप्तमपराङ्मुखमुपशांतं स्वस्थचित्तं उपस्थितं वंदनां कुर्वीत स्थितं अनुविज्ञाप्य बंदनां करोमीति संबोध्य मेधावी प्राज्ञोऽनेन विधानेन कृतिकर्म प्रारभेत प्रयुंजीत विदधीतेत्यर्थः ॥ १०१ ॥

कथमिव गतं सूत्रं बंदनायाः स्थानमित्याह—

आलोयणाय करणे पडिपुच्छा पूजणे य सज्झाए ।
अवराधे य गुरूणं बंदणमेदेसु ठाणेसु ॥ १०२ ॥

आलोचनायाः करणे प्रतिपृच्छायां पूजने च स्वाध्याये अपराधे च गुरूणां बंदनमेतेषु स्थानेषु ॥ १०२ ॥

आलोचनायाः करणे आलोचनाकालेऽथवा करणे षडावश्यककाले परिप्रश्ने प्रश्नकाले पूजने पूजाकाले च स्वाध्याये स्वाध्यायकालेऽपराधे क्रोधाद्यपराधकाले च गुरूणामाचार्योपाध्यायादीनां बंदनैतेषु स्थानेषु कर्तव्येति ॥ १०२ ॥

"कस्मिन्स्थाने" यदेतत्सूत्रं स्थापितं तद्व्याख्यातमि-

इदानीं कतिवारं कृतिकर्म कर्तव्यमिति यत्सूत्रं स्थापितं तद्व्याख्यानायाह—

चत्तारि पडिक्कमणे
किदियम्मा तिण्णि होंति सज्झाए।
पुव्वण्हे अवरण्हे
किदियम्मा चोद्दसा होंति ॥ १०३ ॥

चत्वारि प्रतिक्रमणे कृतिकर्माणि त्रीणि स्वाध्याये।
पूर्वाह्णे अपराह्णे कृतिकर्माणि चतुर्दश भवंति १०३

सामायिकस्तवपूर्वककायोत्सर्गश्चतुर्विंशतितीर्थकरस्तवपर्यन्तः कृतिकर्मेत्युच्यते। प्रतिक्रमणकाले चत्वारि क्रियाकर्माणि स्वाध्यायकाले च त्रीणि क्रियाकर्माणि भवंत्येवं पूर्वाह्णे क्रियाकर्माणि सप्त तथाऽपराह्णे च क्रियाकर्माणि सप्तैवं पूर्वाह्णेऽपराह्णे च क्रियाकर्माणि चतुर्दश भवंतीति। कथं प्रतिक्रमणे चत्वारि क्रियाकर्माणि, आलोचनाभक्तिकरणे कायोत्सर्ग एकं क्रियाकर्म तथा प्रतिक्रमणभक्तिकरणे कायोत्सर्गः द्वितीयं क्रियाकर्म तथा वीरभक्तिकरणे कायोत्सर्गस्तृतीयं क्रियाकर्म तथा चतुर्विंशतितीर्थकरभक्तिकरणे शांतिहेतोः कायोत्सर्गश्चतुर्थं क्रियाकर्म। कथं च स्वाध्याये त्रीणि क्रियाकर्माणि, श्रुतभक्तिकरणे कायोत्सर्ग एकं क्रियाकर्म तथाऽऽ-

चार्यभक्तिक्रियाकरणे द्वितीयं क्रियाकर्म तथा स्वाध्यायोपसंहारे श्रुतभक्तिकरणे कायोत्सर्गस्तृतीयं क्रियाकर्मैवं जातिमपेक्ष्य त्रीणि क्रियाकर्माणि भवंति स्वाध्याये शेषाणां वंदनादिक्रियाकर्मणामत्रैवान्तर्भावो द्रष्टव्यः । प्रधानपदोच्चारणं कृतं यतः पूर्वाह्ण दिवस इति एवमपराह्णे रात्रावपि द्रष्टव्यं भेदाभावात् अथ वा पश्चिमरात्रौ प्रतिक्रमणे क्रियाकर्माणि चत्वारि स्वाध्याये त्रीणि वंदनायां द्वे, सवितर्युदिते स्वाध्याये त्रीणि मध्याह्नवंदनायां द्वे एवं पूर्वाह्णक्रियाकर्माणि चतुर्दश भवन्ति; तथाऽपराह्णवेलायां स्वाध्याये त्रीणि क्रियाकर्माणि प्रतिक्रमणे चत्वारि वंदनायां द्वे योगभक्तिग्रहणोपसंहारकालयोः द्वे रात्रौ प्रथमस्वाध्याये त्रीणि । एवमपराह्णक्रियाकर्माणि चतुर्दश भवंति प्रतिक्रमणस्वाध्यायकालयोरुपलक्षणत्वादिति, अन्यान्यपि क्रियाकर्माण्यत्रैवान्तर्भवन्ति नाव्यापकत्वमिति संबन्धः । पूर्वाह्णसमीपकालः पूर्वाह्ण इत्युच्यतेऽपराह्णसमीपकालोऽपराह्ण इत्युच्यते तस्मान्न दोष इति ॥१०३॥

कत्यवनतिकरणमित्यादि यत्पृष्टं तदर्थमाह—

दोणदं तु जधाजादं बारसावत्तमेव य।
चदुस्सिरं तिसुद्धं च किदियम्मं पउंजदे॥१०४॥

द्व्यवनतिस्तु यथाजातं द्वादशावर्तमेव च ।
चतुःशिरः त्रिशुद्धं च कृतिकर्म प्रयुंजते ॥ १०४ ॥

दोणदं द्वे अवनती पंचनमस्कारादावेकावनतिर्भूमिसंस्पर्शस्तथा चतुर्विंशतिस्तवादौ द्वितीयाऽवनतिः शरीरनमनं द्वे अवनती जहाजादं यथाजातं जातरूपसदृशं क्रोधमानमायालोभादिरहितं वारसावत्तमेव य द्वादशावर्त्ता एव च पंचनमस्कारोच्चारणादौ मनोवचनकायानां संयमनानि शुभयोगवृत्तयस्त्रय आवर्त्तास्तथा पंचनमस्कारसमाप्तौ मनोवचनकायानां शुभवृत्तयस्त्रीण्यन्यान्यावर्त्तनानि तथा चतुर्विंशतिस्तवादौ मनोवचनकायाः शुभवृत्तयस्त्रीण्यपराण्यावर्त्तनानि तथा चतुर्विंशतिस्तवसमाप्तौ शुभमनोवचनकायवृत्तयस्त्रीण्यावर्त्तनान्येवं द्वादशधा मनोवचनकायवृत्तयो द्वादशावर्त्ता भवंति, अथवा चतसृषु दिक्षु चत्वारः प्रणामा एकस्मिन् भ्रमणे एवं त्रिषु भ्रमणेषु द्वादश भवंति, चदुस्सिरं चत्वारि शिरांसि पंचनमस्कारस्यादावंते च करमुकुलांकितशिरःकरणं तथा चतुर्विंशतिस्तवस्यादावंते च करमुकुलांकितशिरःकरणमेवं चत्वारि शिरांसि भवंति, त्रिशुद्धं मनोवचनकायशुद्धं क्रियाकर्म प्रयुंक्ते करोति। द्वे अवनती यस्मिन्तत् द्व्यवनति क्रियाकर्म द्वादशावर्त्ताः यस्मिंस्तत् द्वादशावर्त्तं मनोवचनकायशुद्धया चत्वारि शिरांसि यस्मिन् तत् चतुःशिरःक्रियाकर्म विशिष्टं यथाजातं कर्म प्रयुंजीतेति ॥ १०४ ॥

पुनरपि क्रियाकर्मप्रयुंजनविधानमाह—

तिविहं तियरणसुद्धं

मयरहियं दुविहठाण पुणरुत्तं ।
विणएण कमविसुद्धं
किदियम्मं होदि कायव्वं ॥१०५॥

त्रिविधं त्रिकरणशुद्धं मदरहितं द्विविधस्थानं पुनरुक्तं विनयेन क्रमविशुद्धं कृतिकर्म भवति कर्तव्यं ॥१०५॥

त्रिविधं ग्रंथार्थोभयभेदेन त्रिप्रकारं, अथवाऽवनतिद्वयमेकः प्रकारः द्वादशावर्त्तः द्वितीयः प्रकारश्चतुःशिरस्तृतीयं विधानमेवं त्रिविधं, अथ वा कृतकारितानुमतिभेदेन त्रिविधं, अथवा प्रतिक्रमणस्वाध्यायवन्दनाभेदेन त्रिविधं, अथवा पंचनमस्कारध्यानचतुर्विंशतिस्तवभेदेन त्रिविधमिति । त्रिकरणशुद्धं मनोवचनकायाशुभपरिणामविमुक्तं, अथ वाऽवनतिद्वयद्वादशावर्त्तचतुःशिरःक्रियाभिः शुद्धं । मदरहितं जात्यादिमदहीनं । द्विविधस्थानं द्वे पर्यंककायोत्सर्गौ स्थाने यस्य तत् द्विविधं स्थानं । पुनरुक्तं क्रियां क्रियां प्रति तदेव क्रियत इति पुनरुक्तं, विनयेन विनययुक्त्या क्रमविशुद्धं क्रममनतिलंघ्यागमानुसारेण कृतिकर्म भवति कर्त्तव्यं । न पुनरुक्तो दोषो द्रव्यार्थिकपर्यायार्थिकशिष्यसंग्रहणादिति ॥ १०५ ॥

कति दोषविप्रमुक्तं कृतिकर्म भवति कर्त्तव्यमिति यत्पृष्टं तदर्थमाह—

अणाठिदं च थद्धं च पविट्ठं परिपीडिदं ।
दोलाइयमंकुसियं तहा कच्छभरिंगियं ॥ १०६ ॥
अनादृतं च स्तब्धश्च प्रविष्टः परिपीडितं ।
दोलायितमंकुशितस्तथा कच्छपरिगितं १०६

अनाठिदमनादृतं विनादरेण संभ्रमंतरेण यत् क्रियाकर्म क्रियते तदनादृतमित्युच्यते अनादृतनामा दोषः । थद्धं च स्तब्धश्च विद्यादिगर्वेणोद्धतः सन् यः करोति क्रियाकर्म तस्य स्तब्धनामा दोषः, पविट्ठं प्रविष्टः पंचपरमेष्ठिनामत्यासन्नो भूत्वा यः करोति कृतिकर्म तस्य प्रविष्टदोषः, परिपीडिदं परिपीडितं करजानुपदेशैः परिपीड्य संस्पर्श्य यः करोति वंदनां तस्य परिपीडितदोषः, दोलायिदं-दोलायितं दोलामिवात्मानं चलाचलं कृत्वा शयित्वा वा यो विदधाति वन्दनां तस्य दोलायितदोषः अंकुसियं अंकुशितमंकुशमिव करांगुष्ठललाटदेशे कृत्वा यो वन्दनां करोति तस्यांकुशितदोषः, तथा कच्छभरिंगियं कच्छभरिंगितं चेष्टितं कटिभागेन कृत्वा यो विदधाति वन्दनां तस्य कच्छभरिंगितदोषः ॥ १०६ ॥

तथा—

मच्छुव्वत्तं मणोदुट्ठं वेदिआवद्धमेव य ।
भयसा चेव भयत्तं इड्ढिगारव गारवं ॥ १०७ ॥

मत्स्योद्वर्तो मनोदुष्टो वेदिकाबद्ध एव च ।
भयेन च विभ्यत्त्वं ऋद्धिगौरवं गौरवं ॥ १०७ ॥

मत्स्योद्वर्त्तः पार्श्वद्वयेन वन्दनाकरणमथवा मत्स्यस्य इव कटिभागेनोद्वर्त्तं कृत्वा यो वंदनां विदधाति तस्य मत्स्योद्वर्त्तदोषः, मनसाचार्यादीनां दुष्टो भूत्वा यो वंदनां करोति तस्य मनोदुष्टदोषः संक्लेशयुक्तेन मनसा यद्वा बंदनाकरणं, वेदियाबद्धमेव य वेदिकाबद्ध एव च वेदिकाकारेण हस्ताभ्यां बंधो हस्तपंजरेण वामदक्षिणस्तनप्रदेशं प्रपीडय जानुद्वयं वा प्रबद्ध्य बंदनाकरणं वेदिकाबद्धदोषः, भयसा चेव भयेन चैव मरणादिभीतस्य भयसंत्रस्तस्य यद्वंदनाकरणं भयदोषः भयतो विभ्यतो गुर्वादिभ्यो विभ्यतो भयं प्राप्नुवतः परमार्थात्परस्य बालस्वरूपस्य बंदनाभिधानं विभ्यद्दोषः, इड्डिगारव ऋद्धिगौरवं बंदनामकुर्वतो महापरिकरश्चातुर्वर्ण्यश्रमणसंघो भक्तो भवत्येवमभिप्रायेण यो बंदनां विदधाति तस्य ऋद्धिगौरवदोषः, गारवं गौरवं आत्मनो माहात्म्यासनादिभिराविःकृत्य रससुखहेतोर्वा यो बंदनां करोति तस्य गौरवबंदनादोषः ॥ १०७ ॥

तथा—

तेणिदं पडिणिदं चावि पदुट्ठं ताज्जिदं तधा ।
सद्दं च हीलिदं चावि तह तिवलिदकुंचिदं १०८
स्तेनितं प्रतिनीतं चापि प्रदुष्टस्तर्जितं तथा ।

शब्दश्च हीलितं चापि तथा त्रिवलितं कुंचितं १०८

तेणिदं स्तेनितं चौरबुद्धया यथा गुर्वादयो न जानंति वन्दनादिकमपवरकाभ्यन्तरं प्रविश्य वा परेषां वंदनां चोरयित्वा यः करोति वंदनादिकं तस्य स्तेनितदोषः, पडिणिदं प्रतिनीतं देवगुर्वादीनां प्रतिकूलो भूत्वा यो वंदनां विदधाति तस्य प्रतिनीतदोषः, पदुट्ठं प्रदुष्टोऽन्यैः सह प्रद्वेषं वैरं कलहादिकं विधाय क्षंतव्यमकृत्वा यः करोति क्रियाकलापं तस्य प्रदुष्टदोषः। तज्जिदं तर्जितं तथा अन्यांस्तर्जयन्नन्येषां भयमुत्पादयन्यदि वन्दनां करोति तदा तर्जितदोषस्तस्याथ वाऽचार्यादिभिरंगुल्यादिना तर्जितः त्रासितो यदि "नियमादिकं न करोषि निर्वासयामो भवन्त" मिति तर्जितो यः करोति तस्य तर्जितदोषः, सद्दं च शब्दं ब्रुवाणो यो वन्दनादिकं करोति मौनं परित्यज्य तस्य शब्ददोषोऽथ वा सट्ठ चेति पाठस्तत एवं ग्राह्यं शाठ्येन मायाप्रपंचेन यो वन्दनां करोति तस्य शाठ्यदोषः हीलिदं हीलितं वचनेनाचार्यादीनां परिभवं कृत्वा यः करोति वन्दनां तस्य हीलितदोषः, तह तिवलिदं तथा त्रिवलितं शरीरस्य त्रिषु कटिहृदयग्रीवाप्रदेशेषु भंगं कृत्वा ललाटदेशे वा त्रिवलिं कृत्वा यो विदधाति वन्दनां तस्य त्रिवलितदोषः, कुंचिदं कुंचितं कुंचितहस्ताभ्यां शिरः परामर्शं कुर्वन यो वन्दनां विदधाति जानुमध्ययोर्वा शिरः कृत्वा संकुचितो भूत्वा यो वन्दनां करोति तस्य संकुचितदोषः १०८

तथा—

दिट्ठमदिट्ठं चावि य संगस्स करमोयणं ।
आलद्धमणालद्धं च हीणमुत्तरचूलियं ॥ १०९ ॥

दृष्टः अदृष्टश्चापि च संघस्य करमोचनं ।
आलब्धः अनालब्धश्च हीनमुत्तरचूलिका ॥१०९॥

दिट्ठं दृष्टं आचार्यादिभिर्दृष्टः सन् सम्यग्विधानेन वंदनादिकं करोत्यन्यथा स्वेच्छयाऽथवा दिगवलोकनं कुर्वन् वन्दनादिकं यदि विदधाति तदा तस्य दृष्टो दोषः, अदिट्ठं अदृष्टं आचार्यादीनां दर्शनं पृथक् त्यक्त्वा भूप्रदेशं शरीरं चामतिलेख्यातद्गतमनाः पृष्ठदेशतो वा भूत्वा यो वन्दनादिकं करोति तस्यादृष्टदोषः, अपि च संघस्स करमोयणं संघस्य करमोचनं संघस्य मायाकरो वृष्टिर्दातव्योऽन्यथा न ममोपरि संघः शोभनः स्यादिति ज्ञात्वा यो वन्दनादिकं करोति तस्य संघकरमोचनदोषः। आलद्धमणालद्धं उपकरणादिकं लब्ध्वा यो वंदनां करोति तस्य लब्धदोषः अणालद्धं—अनालब्ध उपकरणादिकं लप्स्येऽहमिति बुद्धया यः करोति वन्दनादिकं तस्यानालब्धदोषः, हीणं हीनं ग्रंथार्थकालप्रमाणरहितां वन्दनां यः करोति तस्य हीनदोषः, उत्तरचूलियं उत्तरचूलिकां वन्दनां स्तोकेन कालेन निर्वर्त्य वन्दनायाश्चूलिकाभूतस्यालोचनादिकस्य महता कालेन निर्वर्त्तकं कृत्वा यो वन्दनां वि-

दधाति तस्योत्तरचूलिकादोषः ॥ १०९ ॥

तथा—

मूगं च दद्दुरं चावि चुलुलिदमपच्छिमं ।
बत्तीसदोसविसुद्धं किदियम्मं पउंजदे ॥ ११० ॥

मूकश्च दर्दुरं चापि चुलुलितमपश्चिमं ।
द्वात्रिंशद्दोषविशुद्धं कृतिकर्म प्रयुंक्ते ॥ ११० ॥

मूगं च मूकश्च मूक इव मुखमध्ये यः करोति वंदनामथ वा वन्दनां कुर्वन् हुंकारांगुल्यादिभिः संज्ञां च यः करोति तस्य मूकदोषः, दद्दुरं दर्दुरं आत्मीयशब्देनान्येषां शब्दानभिभूय महाकलकलं बृहद्बलेन कृत्वा यो वन्दनां करोति तस्य दर्दुरदोषः, अविचुलुलिदमपच्छिमं अपि चुरुलितमपश्चिमं एकस्मिन्प्रदेशे स्थित्वा करमुकुलं संभ्राम्य सर्वेषां यो वन्दनां करोत्यथ वा पंचमादिस्वरेण यो वन्दनां करोति तस्य चुरुलितदोषो भवत्यपश्चिमः एतैर्द्वात्रिंशद्दोषैः परिशुद्धं विमुक्तं यदि कृतिकर्म प्रयुंक्ते करोति साधुस्ततो विपुलनिर्जराभागी भवति ॥ ११० ॥

यदि पुनरेवं करोति तदा—

किदियम्मंपि करंतो
ण होदि किदयम्मणिज्जराभागी ।

बत्तीसाणण्णदरं
साहू ठाणं विराधंतो ॥ १११ ॥

कृतिकर्मापि कुर्वन् न भवति कृतिकर्मनिर्जराभागी ।
द्वात्रिंशतामन्यतरं साधुः स्थानं विराधयन् ॥ १११ ॥

कृतिकर्म कुर्वन्नपि न भवति कृतिकर्मनिर्जराभागी कृतिकर्मणा या कर्मनिर्जरा तस्याः स्वामी न स्यात्, यदि द्वात्रिंशद्दोषेभ्योऽन्यतरं स्थानं दोषं निवारयन्नाचरन् क्रियाकर्म कुर्यात्साधुरिति. अथवा द्वात्रिंशद्दोषेभ्योऽन्यतरेण दोषेण स्थानं कायोत्सर्गादिवन्दनां विराधयन्कुर्वीतेति ॥ १११ ॥

कथं तर्हि बन्दनां कुर्वीत साधुरित्याह—

हत्थंतरेणबाधे संफासपमज्ज गं पउंजंतो ।
जाएंतो वंदणयं इच्छाकारं कुणइ भिक्खू ॥११२॥

हस्तांतरे अनाबाधे संस्पर्शप्रमार्जनं प्रयुंजानः ।
याचमानो बंदनां इच्छाकारं करोति भिक्षुः ॥ ११२

हस्तान्तरेण हस्तमात्रान्तरेण यस्य बन्दना क्रियते यश्च करोति तयोरन्तरं हस्तमात्रं भवेत् तस्मिन् हस्तान्तरे स्थित्वा अणाबाधेऽनाबाधे बाधामन्तरेण संफासपमज्जणं स्वस्य स्वदेहस्य स्पर्शः संस्पर्शनं कटिगुह्यादिकं च तस्य प्रमार्जनं प्रतिलेखनं शुद्धिं पउंजंतो प्रयुंजानः प्रकर्षेण कुर्वन् जाएन्तो बन्द-

णयं वंदनां च याचमानो ' भवद्भ्यो वंदनां विदधामि ' इति याच्ञां कुर्वन्निच्छाकारंवन्दनाप्रणामं करोति भिक्षुः साधुरेवं द्वात्रिंशद्दोषपरिहारेण तावत् द्वात्रिंशद् गुणा भवंति तस्माद्यत्नपरेण हास्यभयासादनारागद्वेषगौरवालस्यमदलोभस्तेनभावप्रातिकूल्यबालत्वोपरोधहीनाधिकभावशरीरपरामर्शवचनभ्रूकुटिकरणषाट्करणादिवर्जनपरेण देवत दिगतमानसेन विवर्जितकार्यान्तरेण विशुद्धमनोवचनकाययोगेन मौनपरेण वंदना करणीया वन्दनाकारकेणेति ॥ ११२ ॥

यस्य क्रियते वन्दना तेन कथं प्रत्येषितव्येत्याह—

तेण च पडिच्छिदव्वं गारवरहिएण सुद्धभावेण ।
किदियम्मकारकस्सवि संवेगं संजणंतेण ॥ ११३

तेन च प्रत्येषितव्यं गर्वरहितेन शुद्धभावेन ।
कृतिकर्मकारकस्यापि संवेगं संजनयता ॥ ११३ ॥

तेण च तेनाचार्येण पडिच्छिदव्वं प्रत्येषितव्यमभ्युगन्तव्यं गौरवरहितेन ऋद्धिवीर्यादिगर्वरहितेन कृतिकर्मकारकस्य वन्दनायाः कर्तुरपि संवेगधर्मे धर्मफले च हर्षं संजनयता सम्यग्विधानेन कारयता शुद्धपरिणामवता वन्दनाऽभ्युद्यंतव्येति ॥ ११३ ॥

वन्दनानिर्युक्तिं संक्षेपयन् प्रतिक्रमणे निर्युक्तिं सूचयन्नाह--

वंदणणिज्जुत्ती पुण एसा कहिया मए समासेण ।

पाडिक्कमणणिज्जुत्ती पुण एतो उड्ढं पवक्खामि ॥

वंदनानिर्युक्तिः पुनः एषा कथिता मया समासेन ।
प्रतिक्रमणनिर्युक्तिं पुनः इत ऊर्ध्वं प्रवक्ष्यामि॥११४॥

वंदनानिर्युक्तिरेषा पुनः कथिता मया संक्षेपेण प्रतिक्रमणनिर्युक्तिं पुनरित ऊर्ध्वं वक्ष्य इति ॥ ११४ ॥

तां निक्षेपस्वरूपेणाह—

णामट्ठवणा दव्वे खेत्ते काले तहेव भावे य ।
एसो पाडिक्कमणगे णिक्खेवो छव्विहो णेओ॥

नाम स्थापना द्रव्यं क्षेत्रं कालस्तथैव भावश्च ।
एष प्रतिक्रमणके निक्षेपः षड्विधो ज्ञेयः ॥ ११५ ॥

नामप्रतिक्रमणं पापहेतुनामातीचारान्निवर्त्तनं प्रतिक्रमणदंडकगतशब्दोच्चारणं वा, सरागस्थापनाभ्यः परिणामनिवर्त्तनं-स्थापनाप्रतिक्रमणं सावद्यद्रव्यसेवायाः परिणामस्य निवर्त्तनं द्रव्यप्रतिक्रमणं । क्षेत्राश्रितातीचारान्निवर्त्तनं क्षेत्रप्रतिक्रमणं, कालमाश्रितातीचारान्निवृत्तिः कालप्रतिक्रमणं, रागद्वेषाद्याश्रितातीचारान्निवर्त्तनं भावप्रतिक्रमणमेष नामस्थापनाद्रव्यक्षेत्रकालभावाश्रितातीचारनिवृत्तिविषयः प्रतिक्रमणे निक्षेपः षड्विधो ज्ञातव्य इति । अथवा नामप्रतिक्रमणं नाममात्रं, प्रतिक्रमणपरिणतस्य प्रतिबिंबस्थापना स्थापनाप्रतिक्रमणं, प्रति-

कृपणप्राभृतज्ञोप्यनुपयुक्त आगमद्रव्यप्रतिक्रमणं, तच्छरीरादिकं नोआगमद्रव्यप्रतिक्रमणमित्येवमादि पूर्ववद् द्रष्टव्यमिति॥

प्रतिक्रमणभेदं प्रतिपादयन्नाह—

पाडिक्कमणं देवासियं रादिय इरियापधं च बोधव्वं
पक्खिय चादुम्मासिय संवच्छरमुत्तमट्ठं च॥११६॥

प्रतिक्रमणं दैवसिकं रात्रिकं ऐर्यापथिकं च बोद्धव्यं।
पाक्षिकं चातुर्मासिकं सांवत्सरमुत्तमार्थम्॥ ११६॥

प्रतिक्रमणं कृतकारितानुमतातिचारान्निवर्त्तनं, दिवसे भवं दैवसिकं दिवसमध्ये नामस्थापनाद्रव्यक्षेत्रकालभावाश्रितातीचारस्य कृतकारितानुमतस्य मनोवचनकायैः शोधनं, तथा रात्रौ भवं रात्रिकं रात्रिविषयस्य षड्विधातीचारस्य कृतकारितानुमतस्य त्रिविधेन निरसनं रात्रिकं, ईर्यापथे भवमैर्यापथिकं षड्जीवनिकायविषयातीचारस्य निरसनं ज्ञातव्यं, पक्षे भवं पाक्षिकं पंचदशाहोरात्रविषयस्य षड्विधनामादिकारणस्य कृतकारितानुमतस्य मनोवचनकायैः परिशोधनं, चतुर्मासेषु भवं चातुर्मासिकं, संवत्सरे भवं सांवत्सरिकं चतुर्मासमध्ये संवत्सरमध्ये नामादिभेदेन षड्विधस्यातीचारस्य बहुभेदभिन्नस्य वा, कृतकारितानुमतस्य मनोवचनकायैः निरसनं, उत्तमार्थे भवमौत्तमार्थं यावज्जीवं चतुर्विधाहारस्य प-

रित्यागः सर्वातिचारप्रतिक्रमणस्यात्रान्तर्भावो द्रष्टव्यः, एवं प्रतिक्रमणसप्तकं द्रष्टव्यम् ॥ ११६ ॥

पुनरप्यन्येन प्रकारेण भेदं प्रतिपादयन्नाह—

पडिकमओ पडिकमणं
पडिकमिदव्वं च होदि णादव्वं ।
एदेसिं पत्तेयं परूवणा होदि तिण्हंपि ॥ ११७ ॥

प्रतिक्रामकः प्रतिक्रमणं
प्रतिक्रमितव्यं च भवति ज्ञातव्यं ।
एतेषां प्रत्येकं प्ररूपणा भवति त्रयाणामपि ॥११७॥

प्रतिक्रामति कृतदोषाद्विरमतीति प्रतिक्रामकः, अथवा दोषनिर्हरणे प्रवर्त्तते अविघ्नेन प्रतिक्रमत इति प्रतिक्रामकः, पंचमहाव्रतादिश्रवणधारणदोषनिर्हरणतत्परः प्रतिक्रमणं पंचमहाव्रताद्यतीचारविरतिर्व्रतशुद्धिनिमित्ताक्षरमाला वा, प्रतिक्रमितव्यं द्रव्यं च परित्याज्यं मिथ्यात्वाद्यतीचाररूपं भवति ज्ञातव्यं, एतेषां त्रयाणां प्रत्येकमेकमेकं प्रति प्ररूपणाप्रतिपादनं भवति ॥ ११७ ॥

तथैव प्रतिपादयन्नाह—

जीवो दु पडिक्कमओ दव्वे खेत्ते य काल भावे य ।
पडिगच्छदि जेण जहिं तं तस्स भवे पडिक्कमणं॥

जीवस्तु प्रतिक्रामकः द्रव्ये क्षेत्रे च काले भावे च ।
प्रतिगच्छति येन यस्मिन् तत्तस्य भवेत् प्रतिक्रमणं

जीवस्तु प्रतिक्रामकः दोषद्वारागतकर्मविक्षपणशीलो जीवश्चेतनालक्षणः क्व प्रतिक्रामकः द्रव्यक्षेत्रकालभावविषये, द्रव्यमाहारपुस्तकभेषजोपकरणादिकं, क्षेत्रं शयनासनस्थानचंक्रमणादिविषयो भूभागोऽगुलवितस्तिहस्तक्रोशयोजनादिप्रमितः, कालः घटिकामुहूर्तसमयलवदिवसरात्रिपक्षमासर्त्वयनसंवत्सरसंध्यापर्वादिः, भावः परिणामरागद्वेषादिमदादिलक्षणः, एतद्विषयादतिचारान्निवर्त्तनपरो जीवः प्रतिक्रामक इत्युच्यते ज्ञेयाकारबहिर्व्यावृत्तरूपः, अथवा द्रव्यक्षेत्रकालभावविषयादतिचारात्प्रतिगच्छति निवर्त्तते स प्रतिक्रामकोऽथवा येन परिणामेनाक्षरकदंबकेन वा प्रतिगच्छति पुनर्याति यस्मिन् व्रतशुद्धिपूर्वकस्वरूपे यस्मिन् वा जीवे पूर्वव्रतशुद्धिपरिणतेऽतीचारं परिभूतं स परिणामोऽक्षरसमूहो वा तस्य व्रतस्य तस्य वा व्रतशुद्धिपरिणतस्य जीवस्य भवेत्प्रतिक्रमणं व्रतविषयमतीचारं येन परिणामेन प्रक्षाल्य प्रतिगच्छति पूर्वव्रतशुद्धौ स परिणामस्तस्य जीवस्य भवेत्प्रतिक्रमणमिति । मिथ्यादुष्कृताभिधानादभिव्यक्तप्रतिक्रियं द्रव्यक्षेत्रकालभावमाश्रित्य प्रतिक्रमणमिति वा ॥ ११८ ॥

प्रतिक्रमितव्यं तस्य स्वरूपमाह—

पडिकमिदव्वं दव्वं

सच्चित्ताचित्तमिस्सियं तिविहं ।
खेत्तं च गिहादीयं
कालो दिवसादिकालम्हि ॥११९॥

प्रतिक्रमितव्यं द्रव्यं सचित्ताचित्तमिश्रकं त्रिविधं ।
क्षेत्रं च गृहादिकं कालः दिवसादिकाले ॥ ११९ ॥

प्रतिक्रमितव्यं परित्यजनीयं किं तत् द्रव्यं सचित्ताचित्तमिश्रभेदेन त्रिविधं सह चित्तेन वर्त्तत इति सचित्तं द्विपदचतुष्पदाद्यचित्तं सुवर्णरूप्यलोहादिमिश्रं वस्त्रादियुक्तद्विपदादि तथा क्षेत्रं गृहपत्तनकूपवाप्यादिकं प्रतिक्रमितव्यं तथा कालो दिवसमुहूर्तरात्रिवर्षाकालादिः प्रतिक्रमितव्यः येन द्रव्येण क्षेत्रेण कालेन वा पापागमो भवति तत् द्रव्यं क्षेत्रं स कालः परिहरणीयः द्रव्यक्षेत्रकालाश्रितदोषाभाव इत्यर्थः । काले च प्रतिक्रमितव्यं यस्मिन् काले च प्रतिक्रमणमुक्तं तस्मिन् काले कर्त्तव्यमिति, अथ वा कालेऽष्टमीचतुर्दशीनंदीश्वरादिके द्रव्यं क्षेत्रं प्रतिक्रमितव्यं कालश्च दिवसादिः प्रतिक्रमितव्य उपवासादिरूपेण, अथवा 'भावो हि' पाठान्तरं भावश्च प्रतितिक्रमितव्य इति । अप्रासुकद्रव्यक्षेत्रकालभावास्त्याज्यास्तद्द्वारेणातीचाराश्च परिहरणीया इति ॥ ११९ ॥

भावप्रतिक्रमणमाह—

मिच्छत्तपडिक्कमणं तह चेव असंजमे पडिक्कमणं ।

कसाएसु पडिक्कमणं जोगेसु य अप्पसत्थेसु १२०

मिथ्यात्वप्रतिक्रमणं तथा चैव असंयमे प्रतिक्रमणं ।
कषायेषु प्रतिक्रमणं योगेषु च अप्रशस्तेषु ॥ १२० ॥

मिथ्यात्वस्य प्रतिक्रमणं त्यागस्तद्विषयदोषनिर्हरणं तथैवासंयमस्य प्रतिक्रमणं तद्विषयातीचारपरिहारः कषायाणां क्रोधादीनां प्रतिक्रमणं तद्विषयातीचारशुद्धिकरणं योगानामप्रशस्तानां प्रतिक्रमणं मनोवाक्कायविषयव्रतातीचारनिवर्त्तनमित्येवं भावप्रतिक्रमणमिति ॥ १२० ॥

आलोचनापूर्वकं प्रतिक्रमणं यतोऽत आलोचनास्वरूपमाह-

काऊण य किदियम्मं
पडिलेहिय अंजलीकरणसुद्धो ।
आलोचिज्ज सुविहिदो
गारव माणं च मोत्तूण ॥ १२१ ॥

कृत्वा च कृतिकर्म प्रतिलेख्य अंजलीकरणशुद्धः ।
आलोचयेत् सुविहितः गौरवं मानं च मुक्त्वा ॥ १२१

कृतिकर्म विनयं सिद्धभक्तिश्रुतभक्त्यादिकं कृत्वा पूर्वापरभागं स्वोपवेशनस्थानं च प्रतिलेख्य सम्मार्ज्य पिच्छिकया चक्षुषा चाथवा चारित्रातीचारान् सम्यङ्निरूप्यांजलिकरणं शुद्धिर्ललाटपट्टविन्यस्तकरकुड्मलक्रियाशुद्ध एवमा-

लोचयेत् गुरवेऽपराधान्निवेदयेत् सुविहितः स्वच्छवृत्तिः ऋद्धिगौरवं रसगौरवं मानं च जात्यादिमदं मुक्त्वा परित्यज्यैवं गुरवे स्वव्रतातीचारान्निवेदयेदिति ॥ १२१ ॥

आलोचनाप्रकारमाह—

आलोचणं दिवसियं रादिअ इरियापधं च बोद्धव्वं
पक्खिय चादुम्मासिय संवच्छरमुत्तमट्ठं च १२२

आलोचनं दैवसिकं रात्रिकं ईर्यापथं च बोधव्यं ।
पाक्षिकं चातुर्मासिकं सांवत्सरिकमुत्तमार्थं च ॥ १२२

आलोचनं गुरवेऽपराधनिवेदनं अर्हद्भट्टारकस्याग्रतः स्वापराधाविष्करणं वा स्वचित्तेऽपराधानामनवगूहनं, दिवसे भवं दैवसिकं रात्रौ भवं रात्रिकं ईर्यापथे भवमैर्यापथिकं बोद्धव्यं पक्षे भवं पाक्षिकं चतुर्षु मासेषु भवं चातुर्मासिकं संवत्सरे भवं सांवत्सरिकं उत्तमार्थे भवमौत्तमार्थं च दिवसरात्रीर्यापथपक्षचतुर्मासंसंवत्सरोत्तमार्थविषयजातापराधानां गुर्वादिभ्यो निवेदनं सप्तप्रकारमालोचनं वेदितव्यमिति ॥ १२२ ॥

आलोचनीयमाह—

अणाभोगकिदं कम्मं जं किंवि मणसा कदं ।
तं सव्वं आलोचेज्जहु अव्वाखित्तेण चेदसा १२३

अनाभोगकृतं कर्म यत् किमपि मनसा कृतं ।

तद् सर्वं आलोचयेत् अव्याक्षिप्तेन चेतसा ॥ १२३

आभोगः सर्वजनपरिज्ञातव्रतातीचारोऽनाभोगो न परैर्ज्ञातस्तस्मादनाभोगकृतं कर्माऽऽभोगमन्तरेण कृतातीचारस्तथाभोगकृतश्चातीचारश्च तथा यत्किंचिन्मनसा च कृतं कर्म तथा कायवचनकृतं च तत्सर्वमालोचयेत् यत्किंचिदनाभोगकृतं कर्माभोगकृतं कायवाङ्मनोभिः कृतं च पापं तत्सर्वमव्याक्षिप्तचेतसाऽनाकुलितचेतसाऽऽलोचयेदिति ॥ १२३ ॥

आलोचनापर्यायनाम्न्याह ——

आलोचणमालुंचण विगडीकरणं च भावसुद्धी दु
आलोचिदम्हि आराधणा अणालोचणे भज्जा ॥

आलोचनमालुंचनं विकृतिकरणं च भावशुद्धिस्तु ।
आलोचिते आराधना अनालोचने भाज्या ॥ १२४ ॥

आलोचनमालुंचनमपनयने विकृतीकरणमाविष्करणं भावशुद्धश्चेत्येकोऽर्थः । अथ किमर्थमालोचनं क्रियत इत्याशंकायामाह,— यस्मादालोचिते चरित्राचारपूर्वके गुरवे निवेदिते चेति आराधना सम्यग्दर्शनज्ञानचारित्रशुद्धिरनालोचने पुनर्दोषाणामनाविष्करणे पुनर्भाज्याऽऽराधना तस्मादालोचयितव्यमिति ॥ १२४ ॥

आलोचने कालहरणं न कर्त्तव्यमिति प्रदर्शयन्नाह,—

उप्पण्णो उप्पण्णा माया अणुपुव्वसो णिहंतव्वा।
आलोचणणिंदणगरहणाहिं ण पुणो तिअं विदिअं

उत्पन्न उत्पन्ना माया अनुपूर्व्वशो निहंतव्या ।
आलोचननिंदनगर्हणे न पुनः तृतीयं द्वितीयं ॥

उत्पन्नोत्पन्ना यथा यथा संजाता माया व्रतातीचारोऽनुपूर्वशोनुक्रमेण यस्मिन् काले यस्मिन् क्षेत्रे यद्द्रव्यमाश्रित्य येन भावेन तेनैव क्रमेण कौटिल्यं परित्यज्य निहन्तव्या परिशोध्या यस्मादालोचने गुरवे दोषनिवेदने निंदने परेष्वाविष्करणे गर्हणे आत्मजुगुप्सने कर्त्तव्ये पुनर्द्वितीयं पुनर्न करिष्यामीत्यथ वा न पुनस्तृतीयं दिनं द्वितीयं वा द्वितीयदिवसे तृतीयदिवसे आलोचयिष्यामीति न चिंतनीयं यस्माद्गतमपि कालं न जानंतीति भावार्थस्तस्माच्छीघ्रमालोचयितव्यमिति ॥

यस्मात्—

आलोचणणिंदणगर-
हणाहिं अब्भुट्ठिओ अ करणाए ।
तं भावपडिक्कमणं
सेसं पुण दव्वदो भणिअं ॥ १२६ ॥

आलोचननिंदनगर्हणैः अभ्युत्थितश्च करणे ।
तत् भावप्रतिक्रमणं शेषं पुनः द्रव्यतो भणितं ॥

गुरवेऽपराधनिवेदनमालोचनं वचनेनात्मजुगुप्सनं परेभ्यो निवेदनं च निन्दा चित्तेनात्मनो जुगुप्सनं शासनविराधनभयं च गर्हणमेतैः क्रियायां प्रतिक्रमणेऽथ वा पुनरतीचाराकरणेऽभ्युत्थित उद्यतो यतस्तस्माद्भावप्रतिक्रमणं परमार्थभूतो दोषपरिहारः शेषं पुनरेवमन्तरेण द्रव्यतोऽपरमार्थरूपं भणितमिति ॥ १२६ ॥

द्रव्यप्रतिक्रमणे दोषमाह—

भावेण अणुवजुत्तो दव्वीभूदो पडिक्कमदि जो दु।
जस्सट्ठं पडिकमदे तं पुण अट्ठं ण साधेदि १२७

भावेन अनुपयुक्तः द्रव्यीभूतः प्रतिक्रमते यस्तु ।
यस्यार्थं प्रतिक्रमते तं पुनः अर्थं न साधयति ॥

भावेनानुपयुक्तः शुद्धपरिणामरहितः द्रव्यीभूतो दोषेभ्यो न निर्गतमना रागद्वेषादुपहतचेताः प्रतिक्रमते दोषनिर्हरणाय प्रतिक्रमणं शृणोति करोति चेति यः स यस्यार्थं यस्मै दोषाय प्रतिक्रमते तं पुनरर्थं न साधयति तं दोषं न परित्यजतीत्यर्थः ॥ १२७ ॥

भावप्रतिक्रमणमाह—

भावेण संपजुत्तो जदत्थजोगो य जंपदे सुत्तं ।
सो कम्मणिज्जराए विउलाए वट्टदे साधू ॥१२८॥

भावेन संप्रयुक्तः यदर्थयोगश्च जल्पति सूत्रं ।
स कर्मनिर्जरायां विपुलायां वर्तते साधुः ॥ १२८॥

भावेन संप्रयुक्तो यदर्थयोगश्च यस्मिन्निमित्तं शुभानुष्ठानं यस्मा अर्थायाभ्युद्यतो जल्पति सूत्रं प्रतिक्रमणपदान्युच्चरति शृणोति वा स साधुः कर्मनिर्जरायां विपुलायां प्रवर्त्तते सर्वापराधान् परिहरतीत्यर्थः ॥ १२८ ॥

किमर्थं प्रतिक्रमणे तात्पर्यं, यस्मात्—

सपाडिक्कमणो धम्मो
पुरिमस्स य पच्छिमस्स य जिणस्स।
अवराहे पडिकमणं
मज्झिमयाणं जिणवराणं॥१२९॥

सप्रतिक्रमणो धर्मः पूर्वस्य च पश्चिमस्य च जिनस्य
अपराधे प्रतिक्रमणं मध्यमानां जिनवराणां ॥ १२९॥

सह प्रतिक्रमणेन वर्त्तत इति सप्रतिक्रमणो धर्मो दोषपरिहारेण चारित्रं पूर्वस्य प्राक्तनस्य वृषभतीर्थकरस्य पश्चिमस्य पाश्चात्यस्य सन्मतिस्वामिनो जिनस्य तयोस्तीर्थकरयोर्धर्मः प्रतिक्रमणसमन्वितः अपराधो भवतु मा वा, मध्यमानां पुनर्जिनवराणामजितादिपार्श्वनाथपर्यन्तानामपराधे सति प्रतिक्रमणं तेषां यतोऽपराधबाहुल्याभावादिति ॥ १२९ ॥

जावेदु अप्पणो वा अण्णदरे वा भवे अदीचारो।
तावेदु पडिक्कमणं मज्झिमयाणं जिणवराणं १३०

यस्मिन् आत्मनो वा अन्यतरस्य वा भवेदतीचारः ।
तस्मिन् प्रतिक्रमणं मध्यमानां जिनवराणां ॥ १३० ॥

यस्मिन् व्रत आत्मनोऽन्यस्य वा भवेदतीचारस्तस्मिन् विषये भवेत्प्रतिक्रमणं मध्यमजिनवराणामाद्यपश्चिमयोः पुनस्तीर्थकरयोरेकस्मिन्नपराधे सर्वान् प्रतिक्रमणदंडकान् भणति ॥

इत्याह—

इरियागोयरसुमिणा—
दिसव्वमाचरदु मा व आचरदु।
पुरिम चरिमादु सव्वे
सव्वं णियमा पडिक्कमंदि ॥१३१॥

ईर्यागोचरस्वप्नादिसर्वं आचरतु मा वा आचरतु ।
पूर्वे चरमे तु सर्वे सर्वान् नियमान् प्रतिक्रमंते ॥१३१

ईर्यागोचरस्वप्नादिभवं सर्वमतीचारमाचरतु मा वाऽऽचरतु पूर्वे ऋषभनाथशिष्याश्चरमा वर्द्धमानशिष्याः सर्वे सर्वान्नियमान् प्रतिक्रमणदण्डकान् प्रतिक्रमन्त उच्चारयन्ति १३१

किमित्याद्याः पश्चिमाश्च सर्वान्नियमादुच्चारयंति किमि-

त्यजितादिपार्श्वनाथपर्यन्तशिष्या नोच्चारयन्ति इत्याशंकायामाह-

मज्झिमया दिढबुद्धी
एयग्गमणा अमोहलक्खा य ।
तह्मा हु जमाचरंति
तं गरहंता वि सुज्झंति ॥ १३२ ॥

मध्यमा दृढबुद्धय एकाग्रमनसः अमोहलक्षाश्च ।
तस्मात् हि यमाचरंति तं गर्हंतोपि शुध्यंति ॥ १३२ ॥

यस्मान्मध्यमतीर्थकरशिष्या दृढबुद्धयोऽविस्मरणशीला एकाग्रमनसः स्थिरचित्ता अमोहलक्षा अमूढमनसः प्रेक्षापूर्वकारिणः तस्मात्स्फुटं यं दोषं आचरंति तस्माद्दोषाद् गर्हन्तोऽप्यात्मानं जुगुप्समानाः शुद्धयन्ते शुद्धचारित्रा भवन्तीति १३२

पुरिमचरिमादु जह्मा
चलचित्ता चेव मोहलक्खा य ।
तो सव्वपडिक्कमणं
अंधलयघोडय दिट्ठंता ॥ १३३ ॥

पूर्वचरमास्तु यस्मात् चलचित्ताश्चैव मोहलक्षाश्च ।
तस्मात् सर्वप्रतिक्रमणं अंधलकघोटकः दृष्टांतः ॥ १३३

पूर्वचरमतीर्थकरशिष्यास्तु यस्माच्चलचित्ताश्चैव दृढम-

नसो नैव, मोहलक्षाश्च मूढमनसो बहून् वारान् प्रतिपादितमपि शास्त्रं न जानंति ऋजुजडा वक्रजडाश्च यस्मात्तस्मात्सर्वप्रतिक्रमणां दंडकोच्चारणं । तेषामन्धलकघोटकदृष्टान्तः कस्यचिद्राज्ञोऽश्वोऽन्धस्तेन च वैद्यपुत्रं प्रति अश्वायौषधं पृष्टं स च वैद्यकं न जानाति वैद्यश्च ग्रामं गतस्तेन च वैद्यपुत्रेणाश्वाक्षिनिमित्तानि सर्वाण्यौषधानि प्रयुक्तानि तैः सोऽश्वः स्वस्थीभूतः एवं साधुरपि यदि एकस्मिन्प्रतिक्रमणादण्डके स्थिरमना न भवति अन्यस्मिन् भविष्यति अन्यस्मिन् वा न भवत्यन्यस्मिन् भवष्यतीति सर्वदण्डकोच्चारणं न्याय्यमिति, न चात्र विरोधः, सर्वेपि कर्मक्षयकरणसमर्था यतः इति ॥ १३३ ॥

प्रतिक्रमणनिर्युक्तिमुपसंहरन् प्रत्याख्याननिर्युक्तिं प्रपंचयन्नाह—

पडिकमणणिजुत्ती पुण
एसा कहिया मए समासेण ।
पच्चक्खाणणिजुत्ती
एतो उड्ढं पवक्खामि ॥ १३४ ॥

प्रतिक्रमणानिर्युक्तिः पुन एषा कथिता मया समासेन ।
प्रत्याख्यानानिर्युक्तिं इत ऊर्ध्वं प्रवक्ष्यामि ॥ १३४ ॥

प्रतिक्रमणानिर्युक्तिरेषा कथिता मया समासेन पुनः प्रत्याख्याननिर्युक्तिमित ऊर्ध्वं प्रवक्ष्यामीति ॥ १३४ ॥

तामेव प्रतिज्ञां निर्वहन्नाह—

णामट्ठवणा दव्वे खेत्ते काले य होदि भावे य ।
एसो पच्चक्खाणे णिक्खेवो छव्विहो णेओ ॥ १३५

नाम स्थापना द्रव्यं क्षेत्रं कालश्च भवति भावश्च ।
एषः प्रत्याख्याने निक्षेपः षड्विधो ज्ञेयः ॥ १३५ ॥

अयोग्यानि नामानि पापहेतूनि विरोधकारणानि न कर्तव्यानि न कारयितव्यानि नानुमंतव्यानीति नामप्रत्याख्यानं प्रत्याख्याननामप्रमात्रं वा, अयोग्याः स्थापनाः पापबंधहेतुभूताः मिथ्यात्वादिप्रवर्त्तका अपरमार्थरूपदेवतादिप्रतिबिंबानि पापकारणद्रव्यरूपाणि च न कर्त्तव्यानि न कारयितव्यानि नानुमन्तव्यानि इति स्थापनाप्रत्याख्यानं प्रत्याख्यानपरिणतप्रतिबिंबं च सद्भावासद्भावरूपं स्थापनाप्रत्याख्यानमिति, पापबन्धकारणद्रव्यं सावद्यं निरवद्यमपि तपोनिमित्तं त्यक्तं न भोक्तव्यं न भोजयितव्यं नानुमंतव्यमिति द्रव्यप्रत्याख्यानं प्राभृतज्ञायकोऽनुपयुक्तस्तच्छरीरं भावी जीवस्तद्व्यतिरिक्तं च द्रव्यप्रत्याख्यानं असंयमादिहेतुभूतस्य क्षेत्रस्य परिहारः क्षेत्रप्रत्याख्यानं प्रत्याख्यानपरिणतेन सेवितप्रदेशो वा क्षेत्रप्रत्याख्यानं, असंयमादिनिमित्तभूतस्य कालस्य त्रिधा परिहारः कालप्रत्याख्यानं प्रत्याख्यानपरिणतेन सेवितकालो वा, मिथ्यात्वासंयमकषायादीनां त्रिविधेन परिहारो भावप्रत्या-

ख्यानं भावप्रत्याख्यानप्राभृतज्ञायकस्तद्विज्ञानं प्रदेशादित्येवमेष नामस्थापनाद्रव्यक्षेत्रकालभावविषयः प्रत्याख्याने निक्षेपः षड्विधो ज्ञातव्य इति । प्रतिक्रमणप्रत्याख्यानयोः को विशेष इति चेन्नैष दोषोऽतीतकालविषयातीचारशोधनं प्रतिक्रमणमतीतभविष्यद्वर्त्तमानकालविषयातिचारनिर्हरणं प्रत्याख्यानमथवा व्रताद्यतीचारशोधनं प्रतिक्रमणपतीचारकारणसचित्ताचित्तमिश्रद्रव्यविनिवृत्तिस्तपोनिमित्तं प्रासुकद्रव्यस्य च निवृत्तिः प्रत्याख्यानं यस्मादिति ॥ १३५ ॥

प्रत्याख्यायकप्रत्याख्यानप्रत्याख्यातव्यस्वरूपप्रतिपादनार्थमाह-

पच्चक्खाओ पच्चक्खाणं पच्चक्खियव्वमेवं तु ।
तीदे पच्चुप्पण्णे अणागदे चेव कालम्हि ॥ १३६ ॥

प्रत्याख्यापकः प्रत्याख्यानं प्रत्याख्यातव्यमेवं तु ।
अतीते प्रत्युत्पन्ने अनागते चैव काले ॥ १३६ ॥

प्रत्याख्यायको जीवः संयमोपेतः प्रत्याख्यानं परित्यागपरिणामः प्रत्याख्यातव्यं द्रव्यं सचित्ताचित्तमिश्रकं सावद्यं निरवद्यं वा एवं त्रिप्रकारं प्रत्याख्यानस्वरूपोऽन्यथाऽनुपपत्तेरिति तत्त्रिविधमप्यतीते काले प्रत्युत्पन्ने कालेऽनागते च काले भूतभविष्यद्वर्त्तमानकालेष्वपि ज्ञातव्यमिति ॥

प्रत्याख्यायकस्वरूपं प्रतिपादयन्नाह—

आणाय जाणणा विय उवजुत्तो मूलमज्झणिद्देसे ।

सागारमणागारं अणुपालेंतो दढधिदीओ ॥१३७

आज्ञया ज्ञापकेनापि च उपयुक्तो मूलमध्यनिर्देशे ।
सागारमनागारं अनुपालयन् दृढधृतिकः ॥ १३७ ॥

आणाविय आज्ञया गुरूपदेशेनार्हदाद्याज्ञया चारित्रश्रद्धया जाणणाविय ज्ञापकेन गुरुनिवेदनेनाथ वा परमार्थतो-ज्ञात्वा दोषस्वरूपं तमोहेतुं वाह्याभ्यन्तरं प्रविश्य ज्ञात्वाऽपि चोपयुक्तः षट्प्रकारसमन्वितः मूले आदौ ग्रहणकाले मध्ये मध्यकाले निर्देशे समाप्तौ सागारं गार्हस्थ्यं संयतासंयतयो-ग्यमथवा साकारं सविकल्पं भेदसहितं अनागारं संयमसमे-तोद्भव यतिप्रतिबद्धमथ वाऽनाकारं निर्विकल्पं सर्वथा परि-त्यागमनुपालयन् रक्षयन दृढधृतिकः सदृढधैर्यः मूलमध्यनिर्देशे साकारमनाकारं च प्रत्याख्यानमुपयुक्तः सन् आज्ञया सम्य-ग्विवेकेन वाऽनुपालयन् दृढधृतिको यो भवति स एष प्रत्या-ख्यायको नामेति संबन्धः उत्तरेणाथवा मूलमध्यनिर्देश आ-ज्ञयोपयुक्तः साकारमनाकारं च प्रत्याख्यान च गुरु ज्ञापयन् प्रति-पादयन अनुपालयँश्च दृढधृतिकः प्रत्याख्यायको भवेदिति ॥

शेषं प्रतिपादयन्नाह,——

एसो पच्चक्खाओ पच्चक्खाणेत्ति वुच्चदे चाओ ।
पच्चक्खदव्वमुवहिं आहारो चेव बोधव्वो ॥ १३८

एष प्रत्याख्यायकः पूत्याख्यानमिति उच्यते त्यागः।
पूत्याख्यातव्यमुपधिराहारश्चैव बोद्धव्यः ॥ १३८॥

एष प्रत्याख्यायकः पूर्वेण सम्बन्धः प्रत्याख्यानमित्युच्यते त्यागः सावद्यस्य द्रव्यस्य निरवद्यस्य वा तपोनिमित्तं परित्यागः प्रत्याख्यानं प्रत्याख्यातव्यः परित्यजनीय उपधिः परिग्रहः सचित्ताचित्तमिश्रभेदभिन्नः क्रोधादिभेदभिन्नश्चाहारश्चाभक्ष्यभोज्यादिभेदभिन्नो बोद्धव्य इति ॥ १३८ ॥

प्रस्तुतं प्रत्याख्यानं प्रपंचयन्नाह;—

पच्चक्खाणं उत्तरगुणेसु खमणादि होदि णेयविहं।
तेणवि अ एत्थ पयदं तंपि य इणमो दसविहं तु॥
पूत्याख्यानं उत्तरगुणेषु क्षमणादि भवति अनेकविधं।
तेनापि च अत्र प्रयतं तदपि च इदं दशविधं तु॥ १३९

प्रत्याख्यानं मूलगुणविषयमुत्तरगुणविषयं वक्ष्यमाणादिभेदेनाशनपरित्यागादिभेदेनानेकविधमनेकप्रकारं तेनापि चात्र प्रकृतं प्रस्तुतं अथ वा तेन प्रत्याख्यायकेनात्र यत्नः कर्त्तव्यस्तदेतदपि च दशविधं तदपि चैतत् क्षमणादि दशप्रकारं भवतीति वेदितव्यम् ॥ १३९ ॥

तान् दशभेदान् प्रतिपादयन्नाह;—

अणागदमदिकंतं कोडीसहिदं णिखंडिदं चेव।

सागारमणागारं परिमाणगदं अपरिसेसं ॥
अनागतमतिक्रांतं कोटीसहितं निखंडितं चैव ।
साकारमनाकारं परिमाणगतं अपरिशेषं ॥ १४० ॥

अणागदं अनागतं भविष्यत्कालविषयोपवासादिकरणं चतुर्दश्यादिषु यत्कर्त्तव्यं तत्त्रयोदश्यादिषु यत् क्रियते तदनागतं प्रत्याख्यानं, अदिकंतं अतिक्रान्तं अतीतकालविषयोपवासादिकरणं चतुर्दश्यादिषु यत्कर्त्तव्यमुपवासादिकं तत्प्रतिपदादिषु क्रियतेऽतिक्रान्तं प्रत्याख्यानं कोडीसहिदं कोटिसहितं संकल्पसमन्वितं शक्त्यपेक्षयोपवासादिकं श्वस्तने दिने स्वाध्यायवेलायामतिक्रान्तायां यदि शक्तिर्भविष्यत्युपवासादिकं करिष्यामि नो चेन्न करिष्यामीत्येवं यत् क्रियते प्रत्याख्यानं तत्कोटिसहितमिति, णिक्खंडिदं निखंडितं अवश्यकर्त्तव्यं पाक्षिकादिषूपवासकरणं निखंडितं प्रत्याख्यानं, साकारं सभेदं सर्वतोभद्रकनकावल्यादयुपवासविधिर्नक्षत्रादिभेदेन करणं तत्साकारप्रत्याख्यानं, अनाकारं स्वेच्छयोपवासविधिर्नक्षत्रादिकमंतरेणोपवासादिकरणमनाकारप्रत्याख्यानं, परिमाणगतं प्रमाणसहितं षष्ठाष्टमदशमद्वादशपक्षार्द्धपक्षमासादिकालादिपरिमाणेनोपवासादिकरणं परिमाणगतं प्रत्याख्यानं, अपरिशेषं यावज्जीवं चतुर्विधाऽऽहारादिपरित्यागोऽपरिशेषं प्रत्याख्यानम् ॥ १४० ॥

तथा;—

अद्धाणगदं णवमं दसमं तु सहेदुगं वियाणाहि ।
पच्चक्खाणवियप्पा णिरुत्तिजुत्ता जिणमदम्हि ॥

अध्वानगतं नवमं दशमं तु सहेतुकं विजानीहि ।
प्रत्याख्यानविकल्पा निरुक्तियुक्ता जिनमते ॥१४१॥

अद्धाणगदं अध्वानं गतमध्वगतं मार्गविषयाटवीनद्यादिनिष्क्रमणद्वारेणोपवासादिकरणं अध्वगतं नाम प्रत्याख्यानं नवमं, सह हेतुना वर्त्तत इति सहेतुकमुपसर्गादिनिमित्तापेक्षमुपवासादिकरणं सहेतुकं नाम प्रत्याख्यानं दशमं विजानीहि, एवमेतान्प्रत्याख्यानकरणादिकल्पान्विभक्तियुक्तान्तथानुगतान् परमार्थरूपाञ्जिनमते विजानीहीति ॥ १४१ ॥

पुनरपि प्रत्याख्यानकरणविधिमाह;—

विणए तहाणुभासा
हवदि य अणुपालणाय परिणामे ।
एदं पच्चक्खाणं
चदुव्विधं होदि णादव्वं ॥ १४२ ॥

विनयेन तथानुभाषया
भवति च अनुपालनेन परिणामेन ।
एतत् प्रत्याख्यानं चतुर्विधं

भवति ज्ञातव्यं ॥ १४२ ॥

विनयेन शुद्धं तथाऽनुभाषयाऽनुपालनेन परिणामेन च यच्छुद्धं भवति तदेतत्प्रत्याख्यानं चतुर्विधं भवति ज्ञातव्यं यस्मिन् प्रत्याख्याने विनयेन सार्द्धमनुभाषाप्रतिपालनेन सह परिणामशुद्धिस्तत्प्रत्याख्यानं चतुर्विधं भवति ज्ञातव्यमिति १४२

विनयप्रत्याख्यानं तावदाहः—

किदियम्मं उवचारिय
विणओ तह णाणदंसणचरित्ते ।
पंचविधविणयजुत्तं
विणयसुद्धं हवदि तं तु ॥ १४३ ॥

कृतिकर्म औपचारिकः विनयः तथा ज्ञानदर्शनचारित्रे ।
पंचविधविनययुक्तं विनयशुद्धं भवति तत्तु ॥ १४३ ॥

कृतिकर्म सिद्धभक्तियोगभक्तिगुरुभक्तिपूर्वकं कायोत्सर्गकरणं, पूर्वोक्तः औपचारिकविनयः कृतकरमुकुललालाटपट्टविनतोत्तमांगः प्रशांततनुः पिच्छिकया विभूषितवक्ष इत्याद्युपचारविनयः, तथा ज्ञानदर्शनचारित्रविषयो विनयः, एवं क्रियाकर्मादिपंचप्रकारेण विनयेन युक्तं विनयशुद्धं तत्प्रत्याख्यानं भवत्येवेति ॥ १४३ ॥

अनुभाषायुक्तं प्रत्याख्यानमाह,—

अणुभासदि गुरुवयणं
अक्खरपदवंजणं कमविसुद्धं ॥
घोसविसुद्धी सुद्धं
एदं अणुभासणासुद्धं ॥ १४४ ॥

अनुभाषते गुरुवचनं अक्षरपदव्यंजनं क्रमविशुद्धं ।
घोषविशुद्ध्या शुद्धमेतत् अनुभाषणाशुद्धं ॥ १४४॥

अणुभासदि अनुभाषते अनुवदति गुरुवचनं गुरुणा यथोच्चारितं प्रत्याख्यानाक्षरपद्धतिस्तथैव तामुच्चरतीति, अक्षरमेकस्वरयुक्तं व्यंजनं, इच्छामीत्यादिकं पदं सुबन्तं मिङंतं चाक्षरसमुदायरूपं, व्यंजनमनक्षरवर्णरूपं खंडाक्षरानुस्वारविसर्जनीयादिकं क्रमविशुद्धं येनैव क्रमेण स्थितानि वर्णपदव्यंजनवाक्यादीनि ग्रंथार्थोभयशुद्धानि तेनैव पाठः, घोषविशुद्ध्या च शुद्धं गुर्वादिकवर्णविषयोच्चारणसहितं मुख्यमध्योच्चारणरहितं महाकलकलेन विहीनं स्वरविशुद्धमिति, एवमेतत्प्रत्याख्यानमनुभाषणाशुद्धं वेदितव्यमिति ॥ १४४ ॥

अनुपालनसहितप्रत्याख्यानस्य स्वरूपमाह;—

आदंके उवसग्गे समे य दुब्भिक्खवुत्ति कंतारे ।
जं पालिदं ण भग्गं एदं अणुपालणासुद्धं ॥
आतंके उपसर्गे श्रमे च दुर्भिक्षवृत्तौ कांतारे ।

यत् पालितं न भग्नं एतत् अनुपालनाशुद्धं ॥ १४५ ॥

आतंकः सहसोत्थितो व्याधिः, उपसर्गो देवमनुष्यतिर्यक्कृतपीडा, श्रम उपवासालाभमार्गादिकृतः परिश्रमः ज्वररोगादिकृतश्च, दुर्भिक्षवृत्तिर्वर्षाकालराज्यभंगविड्वरचौराद्युपद्रवभयेन शस्याद्यभावेन भिक्षायाः प्राप्त्यभावः, कन्तारे महाटवीविंध्यारण्यादिकभयानकप्रदेशः, एतेषूपस्थितेष्वातंकोपसर्गदुर्भिक्षवृत्तिकान्तारेषु यत्प्रतिपालितं रक्षितं न भग्नं न मनागपि विपरिणामरूपं जातं तदेतत्प्रत्याख्यानमनुपालनविशुद्धं नाम ॥ १४५ ॥

परिणामविशुद्धप्रत्याख्यानस्य स्वरूपमाह—

रागेण व दोसेण व मणपरिणामेण दूसिदं जं तु ।
तं पुण पच्चक्खाणं भावविसुद्धं तु णादव्वं ॥

रागेण वा द्वेषेण वा मनःपरिणामेन न दूषितं यत्तु ।
तत् पुनः प्रत्याख्यानं भावविशुद्धं तु ज्ञातव्यम् ॥

रागपरिणामेन द्वेषपरिणामेन च न दूषितं न प्रतिहतं विपरिणामेन यत्प्रत्याख्यानं तत्पुनः प्रत्याख्यानं भावविशुद्धं तु ज्ञातव्यमिति । सम्यग्दर्शनादियुक्तस्य निःकांक्षस्य वीतरागस्य समभावयुक्तस्यार्हिसादिव्रतसहितशुद्धभावस्य प्रत्याख्यानं परिणामशुद्धं भवेदिति ॥ १४६ ॥

चतुर्विधाहारस्वरूपमाह;—

असणं खुहप्पसमणं पाणाणमणुग्गहं तहा पाणं।
खादंति खादियं पुण सादंति सादियं भणियं॥

अशनं क्षुधाप्रशमनं प्राणानामनुग्रहं तथा पानं।
खाद्यते खाद्यं पुनः स्वाद्यते स्वाद्यं भणितं॥ १४७॥

अशनं क्षुदुपशमनं बुभुक्षोपरतिः प्राणानां दशप्रकाराणामनुग्रहो येन तत्तथा खाद्यत इति खाद्यं रसविशुद्धं लड्डुकादि पुनरास्वाद्यत इति आस्वाद्यमेलाकक्कोलादिकमिति भणितमेवंविधस्य चतुर्विधाहारस्य प्रत्याख्यानमुत्तमार्थप्रत्याख्यानमिति॥ १४७॥

चतुर्विधस्याहारस्य भेदं प्रतिपाद्याभेदार्थमाह—

सव्वोपि य आहारो असणं सव्वोवि वुच्चदे पाणं
सव्वोवि खादियं पुण सव्वोवि य सादियं भणियं

सर्वोपि च आहारः अशनं सर्वोपि उच्यते पानं।
सर्वोपि खाद्यं पुनः सर्वोपि च स्वाद्यं भणितं॥ १४८

सर्वोऽप्याहारोऽशनं तथा सर्वोऽप्याहारः पानमित्युच्यते तथा सर्वोऽप्याहारः खाद्यं तथा सर्वोऽप्याहारः स्वाद्यमिति भणितं एवं चतुर्विधस्याप्याहारस्य द्रव्यार्थिकनयापेक्षयैक्यं आहारत्वेनाभेदादिति॥ १४८॥

पर्यायार्थिकनयापेक्षया पुनश्चतुर्विधस्तथैव प्राह—

असणं पाणं तह खा-
दियं चउत्थं च सादियं भणियं ।
एवं परूविदं दु
सद्दहिदुं जे सुही होदि ॥ १४९ ॥

अशनं पानं तथा खाद्यं चतुर्थं च स्वाद्यं भणितं ।
एवं प्ररूपितं तु श्रद्धाय सुखी भवति ॥ १४९ ॥

एवमशनपानखाद्यस्वाद्यभेदेनाहारं चतुर्विधं प्ररूपितं श्रद्धाय सुखी भवतीति फलं व्याख्यातं भवतीति ॥ १४९ ॥

प्रत्याख्याननिर्युक्तिं व्याख्याय कायोत्सर्गनिर्युक्तिस्वरूपं प्रतिपादयन्नाह—

पच्चक्खाणणिजुत्ती एसा कहिया मए समासेण ।
काओसग्गणिजुत्ती एतो उड्ढं पवक्खामि ॥

प्रत्याख्यानिर्युक्तिः एषा कथिता मया समासेन ।
कायोत्सर्गनिर्युक्तिं इत ऊर्ध्वं प्रवक्ष्यामि ॥ १५० ॥

प्रत्याख्याननिर्युक्तिरेषा कथिता मया समासेन कायोत्सर्गनिर्युक्तिमित ऊर्ध्वं प्रवक्ष्य इति। स्पष्टोर्थः ॥१५०॥

णामट्ठवणा दव्वे खेत्ते काले य होदि भावे य ।

एसो काउसग्गे णिक्खेवो छव्विहो णेओ॥१५१

नाम स्थापना द्रव्यं क्षेत्रं कालः च भवति भावश्च।
एषः कायोत्सर्गे निक्षेपः षड्विधो ज्ञेयः॥ १५१॥

खरपरुषादिसावद्यनामकरणद्वारेणागतातीचारशोधनाय कायोत्सर्गो नाममात्रकायोत्सर्गो वा नामकायोत्सर्गः, पापस्थापनाद्वारेणागतातीचारशोधननिमित्तकायोत्सर्गपरिणतप्रतिविंबता स्थापनाकायोत्सर्गः, सावद्यद्रव्यसेवाद्वारेणागतातीचारनिर्हरणाय कायोत्सर्गः, कायोत्सर्गव्यावर्णनीयप्राभृतज्ञोऽनुपयुक्तस्तच्छरीरं वा द्रव्यकायोत्सर्गः, सावद्यक्षेत्रसेवनाद्रागतदोषध्वंसनाय कायोत्सर्गः कायोत्सर्गपरिणतसेवितक्षेत्रं वा क्षेत्रकायोत्सर्गः, सावद्यकालाचरणद्वारागतदोषपरिहाराय कायोत्सर्गः कायोत्सर्गपरिणतसहितकालो वा कालकायोत्सर्गः, मिथ्यात्वाद्यतीचारशोधनाय भावकायोत्सर्गः कायोत्सर्गव्यावर्णनीयप्राभृतज्ञ उपयुक्तसंज्ञानजीवप्रदेशो वा भावकायोत्सर्गः, एवं नामस्थापनाद्रव्यक्षेत्रकालभावविषय एष कायोत्सर्गनिक्षेपः षड्विधो ज्ञातव्य इति॥ १५१॥

कायोत्सर्गकारणमन्तरेण कायोत्सर्गः प्रतिपादयितुं न शक्यत इति तत्स्वरूपं प्रतिपादयन्नाह,—

काउस्सग्गो काउ-
स्सग्गी काउस्सग्गस्स कारणं चेव।

एदेसिं पत्तेयं
परूवणा होदि तिण्हंपि ॥ १५२ ॥

कायोत्सर्गः कायोत्सर्गी कायोत्सर्गस्य कारणं चैव ।
एतेषां प्रत्येकं प्ररूपणा भवति त्रयाणामपि ॥ १५२ ॥

कायस्य शरीरस्योत्सर्गः परित्यागः कायोत्सर्गः स्थितस्यासीनस्य सर्वांगचलनरहितस्य शुभध्यानस्य वृत्तिः कायोत्सर्गोऽस्यास्तीति कायोत्सर्गी असंयतसम्यग्दृष्ट्यादिभव्यः कायोत्सर्गस्य कारणं हेतुरेव तेषां त्रयाणामपि प्रत्येकं प्ररूपणा भवति ज्ञातव्येति ॥ १५२ ॥

तावत्कायोत्सर्गस्वरूपमाह;—

वोसरिदबाहुजुगलो चदुरंगुलअंतरेण समपादो ।
सव्वंगचलणरहिओ काउस्सग्गो विसुद्धो दु १५३

व्युत्सृष्टबाहुयुगलश्चतुरंगुलांतरं समपादः ।
सर्वांगचलनरहितः कायोत्सर्गो विशुद्धस्तु ॥ १५३ ॥

व्युत्सृष्टं त्यक्तं बाहुयुगलं यस्मिन्नवस्थाविशेषे सो व्युत्सृष्टबाहुयुगलः प्रलंबितभुजश्चतुरंगुलमन्तरं ययोः पादयोस्तौ चतुरंगुलान्तरौ चतुरंगुलान्तरौ समौ पादौ यस्मिन्स चतुरंगुलान्तरसमपादः सर्वेषामंगानां करचरणशिरोग्रीवाक्षिभ्रूविकारादीनां चलनं तेन रहितः सर्वांगचलनरहितः सर्वाक्षेप-

विमुक्तः, एवंविधस्तु विशुद्धः कायोत्सर्गो भवतीति ॥१५३॥

कायोत्सर्गकस्वरूपनिरूपणायाह;—

मुक्खट्ठी जिदणिद्दो सुत्तत्थविसारदो करणसुद्धो
आदबलविरियजुत्तो काउस्सग्गी विसुद्धप्पा १५४

मोक्षार्थी जितनिद्रः सूत्रार्थविशारदः करणशुद्धः ।
आत्मबलवीर्ययुक्तः कायोत्सर्गी विशुद्धात्मा ॥१५४॥

मोक्षमर्थयत इति मोक्षार्थी कर्मक्षयप्रयोजनः, जिता निद्रा येनासौ जितनिद्रः जागरणशीलः सूत्रञ्चार्थश्च सूत्रार्थौ तयोर्विशारदो निपुणः सूत्रार्थविशारदः, करणेन क्रियाया परिणामेन शुद्धः करणशुद्धः आत्मबलवीर्ययुक्तः आत्माहारशक्तिक्षयोपशमशक्तिसहितः कायोत्सर्गी विशुद्धात्मा भवति ज्ञातव्य इति ॥ १५४ ॥

कायोत्सर्गमधिष्ठातुकामः प्राह;—

काउस्सग्गं मोक्खपहदेसयं घादिकम्म अदिचारं
इच्छामि अहिट्ठादुं जिणसेविद देसिदत्तादो १५५

कायोत्सर्गं मोक्षपथदेशकं घातिकर्म अतिचारं ।
इच्छामि अधिष्ठातुं जिनसेवितं देशितस्तस्मात् ॥ १५५

कायोत्सर्गं मोक्षपथदेशकं सम्यग्दर्शनज्ञानचारित्रोपकारकं घातिकर्मणां ज्ञानदर्शनावरणमोहनीयान्तरायकर्मणामती-

चारं विनाशनं घातिकर्मविध्वंसकमिच्छाम्यहमधिष्ठातुं यतः कायोत्सर्गो जिनैर्देशितः सेवितश्च तस्मात्तमधिष्ठातुमिच्छामीति ॥ १५५ ॥

कायोत्सर्गस्य कारणमाह;—

एगपदमस्सिदस्सवि जो अदिचारो दु रागदोसेहिं
गुत्तीहिं वदिक्कमो वा चदुहिं कसाएहिं व वदेहिं ॥

एकपदमाश्रितस्यापि यः अतिचारस्तु रागद्वेषाभ्यां।
गुप्तीनां व्यतिक्रमो वा चतुर्भिः कषायैः वा व्रतेषु ॥

एकपदमाश्रितस्यैकपदेन स्थितस्य योऽतीचारो भवति रागद्वेषाभ्यां तथा गुप्तीनां व्यतिक्रमः कषायैश्चतुर्भिः स्यात् व्रतविषये वा यो व्यतिक्रमः स्यात् ॥ १५६ ॥

तथा;—

छज्जीवणिकाएहिं भयमयठाणेहिं बंभधम्मेहिं।
काउस्सग्गं ठामिय तं कम्मणिघादणट्ठाए १५७

षड्जीवनिकायैः भयमदस्थानैः ब्रह्मधर्मे।
कायोत्सर्गं अधितिष्ठामि तत्कर्मनिघातनार्थं ॥ १५७

षट्जीवनिकायैः पृथिव्यादिकायविराधनद्वारेण यो व्यतिक्रमस्तथा भयमदस्थानैः सप्तभयाष्टमदद्वारेण यो व्यतिक्रमस्तथा ब्रह्मचर्यविषये यो व्यतिक्रमस्तेनाऽऽगतं यत्कर्मैकप-

दाद्याश्रितस्य गुप्त्यादिव्यतिक्रमेण च यत्कर्म तस्य कर्मणो निघातनाय कायोत्सर्गमधितिष्ठामि कायोत्सर्गेण तिष्ठामीति संबन्धः, अथ वैकपदस्थितस्यापि रागद्वेषाभ्यामतीचारो भवति यतः किं पुनर्भ्रमति ततो घातनार्थं कर्मणां तिष्ठामीति ॥ १५७ ॥

पुनरपि कायोत्सर्गकारणमाह;—

जे केई उवसग्गा देवमाणुसातिरिक्खचेदणिया।
ते सव्वे अधिआसे काओसग्गे ठिदो संतो ॥

ये केचन उपसर्गा देवमानुषतिर्यगचेतनिकाः।
तान् सर्वान् अध्यासे कायोत्सर्गे स्थितः सन्॥ १५८

ये केचनोपसर्गा देवमनुष्यतिर्यक्कृता अचेतना विद्युदशन्यादयस्तान् सर्वानध्यासे सम्यग्विधानेन सहेऽहं कायोत्सर्गे स्थितः सन्, उपसर्गेष्वागतेषु कायोत्सर्गः कर्त्तव्यः कायोत्सर्गेण वा स्थितस्य यदुपसर्गाः समुपस्थिताः भवन्ति तेऽपि सहनीया इति ॥ १५८ ॥

कायोत्सर्गप्रमाणमाह;—

संवच्छरमुक्कस्सं भिण्णमुहुत्तं जहण्णयं होदि।
सेसा काओसग्गा होंति अणेगेसु ठाणेसु ॥ १५९

संवत्सरमुत्कृष्टं भिन्नमुहूर्तं जघन्यं भवति ।
शेषाः कायोत्सर्गा भवंति अनेकेषु स्थानेषु ॥१५९॥

संवत्सरं द्वादशमासमात्रं उत्कृष्टं प्रमाणं कायोत्सर्गस्य जघन्येन प्रमाणं कायोत्सर्गस्यान्तर्मुहूर्तमात्रं संवत्सरान्तर्मुहूर्त्तमध्येऽनेकविकल्पा दिवसरात्र्यहोरात्रभेदभिन्नाः शेषाः कायोत्सर्गा अनेकेषु स्थानेषु बहुस्थानविशेषेषु शक्त्यपेक्षया कार्याः, कालद्रव्यक्षेत्रभावकायोत्सर्गविकल्पा भवंतीति १५९

दैवसिकादिप्रतिक्रमणे कायोत्सर्गस्य प्रमाणमाह,—

अट्ठसदं देवसियं कल्लद्धं पक्खियं च तिण्णिसया
उस्सासा कायव्वा णियमंते अप्पमत्तेण ॥१६०॥
अष्टशतं दैवसिकं कल्येर्धं पाक्षिकं च त्रीणि शतानि
उच्छ्वासाः कर्तव्या नियमांते अप्रमत्तेन ॥१६०॥

अष्टभिरधिकं शतमष्टोत्तरशतं दैवसिके प्रतिक्रमणे दैवसिकप्रतिक्रमणविषये कायोत्सर्गे उच्छ्वासानामष्टोत्तरशतं कर्त्तव्यं कल्लद्धं रात्रिकप्रतिक्रमणविषयकायोत्सर्गे चतुःपंचाशदुच्छ्वासाः कर्त्तव्याः पाक्षिके च प्रतिक्रमणविषये कायोत्सर्गे त्रीणि शतानि उच्छ्वासानां चिन्तनीयानि स्थातव्यानि विधेयानि नियमान्ते वीरभक्तिकायोत्सर्गकाले प्रमादरहितेन यत्नवता विशेषे सिद्धभक्तिप्रतिक्रमणभक्तिचतुर्विंशतितीर्थंकर-

सप्तविंशतिरुच्छ्वासाः कर्त्तव्या इति ॥ १६० ॥

चातुर्मासिकसांवत्सरिककायोत्सर्गप्रमाणमाह—

चादुम्मासे चउरो सदाइं संवत्थरे य पंचसदा ।
काओसग्गुस्सासा पंचसु ठाणेसु णादव्वा ॥

चातुर्मासिके चत्वारि शतानि संवत्सरे च पंचशतानि कायोत्सर्गोच्छ्वासाः पंचसु स्थानेषु ज्ञातव्याः ॥

चातुर्मासिके प्रतिक्रमणे चत्वारि शतान्युच्छ्वासानां चिन्तनीयानि सांवत्सरिके च प्रतिक्रमणे पंचशतान्युच्छ्वासानां चिन्तनीयानि स्थातव्यानि नियमान्ते कायोत्सर्गप्रमाणमेतच्छेषेषु पूर्ववत् द्रष्टव्यः । एवं कायोत्सर्गोच्छ्वासाः पंचसु स्थानेषु ज्ञातव्याः ॥ १६१ ॥

शेषेषु स्थानेषूच्छ्वासप्रमाणमाह—

पाणिवह मुसावाए अदत्त मेहुण परिग्गहे चेय
अट्ठसदं उस्सासा काओसग्गाह्म कादव्वा ॥

प्राणिवधे मृषावादे अदत्ते मैथुने परिग्रहे चैव ।
अष्टशतं उच्छ्वासाः कायोत्सर्गे कर्तव्याः ॥ १६२ ॥

प्राणिवधातीचारे मृषावादातीचारे अदत्तग्रहणातीचारे मैथुनातिचारे परिग्रहातीचारे च कायोत्सर्गे चोच्छ्वासाना-

मष्टोत्तरशतं कर्त्तव्यं नियमान्ते सर्वत्र द्रष्टव्यं शेषेषु पूर्ववदिति ॥ १६२ ॥

पुनरपि कायोत्सर्गप्रमाणमाह—

भत्ते पाणे गामंतरे य अरहंतसमणसेज्जासु ।
उच्चारे पस्सवणे पणवीसं होंति उस्सासा ॥

भक्ते पाने ग्रामांतरे च अर्हत्श्रमणशय्यायाम् ।
उच्चारे प्रस्रवणे पंचविंशतिः भवंति उच्छ्वासाः ॥

भक्ते पाने गोचरे प्रतिक्रमणविषये गोचरादागतस्य कायोत्सर्गे पंचविंशतिरुच्छ्वासाः कर्त्तव्या भवन्ति, प्रस्तुतात् ग्रामादन्यग्रामो ग्रामान्तरं ग्रामान्तरगमनविषये च कायोत्सर्गे च पंचविंशतिरुच्छ्वासाः कर्तव्यास्तथार्हच्छय्यायां जिनेन्द्रनिर्वाणसमवसृतिकेवलज्ञानोत्पत्तिनिष्क्रमणजन्मभूमिस्थानेषु वन्दनाभक्तिहेतोर्गतेन पंचविंशतिरुच्छ्वासाः कायोत्सर्गे कर्त्तव्याः । तथा श्रमणशय्यायां निषद्यिकास्थानं गत्वाऽऽगतेन पंचविंशतिरुच्छ्वासाः कायोत्सर्गे कर्त्तव्यास्तथोच्चारे बहिर्भूमिगमनं कृत्वा प्रस्रवणं प्रस्रवणं च कृत्वा यः कायोत्सर्गः क्रियते तत्र नियमेनेति ॥ १६३ ॥

तथा—

उद्देसे णिद्देसे सज्झाए बंदणे य पणिधाणे ।
सत्तावीसुस्सासा काओसग्गह्मि कादव्वा ॥

उद्देशे निर्देशे स्वाध्याये वंदनायां प्रणिधाने ।
सप्तविंशतिरुच्छ्वासाः कायोत्सर्गे कर्तव्याः ॥ १६४

उद्देशे ग्रन्थादिप्रारम्भकाले निर्देशे प्रारब्धग्रन्थादिसमाप्तौ च कायोत्सर्गे सप्तविंशतिरुच्छ्वासाः कर्त्तव्यास्तथा स्वाध्याये स्वाध्यायविषये कायोत्सर्गास्तेषु च सप्तविंशतिरुच्छ्वासाः कर्त्तव्यास्तथा वन्दनायां ये कायोत्सर्गास्तेषु च प्रणिधाने च मनोविकारे चाशुभपरिणामे तत्क्षणोत्पन्ने सप्तविंशतिरुच्छ्वासाः कायोत्सर्गे कर्त्तव्या इति ॥ १६४ ॥

एवं प्रतिपादितक्रमे कायोत्सर्गं किमर्थमधितिष्ठन्तीत्याह—

काओमग्गं इरियावहादिचारस्स मोक्खमग्गम्मि ।
वोसट्ठचत्तदेहा करंति दुक्खक्खयट्ठाए ॥

कायोत्सर्गं ईर्यापथातिचारस्य मोक्षमार्गे ।
व्युत्सृष्टत्यक्तदेहाः कुर्वंति दुःखक्षयार्थं ॥ १६५ ॥

ईर्यापथातीचारनिमित्तं कायोत्सर्गं मोक्षमार्गे स्थित्वा व्युत्सृष्टत्यक्तदेहाः सन्तः शुद्धाः कुर्वन्ति दुःखक्षयार्थमिति ॥

तथा;—

भत्ते पाणे गामंतरे य चदुमासिवरिसचरिमेसु ।
णाऊण ठंति धीरा घणिदं दुक्खक्खयट्ठाए ॥

भक्तं पानं ग्रामांतरं च चातुर्मासिकवार्षिकचरमान् ।
ज्ञात्वा तिष्ठंति धीरा अत्यर्थं दुःखक्षयार्थम् ॥ १६६ ॥

भक्तपानग्रामान्तरचातुर्मासिकसांवत्सरिकचरमोत्तमार्थविषयं ज्ञात्वा कायोत्सर्गे निष्ठुति दैवसिकादिषु च धीरा अत्यर्थं दुःखक्षयार्थं नान्येन कार्येणेति ॥ १६६ ॥

यदर्थं कायोत्सर्गं करोति तमेवार्थं चिन्तयतीत्याह;—

काओसग्गम्मि ठिदो चिंतिदु
इरियावधस्स अतिचारं ।
तं सव्वं समाणित्ता
धम्मं सुक्कं च चिंतेज्जो ॥

कायोत्सर्गे स्थितः चिंतयन् ईर्यापथस्य अतीचारं ।
तं सर्वं समानीय धर्मं शुक्लं च चिंतयतु ॥ १६७ ॥

कायोत्सर्गे स्थितः सन ईर्यापथस्यातीचारं विनाशं चिन्तयन् तं नियमं सर्वं निरवशेषं समाप्य समाप्तिं नीत्वा पश्चाद्धर्मध्यानं शुक्लध्यानं च चिन्तयत्विति ॥ १६७ ॥

तथा;—

तह दिवसियरादियप-
क्खियचदुमासिवरिसचरिमेसु ।

तं सव्वं समाणित्ता
धम्मं सुक्क च झायेज्जो ॥ १६८ ॥

तथा दैवसिकरात्रिकपाक्षिकचतुर्मासवर्षचरमान् ।
तं सर्वं समाप्य धर्मं शुक्लं च ध्यायेत् ॥ १६८ ॥

एवं यथा ईर्यापथातीचारार्थं दैवसिकरात्रिकपाक्षिकचातुर्मासिकसांवत्सरिकोत्तमार्थान् नियमान् तान् समाप्य धर्मध्यानं शुक्लध्यानं ध्यायेत्, न तावन्मात्रेण तिष्ठेदित्यनेनालस्याद्यभावः कथितो भवतीति ॥ १६८ ॥

कायोत्सर्गस्य दृष्टं फलमाह;—

काओसग्गह्मि कदे जह भिज्जदि अंगुवंगसंधीओ
तह भिज्जदि कम्मरयं काउस्सग्गस्स करणेण ॥

कायोत्सर्गे कृते यथा भिद्यते अंगोपांगसंधयः ।
तथा भिद्यते कर्मरजः कायोत्सर्गस्य करणेन ॥ १६९ ॥

कायोत्सर्गे हि स्फुटं कृते यथा भिद्यन्तेऽङ्गोपांगसंधयः शरीरावयवास्तथा भिद्यते कर्मरजः कायोत्सर्गकरणेनेति १६९

द्रव्यादिचतुष्टयापेक्षामाह;—

बलवीरियमासेज्ज य खेत्ते काले सरीरसंहडणं ।
काओसग्गं कुज्जा इमे दु दोसे परिहरंतो ॥ १७०

बलवीर्यमासाद्य च क्षेत्रं कालं शरीरसंहननं ।
कायोत्सर्गं कुर्यात् इमांस्तु दोषान् परिहरन् ॥१७०॥

बलवीर्यं चौषधाद्याहारशक्तिर्वीर्यान्तरायक्षयोपशमं वाऽऽश्रित्य क्षेत्रबलं कालबलं चाश्रित्य शरीरं व्याध्यनुपहतसंहननवज्रर्षभनाराचादिकमपेक्ष्य कायोत्सर्गं कुर्यात्, इमाँस्तु वक्ष्यमानान् दोषान्परिहरन्निति ॥ १७० ॥

तान् दोषानाह;—

घोडय लदा य खंभे कुड्डे माले सवरबधू णिगले
लंबुत्तरथणदिट्ठी वायस खलिणे जुग कविट्ठे ॥
घोटको लता च स्तंभः कुड्यं माला शवरबधूर्निगडः
लंबोत्तरः स्तनदृष्टिः वायसः खलिनं युगं कपित्थं ॥

घोटकस्तुरगः स यथा एकं पादमुत्क्षिप्य विनम्य वा तिष्ठति तथा यः कायोत्सर्गेण तिष्ठति तस्य घोटकसदृशो घोटकदोषः, तथा लता इवांगानि चालयन्यः तिष्ठति कायोत्सर्गेण तस्य लतादोषः, स्तंभमाश्रित्य यस्तिष्ठति कायोत्सर्गेण तस्य स्तंभदोषः स्तंभवत् शून्यहृदयो वा तत्साहचर्येण स एवोच्यते तथा कुड्यमाश्रित्य कायोत्सर्गेण यस्तिष्ठति तस्य कुड्यदोषः साहचर्यादुपलक्षणमात्रमेतदन्यदप्याश्रित्य न स्थातव्यमिति ज्ञापयति, तथा मालापीठाद्युपरि स्थानं अथ वा मस्तकादूर्ध्वं यत्तदाश्रित्य मस्तकस्योपरि यदि किंचिदत्र ग-

तिस्तयापि यदि कायोत्सर्गः क्रियते स मालदोषः, तथा शबर-वधूरिव जंघाभ्यां जघने निपीडय कायोत्सर्गेण तिष्ठति तस्य शबरबधूदोषः, तथा निगडपीडित इव पादयोर्महदन्तरालं कृत्वा यस्तिष्ठति कायोत्सर्गेण तस्य निगडदोषः, तथा लंबमानो नाभेरूर्ध्वभागो भवति वा कायोत्सर्गस्थस्योन्नमनमधोनमनं वा च भवति तस्य लंबोत्तरदोषो भवति तथा यस्य कायोत्सर्गस्थस्य स्तनयोर्दृष्टिरात्मीयौ स्तनौ यः पश्यति तस्य स्तनदृष्टिनामा दोषः तथा यः कायोत्सर्गस्थो वायस इव काक इव पार्श्वं पश्यति तस्य वायसदोषस्तथा यः खलीनपीडितोऽश्व इव दन्तकटकटं मस्तकं कृत्वा कायोत्सर्गं करोति तस्य खलीनदोषः, तथा यो युगनिपीडितवलीवर्दवत् ग्रीवां प्रसार्य तिष्ठति कायोत्सर्गेण तस्य युगदोषः, तथा यः कपित्थफलवन्मुष्टिं कृत्वा कायोत्सर्गेण तिष्ठति तस्य कपित्थदोषः १७१

तथा—

सीसपकंपिय मुइयं
अंगुलि भूविकार वारुणीपेयी ।
काओसग्गेण ठिदो
एदे दोसे परिहरेज्जो ॥ १७२ ॥

शिरःप्रकंपितं मूकत्वं
अंगुलिभ्रूविकारः वारुणीपायी ।

कायोत्सर्गेण स्थितः
एतान् दोषान् परिहरेत् ॥ १७२ ॥

शिरःप्रकंपितं कायोत्सर्गेण स्थितो यः शिरः प्रकंपयति चालयति तस्य शिरःप्रकंपितदोषः, मूक इव कायोत्सर्गेण स्थितो मुखविकारं नासिकाविकारं च करोति तस्य मूकितदोषः, तथा यः कायोत्सर्गेण स्थितोंऽगुलिगणनां करोति तस्यांगुलिदोषः, तथा भ्रूविकारः कायोत्सर्गेण स्थितो यो भ्रूविक्षेपं करोति तस्य भ्रूविकारदोषः पादांगुलिनर्त्तनं वा, वारुणीपायीव—सुरापायी वेति घूर्णमानः कायोत्सर्गं करोति तस्य वारुणीपायीदोषः, तस्मादेतान् दोषान् कायोत्सर्गेण स्थितः सन परिहरेद्वर्जयेदिति ॥ १७२ ॥

तथेमांश्च दोषान् परिहरेदित्याह——

आलोगणं दिसाणं गीवाउण्णामणं पणवणं च ।
णिट्ठीवणंगमरिसो काउसग्गह्मि वज्जिज्जो ॥
आलोकनं दिशानां ग्रीवोन्नमनं प्रणमनं च ।
निष्ठीवनमंगामर्शं कायोत्सर्गे वर्जयेत् ॥ १७३ ॥

कायोत्सर्गेण स्थितो दिशामालोकनं वर्जयेत्, तथा कायोत्सर्गेण स्थितो ग्रीवोन्नमनं वर्जयेत् तथा कायोत्सर्गेण स्थितः सन् प्रणमनं च वर्जयेत्, तथा कायोत्सर्गेण स्थितो

निष्ठीवनं षाट्करणं च वर्जयेत् तथा कायोत्सर्गेण स्थितोऽगामर्शं शरीरपरामर्शं वर्जयेदेतेऽपि दोषाः सन्त्यतो वर्जनीयाः दशानां दिशामवलोकनानि दश दोषाः, शेषा एकैका इति ॥

यथा यथोक्तं कायोत्सर्गं कुर्वन्ति तथाह—

णिक्कूडं सविसेसं बलाणुरूवं वयाणुरूवं च ।
काओसग्गं धीरा करंति दुक्खक्खयट्ठाए ॥१७४॥

निःकूटं सविशेषं बलानुरूपं वयोनुरूपं च ।
कायोत्सर्गं धीराः कुर्वंति दुःखक्षयार्थम् ॥ १७४ ॥

निःकूटं मायाप्रपंचान्निर्गतं, सह विशेषेण वर्त्तत इति सविशेषस्तं सविशेषं विशेषतासमन्वितं बलानुरूपं स्वशक्त्यनुरूपं, वयोऽनुरूपं, बालयौवनवार्द्धक्यानुरूपं तथा वीर्यानुरूपं कालानुरूपं च कायोत्सर्गं धीरा दुःखक्षयार्थं कुर्वन्ति तिष्ठन्तीति ॥ १७४ ॥

मायां प्रदर्शयन्नाह—

जो पुण तीसदिवरिसो
सत्तरिवरिसेण पारणाय समो ।
विसमो य कूडवादी
णिव्विण्णाणी य सोय जडो ॥ १७५ ॥

यः पुनः त्रिंशद्वर्षः सप्ततिवर्षेण पारणेन समः ।

विषमश्च कूटवादी निर्विज्ञानी च स च जडः ॥१७५॥

यः पुनस्त्रिंशद्वर्षप्रमाणो यौवनस्थः शक्तः सप्ततिसंवत्सरेण सप्ततिसंवत्सरायुःप्रमाणेन वृद्धेन निःशक्तिकेन पारणेनानुष्ठानेन कायोत्सर्गादिसमाप्त्या समः सदृशशक्तिको निःशक्तिकेन सह यः स्पर्द्धां करोति सः साधुर्विषमश्च शान्तरूपो न भवति कूटवादी मायाप्रपंचतत्परो निर्विज्ञानी विज्ञानरहितश्चारित्रमुक्तश्च जडश्च मूर्खो, न तस्येहलोको नाऽपि परलोक इति ॥ १७५ ॥

कायोत्सर्गस्य भेदानाह—

उट्ठिदउट्ठिद उट्ठिदणिविट्ठ उवविट्ठउट्ठिदो चेव ।
उवविट्ठणिविट्ठोवि य काओसग्गो चदुट्ठाणो ॥
उत्थितोत्थित उत्थितानिविष्ट उपविष्टोत्थितश्चैव ।
उपाविष्टानिविष्टोपि च कायोत्सर्गः चतुःस्थानः ॥

उत्थितश्चासावुत्थितश्चोत्थितोत्थितो महतोऽपि महतः, तथोत्थितनिविष्टः पूर्वमुत्थितः पश्चान्निविष्ट उत्थितनिविष्टः, कायोत्सर्गेण स्थितोप्यसावासीनो दृष्टव्य उत्थितः, उपविष्टो भूत्वा स्थितो आसीनोऽप्यसौ कायोत्सर्गस्थश्चैव तथोपविष्टोऽपि चासावासीन एवं कायोत्सर्गः चत्वारि स्थानानि यस्यासौ चतुःस्थानश्चतुर्विकल्प इति ॥

उक्तं च—

त्यागो देहममत्वस्य तनूत्सृतिरुदाहृता ।
उपविष्टोपविष्टादिविभेदेन चतुर्विधा ॥ १ ॥
आर्त्तरौद्रद्वयं यस्यामुपविष्टेन चिन्त्यते ।
उपविष्टोपविष्टाख्या कथ्यते सा तनूत्सृतिः ॥ २ ॥
धर्मशुक्लद्वयं यत्रोपविष्टेन विधीयते ।
तामुत्थितोपविष्टांकां निगदंति महाधियः ॥ ३ ॥
आर्तरौद्रद्वय यस्यामुत्थितेन विधीयते ।
तामुत्थितोपविष्टांकां निगदंति महाधियः ॥ ४ ॥
धर्मशुक्लद्वयं यस्यामुत्थितेन विधीयते ।
उत्थितोत्थितनाम्ना तामाभाषन्ते विपश्चितः ॥ ५ ॥
उत्थितोत्थितकायोत्सर्गस्य लक्षणमाह—

धम्मं सुक्कं च दुवे झायदि झाणाणि जो ठिदो संतो ।
एसो काओसग्गो इह उट्ठिदउट्ठिदो णाम ॥ १७७

धर्मं शुक्लं च द्वे ध्यायति ध्याने यः स्थितः सन् ।
एष कायोत्सर्गः इह उत्थितोत्थितो नाम ॥ १७७ ॥

धर्म्यध्यानं शुक्लध्यानं द्वे ध्याने यः कायोत्सर्गस्थितः सन् ध्यायति तस्यैष इह कायोत्सर्ग उत्थितोत्थितो नामेति ॥

तथोत्थितनिविष्टकायोत्सर्गस्य लक्षणमाह—

अट्टं रुद्दं च दुवे झायदि झाणाणि जो ठिदो संतो ।
एसो काओसग्गो उट्ठिदणिविट्ठिदो णाम ॥ १७८

आर्तं रौद्रं च द्वे ध्यायति ध्याने यः स्थितः सन् ।
एष कायोत्सर्गः उत्थितनिविष्टो नाम ॥ १७८ ॥

आर्तध्यानं रौद्रध्यानं च द्वे ध्याने यः पर्यंककायोत्सर्गेण स्थितो ध्यायति तस्यैष कायोत्सर्ग उत्थितनिविष्टनामेति ॥ १७८ ॥

धम्मं सुक्कं च दुवे
झायदि झाणाणि जो णिसण्णो दु ।
एसो काओसग्गो
उवविट्ठउट्ठिदो णाम ॥ १७९ ॥

धर्मं शुक्लं च द्वे ध्यायति ध्याने यो निषण्णस्तु ।
एष कायोत्सर्गः उपविष्टोत्थितो नाम ॥ १७९ ॥

धर्म्यं शौक्लयं च द्वे ध्याने यो निविष्टो ध्यायति तस्यैष कायोत्सर्ग इहागमे उपविष्टोत्थितो नामेति ॥ १७९ ॥

उपविष्टोपविष्टकायोत्सर्गस्य लक्षणमाह—

अट्टं रुद्दं च दुवे
झायदि झाणाणि जो णिसण्णो दु ।
एसो काओसग्गो
णिसण्णिदाणिसण्णिदो णाम ॥१८०॥

आर्तं रौद्रं च द्वे ध्यायति ध्याने यः निषण्णस्तु ।
एष कायोत्सर्गः निषण्णितनिषण्णितो नाम ॥१८०॥

आर्तध्यानं रौद्रध्यानं च द्वे ध्याने यः पर्यंकेकायोत्सर्गेण स्थितो ध्यायति तस्यैष कायोत्सर्ग उपविष्टोपविष्टो नाम १८०

कायोत्सर्गेण स्थितः शुभं मनःसंकल्पं कुर्यात् परंतु कः शुभो मनःसंकल्प इत्याह;--

दंसणणाणचरित्ते उवओगे संजमे विउस्सग्गे ।
पच्चक्खाणे करणे पणिधाणे तह य समिदीसु ॥
दर्शनज्ञानचारित्रे उपयोगे संयमे व्युत्सर्गे ।
प्रत्याख्याने करणेषु प्रणिधाने तथा च समितिषु ॥

दर्शनज्ञानचारित्रेषु यो मनःसंकल्प उपयोगे ज्ञानदर्शनोपयोगे यश्चित्तव्यापारः संयमविषये यः परिणामः कायोत्सर्गस्य हेतोर्यत् ध्यानं प्रत्याख्यानग्रहणे यः परिणामः करणेषु पंचनमस्कारषडावश्यकासिकानिषद्यिकाविषये शुभयोगस्तथा प्रणिधानेषु धर्मध्यानादिविषयपरिणामः समितिषु समितिविषयः परिणामः ॥ १८१ ॥

तथा,--

विज्जाचरणमहव्वदसमाधिगुणबंभचेरछक्काए ।
खमणिग्गह अज्जवमद्दवमुत्तीविणए च सद्दहणे ॥

विद्याचरणमहाव्रतसमाधिगुणब्रह्मचर्यषट्कायेषु ।
क्षमानिग्रहार्जवमार्दवमुक्तिविनयेषु च श्रद्धाने ॥ १८२

विद्यायां द्वादशांगचतुर्दशपूर्वविषयः संकल्पः, आचरणे भिक्षाशुद्ध्यादिपरिणामः, महाव्रतेषु अहिंसादिविषयपरिणामः, समाधौ विषयसन्यसनेन पंचनमस्कारस्तवनपरिणामः, गुणेषु गुणविषयपरिणामः, ब्रह्मचर्ये मैथुनपरिहारविषयपरिणामः, षट्कायेषु पृथिवीकायादिरक्षणपरिणामः, क्षमायां क्रोधोपशमनविषयपरिणामः, निग्रह इन्द्रियनिग्रहविषयोऽभिलाषः, आर्जवमार्दवविषयः परिणामः, मुक्तौ सर्वसंगपरित्यागविषयपरिणामः, विनयविषयः परिणामः, श्रद्धानविषयः परिणामः ॥ १८२ ॥

उपसंहरन्नाह,—

एवंगुणो महत्थो मणमकंप्पो पसत्थ वीसत्थो।
संकप्पोत्ति वियाणह जिणसासणसम्मदं सव्वं ॥

एवंगुणो महार्थः मनःसंकल्पः प्रशस्तो विश्वस्तः।
संकल्प इति विजानीहि जिनशासनसंमतं सर्वं ॥

एवंगुणः पूर्वोक्तमनःसंकल्पो मनःपरिणामः महार्थः कर्मक्षयहेतुः प्रशस्तः शोभनो विश्वस्तः सर्वेषां विश्वासयोग्यः संकल्प इति सम्यग्ध्यानमिति विजानीहि जिनशासने स-

म्मतं सर्वं समस्तमिति, एवंविशिष्टं ध्यानं कायोत्सर्गेण स्थितस्य योग्यमिति ॥ १८३ ॥

अप्रशस्तमाह,—

परिवारइड्ढिसक्कारपूयणं असणपाणहेऊ वा ।
लयणसयणासणं भत्तपाणकामट्ठहेऊ वा ॥ १८४

परिवारऋद्धिसत्कारपूजनं अशनपानहेतोर्वा ।
लयनशयनासनभक्तपानकामार्थहेतोर्वा ॥ १८४ ॥

परिवारः पुत्रकलत्रादिकः शिष्यसामान्यसाधुश्रावकादिकः ऋद्धिर्विभूतिर्हस्त्यश्वद्रव्यादिकस्य सत्कारः कार्यादिष्वग्रतः करणं पूजनमर्चनं अशनं भक्तादिकं पानं सुगन्धजलादिकं हेतुः कारणं वा विकल्पार्थः, लयनं उत्कीर्णपर्वतप्रदेशः शयनं पर्यंकतूलिकादिकं आसनं वेत्रासनादिकं भक्तो भक्तियुक्तो जन आत्मभक्तिर्वा प्राणः सामर्थ्यं दशप्रकाराः प्राणा वा कामो मैथुनेच्छा अर्थो द्रव्यादिप्रयोजनं, इत्येवंकारणेन कायोत्सर्गं यः करोति परिवारनिमित्तं विभूतिनिमित्तं सत्कारपूजानिमित्तं चाशनपाननिमित्तं वा लयनासननिमित्तं मम भक्तो जनो भवत्विति मदीया भक्तिर्वा ख्यातिं गच्छत्विति मदीयं प्राणसामर्थ्यं लोको जानातु मम प्राणरक्षको देवो वा मनुष्यो वा भवत्विति हेतो यः कायोत्सर्गं करोति, कामहेतुरर्थहेतुश्च यः कायोत्सर्गः स सर्वोऽप्यप्रशस्तो मनःसंकल्प इति ॥ १८४ ॥

तथा—

आज्ञाणिद्देसपमाणकित्तिवण्णणपहावणगुणट्ठं ।
झाणमिणमप्पसत्थं मणसंकप्पो दु वीसत्थो १८५

आज्ञानिर्देशप्रमाणकीर्तिवर्णनप्रभावनगुणार्थं ।
ध्यानमिदमप्रशस्तं मनःसंकल्पस्तु विश्वस्तः ॥१८५

आज्ञा आदेशमन्तरेण नीत्वा वर्त्तनं निर्देशः आदेशो वचनस्यानन्यथा करणं प्रमाणं सर्वत्र प्रमाणीकरणं कीर्तिः ख्यातिस्तया वर्णनं प्रशंसनं प्रभावनं प्रकाशनं गुणाः शास्त्रज्ञातृत्वादयोऽर्थः प्रयोजनं, आज्ञां मम सर्वोऽपि करोतु निर्देशं मम सर्वोऽपि करोतु प्रमाणीभूतं मां सर्वोऽपि करोतु मम कीर्त्तिवर्णनं सर्वोऽपि करोतु मां प्रभावयन्तु सर्वेऽपि मदीयान् गुणान् सर्वेऽपि विस्तारयन्त्वित्यर्थं कायोत्सर्गेण ध्यानमिदमप्रशस्तमेवंविधो मनःसंकल्पोऽविश्वस्तोऽविश्वसनीयो न चिन्तनीयोऽप्रशस्तो यत इति ॥ १८५ ॥

कायोत्सर्गनिर्युक्तिमुपसंहरन्नाह;—

काउस्सग्ग णिजुत्ती एसा कहिया मए समासेण ।
संजमतवड्ढियाणं णिग्गंथाणं महरिसीणं ।१८६।

कायोत्सर्गनिर्युक्तिः एषा कथिता मया समासेन ।
संयमतपऋद्धिकानां निर्ग्रंथानां महर्षीणां ॥ १८६॥

कायोत्सर्गनिर्युक्तिरेषा कथिता मया समासेन, संयमतपोवृद्धिमिच्छतां निर्ग्रन्थानां महर्षीणामिति, नात्र पौनरुक्त्यमाशंकनीयं द्रव्यार्थिकपर्यायार्थिकशिष्यसंग्रहणात्सूत्रवार्त्तिकस्वरूपेण कथनाच्चेति ॥ १८६ ॥

षडावश्यकचूलिकामाह—

सव्वावासणिजुत्तो णियमा सिद्धोत्ति होइ णायव्वो ।
अह णिस्सेसं कुणदि ण णियमा आवासया होंति ॥

सर्वावश्यकनिर्युक्तः नियमात्
सिद्ध इति भवति ज्ञातव्यः ।
अथ निश्शेषाणि करोति
न नियमात् आवासका भवंति ॥ १८७ ॥

आवश्यकानां फलमाह,—अनया गथया सर्वैरावश्यकैर्निर्युक्तः संपूर्णैरस्खलितैः संपताद्यावश्यकैरुद्युक्तः परिणतो नियमात् निश्चयेन सिद्ध इति भवति ज्ञातव्यो भाविनि वर्त्तमानबहुपचारोऽन्तर्मुहूर्त्तादूर्ध्वं सिद्धो भवति, अथ वा सिद्ध एव सर्वावश्यकैर्युक्तः संपूर्णो नान्य इति, अथ पुनः शेषात् स्तोकात् निर्गतानि निःशेषाणि न स्तोकरहितानि सावशेषाणि न संपूर्णानि करोत्यावश्यकानि तदा तस्य नियमान्निश्चयात् आवासकाः स्वर्गाद्यावासा भवन्ति तेनैव भवेन न मोक्षः स्यादिति यदि सविशेषान्नियमात्करोति तदा तु सिद्धः

कर्मक्षयसमर्थः स्यात्, अथ निर्विशेषान्नियमाच्छैथिल्यभावेन करोति तदा तस्य यतेर्नियमाः समतादिक्रिया आवासयंति प्रच्छादयंतीति आवासकाः प्रच्छादकाः नियमाद्भवन्तीत्यर्थः। अथ वा संसारे आवासयंति स्थापयंतीत्यर्थः ॥ १८७ ॥

अथ वाऽऽवासकानामपर्यायमर्थ इत्याह;—

आवासयं तु आवसएसु सव्वेसु अपरिहीणेसु ।
मणवयणकायगुत्तिंदियस्स आवासया होंति ॥

आवासनं तु आवश्यकेषु सर्वेषु अपरिहीनेषु ।
मनोवचकायगुप्तेंद्रियस्य आवश्यका भवंति ॥ १८८

मनोवचनकायैर्गुप्तानींद्रियाणि यस्यासौ मनोवचनकायगुप्तेन्द्रियस्तस्य मनोवचनकायगुप्तेन्द्रियस्य सर्वेष्वावश्यकेष्वपरिहीणेष्वावसनमवस्थानं यत्तेन आवश्यकाः साधोर्भवंति परमार्थतोऽन्ये पुनरावासकाः कर्मागमहेतव एवेति, अथ वा आवासयंतु इति प्रश्नवचनं, आवश्यकानि संपूर्णानि कथंभूतस्य पुरुषस्य भवंतीति प्रश्ने तत आह— सर्वेषु चापरिहीणेषु मनोवचनकायगुप्तेन्द्रियावश्यकानि भवन्तीति निर्देशः कृत इति ॥ १८८ ॥

आवश्यककरणविधानमाह;—

तियरण सव्वविसुद्धो दव्वे खेत्ते यथुत्तकालह्मि ।
मोणेणव्वाखित्तो कुज्जा आवासया णिच्चं ॥ १८९ ॥

त्रिकरणैः सर्वविशुद्धः द्रव्ये क्षेत्रे यथोक्तकाले ।
मौनेनाव्याक्षिप्तः कुर्यादावश्यकानि नित्यं ॥ १८९ ॥

त्रिकरणैर्मनोवचनकायैः सर्वथा शुद्धो द्रव्यविषये क्षेत्रविषये यथोक्तकाले आवश्यकानि नित्यं मौनेनाव्याक्षिप्तः सन् कुर्याद्यतिरिति ॥ १८९ ॥

अथासिकानिषिद्यकयोः किंलक्षणमित्याशंकायामाह;—

जो होदि णिसीदप्पा
णिसीहिया तस्स भावदो होदि ।
अणिसिद्धस्स णिसीहिय-
सद्दो हवदि केवलं तस्स ॥ १९० ॥

यो भवति निसितात्मा
निषिद्यका तस्य भावतो भवति ।
अनिसितस्य निषिद्यकाशब्दो
भवति केवलं तस्य ॥ १९० ॥

यो भवति निसितो बद्ध आत्मपरिणामो येनासौ निसितात्मा निगृहीतेन्द्रियकषायचित्तादिपरिणामोऽसौ निसितात्माऽथ वा निषिद्धात्मा सर्वथा नियमितमतिस्तस्य भावतो निषिद्यका भवति अनिषिद्धस्य स्वेच्छाप्रवृत्तस्यानिषिद्धात्म-

नश्चलचित्तस्य कषायादिवशवर्त्तिनो निषिद्धकाशब्दो भवति केवलं शब्दमात्रकरणं तस्येति ॥ १९० ॥

आसिकार्थमाह;—

आसाए विप्पमुक्कस्स आसिया होदि भावदो।
आसाए अविप्पमुक्कस्स सद्दो हवदि केवलं ॥
आशया विप्रमुक्तस्य आसिका भवति भावतः।
आशया अविप्रमुक्तस्य शब्दो भवति केवलं॥ १९१

आशया कांक्षया विविधप्रकारेण मुक्तस्य आसिका भवति भावतः परमार्थतः, आशया पुनरविप्रमुक्तस्यासिकाकरणं शब्दो भवति केवलं, किमर्थमासिकानिषिद्धकयोरत्र निरूपणमिति चेन्न त्रयोदशकरणमध्ये पठितत्वात्, यथाऽत्र पंचनमस्कारनिरूपणं षडावश्यकानां च निरूपणं कृतमेवमनयोरप्यधिकारात् भवतीति नामस्थाने निरूपणमनयोरिति ॥ १९१ ॥

चूलिकामुपसंहरन्नाह;—

णिज्जुत्ती णिज्जुत्ती एसा कहिदा मए समासेण
अह वित्थारपसंगोऽणियोगदो होदि णादव्वो ॥
निर्युक्तेर्निर्युक्तिः एषा कथिता मया समासेन।
अथ विस्तारप्रसंगो अनियोगात् भवति ज्ञातव्यः॥

निर्युक्तेर्निर्युक्तिरावश्यकचूलिकावश्यकनिर्युक्तिरेषा क-

थिता मया समासेन संक्षेपेणार्थविस्तारप्रसंगोऽनियोगादाचारांगाद्भवति ज्ञातव्य इति ॥ १९२ ॥

आवश्यकनिर्युक्तिं सचूलिकामुपसंहरन्नाह—

आवासयणिज्जुत्ती एवं कधिदा समासओ विहिणा
जो उवजुंजदि णिच्चं सो सिद्धिं जादि विसुद्धप्पा ॥

आवश्यकनिर्युक्तिः एवं कथिता समासतो विधिना।
यः उपयुंक्ते नित्यं सः सिद्धिं याति विशुद्धात्मा ॥

आवश्यकनिर्युक्तिरेवंप्रकारेण कथिता समासतः संक्षेपतो विधिना, तां य उपयुंक्ते समाचरति नित्यं सर्वकालं स सिद्धिं याति विशुद्धात्मा सर्वकर्मनिर्मुक्त इति ॥ १९३ ॥

इति श्रीवट्टेरकाचार्यवर्यप्रणीतमूलाचारस्य वसुनंद्याचार्यविरचितायामाचारवृत्तावावश्यकनिर्युक्तिनामकः सप्तमः परिच्छेदः ॥ ७ ॥

माणिकचन्द दि० जैन-ग्रन्थमालामें प्रकाशित पुस्तकोंकी सूची।

१ लघीयस्त्रयादिसंग्रह (लघीयस्त्रयतात्पर्यवृत्ति, लघुसर्वज्ञसिद्धि, बृहत्सर्वज्ञसिद्धि) .... ।=)
२ सागारधर्मामृत सटीक .... ।=)
३ विक्रान्तकौरवीय नाटक .... ।=)
४ पार्श्वनाथचरित्र .... ॥)
५ मैथिलीकल्याण नाटक .... ।)
६ आराधनासार सटीक .... ।)॥
७ जिनदत्तचरित .... ॥।)
८ प्रद्युम्नचरित .... ॥)
९ चारित्रसार .... ।=)
१० प्रमाणनिर्णय .... ।-)
११ आचारसार .... ।=)
१२ त्रैलोक्यसार सटीक .... १॥।)
१३ तत्त्वानुशासनादिसंग्रह (तत्त्वानुशासन, इष्टोपदेश सटीक, नीतिसार, श्रुतावतार, श्रुतस्कन्ध, वैराग्य-मणिमाला, ढाढसीगाथा, तत्त्वसार, ज्ञानसार, मोक्षपंचाशिका, अध्यात्मतरंगिणी, पात्रकेसरी-स्तोत्र, अध्यात्माष्टक, द्वात्रिंशतिका) .... ॥।=)
१४ अनगारधर्मामृत सटीक .... ३॥)
१५ युक्त्यानुशासन सटीक .... ॥।-)
१६ नयचक्रसंग्रह (आलापपद्धति, नयचक्र, द्रव्य-स्वभावप्रकाशक नयचक्र) .... ॥।=)
१७ षट्प्राभृतादिसंग्रह .... ३)